"કે જે ષડ્દર્શન રૂપી પશુઓને જૈન ગોચરમાં ચરાવે છે."

આ ઉપરાંત પણ અન્ય કેટલાક ગ્રન્થોમાંથી રામચન્દ્રની સમસ્યાપૂર્તિઓ મળી આવે છે. તે સર્વ રામચન્દ્રની પોતાની ન હોય તો પણ એ વિદ્વાન અને કવિ તરીકેની રામચન્દ્રની પ્રતિષ્ઠાની ચાલતી આવેલી પરંપરાને પ્રકટ કરે છે એ ભૂલવું ન જોઈએ.

રામચન્દ્રનો સ્વાતંત્ર્યપ્રેમ

રામચન્દ્રનો સ્વભાવ સ્વાતંત્ર્યપ્રેમી અને માની હતો એમ તેમની કૃતિઓ પરથી અનુમાન થઈ શકે છે. 'નાટ્યદર્પણ'માં રસ અને અભિનય પરત્વેનાં નૂતન વિધાનો રામચન્દ્રની સ્વતંત્ર વિચારશક્તિ અને પરંપરાને જ પ્રમાણ નહીં માનવાની બુદ્ધિજન્ય મનસ્વિતાને આભારી છે.

---

૧. 'પ્રબન્ધચિન્તામણિ' (ફા.ગૂ.સભની આવૃત્તિ) પૃ.૧૦૨ ૨. એજન. પૃ. ૧૮૫.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

એમનાં લખાણોમાં એક સ્થળે જે અહંભાવ જણાય છે તે સ્વતંત્ર અને માની સ્વભાવનું જ પરિણામ હોઈ શકે. પોતાને માટે તેમણે 'વિદ્યાત્રયીચણ', 'અચુમ્બિતકાવ્યતંદ્ર',[૧] અને 'વિશીર્ણકાવ્યનિર્માણતંદ્ર'[૨] એવાં વિશેષણો વાપરેલાં છે. ઉપરાંત, અનેક સ્થળે તેમણે આત્મપ્રશંસાની ઉક્તિઓ મૂકી છે :

કવિઃ કાવ્યે રામઃ સરસવચસામેકવસતિઃ । - 'નલવિલાસ' : શ્લોક ૨.

ઋતે રામાન્નાન્યઃ કિમુત પરકોટૌ ઘટયિતું ।
રસાન્ નાટ્યપ્રાણાન્ પટુરિતિ વિતર્કો મનસિ મે ॥ - 'નલવિલાસ' : શ્લોક ૩.

સાહિત્યોપનિષદ્વિદઃ સ તુ રસઃ રામસ્ય વાચાં પરઃ । - 'સત્યહરિશ્ચન્દ્ર' : શ્લોક ૩.

પ્રબન્ધા ઇક્ષુવત્ પ્રાયો હીયમાનરસાઃ ક્રમાત્ ।
કૃતિસ્તુ રામચન્દ્રસ્ય સર્વા સ્વાદુઃ પુરઃ પુરઃ । - 'કૌમુદીમિત્રાણંદ' : શ્લોક ૪.

સ્વાતંત્ર્યપ્રેમ એ કવિ રામચન્દ્રનું વિશિષ્ટ અને કદાચ અપ્રતિમ લક્ષણ છે. એમાંની ઉદ્દામ ભાવનાઓ આજે પણ જાણે કે અત્યંત આધુનિક લાગે છે. પોતાની રચનામાં પણ બને તેટલી સ્વતંત્રતા અને મૌલિકતા આણવાનો તેણે ખૂબ પ્રયાસ કર્યો છે. સાહિત્યચોરી કરનારાઓ અને પારકા વિચારો ઉછીના લેનારાઓ સામે તેણે વખતોવખત ઊભરો ઠાલવ્યો છે.[૩] જીવનમાં પણ કવિ સ્વતંત્ર અને સ્પષ્ટવક્તા હશે એમ શ્રીપાલની 'સહસ્રલિંગસરોવરપ્રશસ્તિ'વાળા પ્રસંગ (જે વિષે આગળ લખવામાં આવશે) પરથી જણાઈ આવે છે. સ્વાતંત્ર્યપ્રેમથી ઊભરાતી તેમની કેટલીક સૂક્તિઓના નમૂના જોઈએ-

સ્વાતન્ત્ર્યં યદિ જીવિતાવધિ મુધા સ્વર્ભૂર્ભુવો વૈભવમ્ । - 'નલવિલાસ' : શ્લોક ૨-૨.

ન સ્વતન્ત્રો વ્યથાં વેત્તિ પરતન્ત્રસ્ય દેહિનઃ । -- 'નલવિલાસ' : શ્લોક ૬-૭.

અજાતગણનાઃ સમાઃ પરમતઃ સ્વતન્ત્રો ભવ । - 'નલવિલાસ' : અંતભાગ

પ્રાપ્ય સ્વાતન્ત્ર્યલક્ષ્મીમનુભવતુ મુદં શાશ્વતીં ભીમસેનઃ । - 'નિર્ભયભીમવ્યાયોગ' : અંતભાગ.

'જિનસ્તવષોડશિકા'ના આરંભમાં અર્હત્ને સ્વાતંત્ર્યશ્રીપવિત્રાય રામચન્દ્ર નમસ્કાર કરે છે અને 'જિનસ્તોત્ર'ના અંતમાં કહે છે કે --

સ્વતન્ત્રો દેવ ભૂયાસે સારમેયોઽપિ વર્ત્મનિ ।
મા સ્મ ભૂવં પરાયત્તઃ ત્રિલોકસ્યાપિ નાયકઃ ॥

'સત્યહરિશ્ચન્દ્ર'ની પ્રસ્તાવનામાં રામચન્દ્ર ગર્ભિત રીતે પોતાના આનંદના સાધનો એક શ્લોકમાં વર્ણવે છે, તે ઉપરથી તેમના મુક્ત માનસનો સારી રીતે ખ્યાલ આવી શકશે--

સૂક્તયો રામચન્દ્રસ્ય વસન્તઃ કલગીતયઃ ।
સ્વાતન્ત્ર્યમિષ્ટયોગશ્ચ પઞ્ચૈતે હર્ષવૃષ્ટયઃ ॥

---

૧. પઞ્ચપ્રબન્ધમિષપઞ્ચમુખાનકેન વિદ્વન્મનઃસદસિ નૃત્યતિ યસ્ય કીર્તિઃ । વિદ્યાત્રયીચણમચુમ્બિતકાવ્યતન્દ્રં કરતં ન વેદ સુકૃતી કિલ રામચન્દ્રમ્ । - 'રઘુવિલાસ' : પ્રસ્તાવના ૨. જુઓ પાદ નોંધ ૩. જુઓ 'નાટ્યદર્પણવિવૃત્તિ'ના અંતે, પરોપનીતશબ્દાર્થાઃ० તથા અકવિત્વં પરસ્તાવત્० એ શ્લોકો. 'કૌમુદીમિત્રાણંદ'ની પ્રસ્તાવનામાં એમાંના જ પહેલા શ્લોકની પુનરુક્તિ તથા 'જિનસ્તોત્ર'માં વિદ્વાનપિ યથા હાસ્યઃ પરકાવ્યૈઃ કવિર્ભવન્ । ઈત્યાદિ.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

રામચન્દ્રનો નેત્રનાશ

રામચન્દ્રની જમણી આંખ ગયેલી હતી એમ પ્રબન્ધો ઉપરથી જણાય છે. પ્રબન્ધકારો એનાં ચમત્કારિક કારણો આપે છે. 'પ્રભાવકચરિત' લખે છે કે, હેમચન્દ્રાચાર્યે જ્યારે સિદ્ધરાજ સાથે રામચન્દ્રનો પરિચય કરાવ્યો ત્યારે સિદ્ધરાજે તેમને જિનશાસનમાં 'એકદૃષ્ટિ' બનવાની સૂચના કરી હતી, આથી તેમની જમણી આંખ તત્કાળ નાશ પામી હતી.[૧] 'પ્રબન્ધચિન્તામણિ'કાર જણાવે છે કે, શ્રીપાલ કવિએ રચેલી 'સહસ્રલિંગસરોવરપ્રશસ્તિ' પત્થર ઉપર કોતરવામાં આવી ત્યારે તેનું અવલોકન કરવા માટે સર્વે વિદ્વાનોને આમંત્રણ આપવામાં આવ્યું હતું. 'જો સર્વ વિદ્વાનો પ્રશસ્તિકાવ્યને સંમતિ આપે તો તમારે એ પર કંઈ ટીકા કરવી નહીં,' એવી સૂચના સાથે હેમચન્દ્રે રામચન્દ્રને તે જોવા મોકલ્યા. પ્રશસ્તિમાં રાજાની મમતા હોવાથી તથા શ્રીપાલ કવિના સૌ પ્રત્યેના સૌજન્યને કારણે સર્વ વિદ્વાનો કહેવા લાગ્યા કે સર્વ શ્લોકો બરાબર છે અને તેમાંય कोशेनापि युतं दलैरुपचितं એ શ્લોક સુન્દર છે. સિદ્ધરાજે રામચન્દ્રને પૂછતાં તેમણે જણાવ્યું કે, 'એ જરા વિચાર કરવા જેવું છે,' અને कोशेनापि વાળા કાવ્યમાં વ્યાકરણ સંબંધી બે દોષો બતાવ્યા. આ વખતે સિદ્ધરાજની નજર લાગવાથી (सिद्धराजस्य सञ्जातदृष्टिदोषेण) પાછા વળતાં ઉપાશ્રયમાં પેસતાં રામચન્દ્રની એક આંખ ફૂટી ગઈ[૨]

આ વાર્તાઓ સામાન્ય ઐતિહાસિક હકીકતોને ચમત્કારિક સ્વરૂપમાં મૂકવાના પ્રબન્ધકારોના શોખને આભારી હોય એમ જણાય છે. રામચન્દ્રની એક આંખ જન્મથી અથવા નાનપણમાં જ દૈવવશાત્ ગયેલી હશે એમ 'જ્યોતિરેકદ્વાત્રિંશિકા'ના અંતમાં તેમના જ એક શ્લોક ઉપરથી અનુમાન થઈ શકે છે -

जगति पूर्वविधेर्विनियोगजं विधिनतान्ध्य-गलत्तनुताऽऽदिकम् ।
सकलमेव विलुम्पति यः क्षणादभिनवः शिवसृष्टिकरः सताम् ॥

બીજા કેટલાક સ્તોત્રોમાં પણ રામચન્દ્રે દૃષ્ટિદાન માટે પ્રાર્થના કરી છે.[૩]

રામચન્દ્રનું મરણ

રાજા કુમારપાળના મરણ પછી ગાદીએ આવનાર તેના ભત્રીજા અજયપાલે જૈનોનું દમન આરંભ્યું, અને પોતાના પુરોગામી રાજાઓએ બંધાવેલા અનેક જૈન પ્રસાદોને તોડી નખાવ્યા. અગાઉના દ્વેષને કારણે રામચન્દ્રનું પણ તેણે મરણ નીપજાવ્યું.

આ વિષે જુદા જુદા ગ્રન્થોમાં નજીવા ફેરફાર સાથે એકસરખી જ હકીકત મળે છે.

રાજશેખરસૂરિ 'પ્રબન્ધકોશ' માં આ દ્વેષનું કારણ અને પરિણામ વર્ણવતાં લખે છે કે, રાજા કુમારપાળ અને હેમચન્દ્ર વૃદ્ધ થયા તે વખતે હેમચન્દ્રના શિષ્યમંડળમાં બે ભાગ પડી ગયા હતા. એક તરફ રામચન્દ્ર, ગુણચન્દ્ર વગેરે શિષ્યો અને બીજી તરફ બાલચન્દ્ર. બાલચન્દ્રને

---

૧. 'પ્રભાવકચરિત' : 'હેમાચાર્ય પ્રબન્ધ', શ્લોક ૧૩૦-૧૪૦. ૨. 'પ્રબન્ધચિન્તામણિ' (ફા.ગૂ.સભાની આવૃત્તિ) પૃ. ૧૦૧-૨-૩. ૩. नेमे निधेहि निशितासिलताभिराम-चंद्रावदातमहसं मयि देहि दृष्टिम् ।
- 'नेमिस्तव' : अंतभाग. शक्रस्तुताङ्घ्रिसरसीरुहदुःस्थसार्थे देव प्रसीद करुणां कुरु देहि दृष्टिम् ।
- 'षोडशिका' : अंतभाग

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

અજયપાલ સાથ મિત્રતા હતી. એક વાર રાત્રે મંત્રી આભડ અને હેમચન્દ્ર વચ્ચે, કુમારપાળ પછી ગાદી કોને મળવી જોઈએ એ વિષે મંત્રણા ચાલતી હતી. હેમચન્દ્રે કહ્યું : 'ગાદી તો પ્રતાપમલ્લને મળવી જોઈએ. અજયપાલ તમારા સ્થાપેલા ધર્મનો નાશ કરશે.' આભડે કહ્યું : 'ગમે તેવો તોપણ પોતાનો હોય તે જ સારો.' બાલચન્દ્રે આ સાંભળ્યું અને અજયપાળને કહ્યું. આથી અજયપાળને રામચન્દ્ર, વગેરે ઉપર દ્વેષ થયો. હેમચન્દ્રના અવસાન પછી બત્રીસ દિવસે અજયપાળના વિષપ્રયોગથી કુમારપાળનું અવસાન થયું. હેમચન્દ્ર પ્રત્યેના વૈરને કારણે અજયપાળે તપાવેલા લોઢાના આસન પર બેસાડી રામચન્દ્રનું મરણ નીપજાવ્યું.[૧] આવી જ હકીકત મેરુતુંગના 'પ્રબન્ધ-ચિન્તામણિ'માં[૨] જયસિંહસૂરિના 'કુમારપાલ ચરિત'માં અને જિનમંડનગણીના 'કુમારપાલપ્રબન્ધ' માં મળે છે.

'પુરાતનપ્રબન્ધસંગ્રહ' ના એક પ્રબન્ધમાં રામચન્દ્રના મરણ સંબંધી એવી હકીકત જણાવેલી છે કે, ''હેમસૂરિના શિષ્યો રામચન્દ્ર અને બાલચન્દ્ર હતા, ગુરુએ સુશિષ્ય જાણીને રામચન્દ્રને વિશેષ વિદ્યા આપી, માન આપ્યું. આથી રિસાઈને બાલચન્દ્ર ચાલી નીકળ્યો. અજયપાલની સાથે તેને મિત્રતા થઈ. પોતાને રાજ્ય પ્રાપ્ત થયા બાદ અજયપાલે રામચન્દ્રને કહ્યું, 'હેમચન્દ્રસૂરિની સર્વ વિદ્યા મારા મિત્ર બાલચન્દ્રને આપ.' રામચન્દ્રે કહ્યું 'ગુરુની વિદ્યા કુપાત્રને અપાતી નથી.' રાજાએ કહ્યું, 'તો અગ્નિ.....[૩] જીભ કરડીને તેના ઉપર (તપાવેલાં પતરા ઉપર ?) બેસતાં તેમણે દોધકપંચશતી (એટલે પાંચસો દુહા ?) બનાવી.''[૪]

આ સર્વે ઉપરથી એટલું તો ચોક્કસપણે કહી શકાય છે કે, હેમચન્દ્રના શિષ્યમંડળમાંથી બાલચન્દ્ર જુદા પડ્યા હતા એ ઐતિહાસિક સત્ય છે અને રામચન્દ્રના મૃત્યુમાં પણ તે કારણભૂત હશે.

અજયપાલના જૈનમંત્રી યશઃપાલ ('મોહરાજપરાજય' ના કર્તા) તથા આભડ વગેરે શેઠિયાઓએ રામચન્દ્રસૂરિનું આવી રીતે મૃત્યુ થતું અટકાવવાના ઘણા પ્રયાસો કર્યા હતા, પણ એમના એ સર્વ પ્રયત્નો નિષ્ફળ નિવડ્યા હતા.[૫]

---

૧. 'પ્રબન્ધકોશ' (સિંઘી જૈન ગ્રન્થમાલાની આવૃત્તિ), પૃ.૯૮ ૨. 'પ્રબન્ધચિન્તામણિ' (ફા.ગુ.સભાની આવૃત્તિ, પૃ.૧૪૫) લખે છે કે ત્રાંબાના પતરા ઉપર બેસાડી રામચન્દ્રનું મરણ નીપજાવવાનો પ્રયત્ન કરવામાં આવ્યો હતો, પણ તેઓ નીચેનો દુહો બોલી જીભ કરડી મરણ પામ્યા હતા.

महावीढह सचराचरह जिण सिरि दिन्हा पाय ।
तसु अत्थुमणु दिणेसरह होउत होहि चिराय ॥

(આ સચરાચર પૃથ્વીના માથે જેમણે પગ મૂક્યો છે એવો દિનેશ્વર સૂર્યનો અસ્ત થાય છે. થવાનું હોય તે લાંબે કાળે પણ થયા કરે છે.) 'પુરાતનપ્રબન્ધસંગ્રહ' ના એક પ્રબન્ધમાં (પૃ.૪૭) હેમચન્દ્રના અવસાન પછી શ્રીસંઘનો શોક શમાવતા રામચન્દ્રના મુખમાં આ દુહો મૂકવામાં આવ્યો છે.
૩. આ સ્થળે મૂળ પ્રતમાનો કેટલોક ભાગ ગયેલો હોઈ વાક્ય તૂટે છે. ૪. 'પુરાતનપ્રબન્ધસંગ્રહ' (સિંઘી જૈન ગ્રન્થમાલા), પૃ.૪૯. ૫. રામચન્દ્ર વિષેના આ લખાણમાં તેમના અપ્રસિદ્ધ ગ્રન્થોમાંથી જે અવતરણો વગેરે લેવાયાં છે તે પં. લાલચન્દ્ર ગાંધીએ લખેલ 'નલવિલાસ' ના નાટકની સંસ્કૃત પ્રસ્તાવનામાં ઉદ્ધૃત કરેલાં છે, એ હકીકતની અહીં સાભાર નોંધ લઉં છું.

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

૨. ગુણચન્દ્ર

રામચન્દ્રના ગુરુભાઈ અને તેમની સાહિત્યપ્રવૃત્તિઓમાં અનેક પ્રકારે સહાય કરનાર ગુણચન્દ્ર વિષે લગભગ કંઈ જ જાણવામાં આવતું નથી. પ્રાપ્ત સાધનો ઉપરથી માત્ર અનુમાનો ખેંચવાનાં જ રહે છે. ગુણચન્દ્રનો એકે સ્વતંત્ર ગ્રન્થ અત્યારસુધીમાં જાણવામાં આવેલો નથી. રામચન્દ્રને 'નાટ્યદર્પણ' એ નાટ્યશાસ્ત્રનો અને 'દ્રવ્યાલંકાર' એ પ્રમાણશાસ્ત્રનો ગ્રન્થ લખવામાં ગુણચન્દ્રે સહાય કરી હતી એ સુપ્રસિદ્ધ છે. એ બન્ને ગ્રન્થો પરની વૃત્તિઓ પણ તેમણે સાથે જ લખેલી છે.

રામચંદ્ર અને ગુણચન્દ્રના સ્વભાવમાં અમુક તફાવત હતો, એમ આપણે સહજ અનુમાન કરી શકીએ છીએ. બન્ને પ્રખર વિદ્વાનો તો હતા જ, પરન્તુ રામચન્દ્રનાં અગિયાર નાટકો, તેમાંનું હળવું, લોકભોગ્ય વસ્તુ, વારંવાર તેમાં જણાતા રમૂજી ટોળટપ્પા અને હાસ્યજનક પ્રસંગો, સામાજિક અને સાંસારિક ચિત્રો, મધુર વિશદ અને આનંદજનક સૂક્તિઓ, ઉદ્દામ સ્વાતન્ત્ર્યપ્રેમ એ બધું બતાવે છે કે રામચન્દ્રની પ્રતિભા સર્વતોમુખી હતી, એમનું માનસિક ઘડતર ગંભીરતાપરાયણ નહીં- બલ્કે ઉલ્લાસમય હતું. તદ્દન સામાન્ય વસ્તુઓમાં પણ ઊંડો રસ લઈ તેમાનું સૌન્દર્ય પીછાણવાની ઉચ્ચ સાહિત્યકારોમાં સાધારણ એવી એ શક્તિ તે તેમના માનસમાં સભર ભરેલી હતી. બીજી બાજુ, ગુણચન્દ્ર વિષે એમ કહી શકાય કે તેઓ વિદ્વાન હતા, સર્જક અને સાહિત્યકાર નહોતા, રામચંદ્ર જ્યારે નાટકો, સુભાષિત કોશો કે એવું હળવું સાહિત્ય લખે છે ત્યારે તેઓ તેમની સાથે જોડાતા નથી, પરન્તુ 'નાટ્યદર્પણ' કે 'દ્રવ્યાલંકારવૃત્તિ' જેવા ગંભીર અને વિદ્વતાપૂર્ણ ગ્રન્થો તૈયાર કરવામાં બન્ને સાથે કાર્ય કરે છે, એ સૂચક છે.

જેસલમેર ભંડારમાંની 'દ્રવ્યાલંકારવૃત્તિ' ની તાડપત્ર પરની પ્રત સં. ૧૨૦૨ માં લખાયેલી, એથી એ ગ્રન્થ તે પહેલાં લખાયેલો હોવો જોઈએ એવું અનુમાન થાય છે.[૧]

'શતાર્થકાવ્ય' ના કર્તા સોમપ્રભસૂરિએ સં. ૧૨૪૧ માં પાટણમાં, હેમચન્દ્રે કુમારપાળને કરેલા ઉપદેશના વિષય પર 'કુમારપાળપ્રતિબોધ' એ વિશાળ ગ્રન્થ પ્રાકૃત ભાષામાં રચ્યો હતો. હેમચન્દ્રના ત્રણ શિષ્યો ગુણચન્દ્ર, મહેન્દ્રમુનિ અને વર્ધમાનગણિએ તે ગ્રન્થ સાદ્યંત સાંભળ્યો હતો, એવો ઉલ્લેખ તેની પ્રશસ્તિમાંથી મળે છે.[૨]

૩. મહેન્દ્રસૂરિ

હેમચન્દ્રે સંસ્કૃત ભાષાને ચાર કોશની ભેટ ધરી છે- શબ્દોના પર્યાયો દર્શાવતો 'અભિધાનચિન્તામણિ', વનસ્પતિશાસ્ત્ર અને વૈદકના શબ્દોને લગતો 'નિઘંટુકોશ', દેશ્ય શબ્દોનો કોશ 'દેશીનામમાલા' અને એક જ શબ્દોના નાનાવિધ અર્થો બતાવતો 'અનેકાર્થસંગ્રહ'. આ પૈકી પહેલા બે કોશ ઉપર અનુક્રમે દશ હજાર અને ત્રણ હજાર શ્લોકની વિસ્તૃત ટીકાઓ તેમણે લખેલી છે. એમ અનુમાન થાય છે કે 'અભિધાનચિન્તામણિ' પરની ટીકા એ હેમચન્દ્રની છેલ્લી કૃતિ હશે, કેમકે 'યોગશાસ્ત્ર' અને 'ત્રિષષ્ટિશલાકાપુરુષચરિત્ર' વિષેના ઉલ્લેખો આપણને

૧. 'જેસલમેર ભંડારની સૂચિ' (ગા.ઓ.સી.) પૃ.૧૧ ૨. જઓ 'કુમારપાલપ્રતિબોધ' (ગા.ઓ.સી.) પૃ.૪૭૮

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

તેમાંથી સાંપડે છે. 'અનેકાર્થસંગ્રહ' પર ટીકા લખવાની પણ હેમચન્દ્રની યોજના હોવી જોઈએ, પરન્તુ એ વિચાર અમલમાં આવી શકે તે પૂર્વે જ તેમનું અવસાન થયું. આથી તેમના શિષ્ય મહેન્દ્રસૂરિએ, ગુરુએ પોતાના જીવનકાળમાં જે કંઈ કહેલું તે ઉપરથી એ ગ્રન્થ ઉપર 'અનેકાર્થકૈરવાકરકૌમુદી' એ ટીકા પોતાના ગુરુના નામથી જ લખી છે.[૧] હેમચન્દ્રાચાર્યનો સ્વર્ગવાસ સં. ૧૨૨૯ માં થયો, તે પછી ટૂંક સમયમાં તે લખાઈ હશે એમ કલ્પના થાય છે. મહેન્દ્રસૂરિની આ સિવાય બીજી કોઈ કૃતિ જાણવામાં નથી.

૪. વર્ધમાનગણી

કુમારપાળે બંધાવેલા 'કુમારવિહાર' ની પ્રશસ્તિરૂપ 'કુમારવિહારપ્રશસ્તિ' કાવ્ય પર વ્યાખ્યા લખીને વર્ધમાનગણીએ એ કાવ્યના ૧૧૬ અર્થ કરી બતાવ્યા હતા. એ વ્યાખ્યાનને અંતે તેમણે લખ્યું છે કે અગાઉ આ કાવ્યના છ અર્થ કરવામાં આવેલા છે, પરન્તુ મેં કુતૂહલથી તેના ૧૧૬ અર્થ કર્યા છે.[૨] આ વસ્તુ વર્ધમાનગણીના અદ્‌ભુત પાંડિત્ય પર પ્રકાશ પાડે છે.

૫. દેવચન્દ્ર

હેમચન્દ્રના ગુરુનું નામ પણ દેવચન્દ્ર છે, તેથી 'જૈનગ્રન્થાવલિ' માં આ દેવચન્દ્રને હેમચન્દ્રનાં ગુરુ લેખવામાં આવ્યા છે તે બરાબર નથી. હેમચન્દ્રના એક શિષ્યનું નામ પણ દેવચન્દ્ર હતું. તેમણે 'ચન્દ્રલેખાવિજયપ્રકરણ' નામનું નાટક લખેલું છે અને તેની હસ્તલિખિત પ્રત જેસલમેરના ભંડારમાં છે.[૩] આ નાટકની રચનામાં એક શેષભટ્ટારકે સહાય કરી હતી, એમ તેના અંતમાં ઉલ્લેખ છે.

પરન્તુ આ શેષભટ્ટારક કોણ તે જાણી શકાતું નથી. 'ચન્દ્રલેખાવિજયપ્રકરણ' ની નાયિકા તરીકે ચન્દ્રલેખા વિદ્યાધરીને કલ્પવામાં આવી છે, પરન્તુ કુમારપાળે સપાદલક્ષના રાજા અર્ણોરાજને હરાવ્યો તે પરત્વે કુમારપાળના વીરત્વને વર્ણવતું આ પ્રશંસાત્મક નાટક છે. વળી નાટક કુમારપાળની ખાસ આજ્ઞાથી લખાયું હોય એ પણ સંભવિત છે. કેમકે કુમારવિહારમાં શ્રી અજિતનાથદેવના વસન્તોત્સવ પ્રસંગે કુમારપાળની સભાના પરિતોષ અર્થે ભજવવાને

---

૧. જુઓ સંસ્કૃત હાથપ્રતોની શોધનો ડૉ. પિટર્સનનો અહેવાલ નં.૧ સને ૧૮૮૨-૮૩, પૃ.૨૩૩ ઉપર ઉતારેલી પ્રસ્તુત ગ્રન્થની પ્રશસ્તિ. ૨. છએક વર્ષ પર પાટણમાં પૂ. મુનિશ્રી પુણ્યવિજયજીએ આ વ્યાખ્યાની અત્યંત સૂક્ષ્મ અક્ષરોએ લખાયેલી એક સુન્દર પ્રત મને બતાવી હતી. શ્રી સારાભાઈ નવાબે 'જૈનઅનેકાર્થગ્રન્થસંગ્રહ' માં આ કૃતિ પ્રસિદ્ધ કરી છે. (પાટણમાં હેમસારસ્વત સત્ર પ્રસંગે યોજાયેલા પ્રદર્શનમાં ઉપરોક્ત સૂક્ષ્માક્ષરી પ્રત મૂકવામાં આવી હતી, તે પ્રદર્શન જોનાર સજ્જનોના ધ્યાનમાં હશે.) તેમાં કર્તા જણાવે છે. श्रीहेमचन्द्रसूरिशिष्येण वर्धमानगणिना कुमारविहारप्रशस्तौ काव्येऽमुष्मिन् पूर्वं षडर्थे कृतेऽपि कौतुकात् षोडशोत्तरं व्याख्यानं चक्रे ।

૩. चंद्रलेखाविजयप्रकरणने अंते-

विद्याम्भोनिधिमन्थमन्दरगिरिः श्रीहेमचन्द्रो गुरुः सान्निध्यैकरतिर्विशेषविधये श्रीशेषभट्टारकः ।
यस्य स्तः कविपुङ्गवस्य जयिनः श्रीदेवचन्द्रस्य सा
कीर्तिस्तस्य जगत्त्रये विजयतात् साद्ध(र्दू)ललीलायिते ॥

- 'જેસલમેર ભંડારની સૂચિ' (ગા.ઓ.સી.) પૃ.૬૪

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

તે રચાયું છે, એમ સૂત્રધાર પ્રસ્તાવનામાં કહે છે.[૧] અર્ણોરાજ સાથેનો કુમારપાળનો વિગ્રહ અનેક વર્ષ સુધી ચાલ્યો હતો, પરન્તુ કુમારપાળનો સંપૂર્ણ વિજય સં.૧૨૦૭ માં અથવા તેથી થોડોક સમય અગાઉ એમ થઈ ગયો હોવો જોઈએ, કેમકે ચીતોડમાં કુમારપાળના સં. ૧૨૦૭ ના શિલાલેખમાં એમ જણાવેલું છે કે શાકંભરીના રાજાનો પરાજય કરીને તથા શાલીપુર નામના ગામમાં પોતાના લશ્કરને રાખીને ચીતોડની શોભા જોવા માટે રાજા ત્યાં આવ્યો હતો. આ ઉપરથી એ નક્કી થઈ જાય છે કે 'ચન્દ્રલેખાવિજયપ્રકરણ' સં. ૧૨૦૭ માં અગર તે પછી ટૂંક સમયમાં રચાયું હશે.

આ ઉપરાંત, દેવચન્દ્રની 'માનમુદ્રાભંજન' નામની બીજી એક રચના હતી એમ અન્ય સ્થળોએ મળતા ઉલ્લેખ પરથી સમજી શકાય છે, પરંતુ એ કૃતિનો હાલમાં પત્તો લાગતો નથી.[૨]

૬. ઉદયચન્દ્ર

ઉદયચન્દ્રે લખેલો એક પણ ગ્રન્થ હજી સુધી બહાર આવેલો નથી. પરન્તુ તેમના ઉપદેશથી એક કરતાં વધુ ગ્રન્થો લખાયાની હકીકત મળે છે. તેઓ એક સારા વિદ્વાન હતા. 'પ્રબન્ધચિન્તામણિ'માં કુમારપાલપ્રબન્ધાન્તર્ગત ઉદયચન્દ્રપ્રબંધમાં જણાવેલું છે કે, એક વાર કુમારપાળ સમક્ષ પં. ઉદયચન્દ્ર ગુરુ હેમાચાર્યનું 'યોગશાસ્ત્ર' વાંચતા હતા. તેમાં પંદર કર્માદાનની વ્યાખ્યામાં दन्तकेशनखास्थित्वग्रोम्णां ग्रहणमाकरे શ્લોક આવ્યો, તેમાં હેમાચાર્યના મૂળ પાઠને સુધારીને રોમ્ણાં ને રોમ્ણો એ પ્રમાણે ઉદયચન્દ્રે વારંવાર વાંચ્યું, હેમચન્દ્રે એમ કરવાનું કારણ પૂછતાં ઉદયચન્દ્રે પ્રાણીઓનાં અંગો, વાજિંત્રો, વિગેરે માટે દ્વંદ્વસમાસમાં એકવચન સિદ્ધ છે એમ બતાવ્યું, એટલે હેમાચાર્યે, રાજાએ તેમજ બીજાઓએ તેમની પ્રશંસા કરી.[૩]

ઉદયચન્દ્રના ઉપદેશથી દેવેન્દ્રે 'સિદ્ધહેમબૃહદ્વૃત્તિ' ઉપર 'કતિચિદ્દુર્ગપદવ્યાખ્યા' નામની ટીકા[૪] તથા 'ઉપમિતિપ્રપંચાકથાસારોદ્ધાર,'[૫] એ ગ્રન્થો લખ્યા હતા, તથા ચંદ્રગચ્છના દેવેન્દ્રસૂરિના શિષ્ય કનકપ્રભે 'હૈમન્યાસસાર'નો ઉદ્ધાર કર્યો હતો.[૬] 'હૈમબૃહદ્વૃત્તિ' પર વ્યાખ્યા લખનાર

---

૧. कुमारविहारे मूलनायकपार्श्वजिनवामपार्श्वावस्थितश्रीमदर्जितनाथदेवस्य वसन्तोत्सवे कुमारपालपरिषच्चेतः-परितोषायास्य प्रणयनम् । - એજન ૨. 'જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસ' પૃ.૨૮૦. ૩. 'પ્રબન્ધચિન્તામણિ' (ફા.ગુ.સભાની આવૃત્તિ), પૃ.૧૪૭ ૪. આ ટીકાની સં. ૧૨૭૧ માં લખાયેલી જેસલમેરના 'બૃહદ્જ્ઞાનકોશ'ની પ્રતિમાંથી ડો. બુલ્હરે હેમચન્દ્રાચાર્ય વિષેના પોતાના નિબંધમાં ઉતારેલું મંગલાચરણ-

॥अर्हं ॥ प्रणम्य केवलालोकावलोकितजगत्त्रयम् । जिनेशं श्रीसिद्धहेमचन्द्रशब्दानुशासने ॥
शब्दविद्याविदां वन्द्योदयचन्द्रोपदेशतः । न्यासतः कतिचिद्दुर्गपदव्याख्याभिधीयते ॥ જુઓ, 'લાઈફ ઑફ હેમચંદ્રાચાર્ય' (સીંધી જૈન ગ્રન્થમાલા), પૃ.૮૧.

૫. જુઓ, 'પાટણ ભંડારનાં પુસ્તકોની વર્ણનાત્મક સૂચિ' (ગા.ઓ.સી.), ભાગ ૧, પૃ.૫૧

૬. भूपालमौलिमाणिक्यमालालालितशासनः । दर्शनषट्कनिस्तन्द्रो हेमचन्द्रमुनीश्वरः ॥
तेषामुदयचन्द्रोऽस्ति शिष्यः संख्यावतां वरः । यावज्जीवमभूद् यस्य व्याख्या ज्ञानामृतप्रपा ॥
तस्योपदेशात् देवेन्द्रसूरिशिष्यलवो व्यधात् । न्याससारसमुद्धारं मनीषी कनकप्रभः ॥
- 'હૈમશબ્દાનુશાસન બૃ.ન્યા.' પ્રાન્તે ('નલવિલાસ' : પ્રસ્તાવના, પૃ.૨૪)

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

દેવેન્દ્રને ડૉ. બુલ્હરે ઉદયચંદ્રના શિષ્ય માન્યા છે.[૧]

૭. યશચન્દ્ર

યશશ્ચન્દ્રનો લખેલો કોઈ પણ ગ્રન્થ હજી સુધી મળેલો નથી.[૨] પણ પ્રબન્ધોમાં તેમના વિષેના ઉલ્લેખો અનેકવાર આવે છે તે ઉપરથી સમજાય છે કે તેઓ ઘણો વખત હેમચન્દ્રસૂરિની સાથે રહેતા હતા. 'પ્રબન્ધચિન્તામણિ' માં બે સ્થળે યશશ્ચન્દ્રગણી વિષેનો ઉલ્લેખ મળે છે. એક સ્થળે જણાવેલું છે કે, એકવાર દેવપૂજનના સમયે હેમચન્દ્ર કુમારપાલના મહેલમાં પહોંચ્યા ત્યારે યશશ્ચન્દ્ર તેમની સાથે હતા.[૩] બીજે સ્થળે એમ જણાવેલું છે કે આંબડ મહેતાએ ભરૂચમાં પોતાના પિતાના કલ્યાણઅર્થે શકુનિકાવિહાર બંધાવ્યો હતો, તેની ઉપર ધજા ચડાવવાના ઉત્સવ પ્રસંગે નૃત્ય કરતાં મિથ્યાત્વીઓની દેવીના દોષમાં આવી જવાને કારણે મહેતા આખર સ્થિતિએ પહોંચી ગયા હતા, તેનું નિવારણ કરવા માટે હેમચન્દ્ર તથા યશશ્ચન્દ્ર પાટણથી ભરૂચ આવ્યા હતા અને દોષનું નિવારણ કરી પાછા પાટણ ગયા હતા.[૪] આ ઉપરાંત પ્રભાચન્દ્રસૂરિના 'પ્રભાવકચરિત'માં[૫] તથા જિનમંડનગણીકૃત 'કુમારપાલપ્રબંધ'માં[૬] પણ યશશ્ચન્દ્રનો નામોલ્લેખ મળે છે.

૮. બાલચન્દ્ર

બાલચન્દ્રના ગુરુદ્રોહ વિષે તથા તેના પરિણામરૂપે નીપજેલા રામચન્દ્રના અકાળ મૃત્યુ વિષે આગળ કહેવાઈ ગયું છે. આ વિષયમાં વધુ લખતાં 'પ્રબંધકોશ'કાર જણાવે છે કે, રામચન્દ્રના અવસાન પછી, 'આ તો પોતાના ગોત્રની જ હત્યા કરાવનાર છે' એમ કહીને બ્રાહ્મણોએ બાલચન્દ્રને રાજા અજયપાલના મનથી ઉતારી નાખ્યા હતા. આથી લજ્જા પામી બાલચન્દ્ર માળવા તરફ ચાલ્યા ગયા હતા અને ત્યાંજ તેમનું અવસાન થયું હતું.[૭]

'સ્નાતસ્યા' નામની પ્રસિદ્ધ સ્તુતિ બાલચન્દ્રે રચી હોવાનું કહેવાય છે.

---

૧. 'લાઈફ ઓફ હેમચદ્ર' (સીંધી જૈન ગ્રન્થમાલા) પૃ.૮૧ ૨. 'મુદ્રિતકુમુદચન્દ્રપ્રકરણ' ના કર્તા શ્રાવક યશશ્ચન્દ્રને શ્રી કનૈયાલાલ મુનશીએ (જુઓ 'ગુજરાત એન્ડ ઈટ્સ લિટરેચર' પૃ.૪૭) તથા શ્રી રામલાલ મોદીએ (જુઓ 'બુદ્ધિપ્રકાશ', જાન્યુઆરી ૧૯૩૦ માં લેખ 'પાટણના ગ્રન્થકારો') હેમચન્દ્રનો શિષ્ય માન્યો છે તે વાસ્તવિક નથી. ૩. 'પ્રબન્ધચિન્તામણિ' (ફા.ગ.સભાની આવૃત્તિ), પૃ.૧૩૩ ૪. એજન, પૃ.૧૪૩-૧૪૪ ૫. 'પ્રભાવકચરિતઃ' 'હેમાચાર્યપ્રબન્ધ', શ્લોક ૭૩૭ ૬. 'કુમારપાલપ્રબન્ધ', પૃ.૧૮૮ ૭. 'પ્રબન્ધકોશ' (સીંધી જૈન ગ્રન્થમાલા), પૃ.૯૮

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

• विषयानुक्रमः •

	पृ.
द्रव्यालङ्कारः (मूलमात्रप्रकाशत्रयात्मकः)	१-२४
प्रथमो जीवप्रकाशः	१-
द्वितीयः पुद्गलप्रकाशः	
तृतीयोऽकम्पप्रकाशः	
स्वोपटीकासहिते द्रव्यालङ्कारे द्वितीयः पुद्गलप्रकाशः	१-१३२
पुद्गलस्वरूपवर्णनम्	२-८
परिणामस्वरूपवर्णनम्	८-१२
परिणामवैचित्र्यवर्णनम्	१२-१४
पुद्गललक्षणव्यापित्वसाधनम्	१४-१६
बौद्धमतखण्डनम्	१७-१८
पुद्गलभेदवर्णनम्	१८-१९
परमाणोः स्कन्धस्य च स्वरूपस्य वर्णनम्	१९-२३
संघातवर्णनम्	२३-२६
पुद्गलेषु जैनमतानुसारेण परिणामवादः	२६-२९
बौद्धमतखण्डनम्	२९-३३
विकल्पग्राह्यस्य अस्वलक्षणत्वपरिहारः	३३-३४
बौद्धमतखण्डनम्	३४-३७
एकान्तभिन्नावयविवादिनैयायिकमतनिरासः	३७-४३
पुद्गलभेदवर्णनम्	४३-४९
मनःस्वरूपम्	४९-५०
तमःस्वरूपम्	५०-५६
शब्दस्वरूपम्	५६-५९
शब्दोद्द्योतप्राणापानादिस्वरूपम्	५९-६२
पुद्गलस्वरूपम् अर्थग्रहणोपायवर्णनं च	६२-६५
अर्थाभावनिराकरणम्	६५-६७
बौद्धसम्मतज्ञानार्थैक्यनिराकरणम्	६७-८१

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विकल्पप्रतिभासस्य अवस्तुत्वनिराकरणम् ८१-९७
सामान्य-विशेषसाधनम् ९७-११४
सामान्य-विशेषात्मकं वस्तु शब्दस्य विषयः ११४-१२४
सामान्य-विशेषसाधनम् १२४-१३२

तृतीयोऽकम्पप्रकाशः **१३३-२१५**
धर्मास्तिकायनिरूपणम् १३३-१३६
धर्माधर्मास्तिकायसाधनम् १३६-१४५
आकाशास्तिकायसाधनम् १४५-१६१
आकाशप्रदेशाः १६१-१६२
उत्पाद-व्यय-ध्रौव्यसाधनम् १६२-१९९
सदसद्रूपत्वसाधनम् १९९-२०८
सप्तभङ्गीसाधनम् २०८-२१२
सप्तभङ्गीनिरूपणमुक्तार्थसङ्ग्रहश्च २१२-२१३
कालसाधनम् २१४-२१६

परिशिष्टानि **२१७-२४९**
प्रथमं परिशिष्टम्
द्वितीयं परिशिष्टम्
तृतीयं परिशिष्टम्
चतुर्थं परिशिष्टम्
पञ्चमं परिशिष्टम्

शुद्धिपत्रकम्
सम्पादनोपयुक्तग्रन्थसूचिः

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

श्री शंखेश्वरपार्श्वनाथाय नमः । श्री ऋषभदेवस्वामिने नमः । श्री महावीरस्वामिने नमः ।
श्री सद्गुरुदेवेभ्यो नमः । श्री पुण्डरीकस्वामिने नमः । श्री गौतमस्वामिने नमः ।

परमार्हतकुमारपालभूपालप्रतिबोधकाचार्यश्रीहेमचन्द्रसूरीश्वराणां शिष्यप्रवराभ्याम्
आचार्यरामचन्द्र-गुणचन्द्रसूरिभ्यां प्रणीतो

द्रव्यालङ्कारः ।*

।। प्रथमो जीवप्रकाशः ।।

अनन्तवेद्यपि ज्योतिर्यस्य संख्यातवेदिताम् ।
गमितं पञ्चभिर्द्रव्यैर्नमस्तस्मै परात्मने ।।
मृगोऽपि वन्द्यतां याति मृगलाञ्छनमाश्रितः ।
स्वगुरून्नीतसूत्रस्य व्याख्यामिति वितन्वहे ।।

---

*. अत्रेदमादाववधेयम् - आचार्यप्रवरश्रीहेमचन्द्रसूरीश्वराणां शिष्यप्रवराभ्यामाचार्यश्रीरामचन्द्र-गुणचन्द्राभ्यां संमील्य स्वोपज्ञटीकायुतः **द्रव्यालङ्कारो** नाम ग्रन्थो विरचितः । तत्र प्रकाशत्रयम् - **जीवप्रकाशः, पुद्गलप्रकाशः, अकम्पप्रकाशश्च** । सम्प्रति स्वोपज्ञटीकासहितौ द्वितीय-तृतीयप्रकाशावेवोपलभ्येते । **जेसलमेरुदुर्गे** आचार्यश्रीजिनभद्रसूरिसंस्थापिते ग्रन्थभाण्डागारे सं० १२०२ वर्षे तालपत्रोपरिलिखित एक एव आदर्शो द्रव्यालङ्कारटीकाया विद्यते । ३६६ ग्रन्थाङ्के (१) मध्ये द्वितीयः प्रकाशो वर्तते, पत्राणि १-१९७ । ९१,९२,१२८ इति पत्रत्रयं नास्ति । (२) मध्ये तृतीयः प्रकाशो वर्तते, पत्राणि १-११३ । सटीकं प्रथमं प्रकाशमुपलब्धुं बहूनि बहूनि वर्षाणि यावत् बहुषु बहुषु स्थलेषु प्रयतितमस्माभिः, किन्तु कुत्रापि स नोपलब्धः ।

एतत्तु अस्ति - मूलमात्रं त्रयाणामपि प्रकाशानामुपलभ्यते । किन्तु तद् बहुषु स्थलेष्वशुद्धमिवाभाति । द्रव्यालङ्कारटीकाया द्वितीये प्रकाशे तृतीये प्रकाशे च टिप्पणेषु ग्रन्थकाराभ्यां प्रायः सर्वं मूलं लिखितं वर्तते । अतस्तत् सुगमम् । प्रथमप्रकाशमूलं तु टीकाया अभावेन अतीव दुरूहम् ।

सटीकस्य प्रकाशद्वयस्य मुद्रणं विंशतेर्वर्षेभ्यः प्राग् यदाऽस्माभिरारब्धं तदा मूलमात्रस्य आदर्शद्वयमेवास्माभिर्लब्धम्- **अमदावादनगरे 'हाजापटेलनी पोल'** मध्ये संवेगी-उपाश्रये सं. १४९२ वर्षे कागजपत्रोपरिलिखित एक आदर्शो विद्यते, पू० आगमप्रभाकरमुनिराजश्रीपुण्यविजयजीमहाभागैः अस्य प्रतिकृतिः (Photo-Copy) प्रतिलिपिश्च महता उत्साहेन प्रेषिता, अत्र १-१२ पत्राणि, अस्य P इति संज्ञाऽस्माभिः कृता । अपर आदर्शो **मरुदेशे बेडानगरे** आचार्यश्री-**विजयक्षमाभद्रसूरिविहिताद्** ग्रन्थसंग्रहादस्माभिर्लब्धः, अत्र पत्राणि १-१३ । अस्य K इति संज्ञाऽस्मत्कृता । एतच्च सटीकस्य ग्रन्थस्य मुद्रणवेलायां प्रथमे पृष्ठे एव निर्देदितम् । सम्प्रति पू० **पं० श्री भद्रङ्करविजयजीगणिवर्यमहाभागानां** शिष्याणामुपाध्यायश्री-**महायशविजयानां** शिष्यप्रवराणां मुनि**धुरन्धर**विजयानां सकाशादपि कागजपत्रोपरि लिखित एक आदर्श उपलब्धः, अत्र पत्राणि १-१२ । अस्य D इति संज्ञाऽस्मत्कृता । अस्य लिपिः समीचीना । अत्र प्राचीनेन केनचिल्लिखितानि टिप्पणान्यपि वर्तन्ते, तानि चात्र **टि०** इति संकेतेन मुद्रितान्यस्माभिः । यद्यपि त्रिष्वपि आदर्शेषु बह्वचोऽशुद्धयः समानप्राया एव, तथापि किञ्चित् समीचीनतरोऽयम् D आदर्शः । एतदादर्शत्रयानुसारं मूलमात्रः संपूर्णो **द्रव्यालङ्कारो**ऽत्र स्थूलाक्षरैः मुद्र्यते ।

इदं तु ध्येयम् - **द्रव्यालङ्कारं सटीकमादौ** विरचय्य ततः परं ग्रन्थकाराभ्यामेव बहुषु स्थलेषु पाठसंशोधनं विहितं मूलमपि च परिवर्तितम् । अत्र तु प्रारम्भिकमूलादर्शानुसारेण यादृशं मूलं तदेवोपन्यस्यते, यत्र क्वचित् टीकादर्शे मूलपरिवर्तनं ग्रन्थकाराभ्यां कृतं तत् टिप्पणेषु **पमू०** = [परिवर्तितं मूलम्] इति संकेतेन निर्दिष्टमस्माभिः । प्रथमप्रकाशस्य सम्यगवगमाय संशोधनाय च **तत्त्वार्थश्लोकवार्तिक-तत्त्वार्थसिद्धसेनीयवृत्ति-न्यायकुमुदचन्द्रादयो** ग्रन्था अतीवोपयोगिनः । अस्माभिः समयाभावादिकारणेन तेषां सम्यगुपयोगः कर्तुं न पारित इति क्षन्तव्यं सुधीभिः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सद्भूतार्थपूर्वकत्वान्निःश्रेयसावाप्तेस्तद्विपञ्चनायोपक्रम्यते । स पञ्चधा । जीव-पुद्गल-धर्मा-ऽधर्मा-ऽऽकाशकाया द्रव्याणि[1] । गुण-पर्यायवद् द्रव्यम् । द्रव्याश्रया धर्मा गुणाः । तदन्ये पर्यायाः । धर्म-धर्मिभावस्तु स्यादभेदात् ।

आश्रवादेराद्ययोरन्तर्भावः । शुभा-ऽशुभकर्मादानहेतुराश्रवः । कात्स्न्र्य-देशाभ्यां तन्निरोधः संवरः । कर्मात्मनोरन्योन्याश्लेषो बन्धः । पार्थक्यापादनं निर्जरा । साता-ऽसातादिकर्महेतवः पुण्य-पापे । तदत्यन्तक्षयो मोक्षः ।

पृथिव्यादेरपि[2] । दिशामाकाशे । कालादिपर्यायाणां सर्वेषु[3] । नान्योन्य[म्,][4] स्वस्वरूपस्थितेः ।

तत्रोपयोगलक्षणा जीवाः । स साकारोऽनाकारश्च[5] । न चायं भूतधर्मः, सत्त्व-कठिनत्वादिवत् मद्याङ्गेषु भ्रम्यादिमदशक्तिवद्वा प्रत्येकमनुपलम्भात् । अनभिव्यक्तावात्मसिद्धिः । कायाकारपरिणतेभ्यस्तेभ्यः स उत्पद्यत इति चेत्, कायपरिणामोऽपि तन्मात्रभावी न कादाचित्कः, अन्यस्त्वात्मैव स्यात् ।

अहेतुत्वे न देशादिनियमः, मृतादपि च स्यात् । शोणिताद्युपाधिः सुप्तादावप्यस्ति । न च सतस्तस्योत्पत्तिः, भूयो भूयः प्रसङ्गात् । अलब्धात्मनश्च प्रसिद्धमर्थक्रियाकारित्वं विरुध्यते । असतः शक्तिविकलस्य कथमुत्पत्तौ कर्तृत्वम् ? अन्यस्यापि प्रसङ्गात् । तन्न भूतकार्यमुपयोगः ।

कुतस्तर्हि सुप्तोत्थितस्य तदुदयः, असंवेदनेन चैतन्यस्याभावात् ? न, जाग्रदवस्थानुभूतस्य स्मरणात् । असंवेदनं तु[6] निद्रोपघातात् ।

---

१. 'दव्वस्स वत्तणा जा स दव्वं कालो तदेव वा दव्वं । न हि वत्तणाइभिन्न जम्हा दव्वं जआ ऽभिहियं ।' [ ] इत्यादिप्रतिपादनाद् द्रव्यस्य तथा तथा वर्तनालक्षणः कालो न द्रव्यात् पृथगिति नासावत्र गृहीतः - टि० ॥ २. **पृथिव्यादेरपि आद्ययोरन्तर्भावः, दिशामाकाशेऽन्तर्भावः, कालादिपर्यायाणां सर्वेष्वन्तर्भावः** । न तु एतेषां द्रव्याणामन्योन्यं परस्परमन्तर्भावः, सर्वेषां स्वस्वरूपे स्थितत्वादिति तात्पर्यम् ॥ ३. (नान्योऽन्यः स्वस्वरूप° ?)॥ ४. ''एवं नास्तिकाभिमतो भूतचिद्वादोऽपि निराकार्यः । तथा च **द्रव्यालङ्कारकारौ** उपयोगवर्णने- 'न चायं भूतधर्मः सत्त्व-कठिनत्वादिवत् मद्याङ्गेषु भ्रम्यादिमदशक्तिवद्वा प्रत्येकमनुपलम्भात् । अनभिव्यक्तावात्मसिद्धिः । कायाकारपरिणतेभ्यस्तेभ्यः स उत्पद्यत इति चेत्, कायपरिणामोऽपि तन्मात्रभावी न कादाचित्कः । अन्यस्त्वात्मैव स्यात् । अहेतुत्वे न देशादिनियमः । मृतादपि च स्यात् । शोणिताद्युपाधिः सुप्तादावप्यस्ति । न च सतस्तस्योत्पत्तिः, भूयो भूयः प्रसङ्गात् । अलब्धात्मनश्च प्रसिद्धमर्थक्रियाकारित्वं विरुध्यते । असतः सकलशक्तिविकलस्य कथमुत्पत्तौ कर्तृत्वम्, अन्यस्यापि प्रसङ्गात् ? तन्न भूतकार्यमुपयोगः । कुतस्तर्हि सुप्तोत्थितस्य तदुदयः ? असंवेदनेन चैतन्यस्याभावात् । न, जाग्रदवस्थानुभूतस्य स्मरणात् । असंवेदनं तु निद्रोपघातात् । कथं तर्हि कायविकृतौ चैतन्यविकृतिः ? नैकान्तः, श्वित्रादिना कश्मलवपुषोऽपि बुद्धिशुद्धेः, अविकारे च भावनाविशेषतः प्रीत्यादिभेददर्शनात् शोकादिना बुद्धिविकृतौ कायविकारादर्शनाच्च । परिणामिनो विना च न कार्योत्पत्तिः । न च भूतान्येव तथा परिणमन्ति विजातीयत्वात् । काठिन्यादेरनुपलम्भात् । अणव एवेन्द्रियग्राह्यत्वरूपां स्थूलतां प्रतिपद्यन्ते तज्ज्ञात्यादि चोपलभ्यते । तन्न भूतानां धर्मः फलं वा उपयोगः । तथा भवां(वं)श्च यदाक्षिपति तदस्य लक्षणम् । स चात्मा स्वसंविदितः । भूतानां तथा भावे बहिर्मुखं स्यात् । गौरोऽहमित्यादि तु नान्तर्मुखं बाह्यकरणजन्यत्वात् । अनभ्युपगतानुमानप्रामाण्यस्य चात्मनिषेधोऽपि दुर्लभः । धर्मः फलं च भूतानामुपयोगो भवेद् यदि । प्रत्येकमुपलम्भः स्यादुत्पादो वा विलक्षणात् ॥'' इति काव्यार्थः ॥२०॥'' इति श्री **मल्लिषेण**सूरिविरचितायां **स्याद्वादमञ्जर्याम्** ॥

५. **तु निद्रोप**० D.॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कथं तर्हि कायविकृतौ चैतन्यविकृतिः ? नैकान्तः, श्वित्रादिना कश्मलवपुषोऽपि बुद्धिशुद्धेः । अविकारे च भावनाविशेषतः प्रीत्यादिभेददर्शनात्, शोकादिना बुद्धिविकृतौ कायविकारादर्शनाच्च । परिणामिनो विना च न कार्योत्पत्तिः । न च भूतान्येव तथा परिणमन्ते, विजातीयत्वात् काठिन्यादेरनुपलम्भात् । अणव एवेन्द्रियग्राह्यत्वरूपां स्थूरतां प्रतिपद्यन्ते तज्जात्यादि चोपलभ्यते । तन्न भूतानां धर्मः फलं वोपयोगः । तथा भवंश्च यदाक्षिपति त[द]स्य लक्षणम् ।

स चात्मा स्वसंविदितः, भूतानां[1] तथाभावे बहिर्मुखं स्यात्, 'गौरोऽहम्' इत्यादि तु नान्तर्मुखम्, बाह्यकरणजत्वात्, प्रत्यक्षेष्वपि कारणभूतधर्मभेदेन कल्पनादर्शनम् । न च चेतना विजातीयपरिणामः, उत्पत्तिमत्त्वात्; सजातीयपरिणामो वा, असत उत्पादायोगादिति ।

अनुमेयश्च । धूमधिया बाष्पाद् भस्मनो वा प्रवृत्तस्य साध्यविप्रलम्भादनाश्वास इति चेत्, किं किल वयं प्रति मूढं प्रमाणं प्रपन्नाः ? विवेचितधूमरूपस्य च न विप्रलम्भोऽस्ति । देश-कालाद्यपेक्षया च गमकत्वे तदात्वा(न्धा?)दि-विप्रलम्भोऽपि न अगमकत्वावहः । अनभ्युपगतानुमानप्रमाणस्य चात्मनिषेधोऽपि दुर्लभः । अविगीतप्रामाण्ये कः सतामात्मीय-परविभागः ?

धर्मः फलं वा भूतानामुपयोगो भवेद्यदि ।
प्रत्येकमुपलम्भः स्यादुत्पादो वा विलक्षणात् ॥
इति संग्रहश्लोकः ।

प्राणादिमत्त्वादप्यात्मसिद्धिः[2] । ज्ञानेनैव कार्यकारणभावनिश्चयः । स्वसंवेदनाध्यक्षस्य कथं परोक्षत्वम् ? कथं चादृष्टपितृव्यपदेशनिबन्धनः पितृकार्यतामधिगतोऽसि ?

अहंप्रत्यक्षाच्च । कायमात्रत्वादि च गोचरः । क्षणिकैकात्मनि तु ज्ञाने(ते?) स्मृत्यादि न स्यात्, सन्तानान्तरेऽपि प्रसङ्गात् । अङ्कुरप्रतिनियमस्तु कथञ्चिदभेदात् । यो यदभावे न भवति स भवंस्तद्भावमुपस्थापयति । न तु शक्तिवैचित्र्यम् । कुशला-ऽकुशलप्रवृत्ति-निवृत्ती च न स्याताम् ।

स तु कायमात्र-स्वतश्चिद्रूप-स्वकृतकर्मभोक्तृमूर्त्तौपशमिकादिभाववत्त्वादिमान्। तत्र स्वकायप्रमाणः, तत्रैव सुख-दुःखभोगात् । अन्यथा दिव्यपि स्यात् । कायसहकारित्वेऽपि संकरः, संयोगस्याविशेषात् । परादृष्टमप्यात्मीयम्, स्वत्वस्य समवायमात्रनिमित्तत्वात् । एकश्च सः । तत्कर्तृत्वमपि तद्धेतुक्रियासु प्रयत्नादिसमवाय एव । वह्न्यादेरूर्ध्वज्वलनादि तु अयुक्तात्मस्थादृष्टनिबन्धनम्,

१. भूतानां स्वसंविदितत्वे - टि० । २. अस्त्यात्मा जीवच्छरीरे प्राणादिमत्त्वात् - टि० ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चित्रशक्तित्वात्। अयुक्तोऽपि ह्युपलः कालायसमाकर्षति, तिलकादि वा दूरस्थमपि अङ्गनादिकमुपनयते। स्वादृष्टाद्वा[1] तथाभावः। काय एव स्वसंवेदनाच्च[2]।

न वै स्ववेद्यत्वेनैव प्रत्यक्षता, मा भूदर्थपरोक्षतेति[3], किन्त्वन्यथापि। तत् प्रमेयत्वादर्थस्येव ज्ञानान्तरवेद्यताऽस्तु। किमीदानीं जडताऽप्यस्तु[4] ? न ह्यनयोः साधकविशेषोऽस्ति। प्रकाशस्तु[5] परवेद्यताया अपि रक्षतु ईश्वरज्ञानमिव। यथा प्रकाशोऽन्यत्रापि तथा स्ववेद्यतापि। यथा तदभावे[6] ज्ञानत्वाभावोऽर्थस्य तथा तदभावेऽपि। अन्वयोऽप्येवमेवेश्वरसंविदि।

न[7] च स्वभावः प्रादेशिकः। ग्राहकत्वविशेषस्तु हेतुविशेषमपेक्षते। न च तत्र तथा, उत्तरोत्तरापेक्षया सर्वदा सर्वज्ञत्वहानेरर्थासिद्धेः[8]। न हि प्रकाशावेदने प्रकाश्यो विदितः। परोक्षताज्ञानद्वयाभ्युपगमाभ्यां[10] वरं स्वसंवित्तिरेव। न चाक्षबीज एव ज्ञानाङ्कुरोत्पत्तिः। अर्थप्रकाशस्तु ज्ञानमेवेत्य[र्था?]सिद्धौ तदसिद्धिरेव। स्वोपलम्भे चार्थो न सिद्धः तदभावे[11] च सिद्ध इति महती प्रज्ञा।

यदि[12] च नियता परोत्पत्तिः, न जात्वर्थाध्यक्षता, अपरापरप्रतीक्षातः। अनियमे यथैव तदन्त्यमज्ञातं स्वकार्यकृत् तथा अन्यदपि स्यात्, किमर्धजरतीयन्यायः ? स्वात्मनि क्रियाविरोधस्तु प्रदीपेश्वरसंविदा निरस्तः। विरुध्येताप्युत्पत्तिः, न चासाविष्टा। एतेन परोक्षतापि प्रतिव्यूढा, अनवगमात्। न ह्यर्थमात्रमव्यभिचारि सर्वसाधारणत्वाच्चात्मन्येवेति न स्यात्। व्यक्तिबुद्धिरेव तदुपाधिः, सोऽप्यसिद्धः। न बुद्धिरर्थधर्म इति चेत्, किमप्रतिबद्धोऽपि गमयति ? न च तत्त्वेनाज्ञातो गमकः, न खलु योग्यतया लिङ्गं गमकम्, स्वनिश्चयापेक्षस्य गमकत्वात् अतिप्रसङ्गाच्च। निश्चयो नान्तरीयकताया न रूपमात्रस्य। न च तत एव तत्त्वनिश्चयः, अन्योन्याश्रयात्। न चान्यतः, अनवस्थानात्। एतेन प्रकटार्थान्यथानुपपत्तिरपि प्रत्युक्ता, बुद्धि-प्रकाशयोर्भेदाभावात्। पावकस्येव च भस्मना तेनानुमाने अभूदिति स्यात्, न चैवम्। तत्प्रवृत्तिरपि प्रवर्तकमनुमापयेत्, निवृत्तिरप्येवम्, सर्वथोदासीनस्यानिश्चयः। इन्द्रिय-मनसी त्वर्थवदेवेति।

अस्तु[13] चैतन्यं तथा, न तु बुद्धिः[14], अचेतनत्वात् प्रधानपरिणामत्वात्[15] तदभावे चैतन्यमिति। केयं बुद्धिः ? अध्यवसायः। किमिदं चैतन्यम् ? अनुभवः।

---

१. वह्न्यादिजीवानामेव कर्मणोर्ध्वज्वलनादि- टि० ॥ २. कायमात्रः - टि० ॥ ३. स्ववेद्यमेव यदि प्रत्यक्षं स्यात् तदा घटाद्यर्थस्य स्ववेद्यत्वाभावात् परोक्षत्वमेव स्यादित्यर्थः। -टि० । ४. यौगः-टि० ॥ ५. स्वपरवेद्यतयोः - टि० ॥ ६. दीपादेः - टि० ॥ ७. प्रकाश - टि० ॥ ८. दृश्यतां **न्यायकुमुदचन्द्रे** पृ० १८४ पं० १। ९. प्रयोजनासिद्धेः - टि० ॥ १०. भाट्टमते ज्ञानं परोक्षम्, यौगानां च ज्ञानान्तरवेद्यम् - टि० ॥ ११. स्वोप०-टि० । १२. दृश्यतां **न्यायकुमुदचन्द्रे** पृ० १८६ पं० १। १३. सांख्यः - टि० ॥ १४. बुद्धिर्न स्वसंविदिता, अचेतनत्वात्, घटवत्। बुद्धिरचेतना प्रधानपरिणामि(म)त्वात् घटवत्। - टि० ॥ १५. जैनः- टि० । इदं टिप्पणं **'केयं बुद्धिः'** इत्यत्र शोभनं भाति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कोऽनयोर्भेदः ? विषयाकारा बुद्धिः, नानारूपाकारत्यागोपादानाभ्यां मा भूत् परिणामितेति विपर्ययश्चैतन्यम् । सारूप्यं लक्षणं चेत्, स्फटिकादेरपि स्यात्, विशेषो वाच्यः । अन्तःकरणत्वादयोऽप्यसाधारणास्तन्निबन्धनाः । तथा [१]नामन्यत्रापि सद्भावान्न वा प्रतिपत्त्यङ्गमिति न वाच्याः । प्रकाशादेव व्यवहारः । अप्रकाशा कथं कुर्यात् ?। अर्थाकारधारित्वं च स्फटिकादावप्यस्ति । न तु तथा स्थितम् । अपरिणामि चैतन्यं तु न प्रत्यर्थनियतव्यवहारनिबन्धनम् । तस्मान्न चैतन्यादन्या बुद्धिः । तद्रूपव्यतिरेकेण बुद्धेरनुपलक्षणात् । एकमेवेदं संविद्रूपं पश्यामः, तत्र च यथेष्टं संज्ञाः क्रियन्ताम् ।

संसर्गादविभागश्चेदयोगोलक-वह्निवत्, उत्सन्ना तर्हि अभेदसंकथा सर्वत्र संसर्गशङ्कातः, एकान्ताभिन्नोपलम्भानपि संसर्गच्छद्मना भेदयन् केन वार्येत ? तद् बुद्धिः स्वसंविदिता । आत्मपरिणामश्च कथं जडः स्यात् ? प्रतिबिम्बनमपि तथात्वे घटादाविव न युक्तम् । तथा च नार्थोपभोगः । न चाचेतनत्वं परवेद्यत्वम्, असिद्धत्वात् । अर्थाकारधारित्वं तु व्योम्न इवामूर्तस्यायुक्तम् । विषयव्यवस्थान्यथानुपपत्त्या सारूप्यम् । उत्पत्त्या सारूप्यम्, ततो व्यवस्थेत्युत्पत्ति-सारूप्याभ्यां ग्राह्यता । शक्तिवैचित्र्यादुत्पत्तावपि नाक्षोपरागः, एवं तर्हि अनन्तरं तुल्यज्ञानं वा नीलं वा द्वयं वा विषय इति सन्दिह्महे । हेतुत्व-सारूप्ययोरविशेषात् ज्ञानं तु युक्तमिव सजातीयत्वात् दृष्टत्वेन दृष्टसादृश्यत्वाच्च, नार्थः व्यत्ययात्, मा भूत् ग्राहकाकारेण ग्राह्याकारेणास्ति सादृश्यम् । न चार्थसारूप्यम्, ज्ञानप्रतिभासिनः स्थूलस्य प्रत्येकं परमाणुष्वभावात् । अविरुद्धधर्माध्यासश्च सरूप्य-सरूपयित्रोः सादृश्यनिबन्धनम् । अन्यथा न केनचित् तत्र(त्) स्यात्, अविशेषात् । न च बहुष्वेकत्वपरिणामस्यानभ्युपगमात् अनेकवृत्तेरेकस्य च । अतीन्द्रियत्वाच्चाणूनां न तदाकारा वृत्तिः । कथं नामास्यैकस्यानेकेषु वृत्तिरित्येकोऽपास्तः । तद्यदि मेचकमणिरपि ज्ञानमात्मना सरूपयेत् कस्तत्र समाधिः ? न चैते न सत्याः, तदनुसारेण वाहाव्यवस्थानात् । तत एव नैकत्वमपि तदभेदात् तत्स्वरूपवच्चानेकत्वं स्यादपि साधारणो धर्मः सत्त्वमिव, नासाधारणो जडिमेव जडिमेव जडि(डे?) नीलिमाप्रतीतिरपि एकत्वात्, अन्यथा भेदः ।

ननु निजधर्माप्रहाणान्न पररूपानुकारिता प्रतिबिम्बात्मता, कुतो जडत्वादि ? तद् यदि बोधात्मता जडसादृश्यं परस्पराभावत्वेन तयोर्विरोधात् । न खलु व्योम

१. नामान्य° D ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

महत्स्वभावमजहत् परिमाणेनाणुसदृशम् । स्फटिकोऽपि तावत् शुक्लिमानमपहाय शोणिमानं धत्ते, उपलत्वमविरुद्धं तु नापैति । तद्वद्वस्तुत्वन(म?)स्तु[2] सदृशभ्रातरीव कदाचिद् धियामर्थधीरपि स्यात् । तत्फलार्थं च प्रवर्तेत च यदि बिम्बानेकत्वं सत्यमतो बाह्ये तथा स्थितिः । अन्यथा नैकान्तः, स्वातन्त्र्याभावात् ।

भवेत् किल सजातेरनेकस्याप्येकः सदृशः, न विजातेः। तन्नार्थस्वरूपं ज्ञानम्। अपौद्गलिकत्वात् । सादृश्यस्य रूपादिनान्तरीयकत्वात् । क्षयोपशमानुभावतः परिच्छेदवत् क्लृप्तिः, प्रतिकर्मपरिणामभेदात् । तन्न धीरर्थाकारा ।

आत्मा कायप्रमाणोऽयं स्वसंवेदनमास्थितः ।
मेयत्वात् परवेद्यत्वसिद्धौ जाड्यं न किं ततः ॥१॥
बुद्धिचैतन्ययोरैक्ये जाड्यं बुद्धेरधिस्थितः ।
आत्मानमजडं जल्पन् कथं न स्यादमूढधीः ॥२॥
नामूर्तं व्योमवन्मूर्तैर्बिम्ब्यते जडतान्यथा ।
सारूप्यं च न किं ज्ञाने चित्रे चानेकता कथम् ॥३॥

इति संग्रहश्लोकः(काः) ॥

तदत्यन्तसजातीयानेकरूपत्वान्नात्मा विभुः[3] । अन्यथा[4] तदभावः ।

अमूर्तद्रव्यत्वाद् धर्माधर्माकाशवद् विभुरिति चेत्, न[5], धर्मादीनामेकव्यक्तिकत्वात् ।

कथं तर्हि देशान्तरे सुखादिभोगः ? गतिमत्त्वात् । अन्यथा न स्थूलस्कन्धस्य देशान्तरप्राप्तिः स्यात् । असंख्यातप्रदेशोऽपि कर्मोपनीतकायानुरोधात् तथा तथा परिणमते । अप्रदेशत्वे कर-चरणादिभेदो न स्यात् । एकत्रैव सर्वात्मना स्थितेः । न चाणुमात्रादिः, अशेषे वपुषि चेतनावेदनात् । न चेयं ततो भिद्यते एव । ततस्तदर्थापरिच्छित्तिप्रसङ्गादविशेषात् । गुणत्वमप्येकान्तभेदिनः समम् । समवायोऽप्यकस्मात् तावुपश्लिष्यन्नात्मव्यर्थतां पिशुनयति ।

तदयमात्मा स्वतश्चिद्रूपत्वेनापि कायमात्रः । कर्ता च कर्मणाम्, तत्फलसुखदुःखभोगात् । अन्यथा न नियमः, सदा भावा-ऽभावौ वा ।

---

१. तद्वद्वस्तुत्वतस्तु K ॥ २. सदृशं D ॥ ३. नात्मा विभुः, अत्यन्तसजातीयानेकरूपत्वात्, घटादिवदिति । - टि० ॥ ४. विपर्यये 'हेतुरस्तु, साध्यं न भावि' इतिरूपे तदभावोऽत्यन्तसत्त्वाभावः । - टि० ॥ ५. आत्मा विभुरमूर्तद्रव्यत्वात् धर्माधर्माकाशवदिति चेत्, न, अस्याप्रयोजकत्वात् । न खलु धर्मादीनाममूर्तद्रव्यत्वाद् विभुत्वम्, अपि तु एकव्यक्तित्वादित्याह न० - टि० ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न भवेदप्येकरूपस्य भोक्तव्यम्, एकान्तसुखितत्वादिप्रसङ्गात् । जन्मिनां च चित्रा दशाः । उभयरूपत्वे समनुभूतिः स्यात् । अनुभूतिरप्यक्षतस्य कथम् ? अनु विरोधेन स्थितस्य चान्यस्य कुतः समुन्नतिः ? यदा तु स एव तत्तत्कर्मोपाधिसम्बन्धान्तर इव नानारूपाण्युपयच्छति तदा सर्वमप्यसंरम्भमुपपद्यते।

अतिप्रसङ्गान्नाकृतं कर्म फलतीति कर्तृत्वमपीति । 5

तदात्मा स्यान्नित्यः स्वकायमात्रः स्वतश्चिद्रूपः स्वकृतकर्मभोक्ता च सिद्धः।

तत्र संसारिणः षोढा पृथिव्यम्बु-तेजो-वायु-वनस्पति-त्रसभेदात् । छेदे[1] च समानधातूत्थानादप्रतिहता भूरर्शोऽङ्कुरवत् सात्मिका ।

भौममम्भोऽपि क्षतभूसजातीयस्वभावसंभवात् शालूरवत् । आन्तरिक्षमपि अभ्रादिविकारे स्वतः सम्भूय पातात् मत्स्यादिवत् । 10

तेजोऽपि आहारोपादानेन वृद्ध्यादिविकारोपलम्भात्, पुरुषाङ्गवत् ।

वायुरप्यपरप्रेरितत्वे तिर्यग्गतिमत्त्वात्, गोवत् । वनस्पतिरपि छेदादिभिर्म्लान्यादिदर्शनात्, पुरुषाङ्गवत् । केषाञ्चित् स्वापा-ऽङ्गनोपश्लेषादिविकाराच्च। अपकर्षवतश्चैतन्याद्[2] वा आप्तवचनाच्च ।

ननु सोऽप्यसिद्धः, प्रत्यक्षादेरवर्तनात् । न वै पिशितचक्षुषामदृष्टिरत्यन्ताभावाय। 15 विप्रकर्षिणामदृष्टावपि सत्त्वसंभवात् । क्वचिदभावेऽपि न क्षतिः । न चाशेषाविषयत्वे प्रमाणमस्ति । परेषां परोक्षत्वात् । अन्यथा तत्सिद्धिरेव । न च(चा?)व्यापकनिवृत्त्याऽन्यनिवृत्तिः, अतिप्रसङ्गात् ।

अनुमानाभावस्त्वसिद्धः, पुद्गलानां[3] प्रत्यक्षकार्यपरिणामिकारणत्वेन कस्यचिदपि प्रत्यक्षत्वात् । अन्यथा[4] तत्त्वहानिः । कार्यधर्माणां कारणेषु सत्त्वेन 20 व्याप्तत्वात् । क्वचिदसर्वज्ञे[5] वा गौणः सर्वज्ञशब्दो मुख्यमाकर्षति । अन्यथा गौणत्वहानिः[6], स्खलत्प्रत्ययजनकत्वस्य[7] स्वविरुद्धव्याप्तत्वात् ।

---

१. तुलना- "पृथिव्यादीनां पुनर्जीवत्वमित्थं साधनीयम्- यथा सात्मिका विद्रुमशिलादिरूपा पृथिवी, छेदे समानधातूत्थानात्, अर्शोऽङ्कुरवत् । भौममम्भोऽपि सात्मकम्, क्षतभूसजातीयस्य स्वभावस्य संभवात्, शालूरवत्। आन्तरिक्षमपि सात्मकम्, अभ्रादिविकारे स्वतः संभूय पातात्, मत्स्यादिवत् । तेजोऽपि सात्मकम्, आहारोपादानेन वृद्ध्यादिविकारोपलम्भात्, पुरुषाङ्गवत्। वायुरपि सात्मकः, अपरप्रेरितत्वे तिर्यग्गतिमत्त्वात्, गोवत्। वनस्पतिरपि सात्मकः छेदादिभिर्म्लान्यादिदर्शनात्, पुरुषाङ्गवत्, केषाञ्चित् स्वापाङ्गनोपश्लेषादिविकाराच्च। अपकर्षवतश्चैतन्याद् वा सर्वेषां सात्मकत्वसिद्धिः, आप्तवचनाच्च।" इति मल्लिषेणसूरिविरचितायां स्याद्वादमञ्जर्याम् २९ तमश्लोकटीकायाम् । २. चैतन्यं क्वचिदात्मनि परमापकर्षवत्, अपकृष्यमाणविशेषत्वात्, परिमाणवत् । यत्र तदपकर्षपर्यन्तस्ते एकेन्द्रियाः स्थावरा इत्याह- अप० -टि० । ३. पुद्गलाः कस्यचित् प्रत्यक्षाः, प्रत्यक्षकार्यपरिणामिकारणत्वात् तन्त्वादिवत् इत्यनेनानुमानेनाऽस्य सिद्धेः । हेतुरस्तु साध्यं न भावीति विपक्षे बाधकाभावादनैकान्तिको हेतुरित्याशङ्क्याह-अन्य० - टि० । ४. विपर्यये -टि० ॥ ५. आप्तसाधकमनुमानान्तरमाह- क्वचीति - टि० । ६. क्वचिदसर्वज्ञे सर्वज्ञशब्द उपचर्यमाणो मुख्यसर्वज्ञापेक्षः, गौणत्वात्, माणवकेऽग्निवत् ॥ अव्यभिचारी मुख्योऽविकलोऽसाधारणोंऽतरंगश्च । विपरीतो गौणोऽर्थः सति मुख्ये धीः कथं गौणे ॥-टि०॥ ७. उक्तं च- नादृष्टपूर्वसर्पस्य रज्ज्वां सर्पमतिः क्वचित् । ततः पूर्वानुसारित्वाद् भ्रान्तिरभ्रान्तिपूर्विका - टि०॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आगमोऽप्यस्ति स्वर्ग-केवलार्थिना तपोध्यानादि कर्तव्यमिति । न चान्यत् केवलात् तद्व्यपदेशहेतुः । तत्सिद्धेर्नेतरेतराश्रयः ।

न च तत्प्रणीतत्वादेवाप्रामाण्यम्, विरुद्धत्वाद् रागादिक्षयात् । वचनं त्ववश्यवेद्यतीर्थकरनामकर्मोदयात् वेदनौपयिकत्वात् तस्य भवोपग्राहि-कर्मक्षयापेक्षणाच्च । तथापि वीतरागोऽभिष्वङ्गाभावात् । अकर्तृकगिरामसंभवाच्च। उपलभ्यानुपलभ्यो ह्यनित्य एव । यच्च यद्धेतुकमन्वय-व्यतिरेकावधृतं तादृशमदृष्टहेतुकमपि तादृशहेतुकम्, यथा धूमः । अन्यथा ततः सकृदपि उत्पादायोगः ।

न च वैदिक-लौकिकयोर्वर्णादिभेदोऽस्ति, सर्वप्रकाराणां पुरुषैः शक्यक्रियत्वात्। यथा च रागादिपरीतो मृषाभाषी दृष्टस्तथा वैराग्यादिगुणयुक्तस्तथ्यवाक् । अतः पुरुषाश्रये वचस्तथ्यातथ्यते । स निवर्तमानस्तेऽपि निवर्तयति इति आनर्थक्यं स्यात्।

तद् वाक्यत्वादेः पौरुषेयो वेदः । अतः कारणसाद्गुण्यादेशदेशा-संवादाद्वा(?)ऽर्हत्प्रणीतं प्रमाणमिति तेन सिद्धिः ।

कथं पुनर्वक्ता वीतरागो विवक्षाऽविनाभावित्वात् ?। का गतिः सुप्त-मत्तयोस्तत्सत्तायां वेदनापत्तिः । न हि निश्चयधियोऽप्रतिसंविदिता एवोदयन्ते व्ययन्ते च । येन सन्त्योऽप्यनुपलक्षिताः स्युः । अन्यतो अन्यदर्शनाच्च ।

विवक्षाभावेऽपि चानभिष्वङ्गरूपा रागादयः मध्यस्थगिरामभावात् । आत्मनि तत्सहचारिणामनुमायां वर्णादिभिः किमपराद्धम् ?

व्यभिचारोऽन्यत्राप्यनिवार्यसंशयः । कथं पुनरात्मस्वभावा अपि ते व्ययन्ते ? न चात्मभावो मा भूत् सर्वो वीतराग इति । यथा चामीकरादिषु । दृश्यन्ते हि क्षार-मृत्पुटपाकादिभिरपेतमलाश्चामीकरादयो विशुद्धिभाजः । उपरञ्जकत्वं तु तुल्यमेषामपि निसर्गशुद्धत्वाद्यपि तत् समम् ।

तत्प्रक्षये किमौपयिकं तत्कारणविरुद्धाभिगमः गुण-दोषैकान्तग्रहस्तत्प्रभवः विरुद्धो नैकान्तग्रहः ? असावौदासीन्यं जनयति तत्प्रकर्षो वीतरागत्वमिति ।

अस्तु तर्हि वक्तृत्वादस्मदादिवदसर्वज्ञः, न, अन्यथानुपपन्नत्वस्याभावात् ।

वह्निगमकत्वं तु धूमस्य तज्जन्यत्वात् तमन्तरेण च भवन्नहेतुकः, अन्यादृशाद् भवतस्तादृशत्वमपि कुतः ? कथं तर्हि शृङ्गादेः शराद्युत्पत्तिः ? । न, हेतुभेदेन रूपभेदात्।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घनश्यामाकरोहिकन्दोद्भवा रम्भा पाण्डुरच्छविरस्थूलस्तम्बा च बीजोद्भवा। साक्षाद् हेतुभेदो भेदक इत्यभेदेऽपि न दोषः । अशक्यनिश्चयो वा । अन्यतोऽपि गौरवादेः कृत्रिमा-ऽकृत्रिमाणामिव मणि-मुक्तादीनाम्, नीलानीलसुमनसोः सर्पयोः पुष्पात्, वन्ध्यावन्ध्ययोः कर्कोट्योः फलात्, वन्यावन्ययोः त्रपुसयो रसात्, स्पर्शोपयोगभ्रंसिन्योर्हरीतक्योः प्रभावात्। तस्मान्न सुविवेचिताकारभेदं कार्यं कारणं व्यभिचरति । नैवं वक्तृत्वम् । ततो यथोदितप्रमाणवृत्तेः सिद्धः सर्ववित्।

प्रमाणपञ्चकादस्मिन्नाप्ते सिद्धे प्रपञ्चतः ।
अजडात्मा निषेधाय प्रयत्नं विदधीत कः ॥१॥
प्ररूढमपि रागादि स्वहेतुपरिपन्थिनि ।
पुष्टिं प्रयाते प्राप्नोति क्षयं हेतुक्षयान्मुहुः ॥२॥

इति संग्रहश्लोकौ ।

न चैवमीश्वरोऽपि साधकाभावात्, [1]कार्यत्वं परिणामि कारणं कर्तृत्वेनाकर्षति, [2]अन्यस्य तद्बुद्धयैव व्यभिचारात् । परिणामिकारणाद् [3]भिन्नस्यैव बुद्धिमतो घटादावुपलम्भः ।

न चैकरूपायां कादाचित्की सृष्टिः संहारो वा । तथापि कथं स्थितिः ? त्रितये तूत्पाद-व्यय-ध्रौव्यं युगपदायातम् । भिन्नविषयत्वे त्वेकान्तः अनिबन्धनस्तथा विवर्तो न क्वचित् कदाचित् कस्मिन्नेव स्यात् । तन्निबन्धनोऽपि तथैव तस्यैकरूपत्वात्। कार्यं च स्यात् ।

न चासत्सु सहकारिष्वपेक्षा । तत्सत्तामात्रनिबन्धनाश्च कदाचिन्न स्युः । तत्राप्यपेक्षायामनवस्थितिः । कालादयोऽपि नित्यसन्निहिता एवेति कुतः कादाचित्कत्वम् ? ।

तस्मात् सा बुद्धिमतः कर्तुर्विनाप्युत्पद्यमाना कार्यतां परिणामिन्येव हेतौ नियमयति ।

स्वातन्त्र्यमात्रानुविधायी कर्तृव्यपदेशोऽपि ष(ख)ड्गादिवाविरुद्धः ।
एवमचेतनत्वादयो[4] दूष्याः । न चेतनाधिष्ठितेषु तदधिष्ठितत्वम् । न च

१. क्षित्यादि बुद्धिमत्कर्तृकं कार्यत्वात् घटवत् इति तत्साधकमस्तीत्याशङ्क्याह- **कार्य०** । कार्यत्वं हि उपादानकारणसत्तया व्याप्तम् । ततः कार्यतया स्वीकृतं क्षित्यादि पुद्गलस्कन्धादिरूपमुपादानकारणमाकर्षति । न च परिणामिवस्तुव्यतिरेकेण क्वचिदुपादानभावः, तेनोपादानं परिणामिकारण[म्] - टि० ॥ २. **अन्यस्य** बुद्धिमत्कर्तुरीश्वरस्य - टि० । ३. पृथग्भूतस्य -टि० ॥ ४. हेतवः **आदिशब्दात्** - टि० ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चेतनावतः कर्तृत्वं काययोगं व्यभिचरति, कुलालादिषु तद्व्याप्तेः । नियतकर्तृत्वमुपाधिरिति चेत्, न, साधनस्यापि व्यापनात् । ईश्वरस्यापि[1] यथाशक्ति करणात् । अन्यथा विश्वानियतरूपस्य षष्ठभूतादेश्च जननप्रसङ्गः । अनित्यज्ञानादियोगोऽपि समः । नित्यं चेच्चोक्तप्रायम् ।

न च शुभाशुभविभागकारिणो न रागादिसंभवः । कार्याधिगम्या अतीन्द्रियवृत्तयः । मध्यस्थे तदभावात् । दुःखस्वरूपत्वात् तत्त्वादिस्वतन्त्रनिर्दोषप्रेक्षावदनुत्पाद्यमिति बाधकाद्वेति ।

तदेवं प्रसिद्धे सर्वविदि तद्वचनात् पृथिव्यादेश्चेतनत्वसिद्धिः ।

त्रसास्तु तथा साधिता एव । ततः षट् । एकस्यानेककायव्यापित्वे विश्वसुखाद्यनुभवप्रसङ्गः । अन्यानुभवादावन्यस्य स्मृत्यादि स्यात्, वार्धक इव, समं बन्धमोक्षौ च । न च कल्पना परमार्थहेतुः । व्योम्नोऽपि स्वतः सप्रदेशता।

जीव-परमात्मभेदोऽप्यद्वैतमुपहन्ति । न च परमात्मता विश्वाभेदबुद्धिहेतुः । शुद्धस्य तदयोगात् । कथं च जीवात्मानोऽसिद्धस्तदाश्रयः ? । तदात्मानः स्वतोऽनन्तभेदिनोऽपि सामान्योपाधिभेदात् षट् । स्वतो भेदिनस्त्वनन्ताः सिद्धा इति ।

यदा प्राणादिमान् कायः सिद्ध एकेन लाञ्छितः ।
निर्विवादं तदा सिद्धाः सर्वाः स्मृत्यादिसम्पदः ॥१॥

इति संग्रहश्लोकः ।

इति द्रव्यालङ्कारे प्रथमो जीवप्रकाशः ।

---

१. ईश्वरः सशरीरी, चेतनावत्कर्तृत्वात्, कुलालादिवत् - टि० ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथ द्वितीयः पुद्गलप्रकाशः ।

[1]मूर्तिमन्तः पुद्गलाः । स्पर्श-रस-गन्ध-वर्णा मूर्तिः ।

संस्थानं तु व्यभिचारि, धर्मा-ऽधर्म-मुक्तात्मनां लोक-शरीरसंस्थानत्वात् ।

[2]स्पर्शनेन ग्राह्यः परिणामः कठिनादिरष्टधा स्पर्शः । प्रायोऽनमनस्य हेतुः कठिनः । सन्नतेर्मृदुः । अधोगतेर्गुरुः । तिर्यगूर्धगतेर्लघुः । काठिन्या-ऽपाकयोः शीतः । मार्दव-पाकयोरुष्णः । चिक्कणत्वा-ऽचिक्कणत्वे स्निग्ध-रूक्षाविति ।

[3]रसनेन तिक्तादिः पञ्चधा रसः । कफशान्तेस्तिक्तः । पाटवस्य च कटुः । रक्तदोषादिशान्तेः कषायः । आस्रवण-क्लेदनयोरम्लः । ह्लादन-बृंहणयोर्मधुरः । लवणो मधुरान्तर्गतः संसर्गजो वेति ।

[4]घ्राणेन सुरभ्यादिर्द्वेधा गन्धः । औन्मुख्यस्य सुरभिः । वैमुख्यस्यासुरभिरिति ।

[5]चक्षुषा कालादिः पञ्चधा वर्णः । उद्वेगस्य कालः । रौद्र-क्षोभयोर्लोहितः । प्रसादस्य शुक्लः । दृशोर्नीलः । विधातस्य पीतः । संयोगजः सारङ्गः । इति मूलभेदाः ।

[6]तद्भावः परिणामः । द्रव्यानुवृत्त्या न पूर्वोत्तरावस्थयोरेकान्तभेदः । अत एव न सांकर्यम् । परिणाम-परिणामिनोः स्यादभेदः । अत एव स्यादेकत्वा-ऽनेकत्व-नित्यत्वा-ऽनित्यत्वानि । एतौ चोपलब्धिलक्षणप्राप्तावुपलभ्येते ।

बीजानि धान्यत्वेन परिणम्य भौमं तन्नायस्पिण्डवदौदकं च रसं बालका इव सवित्रीस्तन्यमाहरन्ति किसलादिभिः परिणाहीभवन्ति । दुग्ध-दधीनि च तापाभितप्तानि स्फारीभवन्ति ।

[7]स चायं परिणामः कश्चित् सदृशेतरः—बालादीनां कुमारादिभावः स्थूलादीनां कृशादिभावो वा, अत्रोभार्पणा । कश्चिद् विसदृशः - नारकादीनां मानवादिजन्म घटादीनां कपालादिभावो वा, अत्र सादृश्यानर्पणा । कश्चित् सदृशः-सर्वेषामस्तित्वम्

---

*. अत्रेदमादाववधेयम्- द्रव्यालंकारमूलसूत्राणि ग्रन्थकाराभ्यामादौ रचितानि । तदनन्तरं तत्र किञ्चित् संशोधनं ताभ्यामेव विहितम् । ततः परमपि यदा टीकाया अन्तिमं स्वरूपं ग्रन्थकाराभ्यां निर्णीतं तदापि टीकायां भूरितरं संशोधनं ताभ्यां विहितम्, मूलेऽपि किञ्चित् परिवर्तनं कृतम् । अतोऽत्र यत् प्राक्तनं रूपमासीत् तदत्र P.K.D. अनुसारेण उपन्यस्यते । यत्तु ताभ्यामन्तिमं स्वरूपं निर्णीतं तत् सटीकस्य द्रव्यालंकारस्य द्वितीय-तृतीयप्रकाशयोः पृ० १ - २१६ मध्ये वर्तते । अतो मूले ये केचन पाठभेदास्ते परस्परं तुलनां विधाय ज्ञातव्याः । यो योऽत्र निर्दिष्टः पाठो यस्मिन् यस्मिन् पृष्ठे सटीके द्रव्यालङ्कारे वर्तते तदत्र टिप्पणेषु निर्दिष्टमस्ति । १. पृ० १ ॥ २. पृ० ३ ॥ ३. पृ० ५ ॥ ४. पृ० ६ ॥ ५. पृ० ७ ॥ ६. पृ० ८ ॥ ७. पृ० १२-१३ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आत्मनां चैतन्यं वा, अत्र वैसदृश्यानर्पणेति ।

[1]समममेकत्र चतुर्धा सत्त्वेऽप्युद्भूतस्य ग्रहः, स्पर्शाविनाभावित्वात् । अत एव सजातीयत्वे पृथिव्यादीनां परस्पररूपपरिणामः, न हि ज्ञानमर्थरूपतामुपयच्छते। लवणमभ्मः, दारुस्तेजः, तेजो भस्म तमो वेति ।

[2]न च प्रत्येकं स्पर्शादयः पुद्गला एव, सप्रतिघत्वात् । अस्पृष्टस्याऽप्रतिघाताज्ज्ञानवत् । तदिमे स्पर्शादयोऽन्योन्याविनाभाविनोऽपुद्गलाः ।

[3]औदारिकादिभेदेनाऽनेकविधाः पुद्गलाः । द्वेधाऽपि अणवः स्कन्धाश्च । आद्यः स्कन्धपरिणामिहेतुर्द्रव्यतोऽनंशः परमाणुः । स युगपदविरुद्धद्विस्पर्शः, अन्यतरैकरसादिः । तत्संघातभेदजो द्व्यणुकादिः सांशः स्कन्धः चतुरष्टस्पर्श-पञ्चरस-वर्ण-द्विगन्ध उद्भूताध्यक्षत्वश्चैन्द्रियकः ।

[4]एकत्वपरिणामौन्मुख्यप्रकर्षपर्यन्तः संघातः । स द्व्याद्यधिकगुणेन स्निग्धस्य रूक्षस्य वा । विजातीयेन तु साम्येऽपि मध्यमोत्कृष्टगुणस्य । अधिकगुणः परिणमकः, समगुणः परिणम्योऽपि । भेदो विश्लेषपरिणामः ।

[5]कथञ्चिदत्यक्तरूपाणां घनादिभावेनैकत्वपरिणतिः स्कन्धः । सत्त्वोपचयाभावेऽपि तथाभावो न विरुद्धः, तुल्यमानयोरपि हि वज्र-भेण्डयोरल्प-महत्त्वादिदर्शनात् । तथाप्युत्पाद-व्यय-ध्रौव्याणि पूर्वपर्यायक्षयात् तत्क्रियासिद्धेः । उत्तरपर्यायश्चोत्पद्यते । तदेव च द्रव्यं तथा परिणमते ।

[6]न चैते तदाप्यनेकत्वपरिणतय एव, धरणा-ऽऽकर्षणभावात् । अविलक्षणेषु च कुतोऽयं संस्थानवित्तिभेदः ? वासनातः, रूपादिभेदोऽपि तत एवास्तु । अर्थं तु साधयिष्यामः ।

[7]नाकल्पिकायां भेदकालुष्यम् । न तर्हि विकल्पिकायामपि, अगृहीते कल्पनाऽभावात् । प्रमाणं हि स्यात् । अस्वलक्षणत्वेऽन्योन्याश्रयः । अधिकार्थक्रियाकारिणश्च कुतोऽस्वलक्षणत्वम् ?

[8]कथं चातीन्द्रियाणामविकल्पसंविदि तदापि प्रतिभासः ? भेदोत्पत्तेः । कदा पुनः क्षणिकेष्वियं नास्ति ? वैशिष्ट्यं तु स्थूलताया अन्यत्र विद्मः ।

[9]तदग्रहे तदग्रहात् तयोरभेदः, न, रसेन व्यभिचारात् । तदस्ति तेषां तदैकत्वपरिणतिः ।

---

१. पृ० १४ ॥ २. पृ० १७ ॥ ३. पृ० १८ ॥ ४. पृ० २३ ॥ ५. पृ० २६-२७ ॥ ६. पृ० २९ ॥ ७. पृ० ३० ॥ ८. पृ० ३३ ॥ ९. पृ० ३६ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]सा स्यादवयवाभेदिनी द्रव्यम् । एकान्तभेदे का तेषु तद्वृत्तिः ? समवायः। सा कथं न नभसि ? अजनकत्वात् । तर्हि अग्नौ धूमस्याऽस्तु । न, असमवायिकारणत्वात् । असमवायिनिबन्धनस्तद्भावः कथं न तस्य ?

[2]तथापि नांशेन, अनंशत्वात्। सर्वात्मनापि, तच्छून्यतापादात् बहुत्वप्रसङ्गाच्च। अनंशस्य अंशानंशकल्पनावद् वृत्तेरप्ययोगः, एकान्तभेदिवृत्तेस्तद्व्याप्तेः । अधिकोत्पत्तौ च तुलानतिविशेषः स्यात्, उपलक्षणं च, महत्त्वात् उपलभ्यत्वात्। गुरुत्वं च, पतनधर्मकत्वाद् गुणानां गुणान्तरारम्भाच्च । जलादयो मत्स्यादीनामेव गुरुत्वं प्रतिबध्नन्ति, पतनस्खलनदर्शनात् । नैवमवयविनः । यदा त्वणव एव तथा परिणमन्ते तदा न दोषः ।

[3]तदयमवयवेभ्यः स्यादभिन्नः । अत एव एकत्वा-ऽनेकत्व-कम्पा-ऽकम्पाद्युपपद्यते। तत् स्यादवयवाभेदी स्कन्धो द्रव्यम् ।

[4]मनस्तमःशब्दोद्द्योतादयस्तद्भेदाः । भावमनोहेतुः करणविशेषात्तः स्कन्धो मनः अचेतनासर्वगतापरमाणुद्रव्यत्वात् पौद्गलिकम्, अन्यथा स्पर्शवत्त्वाभावेन तदभावः । मूर्तकरणत्वाच्च चक्षुरादिवत् । अतश्च स्पर्शवत् । न च शरीरान्यत्वे सर्वविषयज्ञानहेतुरित्येवास्पर्शवत् । परमाण्वन्यत्वे सति अपौद्गलिकत्वादात्मा अस्पर्शवान् । विभुत्वं च स्यात्, अचेतनास्पर्शद्रव्यत्वात्, निष्क्रियत्वं च । तद् मनः पौद्गलिकम् ।

[5]विकल्प उपादानप्रत्ययापेक्षः, प्रतिनियतविषयज्ञानत्वात्, चाक्षुषादिवत्, प्रत्ययश्च मनः । अन्यथाऽतिप्रसङ्ग इति ।

[6]तेजसैवाऽपवर्त्यः स्कन्धस्तमः । पौद्गलिकत्वं तु विधि-स्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वात् । स्पर्शवत्त्वेऽपि परिणामभेदात् प्रदीपप्रभावदप्रतिघातः । रजोवत् स्पर्शानुपलम्भोऽपि खण्डादर्शनं च । न च भाऽभावः, अल्प-कृष्ण-महत्त्वप्रतिभासायोगाद् विधिग्रहाच्च । अत एव नालोकादर्शनम् । न चानाश्रयो गुणः । नाप्यारोपप्रत्ययोऽस्खलितः सर्वभावी वा । तत् पौद्गलिकं तम इति।

[7]वाग्योगनिसृष्टः स्कन्धः शब्दः संघात-भेदजो वा । बाह्येन्द्रियविषयत्वाद् गन्धादिवद् नाकाशगुणः, आकाशगुणत्वाभावेन व्याप्तत्वात् । गुणत्वे च व्यापित्वम्, व्योम्नो निष्प्रदेशत्वात् । परोक्षत्वादनुपलम्भो वा । न चामूर्तं

१. पृ० ३७ ॥ २. पृ० ३९ ॥ ३. पृ० ४३ ॥ ४. पृ० ४५ ॥ ५. पृ० ४९ ॥ ६. पृ० ५० ॥ ७. पृ० ५६-५७॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मूर्तगुणम् । स च पौद्गलिकः, विधि-स्वातन्त्र्याभ्यां बाह्येन्द्रियग्राह्यत्वात् । तच्छब्दो द्रव्यं पौद्गलिकम् ।

[1]तमोऽपवर्तकः स्कन्ध उद्द्योतः, बाह्येन्द्रियग्राह्यद्रव्यत्वात् पौद्गलिकः । प्राण-ऽपानादयोऽप्येवमिति ।

[2]स्पर्श-रस-गन्ध-वर्णा अन्योन्यमविनाभुवः ।
मूर्तिस्तदङ्किता ये ते पुद्गला द्विविधाश्च ते ॥१॥
अणुः स्कन्धश्च तत्राणुराद्यं स्कन्धनिबन्धनम् ।
द्रव्यतो भागनिर्मुक्तो भावतो भागवानपि ॥२॥
तत्संघात-विभेदोत्थः स्कन्धो द्व्यण्वादिरंशवान् ।
विचित्रभावोऽध्यक्षश्चोद्भूताध्यक्षत्वयोगतः ॥३॥
मनस्तमःशब्दोद्द्योताः स्कन्धस्यैव प्रभित्तयः ।
पौद्गलिकत्वमेषां तु प्रसिद्धं स्वस्वलिङ्गतः ॥४॥

इति संग्रहश्लोकाः ॥

[3]स्कन्धग्रहणपरिणामेन च ज्ञानेन तद्ग्रहः । स च संवेदनात् । तदेवार्थग्रहः । क्षयोपशमानुभावतः परिच्छेदावक्लृप्तिः, प्रतिकर्म विक्रियाभेदात् ।

[4]स्वप्नादौ तु प्रमाणाभासम् । शुद्धहेतुजं तु प्रमाणमर्थाविनाभाव्येव । कस्यचिद् भ्रान्तत्वोपलम्भः सजातीयस्य तथाभावं गमयति । न ह्यवाग्दृशो वृत्तिः सोपप्लवेति योगिनोऽपि । तद् व्यभिचारेऽपि नार्थाभावः ।

[5]सहोपलम्भनियमोऽपि उभयोः सहभावनियमायाऽस्तु, न भेदाभावाय, विच्छिन्नग्रहणसंवेदनात् । तथाप्यभावे ज्ञानाभावोऽप्यस्तु, 'सह'-ध्वनेरुभयनिष्ठत्वाच्च । प्रमाणान्तरसिद्धे परमार्थाभेदे कल्पितभेदे विषयत्वं स्यात् ।

[6]एकोपलम्भेऽपि कोऽवश्यं भेदाभावः ? एकस्याप्यनेकग्रहणाविरोधात् ।

[7]तावद् भेदेऽपि रूपादीनां सहनियमोऽस्ति, मा भूत् सर्वस्यापि, इति स्वभावविशेषादसौ । तत एवैकोपलम्भनियमोऽप्यस्तु । भेदो हि सामग्रीभेदमन्वसाऽनुरुणद्धि । उपलम्भनियमस्तु ज्ञानस्वसंविदितोत्पत्तिकृतः ।

[8]अन्यथा भ्रान्तेतरास्थितिः, निबन्धनाभावात् । सक्लेशसन्ततेरपि विभागोऽस्ति । वासनासन्ध्यसन्धी अपि सदा स्याताम्, विशेषकाभावात् ।

१. पृ० ५९ ॥ २. पृ० ६२ ॥ ३. पृ० ६३ ॥ ४. पृ० ६५ ॥ ५. पृ० ६७ ॥ ६. पृ० ६९ ॥ ७. पृ० ७०॥ ८. पृ० ७२ ॥ ९. पृ० ७६ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कादाचित्कौ तूपादानादपरमपेक्षेते । न चातत्त्वार्थविभागप्रणयनप्रयासः श्रेयान् । अपरमार्थभावना परमार्थावतारायेति महती श्रद्धा । न खलु ध्यानशतैरपि भाविताः मरीचिकाः पयसीभवन्ति । तदर्थ एव सर्वं साधीयः ।

[1]स द्रव्याद्याहितविश्वशक्तिः क्रमाक्रमाभ्यां सातासातोदयक्षयहेतुः । सदसद्रूपते अपि यत्रैकत्र कस्तत्रान्यानवसरः ?

[2]अत एवाणोरेकस्य षडंशतापि । भावभेदेऽप्येकत्वमविरोधि, स्यादभेदात् । अणुत्वं च, अल्पतराभावात् । तन्निबन्धनः स्कन्धोऽपि एकानेकात्मकः । तत् नानारूपत्वात् क्रमज्ञानं नानारूपसन्तानजन्यम्, अन्यथाऽहेतुत्वमपि ।

[3]न चावस्तु प्रतिभासः, विकल्पस्य सम्यगनुभवत्वात् अदुष्टेन्द्रियजत्वात् तदविनाभावात् । क्वचिदविकल्पस्यापि व्यभिचारः ।

[4]न चार्थस्य स्मृत्यादिव्यवधा, आविष्टाभिलापस्यास्य यथासङ्केतक्षयोपशममुपादानभेदादुत्पादात्, अन्तर्बहिर्भाषाद्रव्येभ्योऽपि वा ।

[5]अवहितेन्द्रियस्य बोधात् तत्त्वम् । अर्थात् तद्ग्रहणपरिणतिः । भाषाद्रव्येभ्यः 'अहिरहिः' इत्यभिलापोल्लेखः । अन्यथा स्मृतावपि स न स्यात् ।

[6]उच्चार्यमाणो ध्वनिस्तज्जन्मा अन्य एव । स एव च श्रावणः ।

[7]न चास्य स्वरूपमेव भ्रान्तिहेतुः, अविकल्पस्यापि प्रसङ्गात् ।

[8]पूर्वदृष्टैकत्वग्रहेऽपि अर्थोत्पत्तिस्तुल्या, वस्तुनस्त्रिकालान्वयस्य सद्भूतत्वात् ।

[9]न च पूर्वदृष्टत्वग्रहादेवातीतगोचरत्वादयः, नोइन्द्रियजस्यैव सामर्थ्यात् । इन्द्रियं हि रूपाद्याभास इव भेदान्तरेऽपि समर्थम् ।

[10]स्पार्शनादौ तु स्मार्तो वर्णाद्याभासः, अस्पष्टत्वात्— ऐन्द्रियस्य स्पष्टत्वात्- अनुभवाभावेऽभावाच्च । आशुभवनादेकत्वभ्रमः ।

[11]निश्चयात्मकत्वेऽपि अवायस्य नियतपर्ययपरिच्छेदः, क्षयोपशमस्य द्रव्याद्यपेक्षयाऽल्पशक्तित्वात् । धूमो देशादिभेदैरवच्छिन्नं वह्निं गमयति, इन्द्रियं साक्षाद् बहुतरविशेषैः ।

[12]क्षयोपशमादेव च क्रमः--जनकाध्यापकं पश्यन् जनकत्वं निश्चित्य अध्यापकत्वं निश्चिनोति ।

---

१. पृ० ७८ ॥ २. पृ० ७९ ॥ ३. पृ० ८१ ॥ ४. पृ० ८२ ॥ ५. पृ० ८४ ॥ ६. पृ० ८६ ॥ ७. पृ० ८७॥ ८. पृ० ८८ ॥ ९. पृ० ८९ ॥ १०. पृ० ९०॥ ११. पृ० ९१ ॥ १२. पृ० ९२ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]अव्यक्तासन्मात्रग्रहाद् विशेषावसायो भिन्नगोचरः प्रमाणम् । नेत्रमुन्मीलयतः सन्मात्रावगमोऽनुभवसिद्धः ।

[2]न च क्षयोपशमाधीना छद्मस्थधीर्वस्तुभाविताऽपि यथावस्तु । अनन्तात्मनः कियदग्रहोऽप्यदोषाय ।

[3]तत् प्रमाणस्यावायस्य सामान्यविशेषरूपः प्रतिभासो वस्त्वेव । अन्यथाऽनुगतव्यावृत्तबुद्धि-शब्दावपि न स्याताम्, एकरूपत्वात् ।

[4]एकार्थक्रियाकारित्वेऽपि च न चक्षुरादयः समानबुद्धि-शब्दहेतवः ।

[5]तत्कार्यावधिः समानपरिणामस्तत्राऽप्यस्ति ।

[6]क्रिया अपि विलक्षणा नैकत्वहेतवः । तथा चैकः परामर्शोऽप्यसिद्धः ।

[7]निवृत्तपाकादौ पाचकादौ ज्ञान-शक्त्यपेक्षौ बुद्धि-शब्दौ ।

[8]प्रधानादिकार्यरूपौ तु संकेत-व्यामोहनिमित्तौ, तदभावेऽभावात् । अध्यक्षतो वस्तुमात्रावगमात् ।

[9]वृक्षादिषु स्वतः सर्वस्य समानपरिणामावगमः । शब्दः संकेतमप्यपेक्षते, क्षयोपशमान्यथानुपपादात् ।

[10]न चायं भ्रान्तः, सर्वत्राऽस्खलितत्वात्, निबन्धनाभावाच्च । अतत्कार्यकारणव्यावृत्तिश्चक्षुरादावप्यस्ति । वासनाहेतुर्न सर्वत्र स्यात्, व्यामोहासम्भवात् । तदयं शाश्वतिको निर्भासो बाह्यसदृशपरिणतिनिबन्धनः प्रमाणम् ।

[11]तुल्यज्ञानगोचरो वस्तुभावः समानपरिणामः स सामान्यम् । अन्यो विशेषः । तौ वस्तुनः स्यादभिन्नावन्योन्याविनाभूतौ सद्भूतौ । अत एवाविरोधः ।

[12]प्रतिव्यक्ति भेदाविशेषेऽपि अनयोर्भिन्नधीहेतुत्वम्, सामर्थ्यवैचित्र्यात्, घटोदञ्चनादिवत् ।

[13]अनुगतैकसम्बन्धनिबन्धना तु धीस्तद्वन्त इति स्यात्, भूतवत् कण्ठे गुणेन । न हि सम्बन्धिनाऽपि अन्येन अन्ये समाना नाम । सङ्घ्चादिमन्तोऽपि स्युः । अभिन्नाभिधानप्रत्ययहेतुत्वमपि समवायनिमित्तम् ।

[14]न च यथारूपमन्यधीः, वर्णादिग्रहणपरिणामसंवेदनात् ।

---

१. पृ० ९५ ॥ २. पृ० ९५ ॥ ३. पृ० ९६ ॥ ४. पृ० ९७ ॥ ५. पृ० ९८ ॥ ६. पृ० ९८ ॥ ७. पृ० ९९ ॥ ८. पृ० १०० ॥ ९. पृ० १०० ॥ १०. पृ० १०१ ॥ ११. पृ० १०३ ॥ १२. पृ० १०४ ॥ १३. पृ० १०६ ॥ १४. पृ० १०७ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यक्तेर्वर्णादिप्रतिभासे तुल्यतापि तस्या एवास्तु ।

[1]कथं च स्वाश्रयमात्रव्यापिनः सामान्यस्यान्योत्पत्तौ सम्भवः, स्वव्यक्त्यभावेऽभावात् नित्यत्वात् व्यक्तिशून्यतापादात् ।

[2]सर्वगतत्वे चान्यत्रापि तत्प्रत्ययः स्यात्, समवायभावात् । स्वत्वमपि तन्निबन्धनम् । अस्ति चैकत्रापि अश्वत्व-पशुत्वधीः । विरोधित्वे चासर्वगतत्वम्, अविकलकारणस्य कार्यनिष्ठत्वात् । गोत्वं वा गजत्ववैकल्यायाऽस्तु । अन्योन्यमुभयं वा । ततः प्रत्ययानुत्पत्तिः । को वाऽविशेषे व्यक्तीनां पक्षपातः ?

[3]तत् सद्भूतसामान्यविशेषग्राहिविकल्पाभासस्य वस्तुत्वम् ।

[4]स एव च शब्दविषयः, ततोऽपि तत्प्रत्ययात् । अस्पष्टता त्वक्षाव्यापारात् ।

[5]दूरा-ऽऽसन्नतादिभिरैन्द्रियस्याभासभेदेऽपि न गोचरभेदः । अर्थक्रियाक्षमं तु शब्दादपि तदेव, समानपरिणामात्मनां सत्त्वात् ।

[6]यतो धर्मादिभ्यो व्यावर्तते व्योम स स्वभावः । स एव च प्रत्ययनिमित्तम् ।

[7]सर्वलिङ्ग-सङ्ख्ये च दारादिवस्तुनि लिङ्ग-वचनभेदो नातिदुर्घटः, द्रव्यस्य स्यादभेदात् पर्यायेभ्यः । अत एव शब्दानामभिधेयभेदेऽपि सामानाधिकरण्यं विशेषण-विशेष्यता च ।

[8]न चैते निरभिधेया एव अस्खलत्प्रत्ययजनकत्वात् । न खलु शब्दादर्थं प्रपद्य मरीचिकासु जलमिव मिथ्येति जुगुप्सते । क्वचिद् विसंवादोऽन्यत्रापि समः ।

[9]कथञ्चित् सर्वार्थवाचकत्वेऽपि यथासङ्केतक्षयोपशमं सर्वत्र प्रवृत्तिः ।

[10]तुल्यपरिणामेषु तुल्यपरिणामानां सङ्केतः-एतज्जातीया एतज्जातीयशब्दवाच्या इति । तुल्यपरिणामिता च देशान्तरवर्तिनामप्यस्ति ।

[11]जातिमात्रे त्वनर्थक्रियाकारिणि न सङ्केतः । न खलु वै व्यसनमेवैतच्छब्दसङ्केतनं लोकस्य । किमु सर्व एवास्यारम्भः फलार्थः, निष्फलारम्भस्योपेक्षणीयत्वात् । न च जातिमात्रं दाह-वाहादावुपयुज्यते । विशेषापेक्षायां तु वरं तत्रैव सङ्केतः ।

[12]नाप्यन्यापोहे वस्तुनि, भेदे वस्तुनि प्रवृत्तेरघटनात्, दण्डच्छेदोपदेशे दण्डिनीव । अभेदे मुधा बाह्यो बहिष्कृतः । अवस्तुत्वे न किञ्चिदभिहितम् । प्रत्यक्षसिद्धं च प्रवृत्त्यादि ।

[13]दृश्य-विकल्प्ययोरभेदाध्यवसायेनापि न बाह्ये प्रवृत्तिः, अतुल्यत्वात् ।

---

१. पृ० १०८ ॥ २. पृ० १११ ॥ ३. पृ० ११३ ॥ ४. पृ० ११४ ॥ ५. पृ० ११५ ॥ ६. पृ० ११६ ॥ ७. पृ० ११६ ॥ ८. पृ० ११९ ॥ ९. पृ० १२० ॥ १०. पृ० १२० ॥ ११. पृ० १२१ ॥ १२. पृ० १२२ ॥ १३. पृ० १२३ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]तदवायविषये सामान्यविशेषात्मनि शब्दसङ्केतः । सङ्केतितश्चाभिधेयः ।

[2]एतेन व्यापकानुपलब्धिरपि प्रत्युक्ता, परोक्षस्यैव शाब्दविषयत्वात् । यथा अनुमात्वाभेदेऽपि स्व-परार्थभेदः तथाऽत्रापि ।

[3]तावत् सिद्धा प्रतीतिः । सा चेद् व्यधिकरणादपि भवति, को विरोधः ? यथोपेयदर्शनं ह्यौपयिकक्लृप्तिः । न तु व्यत्ययः । अत एवानुमातोऽपि भिद्यते इति ।

[4]यद्ग्रहणपरिणत्या जाता धीस्तस्य वेदिनी ।
निराकाराऽपि तेनार्थः प्रत्यक्षेणैव सिध्यति ॥१॥
अशुद्धजन्यं स्वापादौ नार्थं तूज्झति शुद्धजम् ।
एकोपलम्भनियमः स्वाभासज्ञानजन्मतः ॥२॥
सदृशा-ऽसदृशग्राह्यग्राह्यवायः प्रपद्यते ।
इन्द्रियैर्जनितत्वेनाऽऽलोचनेव प्रमाणताम् ॥३॥
नासत्यः प्रत्ययः शाब्दोऽस्खलनाद् वञ्चनं समम् ।
सर्वार्थवाचकत्वेऽपि बुद्धिः कारणमीक्षते ॥४॥ इति सङ्ग्रहश्लोकाः ॥

इति द्रव्यालङ्कारे पुद्गलप्रकाशो द्वितीयः प्रकाशः ॥

---

१. पृ० १२४ ॥ २. पृ० १२४ ॥ ३. पृ० १२९ ॥ ४. पृ० १३०-१३१ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथ तृतीयोऽकम्पप्रकाशः ।

[१]अथाऽकम्पानि । गति-स्थित्युपग्राहकौ धर्मा-ऽधर्मौ । देशान्तरप्राप्तिहेतुः परिणामो गतिः । विरुद्धः स्थितिः । तत्पोषक उपग्राहकः ।

[२]एतयोः परिणामिनो भावेऽपि ज्ञानादेरिव चक्षुरादौ धर्मा-ऽधर्मयोरपेक्षा । न क्षित्यादौ, खगादेर्वियत्यपि भावात्, अणूनां च । न वायौ, तत्रापि भावात्। न गतिपूर्वा स्थितिरधर्मे । क्वचिदभावेऽपि भावाच्च ।

[३]नाप्याकाशे, लोकालोकविभागस्याभावप्रसङ्गात्, तस्य तन्निबन्धनत्वात् । जीव-पुद्गलसद्भावे कालस्यापि सद्भावः स्यात्, तत्कार्याणां तत्रापेक्षणात् । न च तद्भावः, सावधित्वाल्लोकस्य । अन्यथा संस्थानाभावः ।

[४]तत एव न शुभाशुभयोः, अव्यापकयोस्तन्निबन्धनत्वे सर्वत्र तत्प्रसङ्गात्, मुक्तेष्वपि भावाच्च, न हि तद्गति-स्थिती पुरुषानुपकुरुतः ।

[५]नाप्यालोक-तमसोः, प्रत्येकमुभयाभावेऽपि भावात् । विशेषाव्यभिचारेऽपि सामान्यं व्यभिचारि । तदेव च पक्षः । गति-स्थितिमत्त्वाच्च ।

[६]सदा सन्निधानेऽपि एतयोः स्वतो गति-स्थितिपरिणामिनामेवोपग्राहकत्वान्न सदा भावः ।

[७]न चैक एवोभयकार्यः, धर्मा-ऽधर्मविभागाभावप्रसङ्गात् । एक एव ह्यन्यतरस्तत्तत्प्रत्ययसन्निधानतः सुख-दुःखहेतुः स स्यात् ।

[८]तत् सकृत् सर्वार्थगति-स्थित्यनुग्राहकौ लोका-ऽलोकव्यवस्थाहेतू धर्मा-ऽधर्मास्तिकायौ सिद्धौ । आगमाच्च । अमूर्तत्वाद्यास्तद्धर्मा इति ।

[९]अवगाहस्य दातृ आकाशम् । नियतस्य तदबहिर्भावोऽवगाहः ।

[१०]न दातृत्वं क्षित्यादौ, तदभावेऽपि भावात्। न पवने, गरीयसा प्रतिस्खलनात्। सर्वेषामव्याप्यवगाहकत्वाच्च ।

[११]न मूर्त्ताभावे, निरुपाख्यस्य दातृत्वाभावात् ।

[१२]आकाशस्तु व्यापितमत्वादवगाह्य एव ।

[१३]तत् सकृत् सर्वार्थावगाहदातृत्वादागमाच्चाकाशसिद्धिः ।

---

१. पृ० १३५ ॥ २. पृ० १३६ ॥ ३. पृ० १३९ ॥ ४. पृ० १४१ ॥ ५. पृ० १४२ ॥ ६. पृ० १४३ ॥ ७. पृ० १४३ ॥ ८. पृ० १४३ ॥ ९. पृ० १४५ ॥ १०. पृ० १४६ ॥ ११. पृ० १४७ ॥ १२. पृ० १४८ ॥ १३. पृ० १४८ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तत्प्रदेशश्रेणयो दिशः, आदित्योदयास्तापेक्षया पूर्वापरादिप्रत्ययहेतुत्वात् । आत्मनि तु स्वरूपनिबन्धन एव । पूर्वस्यां दिशि द्रव्यमिति व्यपदेशाच्छ्रेणिकल्पनाऽवश्यंभाविनी । परमार्थैकदिग्निमित्तत्वे तु अस्खलितः पूर्वादिप्रत्यभेदो न स्यात् । तदाकाशदेशश्रेणय एव दिग्व्यवहारनिबन्धनम् ।

[२] स च लोकालोकभेदाद् द्वेधा । गति-स्थितिमाल्लोकः । तस्य असंख्येयभागादिषु परिणामभेदाज्जीवानामवगाहः । एकप्रदेशादिषु पुद्गलानाम् । धर्माधर्मयोः कृत्स्ने ।

[३] अलोकोऽन्यः । न सतामात्मादीनामभावोऽनात्मा । गुणादयश्च द्रव्यवृत्तयः । परिशेषाद् द्रव्यमनन्तं नभः ।

[४] धर्मादीनि एकद्रव्याणि, अक्रियाणां सर्वत्र एककार्योपलम्भात्, अचेतनानाममूर्तद्रव्यत्वेन वा । अमूर्तत्वं त्वपुद्गलरूपत्वादिति ।

[५] येयं गतिः स्थितिर्वा द्रव्याणामन्यकारणायोगात् ।
धर्माधर्मकृते ते अवगाहो व्योमहेतुस्तु ॥१॥ इति सङ्ग्रहश्लोकः ।

[६] कायः प्रदेशबाहुल्यम् । एकजीव-धर्मा-ऽधर्माणां सकृत्सर्वमूर्ताभिसम्बन्धार्हत्वात् सदेशत्वम् । अन्यथाऽणोरिव तन्न स्यात् । सदेशत्वेन कथञ्चिदनित्यत्वमप्यभिमतम् । देशाश्चासंख्येयाः, लोकाकाशव्याप्तियोग्यत्वादिति ।

[७] आकाशोऽपि सदेशः, सकृत्सर्वमूर्ताभिसम्बन्धार्हत्वात् । अन्यथा सर्वावगाहिनामेकदेशत्वम्, एकदेशावगाढानेकपुद्गलवत् । एकत्रैव चाधेय-स्वरूपभावा-ऽभावौ स्याताम्, विभागादयश्च कस्यचिन्न स्युः ।

[८] लोकाकाशमसङ्ख्येयप्रदेशम्, शश्वदसंहरणधर्मकस्य सावधित्वात् ।

[९] सर्वमनन्तप्रदेशम्, अलोकाकाशस्यानन्तत्वादिति । [१०] अनेकप्रदेशः स्कन्धः । भावांशैरणुः कायः ।

[११] उत्पाद-व्यय-ध्रौव्याणि वा कायः, प्रतिक्षणमविकारिणोऽर्थक्रियाऽभावात्, समर्थस्य सदा जनना-ऽजननप्रसङ्गात् । अपेक्ष्यस्यानुवर्तिनः पूर्वरूपस्य निवृत्तिः, तस्य कार्यविरोधात् । कार्योत्पत्तौ वा निवृत्तिः । उत्तरमपि वा जनयेत् ।

---

१. पृ० १४८-१४९ ॥ २. पृ० १५२ ॥ ३. पृ० १५४ ॥ ४. पृ० १५५ ॥ ५. पृ० १५६ ॥ ६. पृ० १५७॥ ७. पृ० १५९ ॥ "तथा च **द्रव्यालङ्कारकारौ**- 'आकोशोऽपि सदेशः, सकृत् सर्वमूर्ताभिसम्बन्धार्हत्वात्' इति" इति आचार्यश्री**मल्लिषेणसूरि**विरचितायां **स्याद्वादमञ्जर्याम्**, श्लो० ९ ॥ ८. पृ० १६१ ॥ ९. पृ० १६१ ॥ १०. पृ० १६२॥ ११. पृ० १६२ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवमयमशीर्णाशेषरूपो यदि प्रसह्य कृतमपि करोति ।

[1]तत् प्रतिक्षणं कथञ्चिद् विकारिण एवार्थक्रिया । एकान्तक्षणिकेऽपि तदयोगात्, निरन्वयनाशिनः कार्योत्पत्त्यभावात् । न हि निरुपाख्यस्य जन्माभिसम्बन्धः, सर्वतः सर्वस्यानुत्पादात् ।

[2]कारणशक्तिनियमोऽपि असत्त्वाविशेषादसन् । कारणान्यपि कार्यजननसामर्थ्यमात्रमनवधिकं जनयेयुः, अवधेरभावात् ।

[3]नियतदर्शनं नियतोत्पादाविवादे नियतशक्तिमवगमयेत् ।

[4]उत्पत्तिर्भावसत्तैव । नास्याः प्रतिपत्ताऽस्ति । किन्तु कुतोऽप्यतर्कितेयमुपलभ्यत इति । क एवं वादी सम्भवति ? मुहुर्मुहुः प्रपीयमानातिस्निग्धदुग्धरसोपचयोपचिताजीर्णदोषेणाऽपि नाम भिक्षुः सम्भवति । केनचिदात्मना हि सन् शक्येतात्मनि कमपि विशेषमाधातुम् । सर्वथा निरुपाख्यस्तु कं रूपहेतुनियममुपादित्सेत ? पर्यायोत्पत्तेः द्रव्यं सदवधेः ।

[5]तन्न निरन्वयनाशिनः कार्योत्पत्तिः । कार्यकारणभावावगमोऽप्येवं न स्यात्, अन्वयिनो ग्राहकस्याभावात् प्रत्येकं स्वगोचरमात्रसंवेदनात् । न ह्यगृहीतावधिनाऽवधिमत्त्वग्रहः । विशष्टोऽपि हि स्वभावो नानवधिः । मा भूदविशिष्ट इति । अनुभवाविदितं च विकल्पयन् विकल्पः कथमुपादेयः स्यात् ? । तन्न कार्यकारणभावावगमः ।

[6]युगपत् कर्तृत्वमपि न स्यात्, एकरूपोद्भवस्यैकरूपत्वात् । हेतु-प्रत्ययत्वे अपि वस्तुसती न निरंशस्य । अवस्तुत्वे तदवस्थः प्रसङ्गः ।

[7]एकस्य भिन्नकालाद्यपेक्षया कर्तृत्वं क्रमः । सोऽपि वर्तमानकालावस्थायित्वात् तत्त्वतः सन्तानस्याभावाच्च न स्यात् । [8]संवत्सरस्थितिस्वभावस्य समयाद्यतिक्रमात् स्यान्निवृत्तिः, संवत्सरस्यासमयादिरूपत्वात् । शेषस्यान्वयः ।

[9]विनाशाहेतुकत्वं प्रतिक्षणविकारितामुपनयेत्, न निरन्वयनाशिनम्, तत्राव्याप्तेः । न च तत् सिद्धमपि, उत्तरपरिणामांशरूपत्वाद् विनाशस्य । स च कारणान्वय-व्यतिरेकानुविधायी सिद्धः । [10]न च पूर्वोत्तरयोर्भेदो येन पूर्वस्योपलम्भादि स्यात् । किमु स एवोत्तरीभवति । मृदादेरुपलम्भोऽप्यस्ति ।

---

१. पृ० १७० ॥ २. पृ० १७१ ॥ ३. पृ० १७३ ॥ ४. पृ० १७३ ॥ ५. पृ० १७५-१७६ ॥ ६. पृ० १७८॥ ७. पृ० १७९ ॥ ८. पृ० १८० ॥ ९. पृ० १८१ ॥ १०. पृ० १८२ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रदीपादेस्तमसादिभावो भावान्तरम् ।

[1]प्रागभावाभाव एव भावोद्भवः, न प्रध्वंसाभावाभावे ।

[2]अनर्पितसदनुवेधः पररूपनिषेधः प्रसज्यनञर्थः । [3]अपेक्षितहेतवोऽपि विसभागक्षणादयोऽवश्यम्भाविनः । [4]स्वहेतुभ्यस्तत्तद्धेतुयोगतस्तथा तथा परिणामिनो भावाः । [5]तन्न विनाशाहेतुकत्वमपि निरन्वयनाशाय ।

[6]सान्वयनाशित्वं चानुवृत्त-व्यावृत्तवस्तुग्रहणपरिणामप्रत्यक्षसिद्धम् । न हि भेदाविशेषेऽपि घट-पटादिष्विव स्थास-कोशादिषु विलक्षणैव प्रतिपत्तिः, मृदेकत्वसंवेदनात् । न च मृदेकत्वेऽपि स्थास-कोशादीनामेकैव संवित्तिः, आकारभेदसंवेदनात् । नापि सर्वस्य सर्वत्रास्खलितः प्रत्ययो भ्रान्तः । लूनपुनर्जातकदलीस्तम्भादिष्वपि नैकान्तानन्वयो नाशः ।

[7]न चायमेकान्तक्षणिकेषूपपद्यते, अनुवृत्ताकारस्यापि भावात् । न चायं सदृशापरापरोत्पत्तितः, एकोऽयमिति भावात् । अन्यथा सदृशोऽयमिति स्यात् ।

[8]तदनुभवसिद्धोत्पाद-व्यय-ध्रौव्यसमुदयः कायः । न चैवं विरोधः, असम्भवात्। तथैव प्रमाणभावाच्च । प्रमाणानुपपत्तिर्हि विरोधलक्ष्म ।

[9]अविकलकारणस्य भवतोऽन्यभावेऽभावगतिः प्रमाणेन सहावस्थानानुपपत्तेरन्या का ?

[10]स्यादपि सदैव पृथगाश्रयोपलब्धानामेकाश्रययोजनायां विरोधसम्भावना । न चोत्पाद-व्यय-ध्रौव्याणि सदा परस्परानुवेधेन पृथगाश्रयोपलब्धानि ।

[11]अत एव नैकव्यवच्छेदेनाऽपरपरिच्छेदः । यत् पुनरुभयांशार्पणया एकशब्देन वस्तुस्वरूपानभिधानं तत्रापराध्यति क्षयोपशमः । तन्नोत्पाद-व्यय-ध्रौव्याणां युगपद्भावेऽपि विरोधः ।

[12]अत एवैकं सदसद्रूपमपि, स्वरूपाद्यैः सत् पररूपाद्यैरसत् । अन्यथा प्रतिनियतरूपाद्येव न स्यात् ।

[13]न च स्वरूपादिसत्त्वमेव विशिष्टं पररूपाद्यसत्त्वम्, अपरासत्त्वाभावे वैशिष्ट्यस्यैवाभावात् ।

[14]सदसद्रूपाद्धेतोरेव सदसद्रूपोत्पत्तिः, नोत्पन्नस्यासत्त्वेन परतो भेदः ।

---

१. पृ० १८३ ॥ २. पृ० १८४ ॥ ३. पृ० १८५ ॥ ४. पृ० १८७ ॥ ५. पृ० १८७ ॥ ६. पृ० १८८ ॥ ७. पृ० १९० ॥ ८. पृ० १९४ ॥ ९. पृ० १९७ ॥ १०. पृ० १९७ ॥ ११. पृ० १९८ ॥ १२. पृ० १९९ ॥ १३. पृ० २०० ॥ १४. पृ० २०१ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]एकनिमित्तत्वे शब्दप्रत्ययभेदोऽपि न स्यात्, निमित्तवैरूप्यजत्वान्निमित्ति-वैरूप्यस्य । अन्यथा न प्रतिनियतोपादानपरिग्रहः । पीतमेव वा सकलनीलादिप्रत्ययहेतुः स्यात् ।

[2]एकस्मादनेकसंविदां भावेऽपि न विजातीयत्वम्, सर्वज्ञताभेदप्रसङ्गात् । न चार्थनिबन्धनास्तद्बुद्धयः, अतीतादिषु भावात् । अन्यथा तद्रूपतैव न स्यात् ।

[3]न च विकल्पधियो न प्रमाणम्, सम्यगनुभवत्वात् । तदस्खलितशब्दप्रत्ययभेदो भिन्नहेतुरेव ।

[4]पररूपासत्त्व-स्वरूपसत्त्वयोरभेदेऽपि न पररूपासत्त्ववत् स्वरूपसत्त्वस्य सर्वत्र भावः, सर्वत्र सता स्वरूपासत्त्वेन बाधनात्, पररूपासत्त्वस्य प्रतिव्यक्ति भिन्नत्वाच्च ।

[5]सदसद्रूपते स्वतो धर्मिणश्च स्यादभेदिन्यौ, धर्म-धर्मिणोरेकान्तभेदा-ऽभेदयोः सम्बन्धाभावात् । तदेकं सदसद्रूपमिति ।

[6]एवं सप्तभङ्ग्यपि सिद्धा ।

[7]कायः प्रदेशबाहुल्यं भावांशैस्तदणोः पुनः ।
उत्पाद-व्यय-ध्रौव्याणां यद्वा कायः समुच्चयः ॥१॥

अर्थक्रिया हि नैकान्तनित्यानित्येषु युज्यते ।
सदाभावप्रसङ्गः स्यान्नासतो हेतु-कार्यते ॥२॥

प्रमाणानुपपत्तिर्या तद् विरोधस्य लक्षणम् ।
न खल्वन्यत् ततस्ताप-शीतयोरपि लक्ष्यते ॥३॥

उत्पाद-व्यय-ध्रौव्याणां सतामेकत्र नास्ति सा ।
अतश्च सदसद्रूपमेकमप्युपपद्यते ॥४॥ इति सङ्ग्रहश्लोकाः ।

कालश्चेत्येके ।

इति द्रव्यालङ्कारः परिपूर्यते स्म ॥

कृतिरियं पण्डितरामचन्द्र-गुणचन्द्रयोः ।

भद्रं भवतु श्री संघस्य ।

---

१. पृ० २०१ ॥ २. पृ० २०२ ॥ ३. पृ० २०३ ॥ ४. पृ० २०३ ॥ ५. पृ० २०५ ॥ ६. पृ० २०८ ॥ ७. पृ० २१३ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

द्रव्यालङ्कारे निर्दिष्टानां संग्रहश्लोकानां सूचिः ।

धर्मः फलं वा भूतानामुपयोगो भवेद्यदि ।
प्रत्येकमुपलम्भः स्यादुत्पादो वा विलक्षणात् ॥ पृ. ३

आत्मा कायप्रमाणोऽयं स्वसंवेदनमास्थितः ।
मेयत्वात् परवेद्यत्वसिद्धौ जाड्यं न किं ततः ॥ पृ. ६

बुद्धि- चैतन्ययोरैक्ये जाड्यं बुद्धेरधिस्थितः ।
आत्मानमजडं जल्पन् कथं न स्यादमूढधीः ॥ पृ. ६

नामूर्तं व्योमवन्मूर्तैर्बिम्ब्यते जडतान्यथा ।
सारूप्यं च न किं ज्ञाने चित्रे चानेकता कथम् ॥ पृ. ६

प्रमाणपञ्चकादस्मिन्नाप्ते सिद्धे प्रपञ्चतः ।
अजडात्मा निषेधाय प्रयत्नं विदधीत कः ॥ पृ. ९

प्ररूढमपि रागादि स्वहेतुपरिपन्थिनि ।
पुष्टिं प्रयाते प्राप्नोति क्षयं हेतुक्षयान्मुहुः ॥ पृ. ९

यदा प्राणादिमान् कायः सिद्ध एकेन लाञ्छितः ।
निर्विवादं तदा सिद्धाः सर्वाः स्मृत्यादिसम्पदः ॥ पृ. १०

स्पर्श-रस-गन्ध-वर्णा अन्योन्यमविनाभुवः ।
मूर्तिस्तदङ्किता ये ते पुद्गला द्विविधाश्च ते ॥१॥ पृ. १३

अणुः स्कन्धश्च तत्राणुराद्यं स्कन्धनिबन्धनम् ।
द्रव्यतो भागनिर्मुक्तो भावतो भागवानपि ॥२॥ पृ. १३

तत्संघात-विभेदोत्थः स्कन्धो द्व्यण्वादिरंशवान् ।
विचित्रभावोऽध्यक्षश्चोद्भूताध्यक्षत्वयोगतः ॥३॥ पृ. १४

मनस्तमःशब्दोद्द्योताः स्कन्धस्यैव प्रभित्तयः ।
पौद्गलिकत्वमेषां तु प्रसिद्धं स्वस्वलिङ्गतः ॥४॥ पृ. १४

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यद्ग्रहणपरिणत्या जाता धीस्तस्य वेदिनी ।
निराकाराऽपि तेनार्थः प्रत्यक्षेणैव सिध्यति ॥१॥ पृ. १७

अशुद्धजन्यं स्वापादौ नार्थं तूज्झति शुद्धजम् ।
एकोपलम्भनियमः स्वाभासज्ञानजन्मतः ॥२॥ पृ. १७

सदृशा-ऽसदृशग्राह्यग्राह्यवायः प्रपद्यते ।
इन्द्रियैर्जनितत्वेनाऽऽलोचनेव प्रमाणताम् ॥३॥ पृ. १७

नासत्यः प्रत्ययः शाब्दोऽस्खलनाद् वञ्चनं समम् ।
सर्वार्थवाचकत्वेऽपि बुद्धिः कारणमीक्षते ॥४॥ पृ. १७

येयं गतिः स्थितिर्वा द्रव्याणामन्यकारणायोगात् ।
धर्माधर्मकृते ते अवगाहो व्योमहेतुस्तु ॥ पृ. १९

कायः प्रदेशबाहुल्यं भावांशैस्तदणोः पुनः ।
उत्पाद-व्यय- ध्रौव्याणां यद्वा कायः समुच्चयः ॥१॥ पृ. २२

अर्थक्रिया हि नैकान्तनित्यानित्येषु युज्यते ।
सदाभावप्रसङ्गः स्यान्नासतो हेतु-कार्यते ॥२॥ पृ. २२

प्रमाणानुपपत्तिर्या तद् विरोधस्य लक्षणम् ।
न खल्वन्यत् ततस्ताप-शीतयोरपि लक्ष्यते ॥३॥ पृ. २२

उत्पाद-व्यय-ध्रौव्याणां सतामेकत्र नास्ति सा ।
अतश्च सदसद्रूपमेकमप्युपपद्यते ॥४॥ पृ. २२

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

॥ श्री ऋषभदेवस्वामिने नमः ॥
॥ श्री शङ्खेश्वरपार्श्वनाथाय नमः ॥
॥ 'धामा'मण्डन श्री शान्तिनाथाय नमः ॥
॥ णमोऽत्थु णं समणस्स भगवओ महइमहावीरवद्धमाणसामिस्स ॥
॥ श्री गौतमस्वामिने नमः ॥
॥ श्री सद्गुरुदेवेभ्यो नमः ॥

परमार्हतकुमारपालभूपालप्रतिबोधक–कलिकालसर्वज्ञाचार्यश्रीहेमचन्द्रसूरीश्वरशिष्याभ्याम्
आचार्यश्रीरामचन्द्र-गुणचन्द्राभ्यां विरचितः स्वोपज्ञटीकासहितः

द्रव्यालङ्कारः

॥ *द्वितीयः पुद्गलप्रकाशः ॥

॥ अर्हँ ॥

मूर्तिमन्तः पुद्गलाः । स्पर्श-रस-गन्ध-वर्णा मूर्तिः । संस्थानं तु व्यभिचारि, धर्मा-ऽधर्म-मुक्तात्मनां लोक-शरीरसंस्थानत्वात् ।

॥ स्वोपज्ञटीका ॥

एवं तावद् द्रव्यपञ्चकमध्याज्जीवद्रव्यं स्व-परपरिज्ञानसम्पदा सकलद्रव्याणां

* सिद्धहेमशब्दानुशासनादिविविधग्रन्थप्रणेतृणां जैनाचार्याणां श्रीहेमचन्द्रसूरीणां रामचन्द्र-गुणचन्द्रप्रभृतयो बहवः शिष्या आसन्, तेषु रामचन्द्रः प्रधानशिष्यः । आचार्यरामचन्द्रेण बहवो ग्रन्था विरचिताः, तेषु स्वोपज्ञटीकासहितो द्रव्यालङ्कारग्रन्थ आचार्यरामचन्द्र-गुणचन्द्राभ्यां समीलय विरचितः ।

जैनानां मते द्विविधानि द्रव्याणि – जीवा अजीवाश्च । अजीवाः पञ्चधा पुद्गल-धर्मा-ऽधर्मा-ऽऽकाश-कालभेदात । एवं च एतेषां षण्णां द्रव्याणां यद्वा कालस्य जीवाजीवपर्यायरूपतया जीवादिषु पञ्चसु द्रव्येष्वन्तर्भावात् अस्तिकायात्मकत्वाभावाच्च पञ्चानाम् अस्तिकायद्रव्याणां स्वरूपं तार्किकशैल्या रामचन्द्र-गुणचन्द्राभ्यामेव प्रथमं निरूपितं द्रव्यालङ्कारग्रन्थे । अत्र ग्रन्थे त्रयः प्रकाशा वर्तन्ते, तत्र प्रथमे जीवप्रकाशे जीवस्वरूपं, द्वितीये पुद्गलप्रकाशे पुद्गलस्वरूपं, तृतीयेऽकम्पप्रकाशेऽवशिष्टानां धर्मादिद्रव्याणां स्वरूपं वर्णितम् । अस्य ग्रन्थस्य अतिविस्तृता स्वोपज्ञटीकापि आचार्यरामचन्द्र-गुणचन्द्राभ्यां विरचिता । द्रव्यालङ्कारस्य विक्रमसंवत् १४९२ वर्षे लिखित एकः आदर्शः 'अहम्मदाबाद' नगरे 'हाजापटेलनी पोल' मध्ये संवेगी-उपाश्रये, अपरश्चादर्शो राजस्थाने 'बेडा' नगरे विद्यते । किन्तु तालपत्रोपरि विक्रमसंवत् १२०२ वर्षे लिखितो द्रव्यालङ्कारटीकाया एक एव हस्तलिखित आदर्शो जेसलमेरुदुर्गे जिनभद्रसूरिसंस्थापिते

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मूर्द्धाभिषिक्तं प्रथमं व्याख्यायाधुना तेदत्यन्तोपकारकं पुद्गलद्रव्यं व्याख्यातुं तल्लक्षणमुच्यते। लक्षणं च क्वचिदभिन्नं भवति यथाऽग्नेरौष्ण्यम्, क्वचित्तु भिन्नं यथाऽग्नेरेव धूमः। तदत्र पुद्गलद्रव्यस्याभिन्नं लक्षणमभिधातुकामः प्राह—'मूर्तीति। ये पुद्गलाः सकललोकविश्रुतास्ते मूर्तिमन्तः, तेषां मूर्तिमत्त्वं लक्षणमित्यर्थः। "तदस्यास्त्यस्मिन्निति मतुः" [सि० ७।२।१] इति मतुप्रत्ययो मूर्ति-मूर्तिमतां कथञ्चिदभेदान्नित्ययोगे भवति। पूरणाद् 5
2A गलनाच्च पुद्गलाः परमाणुप्रभृतयोऽनन्तानन्तपरमाणुस्कन्धपर्यवसाना गृह्यन्ते। बहुवचननिर्देशो जीवद्रव्यवत् पुद्गलद्रव्यस्यानेकत्वप्रतिपादनार्थः। पुद्गलद्रव्यं ह्यनन्तभेदम्।

ननु सर्वमपि वाक्यं सावधारणमेव, निरवधारणस्योच्चारणवैयर्थ्यात्। अवधारणं च स्वयोगव्यवस्था-ऽन्ययोगव्यवच्छेदा-ऽत्यन्तायोगव्यवच्छेदैस्त्रेधा, यथा चैत्रो धनुर्धर एव, पार्थ एव धनुर्धरः, नीलं सरोजं भवत्येव। तदत्र कथमवधार्यते? उच्यते, द्वेधा—मूर्तिमन्त 10
एव पुद्गलाः, न कदाचिदप्यमूर्तिमन्तः। तथा मूर्तिमन्तः पुद्गला एव, नान्यानि जीवद्रव्याणीति।

अथ मूर्तिमाह—स्पर्शेति। येऽमी स्पर्श-रस-गन्ध-वर्णास्ते मूर्तिरिति भण्यन्ते। तत्र
2B स्पर्शग्रहणमादौ सर्वसंसारिजीवग्रहणयोग्यत्वात्। अनन्तरं रसग्रहणम्, स्पर्शग्रहणे सति 15
तद्ग्रहणात्, स्पर्शग्रहणानन्तरभावि हि रसग्रहणं। वर्णात् प्राग् गन्धवचनमचाक्षुषत्वात्। अन्ते वर्णग्रहणं स्थौल्ये सति तदुपलम्भात्।

नन्वन्ये संस्थानं मूर्तिमाहुः, तत् किमुच्यते स्पर्शादयो मूर्तिरित्यत आह—संस्थानं त्विति। संस्थानं पुनर्यदि मूर्तिशब्देनोच्येत तदा पुद्गललक्षणं व्यभिचारि स्यात्, अपुद्गलरूपाणामपि धर्मादीनां पुद्गलत्वप्रसङ्गात्। कुतः? धर्माधर्मेति। धर्माधर्म-शब्दाभ्यां धर्मास्तिकाया-ऽधर्मास्तिकायौ वक्ष्यमाणौ गृह्यते, न तु पुण्य-पापे, तयोः 20

ग्रन्थभाण्डागारे विद्यते, किन्तु दुर्दैवात् प्रथमप्रकाशस्य टीका तत्र न लभ्यते, केवलं द्वितीय-तृतीय-प्रकाशयोरेव टीका तत्र विद्यते, अस्मिन्नादर्शे मूलं नास्ति केवलं टीकैवास्ति, किन्तु ग्रन्थकृद्भ्यां लिखितानि बहूनि टिप्पणानि तत्र सन्ति, तेषु च टिप्पणेषु सूत्राण्यपि तत्र तत्र निर्दिष्टानि विद्यन्ते। एतानादर्शान-वलम्ब्य मूलं टीकाग्रन्थश्चिप्पणानि चात्र अस्माभिर्मुद्रयन्ते। यानि तु टिप्पणानि अस्माभिरत्र निर्दिष्टानि तानि * एतादृशेन चिह्नेन अङ्कितानीति ध्येयं सुधीभिः॥ 25

१ जीव॥ २ मूर्तिमन्तः पुद्गलाः॥ ३ स्पर्शरसगन्धवर्णा मूर्तिः॥ ४ किमर्थम्॥ ५ त्रयो-ऽप्येतेऽचाक्षुषाः॥ ६ पूर्वेषां सूक्ष्मत्वेऽपि॥ ७ संस्थानं तु व्यभिचारि॥ ८ अतिप्रसङ्गि॥ ९ धर्मा-धर्ममुक्तात्मनां लोकशरीरसंस्थानत्वात्॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पुद्गलत्वस्येष्टत्वात् । मुक्तात्मानः प्रक्षीणाशेषकर्माणः समधिरूढसिद्धशिलास्थला जीवाः ।
3A तेषां धर्मास्तिकाया-ऽधर्मास्तिकाय-मुक्तात्मनां लोके शरीरसंस्थानत्वात्, लोक-शरीरयोः संस्थानं संस्थानं येषामिति " उष्ट्रमुखादयः " [सि० ३–१–२३] इत्येकसंस्थानपद-लोपी समासः । धर्माधर्मास्तिकायनिमित्तैगतिस्थितिव्यवच्छिन्नो व्योमभागो लोकः, यद्वक्ष्यामः " गति-स्थितिमाँल्लोकः " इति । तत्र धर्माधर्मास्तिकाययोर्लोकसंस्थानमेव संस्थानम्, ताभ्यामखिलस्यापि लोकस्य व्याप्तत्वात्, लोकस्य च संस्थानं प्रतिपन्नवैशाख-स्थानस्य कटितटावस्थितकरयुग्मस्य पुरुषस्य यादृशं तादृशं भवति । तदुक्तम्– 5

" वैशाखस्थानस्थः पुरुष इव कटिस्थकरयुग्मः ॥ " [प्रशमरतौ २१०] इति ।

3B मुक्तात्मनां पुनस्त्रिभागन्यूनस्वशरीरसंस्थानमेव संस्थानम्, तदुक्तम्–

" जं संठाणं तु इहं भवं चयंतस्य चरिमसमयम्मि । 10
आसी य पएसघणं तं संठाणं तहिं तस्स ॥
दीहं हस्सं वा वा जं चरिमभवे हवेज्ज संठाणं ।
तत्तो तिभागहीणा सिद्धाणोगाहणा भणिया ॥ "

[आवश्यकनिर्युक्तौ गा० ९६९–९७०] इति ।

तस्माद् यदि संस्थानं मूर्तिशब्देनोच्येत तदा धर्मादीनामपि तस्य भावात् पुद्गल- 15
लक्षणं व्यभिचारि स्यादिति स्पर्शादय एव मूर्तिः । तथाऽसर्वगतद्रव्यपरिमाणमपि मूर्तिशब्देन नोच्यते, आत्मनामपि पुद्गलत्वप्रसङ्गात्, [६]तेषामसर्वगतत्वस्य प्रसाधितत्वात् ।

सम्प्रति प्रत्येकं स्पर्शादीनां लक्षणं भेदांश्च प्रतिपादयति–

**स्पर्शनेन ग्राह्यः परिणामः कठिनादिरष्टधा स्पर्शः । प्रायोऽ-नमनस्य हेतुः कठिनः । सन्नतेर्मृदुः । अधोगतेर्गुरुः । तिर्यगूर्ध्वगते- 20
र्लघुः । काठिन्या-ऽपाकयोः शीतः । मार्दव-पाकयोरुष्णः । चिक्कणत्वा-ऽचिक्कणत्वे स्निग्ध-रूक्षाविति ।**

[७]स्पर्शनेन स्पर्शनेन्द्रियेण ग्राह्यो विषयीकार्यो यो वस्तुनः परिणामः पर्यायविशेषः
4A कठिनादिः स स्पर्श इति सम्बन्धः । आदिग्रहणाद् मृदु-गुरु-लघु-शीतोष्ण-स्निग्ध-रूक्षाणां

१ वैशाखस्थानस्थ इति ॥ २ * तुला–" लोक्यत इति लोकः ।.....स च धर्माधर्मास्तिकायव्यवच्छिन्नम- 25
शेषद्रव्याधारं वैशाखस्थानस्थकटिन्यस्तकरयुग्मपुरुषोपलक्षितमाकाशखण्डं पञ्चास्तिकायात्मको वेति । " — **आचाराङ्गटीका** पृ० ८३ ४ ॥ ३ प्रस [प्रथमसमासः = बहुव्रीहिः अत्र विवक्षित इत्यर्थः] ॥ ४ '३' [तृतीया विभक्तिरत्र विग्रहे ज्ञेया] ॥ ५ विशेषितः ॥ ६ आत्मनाम् ॥ ७ अस्माकं मते ॥ ८ **स्पर्शनेन ग्राह्य. परिणामः कठिनादिरष्टधा स्पर्शः** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ग्रहः । एतावल्लक्षणम्—यो वस्तूनां परिणामविशेषः स्पर्शनेन्द्रियेण गृह्यते स स्पर्श इति । अष्टधेति भेदकथनम्, तस्य स्पर्शस्याष्ट भेदा भवन्ति, यः स्पर्शनेन ग्राह्यो यश्चाष्टभेद इति विशेषणमनुच्चयात् स्पर्शाभावेन न व्यभिचारः । स हि स्पर्शनग्राह्यो भवति, न त्वेष्टभेदः । एवं रसादिष्वपि योज्यम् ।

सम्प्रति स्पर्शभेदानपि यथाक्रमं लक्षयति–अनमनस्य वस्तूनामसंनतेः प्रायो यो हेतुः 5
कारणं स्पर्शः स कठिन इत्युच्यते । यतः स्पर्शाद्वस्तूनाम् नमनक्रियाऽभावः स स्पर्शः कठिन इत्यर्थः । 'प्रायः'शब्दः संन्तोऽकृत्मनबहुत्ववचनोऽव्ययम्, अयं च यथासम्भवमुत्तरत्र सम्बन्धनीयः ।

४B तथा [१]संनतेर्वस्तूनां मंनमनस्य यो हेतुः स्पर्शः स मृदुरित्युच्यते । यतः स्पर्शाद्वस्तूनां नमनक्रिया स स्पर्शो मृदुरित्यर्थः । पूर्वसूत्रोपात्तं हेतुपदं सर्वेष्वप्युत्तरेषु भेदलक्षणसूत्रेषु 10
षष्ठ्यन्तपदे सम्बध्यते ।

तथा [२]अधोगतेर्वस्तूनामधोगमनस्य यो हेतुः स्पर्शः स गुरुरित्युच्यते । यतो वस्तूनामधोगमनक्रिया स स्पर्शो गुरुरित्यर्थः ।

३A तथा [३]वस्तूनां तिर्यक् ऊर्ध्वं च गतेर्गमनस्य यो हेतुः स्पर्शः स लघुरित्युच्यते । यतो वस्तूनां तिर्यगूर्ध्वं च गमनम् स स्पर्शो लघुरित्यर्थः । 'प्रायः'शब्दानुवृत्तेः परमा- 15
णूनां कदाचिदधोगमनेन व्यभिचारपरिहारः । लघुः पृथक् स्पर्शो न प्राप्नोति गुरुत्वाभावरूपत्वात्तस्येति चेत्, न, गुरुत्वस्यापि लघुत्वाभावरूपत्वप्रसङ्गात् । गुरुत्वस्याभावरूपत्वे तारतम्यं न प्राप्नोतीति चेत्, न, लघुत्वस्यापि गुरुत्वाभावरूपत्वेन तारतम्याभावप्रसङ्गात् । तस्माद् गुरुत्व-लघुत्वे पृथगेव स्पर्शाविति ।

तथा [४]वस्तूनां [५]कौठिन्यस्याऽपाकस्य चाक्लिन्नतायाः प्रायो यो हेतुः स्पर्शः स 20
३B शीत इत्युच्यते । यतो वस्तूनां काठिन्या-ऽपाकौ भवतः स स्पर्शः शीत इत्यर्थः ।

तथा [६]वस्तूनां मार्दवस्य मृदुतायाः पाकस्य च विक्लित्तेर्यो हेतुः स्पर्शः स उष्ण इत्युच्यते । यतो वस्तूनां मार्दव-विक्लित्ती भवतः स स्पर्श उष्ण इत्यर्थः ।

१ अभावस्यैकरूपत्वात् ॥ २ प्रायोऽनमनस्य हेतुः कठिनः ॥ ३ सकारान्तः * ॥ ४ सन्नतेर्मृदुः ॥ ५ तिनसादीनाम् ॥ ६ अधोगतेर्गुरुः ॥ ७ तिर्यगूर्ध्वगतेर्लघुः ॥ ८ इदं गुरु इदमतिशयेन गुरु इति 25
तारतम्यं न स्यादभावरूपस्य तारतम्यासम्भवात् ॥ ९ हिमादीनाम् ॥ १० काठिन्यापाकयोः शीतः ॥ ११ मार्दवपाक्योरुष्णः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथा वस्तूनां ये चिक्कणत्वा-ऽचिक्कणत्वे ते यथासंख्यं स्निग्ध-रूक्षौ स्पर्शौ वेदितव्यौ । चिक्कणत्वपरिणामः स्निग्धः, अचिक्कणत्वपरिणामस्तु रूक्षः । इदं च [2]स्वरूपमेव
6A लक्षणमग्नेरौष्ण्यमिव । ये तु बन्धाबन्धहेतुत्वं[3] लक्षणमाहुस्तेषां स्वरूपसंकरप्रसङ्गः, उभयोरप्युभयहेतुत्वात् । एतच्चोत्तरत्र वक्ष्यामः । 'इति'करणः स्पर्शभेदेयत्तावद्योतकः । न रूक्षो नाम गुणोऽस्ति स्नेहाभावे रूक्षव्यवहारसिद्धेरिति चेत्, न, रूक्षाभावे स्नेह- 5
6B व्यवहारप्रसङ्गात् स्नेहस्याप्यभावापत्तितः[4], शीताभावे उष्णव्यवहारप्रसक्त्योष्णगुणाभावानुषङ्गाच्च । स्पर्शनेन्द्रियज्ञाने शीतवदुष्णगुणस्य प्रतिभासनादुष्णो गुणः स्पर्शविशेषोऽस्तीति चेत्, तर्हि स्नेहवत् स्पर्शनेन्द्रियज्ञाने रूक्षस्यावभासनात् कथं रूक्षो गुणो न स्यात्, तस्य बाधकाभावेनाऽप्रतिक्षेपार्हत्वात् ? तस्मात् स्निग्ध-रूक्षौ चिक्कणत्वा-ऽचिक्कणत्वपरिणामरूपौ पृथगेव गुणाविति । 1

एवं स्पर्शस्य लक्षणं भेदान् [5]भेदलक्षणं चाभिधाय रसस्य प्रतिपादयति—

रसनेन तिक्तादिः पञ्चधा रसः । कफशान्तेस्तिक्तः । पाटवस्य च कटुः । रक्तदोषादिशान्तेः कषायः । आस्रवण-क्लेदनयोरम्लः । ह्लादन-बृंहणयोर्मधुरः । लवणो मधुरान्तर्गतः संसर्गजो वेति ।

[6]रसनेन रसनेन्द्रियेण ग्राह्यो यो वस्तूनां परिणामस्तिक्तादिः स रस इति सम्बन्धः । 15
7A 'आदि'ग्रहणात् कटु-कषाया-ऽम्ल-मधुराणां परिग्रहः । एतावल्लक्षणम्–' यो वस्तूनां परिणामविशेषो रसनेन्द्रियेण गृह्यते स रसः ' । पञ्चधेति भेदकथनम् । तस्य रसस्य तिक्तादयः पञ्च भेदा भवन्ति ।

सम्प्रति रसभेदानपि यथाक्रमं लक्षयति—[7]कफस्य श्लेष्मणः शान्तेरुपशमस्य यो हेतू रसः स तिक्त इत्युच्यते । यतः श्लेष्मोपशमो भवति स रसस्तिक्त इत्यर्थः । 20

तथा पाटवस्य गलामयशोकादिघातेन पटुतायाश्चकारात् कफशान्तेर्यो हेतू रसः स कटुरित्युच्यते । यतः शरीरपाटव-कफशान्ती भवतः स रसः कटुरित्यर्थः ।

7B तथा [8]रक्तदोषस्य 'आदि'शब्दात् कफपित्तयोश्च शान्तेर्यो हेतू रसः स कषाय इत्युच्यते । यतो रक्तदोषादि निवर्त्तते स रसः कषाय इत्यर्थः ।

१ चिक्कणत्वाचिक्कणत्वे स्निग्धरूक्षाविति ॥ २ पूर्वेषां स्पर्शानां कार्यद्वारा लक्षणत्वमस्य तु स्वरूपमेव 25
लक्षणम् ॥ ३ स्निग्धरूक्षयोः ॥ ४ स्नेहस्यापि रूक्षाभावापत्त्या भवदुक्तं न । हेतुमाह—रूक्षाभावे स्नेहव्यवहारप्रसङ्गात् ॥ ५ प्रायोऽनभमस्य हेतुः कठिन इत्यादि ॥ ६ रसनेन तिक्तादिः पञ्चधा रसः ॥ ७ कफशान्तेस्तिक्तः ॥ ८ पाटवस्य च कटुः ॥ ९ रक्तदोषादिशान्तेः कषायः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथा आस्रवणस्य लालास्रुतेः क्लेदनस्य च रेदनमार्दवस्य यो हेतू रसः सोऽम्ल इत्युच्यते । यतो लालास्रुति-दन्तविलक्षते भवतः स रसोऽम्ल इत्यर्थः । मातुलुङ्ग-कपित्थादिरसमाहरतां हि लालास्रुति-दन्तविक्लित्ती दृश्येते । तथा ह्लादनस्य परमाह्लादस्य बृंहणस्य च शरीरपुष्टेर्यो हेतू रसः स मधुर इत्युच्यते । यतः परमाह्लाद-
8A शरीरोपचयौ भवतः स रसो मधुर इत्यर्थः । 5

ननु लवणोऽप्यस्ति रसः, तत् कथं न पञ्चसंख्याविरोध इत्यत आह–लवणो मधुरान्तर्गतो मधुरान्तःपातीति तद्ग्रहणेनैव गत इति न संख्याविरोधः । प्रकारान्तरमप्याह–संसर्गजो वा, रसद्वय-त्रयमीलनसमुत्थो वा लवणो रस इति तद्ग्रहणेनैव गतस्ततो न संख्याविरोधः । तिक्त-मधुरा-ऽम्लरससमुत्थो हि लवणरसः, तेषां तत्रोत्सं-वेदनादिति केचिदाचक्षते । 'इति'करणो रसभेदेयत्तावद्योतकः । 10

सम्प्रति गन्धस्य लक्षणं भेदौ च प्राह–

घ्राणेन सुरभ्यादिर्द्वेधा गन्धः । औन्मुख्यस्य सुरभिः । वैमुख्यस्यासुरभिरिति ।

घ्राणेन घ्राणेन्द्रियेण ग्राह्यो वस्तूनां परिणामविशेषः सुरभ्यादिर्यः स गन्ध इति
8B सम्बन्धः । आदिग्रहणादसुरभिग्रहः । एतावल्लक्षणम् – 'यो वस्तूनां परिणामविशेषो 15
घ्राणेन्द्रियेण गृह्यते स गन्धः' । द्वेधेति भेदकथनम्, तस्य गन्धस्य सुरभ्यसुरभी द्वौ भेदौ भवतः ।

सम्प्रति गन्धभेदावपि प्रत्येकं लक्षयति–प्राय औन्मुख्यस्योत्सुक्यस्योपभोगाभिलाषस्येत्यर्थः, यो हेतुर्गन्धः स सुरभिरित्युच्यते । यतो गन्धादौन्मुख्यं भवति स सुरभिरित्यर्थः । 20

तथा वैमुख्यस्य विचिकित्साया उपभोगाभिलाषनिवृत्तेरित्यर्थः, यो हेतुर्गन्धः सोऽसुरभिरित्युच्यते । यतो गन्धात् पुरुषस्य जुगुप्सा भवति सोऽसुरभिरित्यर्थः । 'इति'करणो गन्धभेदेयत्तावद्योतकः ।

१ आस्रवण-क्लेदनयोरम्लः ॥ २ बीजपूरकादिभक्षणात् दन्तानामम्लत्वम् ॥ ३ ह्लादन-बृंहणयोर्मधुरः ॥ ४ लवणो मधुरान्तर्गतः ॥ ५ मधुराद् माधुर्यं जायते तथा लवणादपि माधुर्यम् । अतो माधुर्यकारणात् 25 लवणोऽपि मधुरो रस उच्यते ॥ ६ संसर्गजो वेति ॥ ७ एतदाचार्यापेक्षया संसर्गेति सूत्रम् ॥ ८ घ्राणेन सुरभ्यादिर्द्वेधा गन्धः ॥ ९ औन्मुख्यस्य सुरभिः ॥ १० वैमुख्यस्यासुरभिरिति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

9A सम्प्रति वर्णस्य लक्षणं भेदांश्च आह—

चक्षुषा कालादिः पञ्चधा वर्णः । उद्वेगस्य कालः । रौद्र-क्षोभयोर्लोहितः । प्रसादस्य शुक्लः । दृशोर्नीलः । विघातस्य पीतः । संयोगजः सारङ्गः । इति मूलभेदाः ।

[1]चक्षुषा चक्षुरिन्द्रियेण ग्राह्यो वस्तूनां परिणामः कालादिर्वर्ण इति सम्बन्धः । आदिग्रहणाल्लोहित-शुक्ल-नील पीतानां परिग्रहः । एतावल्लक्षणम् —'यो वस्तूनां परिणाम-विशेषो नेत्रेन्द्रियेण गृह्यते स वर्णः' । पञ्चधेति भेदकथनम् । तस्य वर्णस्य कालादयः पञ्च भेदा भवन्ति ।

सम्प्रति वर्णभेदानपि प्रत्येकं यथाक्रमं लक्षयति—[2]उद्वेगस्येति उद्वेगस्याऽरतेर्यो हेतुर्वर्णः स कालयति मनो मलिनीकरोति काल इत्युच्यते । यतो मानसस्योद्वेगो भवति स वर्णः काल इत्यर्थः । मषी-नीली-कर्दमा-ऽन्धकार-पिशाचादिवर्णमवलोकयतां
9B हि मनः समुद्विजते । अत एवायं शुक्लविरोधी, तस्य मनोनैर्मल्यहेतुत्वात् । प्रायोऽनुवृत्तेर्भ्रमरादीनामाह्लादजनकत्वेन व्यभिचारनिरासः ।

तथा [3]रौद्रस्य क्षोभस्य च यो हेतुर्वर्णः स लोहित इत्युच्यते । यतो मनसो रुद्रत्व-क्षुभितत्वे भवतः स वर्णो लोहित इत्यर्थः । तथाहि—रुधिरं रक्तकरवीरकुसुम-प्रकराङ्कितां समराङ्गणभुवं च समालोकयतां क्षत्रियकुमाराणां रौद्रः परिणामः प्रादुर्भवति । तथा मन्त्रविशेषसाधनेषु रौद्रावेशाविर्भावाय सकलमपि नेपथ्योपहार-स्थान-ध्येयादिकं लोहितं क्रियते । रौद्रो रसोऽपि लोहितवर्णो वर्ण्यते । यद् भरतमुनिः—

" श्यामो भवेत्तु शृङ्गारः, सितो हास्यः प्रकीर्तितः ।
कापोतः करुणश्चैव, रक्तो रौद्रः प्रकीर्तितः ॥ " [नाट्यशास्त्रे ६ । ४२]

तथा रुधिरं रक्तकरवीरकुसुमप्रकराङ्कितां समराङ्गणभुवं चालोकयतां कातराणां क्षोभो भवति । यदाह—

10A " विष्टाकृमिज उद्वेगी क्षोभणो रुधिरादिजः । " [नाट्यशास्त्रे ६ । ८१]
बीभत्सो द्विविध इति ।

१ चक्षुषा कालादिः पञ्चधा वर्णः ॥ २ उद्वेगस्य कालः ॥ ३ रौद्रक्षोभयोर्लोहितः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ततः पुरुषभेदेन लोहितो वर्णो रौद्रस्य क्षोभस्य च हेतुः । सिन्दूरादिवर्णस्याह्लादकत्वेन व्यभिचारपरिहारार्था प्रायोऽनुवृत्तिः ।

तथा प्रसादस्य मनसः प्रसन्नताया यो हेतुर्वर्णः स शोकति तत्र मनो गच्छतीति शुक्ल इत्युच्यते । यतो वर्णाद् मनसः प्रसत्तिरुपजायते स शुक्ल इत्यर्थ । भवति च सितकुसुमाऽम्भोज-शशाङ्कमण्डलादि विलोकयतामभिनवाम्बुधरपयःप्रक्षालितांशुकस्येव मनसो नैर्मल्यम् । 5

तथा [1]दृशोर्नेत्रयोः प्रसादस्य यो हेतुर्वर्णः स नील इत्युच्यते । प्रसादस्येति पूर्वोपात्तमभिसंबध्यते । दृशोश्च प्रसाद आह्लाद एव, नितान्तखिन्नापि हि दृष्टिः कानना-ऽवनीरुहराजी-पल्लवान्यवलम्ब्य परामाह्लादसम्पदमधिरोहति ।

10B तथा [2]दृशोर्विघातस्योपघातस्य यो हेतुर्वर्णः स पीत इत्युच्यते, दृशोरिति पूर्वोपात्तं सम्बध्यते । यतो वर्णाद् दृशोरुपघातो भवति स पीत इत्यर्थः । तथाहि—चामीकर-वैश्वानरादिकं भास्वरं रूपमवलोकयन्ती दृष्टिरुपहन्यते । 10

ननु शबलोऽप्यस्ति वर्णः, तत् कथं न पञ्चसंख्याविरोधः ? इत्यत आह—[3]संयोगजो द्वि-त्रि-चतुः-पञ्चवर्णानां मिश्रणजः सारङ्गो वर्ण इति तद्ग्रहणेनैव गत इति न संख्याविरोधः ।

इति मूलभेदाः, एते स्पर्शादीनां मूलभेदा मूलजातयो भवन्ति । अवान्तरभेदाः 15
11A पुनरमीषामनन्ता न शक्यन्ते परिगणयितुमिति न तेषां सूत्रसंग्रहः ।

कः परिणामशब्दस्यार्थ इति उच्यते—

तद्भावः परिणामः । द्रव्यानुवृत्त्या न पूर्वोत्तरावस्थयोरेकान्तभेदः । अत एव न सांकर्यम् । परिणाम-परिणामिनोः स्यादभेदः [4]सम्बन्धः । अत एव स्यादेकत्वा-ऽनेकत्व-नित्यत्वा-ऽनित्यत्वानि । एतौ चोपलब्धिलक्षणप्राप्तावुपलभ्येते । बीजानि धान्यत्वेन परिणम्य भौमं तप्तायस्पिण्डवदौदकं च रसं बालका इव सवित्रीस्तन्यमाहरन्ति किसलादिभिः परिणाहोभवन्ति । दुग्ध-दधीनि च तापाभितप्तानि स्फारीभवन्ति । 20

१ प्रसादस्य शुक्लः ॥ २ दृशोर्नीलः ॥ ३ विघातस्य पीतः ॥ ४ संयोगजः सारङ्ग इति मूलभेदाः ॥ ५ * 'सम्बन्धः' इति पदं मूलादर्शे नास्ति, टीकादर्शे तु टिप्पणे विद्यते ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]तेन तेन विवक्षितेन्द्रियग्राह्यत्वादिना [2]रूपेण भवनं भावः पुद्गलानामुत्पादः परिणामो भण्यते । यदमीषां पुद्गलानां द्रव्य-क्षेत्रादीन् सहकारिणः प्राप्य तत् तत् कठिनादिरूपमाविर्भवति स परिणाम इत्यर्थः । अथवा [3]समस्तपञ्चास्तिकायव्यापिपरिणामलक्षणतयेदं व्याख्यायते– तेषां जीवादिद्रव्याणां प्रतिनियतरूपेण[4] भवनं भाव उत्पादो यः स परिणामः ।
11B तेषामिति कर्त्तरि षष्ठी । ततस्तान्येव द्रव्याणि तथा भवन्ति, न कूटस्थनित्यान्यवतिष्ठन्ते, 5
नापि सर्वथोत्पद्यन्ते, नापि सर्वथा विनाशमाविशन्ति । किं तर्हि ? कथञ्चित् पूर्वरूपमपहाय रूपान्तरमास्कन्दन्तीति सिद्धम् ।

स च परिणामः प्रयोग-विस्रसाप्रभवत्वेन द्वेधा । तत्र विस्रसापरिणामोऽनादिरादिमांश्च । चेतनद्रव्यस्य तावज्जीवत्व-भव्यत्वा-ऽभव्यत्वादि[5]रनादिः । औपशमिकादिः पुन-
12A रादिमान् । स तु कर्मोपशमाद्यपेक्षत्वेनापौरुषेयत्वात्[6] कश्चिद् वैस्रसिकः । अचेतनद्रव्यस्य 10
तु लोकसंस्थान-मन्दराकारा[7]दिरनादिः, इन्द्रधनुरादिरादिमान्, पुरुषप्रयत्नानपेक्षत्वादेव वैस्रसिकः । प्रयोगजः पुनर्दान-शील-भावनादिश्चेतनस्य, गुरूपदेशलक्षणपुरुषप्रयत्नापेक्षत्वात् । घटमंस्थानादिरचेतनस्य, कुलालादिपुरुषप्रयत्नापेक्षत्वात् । धर्मास्तिकायादिद्रव्यस्य तु वैस्रसिकोऽसंख्येयप्रदेशत्वादिरनादिः, प्रतिनियतगत्युपग्रहहेतुत्वादिरादिमान् । प्रयोगजो यन्त्रादिगत्युपग्रहहेतुत्वादिः, पुरुषप्रयोगापेक्षत्वादिति । 15

12B अथ द्रव्याणामयं परिणामः किं पूर्वपर्ययस्य परित्यागादुतापरित्यागाद्भवति ? तत्र यदि परित्यागात् तदा पूर्वपर्ययस्य सर्वथा स्वरूपनिर्मोचे स्वभावान्तरमपूर्वमुत्पद्यत इति परिणामरूपतैव न स्यात् । अन्वयाऽपरित्यागे विस्रसा-प्रयोगप्रभवो द्रव्यविकारः परिणाम इति हि जैनाः समामनन्ति । अथापरित्यागात्[10] तदा पूर्वोत्तरपर्याययोः सांकर्येण वृद्धावस्थायामपि यौवनोपलम्भः स्यात्, न चैवम्, तस्मान्न परिणामो वास्तव इति । 20

तत्र प्रथमपक्षमाश्रित्याह– [11]द्रव्येति । न पूर्वोत्तरावस्थयोरेकान्तेन सर्वथा भेदोऽस्ति येन परिणामरूपता न स्यात्, द्रव्यानुवृत्तेः द्रव्यस्य पूर्वपर्यायव्यापिनो मनुष्यत्वादेरुत्तरपर्याये-
13A ऽनुवर्त्तनात् । एतदुक्तं भवति– न बाल्यादिः पर्यायः सर्वथा निवर्त्तते, नाप्यनुवर्त्तते, किन्तु बाल्यादिचेष्टितादिमात्रेण विनिवर्त्तते मनुष्यत्वेनाऽनुवर्त्तत इति कथं पूर्वोत्तरयोरेकान्तभेदेन परिणामरूपता न स्यात्, द्रव्यस्यान्वयेन परिणामलक्षणयोगात् ? 25

१ तद्भावः परिणामः ॥ २ स्वरूपेण ॥ ३ पूर्वं पुद्गलानपेक्ष्य परिणाम उक्त इदानीं समस्तान् ॥ ४ कुन्थ्वादिरूपेण ॥ ५ सकषायत्व-असंख्येयप्रदेशत्वा-ऽमूर्तत्व-सकर्मकत्वादिः ॥ ६ बुद्धिपूर्वकात्मव्यापाररहितत्वादित्यर्थः । यथा ग्रन्थिभेदानन्तरमौपशमिकसम्यक्त्वकाले औपशमिको भावो घण्टनघोलनान्यायेन ॥ ७ वर्षधरादयः ॥ ८ परमाण्वादीनाम् ॥ ९ यन्त्रवाहनादीनां या गतिस्तस्या अपि धर्मास्तिकायो हेतुः ॥ १० पूर्वपर्यायस्य ॥ ११ द्रव्यानुवृत्त्या न पूर्वोत्तरावस्थयोरेकान्तभेदः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत एवेति, । यत एव द्रव्यमेवमनुष्यत्वाद्यनुवर्त्तते न तु बाल्यादिपर्यायचेष्टितादीनि तत एव न पूर्वोत्तरावस्थयोः सांकर्यमस्ति, ततः कथं वृद्धावस्थायां यौवनोपलम्भः स्यात् ?

13B ननु यदि परिणामाभ्यां परिणामिनो भेदस्तदाऽसौ तदवस्थ एवेति कथं परिणतः स्यात् ? न च तत्सम्बद्धयोर्धर्मयोरुत्पाद-विनाशाभ्यां तस्य परिणामो व्यवस्थापयितुं शक्यः, सदसतोः सम्बन्धाभावेन तत्सम्बद्धत्वस्याघटनात् । अथाभेदः, तदैकस्मात् परिणामिरूपाद- 5 भेदेनोत्पादविनाशवतोः परिणामयोः परिणामिस्वरूपवदेकत्वमेवेति केनाश्रयेण परिणामी परिणतः स्यात् ? परिणन्तुश्च सकाशादभेदात् परिणामयोः परिणन्तृस्वरूपवच्च निवृत्तिर्नापि प्रादु-
14A र्भावः । परिणामाभ्यां च परिणन्तुरभेदात् परिणामस्वरूपवदुत्पाद-विनाशौ स्याताम् । न चैवम् . अतो न कस्यचित् परिणामः सिध्यतीति ।

उच्यते, यस्मात् परिणाम-परिणामिनोरवस्थावस्थात्रोः स्यात् कथञ्चिदभेदोऽव्यतिरेकः 10 सम्बन्धोऽस्ति । यद्येकान्तेन पर्यायाभ्यां द्रव्यं भेद्यमेव स्यात् तदा न स्यादेव द्रव्यस्य परिणामः, किन्तु कथञ्चिदभेदोऽप्यस्ति, ततो न दोषः अत एवैकान्ताभेदपक्षोक्तदोषोऽपि प्रतिव्यूढः, एकान्ताभेदस्यानभ्युपगमात् । ततः पर्यायेभ्यः कथञ्चिदभेदाद् द्रव्यमप्युत्पाद-विनाशवदिष्यते । पर्यायाणां च द्रव्यात् कथञ्चिदभेदात् "ध्रौव्यमिति । न च केनाप्या-
14B कारेण भेदः केनाप्यभेद इति व्यवस्थाऽस्ति । यतो न खलु स कोऽप्याकारो धर्मिणो 15 धर्माणां वा चकास्ति येन भेद एव वाऽभेद एव वा । किन्तु सर्वेषां सर्वाकारेषु भेदा-भेदौ संवलितौ, अत ऐकाग्र्यभेदद्वारेणापि दोषोद्भावनं परसिद्धान्तरहस्यानवगमं पिशुनयति । तस्मात् परिणाम-परिणामिनोर्नैकान्तेन भेदो नाप्यभेदः, किन्तु स्याद्भेद इति सर्वं सुस्थम् ।

अत एवेति । यत एव द्रव्य-पर्याययोः कथञ्चिदभेदस्तत एवानयोः स्यात् कथञ्चि- 20
15A देकत्वानेकत्वनित्यत्वानित्यत्वानि भवन्ति । पर्यायाणां कथञ्चिदेकत्वम्, एकस्माद् द्रव्यादभिन्नत्वात् । तथा द्रव्यस्य कथञ्चिदनेकत्वम्, पर्यायेभ्योऽभेदात् । तथा पर्यायाणां कथञ्चिन्नित्यत्वम्,

१ अत एव न सांकर्यम् ॥ २ पूर्वोत्तराभ्याम् ॥ ३ परिणामी ॥ ४ परिणामिनः ॥ ५ ननु तौ परिणामौ सन्तावसन्तौ वा । यदि सन्तौ तदा स्वकारणादेव स्वतन्त्रयोरुत्पादात् कथं सम्बन्धः ? तदाह–"पारतन्त्र्यं हि सम्बन्धः सिद्धे का परतन्त्रता । तस्मात् सर्वस्य भावस्य सम्बन्धो नास्ति वस्तुतः ॥" [सम्बन्धपरीक्षा] । 25 अथासन्तौ तदाऽविद्यमानत्वादेवासम्बन्धः । तदाह– "परापेक्षा हि सम्बन्धः सोऽसन् कथमपेक्षते । संश्च सर्वनिराशंसो भावः कथमपेक्षते ॥" [सम्बन्धपरीक्षा]॥ ६ परिणन्तुः ॥ ७ यथा परिणामिस्वरूपमेकं तथा तदभेदात् तयोरपि स्यादित्यर्थः ॥ ८ परिणामिनः ॥ ९ परिणामपरिणामिनोः स्यादभेदः सम्बन्धः ॥ १० द्रव्यरूपतया ॥ ११ येनाकारेण भेदस्तेनाकारेण कथमभेदो विपर्ययो वा परस्परमाकारयोर्विरोधादित्यादि दोषोद्भावनम् ॥ १२ अत एव स्यादेकत्वानेकत्वनित्यत्वा[नित्यत्वा]नि ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

त्रिकालान्वयिनो द्रव्यादभेदात् । तथा द्रव्यस्य कथञ्चिदनित्यत्वम्, उत्पाद-विनाशाङ्कितेभ्यः पर्यायेभ्योऽभेदादिति ।

ननु न प्रवर्त्तमान-निवर्त्तमानपर्यायद्वयातिरिक्तं द्रव्यमुपलब्धिलक्षणप्राप्तं[1] दर्शनपथमवतरति, ततस्तादृशममद्रव्यवहारयोग्यमेव विदुषामिति । उच्यते— [2]एतौ च परिणाम-परिणामिनावुपलब्धिलक्षणप्राप्तावुपलभ्ययोग्यौ सन्तावुपलभ्येते । ज्ञानिद्वयापेक्षं [3]द्विवचनम् । घट- 5
कपालादयः पर्यायास्तदन्वयिनी मृद्रूपता च प्रत्यक्षेणैवोपलभ्यते । इदमेव हि मृद्रूपताया अन्वयिन्या उपलम्भनं यद्भवोर्मार्हन्त्येन ग्रहणम् । यदि चान्वयो न स्यात् तदा
15B घटरूपतयेव मृद्रूपतयापि घटात् कपालानां भेदाद् मार्हन्त्येन ग्रहणं न स्यात् । घटरूपस्य कलयापि कपालेष्वननुवर्त्तनात् । तस्मात् पत्यक्षसिद्धौ परिणाम-परिणामिनाविति ।

परिणामिनो व्यवस्थिता-ऽव्यवस्थितदोषात् परिणामाभाव इति चेत्, न, अने- 10
कान्तात् । न हि वयमङ्कुरे बीजं व्यवस्थितमेवाभ्युपगच्छामः, विरोधेनाङ्कुराभावप्रसङ्गात् ।
16 नाप्यव्यवस्थितमेव, अङ्कुरस्य बीजपरिणामत्वाभावप्रसङ्गात्, पदार्थान्तरपरिणामत्वाभाववत् । किं तर्हि ? वनस्पतित्व-शालित्वादिभिरङ्कुरे बीजं स्याद् व्यवस्थितं संस्थान-बीजत्वा-
17A दिभिः स्यादव्यवस्थितं प्रतिपद्यामहे । तन्नैकान्तेन व्यवस्थितत्वाव्यवस्थितत्वे ।

स्यान्मतम्— न बीजमङ्कुरादित्वेन परिणमते, वृद्ध्यभावप्रसङ्गात् । यो यत्परिणामः 15
स ततो न वृद्धिमान् दृष्टो यथा पयःपरिणामो दध्यादिः, बीजपरिणामश्चाङ्कुरादिः, तस्माच्च ततो वृद्धिमानिति बीजमात्रमङ्कुरादिः स्यादतत्परिणामो वेति । उक्तञ्च —

"किञ्चान्यद्यदि तद् बीजं गच्छेदङ्कुरतामिह ।
विवृद्धिरङ्कुरस्य स्यात् कथं बीजादपुष्कलात् ॥ १ ॥
17B अथेष्टं [10]ने रसैर्भौमैरौदकैश्च विवर्द्धते । 20
नन्वेवं सति बीजस्य परिणामो न युज्यते ॥ २ ॥
आलिप्तं जतुना काष्ठं यथा स्थूलत्वमृच्छति ।
ननु काष्ठं तथैवास्ते जतु चात्र विवर्द्धते ॥ ३ ॥

१ उत्पद्यमान ॥ २ विनश्वर ॥ ३ यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तन्नास्ति यथा खरविषाणम्, नोपलभ्यते च द्रव्यम् ॥ ४ उपलब्धिलक्षणप्राप्तं सत् अनुपलभ्यमानम् ॥ ५ एतौ चोपलब्धिलक्षणप्राप्तावुपलभ्येते ॥ 25
६ अन्यथा परिणामानां बहुत्वेन बहुवचनं स्यात् ॥ ७ मृत्त्वेन ॥ ८ बीजत्व ॥ ९ * इदं श्लोकचतुष्टयं तत्त्वार्थसूत्रस्य राजवार्तिकेऽपि उद्धृतम् ५ । २२ ॥ १० तव जैन ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथैव यदि तद्बीजमास्ते येनात्मना स्थितम् ।
रसाश्च बृद्धिं कुर्वन्ति बीजं तत्र करोति किम् ॥ ४ ॥" [ ] इति ।

तदेतन्न । यस्माद् बीजानि धान्यत्वेन अङ्कुरत्वेन परिणम्य तद्रूपतामनुभूय किसल्यादिभिः परिणाहीभवन्तीति सम्बन्धः । किं कुर्वन्ति ? भूमेः पृथिव्या इमं भौमं रसं तप्तो
18A वह्निसाद्भूतः स चासावऽयसो लोहस्य पिण्डश्च स इवोदकस्येममौदकं च रसमाहरन्तिं इति सम्बन्धः, बालका इव डिम्भा इव, सवित्री माता, तस्याः स्तन्यं दुग्धमिति साधर्म्यदृष्टान्तः । किसलं नवकिसलयम् । आदिशब्दात् पत्र-काण्डादिग्रहः । परिणाहीभवन्ति विशालीभवन्ति । बीजानां ह्यङ्कुरमात्रपरिणामे व्यापारः, वृद्धौ तु भौमौदकरसस्य । न चेतावताऽमीषां तत्परिणामत्वविरोधः । परिणामस्य हि तँद्भावमात्रमेव लक्षणं न बृद्धयभावोऽपि । तच्चामीषामस्त्येव । ततोऽङ्कुरस्य रसाद् बृद्धावपि बीजस्य तत्परिणामता न विरुध्यते । अत एव जतुकाष्ठदृष्टान्तो विषमः । बीजं हि भौमौदकरसैः स्वपरिणाममपहायाङ्कुररूपतां धत्ते, न त्वेवं जतुना काष्ठं स्वपरिणाममुज्झति । ततः काष्ठस्य तादवस्थ्यं युक्तं न बीजस्य । तस्मादङ्कुरस्य बृद्धावपि बीजपरिणामता न विरुध्यते ।

सम्प्रति व्याप्तिं विघटयति–दुग्धदधीनि च तापेनाऽऽग्नेयेन मानवीयेन चाऽभितप्तानि स्फारीभवन्ति मूलप्रकृतेः सकाशादधिकीभवन्ति । शीतक्षीरस्य ह्यग्निसम्पर्कात् तप्यमानोत्फेनक्षीरपरिणामस्तथा दध्नो घर्मोद्वर्त्तितदधिपरिणामो वा मूलक्षीर-दधिभ्यां बृद्धिमानुपलब्ध इति कथं बृद्धयभावः परिणामस्य परिणामिनः सकाशात् ? अपि च 'बीजपरिणामत्व-
19A मङ्कुरस्यैकान्तवादिनोऽसिद्धम् । पराभ्युपगमात् 'सिद्धौ बृद्धिसिद्धिरपि तत एवास्तु, सर्वथा विशेषाभावात् । तत्र बृद्धयभावात् परिणामाभावः स्याद्वादिनं प्रति साधयितुं शक्यः । तस्मात् सिद्धः परिणामः ।

सम्प्रति परिणामस्य वैचित्र्यं दर्शयति–

स चायं परिणामः कश्चित् सदृशेतरः–बालादीनां कुमारादिभावः स्थूलादीनां कृशादिभावो वा, अत्रोभार्पणा । कश्चिद् विसदृशः–नारकादीनां मानवादिजन्म घटादीनां कपालादिभावो

१ बीजानि धान्यत्वेन परिणम्य भौमं तप्तायस्पिण्डवदौदकं च रसं बालका इव सवित्रीस्तन्यमाहरन्ति किसलादिभिः परिणाहीभवन्ति ॥ २ सन्ति ॥ ३ सन्ति ॥ ४ तेन तेन रूपेण भवनम् ॥ ५ 'यो यत्परिणामो न स ततो बृद्धिमान् यथा दुग्धाद् दध्यादि' इत्यनुमानगताम्, यतः परिणामिनः सकाशादधिकोऽपि परिणामो भवतीति ॥ ६ दुग्धदधीनि च तापाभितप्तानि स्फारीभवन्ति ॥ ७ स्फारित ॥ ८ यो यत्परिणाम इत्यवादि त्वया तत् तवासिद्धम् ॥ ९ परिणामित्व ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वा, अत्र सादृश्यानर्पणा । कश्चित् सदृशः – सर्वेषामस्तित्वम् आत्मनां चैतन्यं वा, अत्र वैसदृश्यानर्पणेति ।

स चायं पूर्वप्रसाधितः परिणामः कश्चित् सदृशेतरो भवति, पूर्वपरिणामस्योत्तरपरिणामः कश्चित् सदृशश्च विसदृशश्च भवतीत्यर्थः । यथा बालादीनाम्, 'आदि'शब्दात् कुमारादिग्रहः । कुमारादिभावः, 'आदि'शब्दाद् युवादिग्रहः । अयं वृद्धिपरिणामः सदृशेतरः । न ह्ययं सदृश एव, वैसदृश्यप्रत्ययभावात् । नापि विसदृश एव, स एवायमिति भावात् ।
19B तथाऽपरमप्याह–[1]स्थूलादीनाम्, 'आदि'शब्दाद् महदादिग्रहः, कृशादिभावः, 'आदि'-शब्दाल्लघ्वादिग्रहः । अयं क्षयपरिणामः सदृशेतरः । अत्रेति अनयोर्निदर्शनयोरुभार्पणा उभयोः सादृश्यवैसदृश्ययोर्द्वयोरपि विवक्षा । सादृश्यं वैसदृश्यं चोभयमपि युगपद्वक्तुमिष्टमित्यर्थः ।

तथा कश्चिद [2]विसदृशः, कोऽपि परिणामः पूर्वपरिणामस्य [3]विसदृशो भवति, तमेवाह–[4]नारकादीनाम्, 'आदि'ग्रहणाद् मानवादिग्रहः । मानवादिजन्म, आदि'ग्रहणा-देवादिग्रहः । अयमुत्तमपरिणामो विसदृशः । अपरमप्याह–[5]घटादीनाम्, 'आदि'शब्दात्
20A पटादिग्रहः, कपालादिभावः, 'आदि'शब्दात् तन्त्वादिभावग्रहः । अयं हीनपरिणामो विस-दृशः । अत्रेति अनयोर्निदर्शनयोः सादृश्यानर्पणा, सादृश्यस्य [6]जीवत्वादेः मतोऽप्यविवक्षा । अयमर्थः– सर्वोऽपि परिणामः सदृशेतर एव । किन्तु क्वचिदुभयमपि विवक्ष्यते, क्वचिदेकं न विवक्ष्यते इति ।

तथा कश्चित् सदृशः, कोऽपि परिणामः पूर्वपरिणामस्य सदृशो भवति, यथा [7]सर्वेषां पञ्चानामपि द्रव्याणामस्तित्वे सत्त्वम् । अयं सर्वद्रव्यगतः सदृशः परिणामः । अपरमप्याह– [8]आत्मनां जीवानां चैतन्यमुपयोगः । अयमेकद्रव्यगतः सदृशः परिणामः ।
20B [9]अत्रेति अनयोर्निदर्शनयोर्वैसदृश्यानर्पणा, वैसदृश्यस्य सर्वद्रव्याणां प्रतिनियतकार्यकर्तृत्वलक्षण-स्यात्मनां प्रतिनियतविचित्रकर्मभोक्तृत्वलक्षणस्य वा मतोऽप्यविवक्षा । 'इति'करणः परिणामवैचित्र्येयत्तावद्योतकः । तस्मात् पुद्गलानां कठिनादिरूपेण पञ्चास्तिकायस्य वा [10]रूपवैचित्र्येण भवनं परिण[11]मः ।

१ स चायं परिणामः कश्चित् सदृशेतरः ॥ २ सदृशश्चासावितरो विसदृशश्च ॥ ३ बालादीनां कुमारादिभावः ॥ ४ स्थूलादीनां कृशादिभावो वा ॥ ५ अत्रोभार्पणा ॥ ६ सूत्र ॥ ७ नारका-दीनां मानवादिजन्म ॥ ८ घटादीनां कपालादिभावो वा ॥ ९ अत्र सादृश्यानर्पणा ॥ १० आदेर्मृत्त्वादिग्रहः ॥ ११ सर्वेषामस्तित्वम् ॥ १२ आत्मनां चैतन्यं वा ॥ १३ अत्र वैसदृश्यानर्प-णेति ॥ १४ गत्युपष्टम्भादिकार्यकर्तृत्व ॥ १५ स्वरूप ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु यदि स्पर्श-रस-गन्ध-वर्णाः समस्ता एव मूर्तिस्तदा पुद्गललक्षणमव्यापि स्यात्, सर्वेषां स्पर्शादीनां सर्वत्र पुद्गलजातावभावात्। तथाहि--जले गन्धस्याभावः, तेजसि गन्ध-रसयोः, वायौ गन्ध-रस-रूपाणाम्, अभावश्च गन्धादीनामग्न्यादिषु, असंवेदनादिति।

अत्राह--

सममेकत्र चतुर्धा सत्त्वेऽप्युद्भूतस्य ग्रहः; स्पर्शाविनाभावित्वात्। अत एव सजातीयत्वे पृथिव्यादीनां परस्परूपपरिणामः, न हि ज्ञानमर्थरूपतामुपयच्छते। लवणमम्भः, दारुस्तेजः, तेजो भस्म तमो वेति।

21A सेममेककालं न क्रमेण। एकत्र पृथिव्यां जले तेजसि वायौ वा धर्मिणि चतुर्द्धा रूप-रस-स्पर्श गन्धलक्षणैश्चतुर्भिः प्रकारैः पुद्गलभावरूपपरिणामस्य सत्त्वेऽपि विद्यमानत्वेऽपि, एतावता पृथ्व्यादीनां वायुपर्यन्तानां सर्वेषामपि चतुर्गुणत्वमाह, यथा पृथिवी-स्पर्श-रस-गन्ध-वर्णवती तथाऽब्वादीन्यपीत्यर्थः। उद्भूतस्य ज्ञानपरिच्छेदयोग्यपरिणामस्य ग्रहो ज्ञानेन परिच्छित्तिः। एतावताऽनुपलम्भे कारणमाह। सन्त्येव सर्वत्र पुद्गलजातौ स्पर्श-रस-गन्ध-वर्णपरिणामास्तथापि यो यदा ग्रहणयोग्यो भवति स एव गृह्यते नान्ये सन्तोऽपि, न खलु यदस्ति तत् सर्वमपि छद्मस्थज्ञानग्राह्यं भवति। ततो नाव्यापि लक्षणम्।

21B इदमुक्तं भवति--त एव पुद्गलाः कदाचित् पृथिवीरूपमपहाय जल-तेजो-वायूनां रूपमादधति, कदाचिच्च तेषां रूपमपहाय पृथ्वीरूपमुपाददते। ततो यदा जलादिरूपं विग्रहस्य पृथ्वीत्वमागृह्णन्ति तदा चतुर्गुणत्वं न स्यात् यदि जलादीनामपि चतुर्गुणत्वं न स्यात्। न खलु सर्वथाऽप्यविद्यमानं किमप्युत्पद्यते षष्ठभूतोत्पादप्रसङ्गादिति जलादयोऽशक्यगन्धादिगुणोपलम्भा अपि चतुर्गुणा एव।

सममेकत्र चतुर्धा सत्त्वे हेतुमाह--[3]स्पर्शेन सहाविनाभावित्वात्। स्पर्शस्तावत् सर्वपुद्गलद्रव्यावस्थायी स्पर्शं च रसादयो न व्यभिचरन्तीति सर्वाण्यपि पुद्गलद्रव्याणि चतुर्गुणान्येव। तथाहि--आपो गन्धवत्यः, तेजो गन्ध-रसवत्, वायुर्गन्ध-रस-रूपवान्, स्पर्शवत्त्वात्, पृथ्वीवत्, वैधर्म्येणाकाशवत्। प्रत्यक्षागमविरुद्धपक्षनिर्देशानन्तरं प्रयुक्तत्वात् तेजस्यनुष्णत्वे साध्ये द्रव्यत्ववत् कालात्ययापदिष्टो हेतुरिति चेत्, न. नायनरश्म्यादिष्वनुद्भूतरूपस्पर्शविशेषास्तित्वे साध्ये तैजसत्वस्य हेतोः कालात्ययापदिष्टत्वप्रसङ्गात्। ततो

१ सममेकत्र चतुर्धा सत्त्वेऽप्युद्भूतस्य ग्रहः ॥ २ भावः पर्यायो द्रव्य-क्षेत्र-काल-भावरूपः ॥ ३ स्पर्शाविनाभावित्वात् ॥ ४ अनुद्भूतं रूपं स्वभावो यस्य स्पर्शविशेषस्य, यद्वा द्वितयम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यथा स्पर्शविशेषस्यानुद्भूतत्वात् प्रत्यक्षेणाग्रहणेऽपि न तेजस्त्वस्य कालात्ययापदिष्टत्वं तथा स्पर्शवत्त्वस्यापि, गन्धादीनामप्यनुद्भूतत्वेन सतामपि प्रत्यक्षेणाग्रहणात् । नायनरश्मिष्वा-
22B गमे स्पर्शप्रतिपादनात् प्रत्यक्षाग्रहणेऽप्यदोष इति चेत्, तदेतदवादिष्वपि समानम्, तत्रापि चतुर्गुणत्वप्रतिपादकागमसम्भवात् । न चास्मदागमो न प्रमाणम्, सर्वज्ञसाधकप्रमाणोपपादनेन तस्यैव प्रामाण्यात्, यौगागमस्य च दृष्टेष्टविरुद्धत्वेनाप्रामाण्यात् । ततो न हेतोः कालात्ययापदिष्टत्वम् । नाप्यनैकान्तिकः, अन्वयव्यतिरेकाभ्यामन्यथानुपपन्नत्वस्य साधनाद् विपक्षवृत्त्यदर्शनाच्च ।

ननु न पृथ्व्यां स्पर्शवत्त्वमात्राद् गन्धादिगुणत्वम्, किं तर्हि ? जलादिभ्योऽन्यत्वे
23A सति स्पर्शवत्त्वादित्यप्रयोजको हेतुरिति । तदयुक्तम् । यद्यन्यत्वं विजातीयत्वं तदा न सिद्धम्, पृथ्व्या औदारिकत्वेन वाय्वादिभिः सह सजातीयत्वाभ्युपगमात् । अथ सजातीयत्वे सत्यपि पृथ्वीकायोऽप्काय इत्यादिव्यक्तिभेदोऽन्यत्वम्, तदा घटापेक्षया पटस्याप्यन्यत्वेन स्पर्शवत्त्वे सत्यपि चतुर्गुणत्वं न स्यात् । शक्यं हि वक्तुम्– पटो न चतुर्गुणः, घटादन्यत्वे सति स्पर्शवत्त्वाद्, अम्बादिवदिति । अपि च, यथा जलाद्यन्यत्वे सति स्पर्शवत्त्वात् पृथ्वी चतुर्गुणा भवद्भिरङ्गीक्रियते तथाऽऽपो गन्धवत्योऽप्यङ्गीक्रियन्ताम् । तथाहि– आपो गन्धवत्यः, तेजो-वायुभ्यामन्यत्वे सति स्पर्शवत्त्वात्, पृथ्वीवत् । तेजो-
23B वाय्वोरपि चतुर्गुणत्वाद्विशेषणं व्यर्थमिति चेत्, न, उभयोर्व्याप्तिसाधनात् । अन्यथा तेजो-वायुभ्यां व्यभिचारेण भवतो व्याप्त्यसिद्धिः स्यादिति नानैकान्तिको हेतुः ।

किञ्च, यदि जलादीनां गन्धादयो न सन्ति तदा सुरभि जलं सुरभिर्वात इति प्रत्ययस्तथा वाताशिनां भुजङ्गमादीनामनलाशिनामुष्ट्रग्रीवादीनामनलोद्भवानामेव वा भुजङ्ग-मूषिकादीनां ज्योत्स्नाशिनां चकोराणां तृप्तिश्च कथं स्यात् ? रसकार्यमेव हि तृप्तिः । यदि चात्र रसाभावेऽपि तृप्तिरिष्यते तदा पृथ्व्यामपि रसकल्पनावैयर्थ्यं स्यात् । प्रत्यक्षोपलब्धो नापह्नोतुं शक्यत इति चेत्, वाताद्याशिनामपि प्रत्यक्षेण वातादिषु रसोपलम्भोऽस्ति । यथा च प्रत्यक्षोपलब्धमपह्नोतुमशक्यं तथानुमानोपलब्धमपि । रसानुमानं च वायु-तेजसोस्तदाशिनां
24A तदशनाभिलाषोदयात् तदुपभोगे च क्षुद्वेदनोपशान्तेस्तनूपचयाच्च भवति । एतानि हि रसकार्याणि ।

१ न कालात्ययापदिष्टत्वम् ॥ २ जैनागमेऽपि अम्बादिषु चतुर्गुणत्वस्य प्रतिपादनात् प्रत्यक्षाग्रहणेऽप्यदोष इति समानम् ॥ ३ दृष्टेष्टाभ्याम् ॥ ४ इष्टं च तस्याशरीरित्वम्, अथ चायाति शरीरित्वं महेश्वरस्येति इष्टविरुद्धत्वम् ॥ ५ गन्धवत्त्वं विना स्पर्शवत्त्वं नोपपद्यते ॥ ६ सन्दिग्धानैकान्तिको व्यषेधि ॥ ७ निश्चितानैकान्तिकं निषर्षेध (न्तिकः व्यषेधि ? न्तिकं निषिषेध ?) ॥ ८ जैनमते ॥ ९ तेजोवायुभ्यामन्यत्वे सति ॥ १० जैनस्य ॥ ११ अम्बादिप्रतिवादिनोः ॥ १२ पक्षिभेदानाम् ॥ १३ आपाकादौ ॥ १४ विवादाध्यासिते रसवती ॥ १५ अत्राम्बादयो दृष्टान्ताः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु सुरभि जलं सुरभिर्वात इति प्रत्ययो वसुधागन्धनिबन्धनत्वेनौपचारिकः, कर्पूरादिपरागसम्पर्कं हि समासाद्याम्भः सौरभमाविष्करोति, तथा प्रभञ्जनोऽपि मालतीकुसुमस्तबकोपकम्पनेन पवमानस्तद्गन्धमात्मानमातनोतीति । तदपि न, अस्खलद्वृत्तित्वात् । न खलु जलानिलयोः सौरभमसौरभं वा समाघ्राय पुमान् द्रव्यान्तरस्येदं न जलानिलयोरिति प्रत्यवमृशति । नन्वस्ति प्रत्यवमर्शो यथा—कर्पूरपूरगन्धमिदमम्भः, मालतीकुसुमगन्धोऽयं गन्धवाह इति । सत्यम्, नोच्यते नास्ति प्रत्यवमर्शः, किन्तु कर्पूरपूर-मालतीकुसुम-
24B सम्पर्केण जला-ऽनिलपुद्गलास्तद्गन्धवत्तया परिणमन्त इत्युच्यते । कर्पूरादिपदोच्चारणं तु तद्वशेन तथा परिणामात् । तस्मात् स्पर्शवत्त्वादवादयः पृथिवीवच्चतुर्गुणाः ।

अत एवेति । यत एव पृथिवीकायादयो वायुकायपर्यन्ताः सर्वेऽपि चतुर्गुणा अत एव चतुर्गुणत्वेन सजातीयत्वे एकजातीयत्वे सति पृथ्व्यादीनामादिग्रहणाज्जलादीनां परस्परूपरिणामोऽन्योन्यरूपेण भवनम्, कदाचित्तेजसो जलपरिणामो यथा चन्द्रकान्तसम्पर्कात् मृगाङ्ककरनिकरो जलीभवति, कदाचिज्जलस्य पृथिवीपरिणामो यथाऽम्भो लवणीभवतीत्यादि ।

25A नैं चैतदेकान्तविजातीयत्वे सम्भवति । हि यस्मान्न ज्ञानमर्थरूपतां बाह्यघटादिस्वभावतामुपयच्छते स्वीकरोति । यथा हि ज्ञानमन्यैव जातिरर्थश्चान्या ततस्तयोर्न कदाचिदप्यन्योन्यमुपादानोपादेयभावः, न खलु ज्ञानं घटीभवति घटो वा ज्ञानीभवति, तथा यदि पृथिव्यप्तेजोवायूनां ज्ञानार्थयोरिवैकान्तेन विजातीयत्वं स्यात्तदा परस्परूपपरिणामो न स्यात्, अस्ति चासौ, तस्मान्नैकान्तविजातीयत्वम् ।

25B सम्प्रति यस्य कायस्य यत्कायरूपेण परिणमनं तद् वार्तिकेन दर्शयति—लवणमम्भः, लवणं पृथिवीकायोऽपि वर्षास्वम्भोरूपेण परिणमते । अथवाऽम्भः पृथ्वीकायलवणरूपेण परिणमत इति व्याख्येयम् । तथा दारुस्तेजः । दारुर्वनस्पतिकायोऽपि तेजोरूपेण परिणमते, दृश्यते हि परस्परमङ्गर्षेऽरणिदारुभ्योऽनलस्फुलिङ्गानामुदयः । तथा तेजस्कायो
26A भस्म-तमोरूपेण परिणमते । वह्निर्भस्मीभवति । प्रदीपकलिका तु तमसीभवति । इतिरेवमर्थः, एवमनेन प्रकारेण पृथिव्यादीनां परस्परूपपरिणामो दृश्यत इत्यर्थः, स्पर्शादीनां गुणत्वविचारपरिसमाप्त्यर्थो वेति ।

१ यदि ते गन्धवहादयः पूर्वं स्पर्शादिमन्तो न स्युः कथं कर्पूरादिवशेन सुरभिगन्धादिमन्तः परिणमेरन्, न हि असदुत्पद्यत इति ॥ २ अत एव सजातीयत्वेन पृथिव्यादीनां परस्परूपरिणामः ॥ ३ चन्द्रकान्तस्य जलपरिणामे तस्य तावती स्थितिर्नोपलभ्येत ॥ ४ न हि ज्ञानमर्थरूपतामुपयच्छते ॥ ५ ६ परिणामिपरिणामभावः ॥ ७ सूत्रम् ॥ ८ अनुवाद्यविधेयभावोऽन्योन्यं पदयोरुभयोरपि ॥ ९ तेजो भस्म तमो वेति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु स्पर्शादयो नान्यस्य कस्यचित् परमाणोर्गुणाः, किं तर्हि ? स्वयमेव परमाणुरूपा इति । अत्राह—

न च प्रत्येकं स्पर्शादयः पुद्गला एव, सप्रतिघत्वात् । अस्पृष्टस्याऽप्रतिघाताज्ज्ञानवत् । तदिमे स्पर्शादयोऽन्योन्याविनाभाविनोऽपुद्गलाः । 5

ने च प्रत्येकं पृथक् पृथक् स्पर्शादयः स्पर्श-रस-गन्ध-वर्णाः पुद्गला एव परमाणव एव । समुदितानां स्पर्शादीनां कथञ्चित् पुद्गलाभेदेन पुद्गलत्वमस्तीति प्रत्येकग्रहणम् । कुतः ? सैप्रतिघत्वात्, स्पर्शादीनां सप्रतिघत्वेन भवद्भिरिष्टत्वात् । रूप रस-गन्धपरमाणवः सप्रतिघा
26B भवद्भिरिष्यन्ते । सप्रतिघत्वं च स्वावष्टब्धदेशे परप्रवेशोपघातकरणम्, न चैतद् रूपपरमाणूनां रसपरमाणूनां गन्धपरमाणूनां वा स्पर्शाभावे सङ्गच्छते, परेणास्पर्शे सत्युपघातस्य कर्तुमशक्यत्वात् । तदाह— अस्पृष्टस्याऽसंसृष्टस्य वस्तुनोऽप्रतिघातात् प्रतिघातस्य कर्तुमशक्यत्वात्, ज्ञानवदिति साधर्म्यम् । यथा ज्ञानमस्पर्शं सन्न कस्याप्यपरस्य ज्ञानस्याऽर्थस्य वा प्रतिघातं कर्तुं प्रभवति, ज्ञानस्य वा यथाऽस्पर्शस्य न कोऽप्यपरो ज्ञानमर्थो वा, द्वयोरेव हि स्पर्शवतोः प्रतिघात्य-प्रतिघातकभावात्, तथा रूपादिपरमाणवोऽप्यस्पर्शाः
27A सन्तो नान्यस्य प्रतिघातं कुर्युरन्यो वा न तेषाम् । तस्मात् सप्रतिघत्वान्यथानुपपत्त्या रूपादयः स्पर्शवन्त एष्टव्याः ।

ननु यत्र रूपादिपरमाणवस्तत्रावश्यं स्पर्शपरमाणवोऽपि, न खलु स कश्चिद्देशोऽस्ति यत्र रूपपरमाणवो रसपरमाणवो गन्धपरमाणवो वा स्पर्शपरमाणुरहिताः केवला एवाऽवतिष्ठन्ते, ततश्च रूपादयः स्वयमस्पर्शवन्तोऽपि सन्निहितस्पर्शपरमाणुबलेन परं प्रतिघ्नन्तीति । तन्न । यस्माच्च यस्मिन्नेव देशे रूपादिपरमाणवस्तस्थिवांसस्तस्मिन्नेव स्पर्शपरमाणवोऽपि,
27B सप्रतिघत्वहानिप्रसङ्गात्, किन्तु भिन्नदेशेषु । ततः स्पर्शपरमाणवो यत्र स्वयं स्थितिमास्थिषत तत्रान्यप्रवेशं वारयेयुः, अन्यत्र तु रूपादिदेशेषु कथं वारयन्ति ? अन्यथा ज्ञानदेशेऽपि परमाणुप्रवेशवारणप्रसङ्गः । न हि स्पर्शपरमाणवः क्वापि न सन्ति, तथा च ज्ञानमपि सप्रतिघं स्यात् । तद् रूपादिपरमाणवः स्वतः स्पर्शवन्तोऽभ्युपेयाः, तथा च सति गन्धादिमन्तोऽपि सन्तु । द्वयोरेकत्रावस्थानाभ्युपगमेऽन्याभ्यां किमपराद्धं येन तावपि नाभ्युपगम्येते ।

१ भस्मलेपेन ॥ २ न च प्रत्येकं स्पर्शादयः पुद्गला एव ॥ ३ सूत्रम् ॥ ४ अस्पृष्टस्याप्रतिघातात् ॥ ५ सूत्रम् ॥ ६ प्रतिघातं कर्तुं प्रभवति ॥ ७ कुर्यात् ॥ ८ यथा रूपपरमाणुसन्निधौ स्पर्शपरमाणवो वर्तन्ते तथा ज्ञानसन्निधावपि, ततश्च ज्ञानस्यापि सप्रतिघत्वम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तेदित्युपसंहरति, तस्मादिमे पूर्वं प्रपञ्चिताः स्पर्शादयः स्पर्श-रस-गन्ध-वर्णा अन्योन्याविनाभाविनः वियुक्ता न भवन्ति, एतावता सर्वपुद्गलजातीनां चतुर्गुणत्वोपसंहारः, अपुद्गला
28A अपरमाणवः, न स्वतन्त्रं द्रव्यं किन्तु गुणा इत्यर्थः । एतावता प्रत्येकं परमाणुत्वाभावोपसंहारः । अपुद्गलत्वं चामीषां प्रत्येकपक्षाश्रयणेन, समुदितानां पुनः कथञ्चित् पुद्गला-
28B भेदेन पुद्गलत्वमप्यस्तीति । 5

तदेवं पुद्गलानां स्वरूपमभिधाय भेदानाह–

औदारिकादिभेदेनाऽनेकविधाः पुद्गलाः । द्वेधाऽपि–अणवः स्कन्धाश्च । आद्यः स्कन्धपरिणामिहेतुर्द्रव्यतोऽनंशः परमाणुः । स युगपदविरुद्धद्विस्पर्शः, अन्यतरैकरसादिः । तत्संघातभेदजो द्व्यणुकादिः सांशः स्कन्धः चतुरष्टस्पर्श-पञ्चरस-वर्ण-द्विगन्ध उद्भूताध्यक्षत्वश्चैन्द्रियकः । 10

औदारिकादीति । 'आदि'ग्रहणाद् वैक्रिया-ऽऽहारक-तैजस-भाषा-ऽऽनप्राण-मनः-कर्मणां परिग्रहः । 'विध'शब्दः प्रकारवचनः पुंस्त्रीलिङ्गः । अनेके अनेका वा विधाः प्रकारा येषामिति विग्रहः । औदारिकादिभेदेन औदारिकादिप्रकारेण अनेकविधाः पुद्गला भवन्ति ।

आगमोक्तभेदापेक्षयाऽनेकविधत्वं प्रतिपाद्य प्रातीतिकं द्वैविध्यमाह– द्वेधाऽपीति ।
29A न केवलमनेकप्रकाराः, द्विप्रकारा अपि पुद्गला भवन्तीत्यपिशब्दार्थः । अथवा पुद्गल- 15
प्रकाराणां द्वैविध्यमाह–द्वेधाऽपीति । पुद्गलानामनेकोऽपि प्रकारो द्विप्रकारो भवति । अपिः सम्भावनायाम्, द्विप्रकारत्वमेव सम्भाव्यते, तृतीयप्रकारस्यासम्भवात् ।

तदेव द्वैविध्यमाह–अणवः स्कन्धाश्च । सौक्ष्म्येणास्मदादीन्द्रियव्यापारातीतत्वाद् अण्यन्ते शब्दमात्रेणैव गम्यन्ते, प्रदेशमात्रभाविस्पर्शादिपर्यायप्रसवसामर्थ्येनाऽण्यन्ते शब्द्यन्त इति वाऽणवः, सौक्ष्म्याच्चात्मादय आत्ममध्या आत्मान्ताश्च । तदुक्तम्– 20

" आत्मादिमात्ममध्यं च, तथात्मान्तमतीन्द्रियम् ।
अविभाग विजानीयात्, परमाणुमनंशकम् ॥ " [ ] इति ।

29B स्थौल्यात् प्रायो ग्रहण-विक्षेपणादिव्यापारस्कन्दनात् स्कन्धः ।

१ तदिमे स्पर्शादयोऽन्योन्याविनाभाविनोऽपुद्गलाः ॥ २ स्पर्शादीनाम् ॥ ३ औदारिकादिभेदेनानेकविधाः पुद्गलाः ॥ ४ सूत्रम् ॥ ५ समुच्चयेऽपिवत्र ॥ ६ वैक्रियाहारकादीनां प्रत्येकं द्वैविध्यम् ॥ ७ सूत्रम् ॥ ८ न त्विन्द्रियेण ॥ ९ ज्ञायन्ते ॥ १० स्वरूपमेवादिर्येषाम् ॥ ११ अविभागोऽद्वैधारूपो जीवोऽप्यस्ति, तद्व्यवच्छित्त्यै अनंशकमिति ग्रहः, यतो जीवः सांशः ॥ १२ प्रायेण ग्रहणं विक्षेपणं च व्यापारं स्कन्दति, अचित्तमहास्कन्धादीनां न ग्रहणं न विक्षेपः ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उभयत्र जातिभेदापेक्षं बहुवचनम्, अणु-स्कन्धौधाराणामवान्तरजातिभेदानामनन्तत्वात्। अणुस्कन्धा इति समासाकरणं स्कन्धस्याणुविशेषणत्वशङ्कानिरासार्थम्। अन्यथा ह्यणवो लघवः स्कन्धा इति शङ्का स्यात्। ननु 'द्वेधाऽपि' इत्यनेनाणुविशेषणत्वशङ्कानिवृत्तिः सिद्धा तत्प्रपञ्चरूपत्वादस्य योगस्य, न, उत्तरयोगेन सह द्वैविध्यशङ्काभावात्। एकभेदस्य प्रतिपादकोऽयं द्वितीयभेदस्योत्तर इत्यपि ह्याशङ्केत। तत्सङ्घातेत्यादि तु स्कन्धस्य लक्षणं कृतम्, तस्य बहुवक्तव्यत्वाद्, नाणोः अल्पवक्तव्यत्वादित्यपि वितर्कयेत्। 5

30A तत्र अणव इत्यनेन स्कन्धैकान्तप्रतिक्षेपः, परमाणूनामपि प्रमाणसिद्धत्वात्। द्व्यणुकादिः स्कन्धो भेद्यः, मूर्त्तत्वे सति सावयवत्वात्, कुम्भवत्। योऽसौ तद्भेदाज्ज्ञातोऽनंशोऽवयवः स परमाणुरिति प्रमाणसिद्धाः परमाणवः स्कन्धवत्। स्कन्धाश्चेत्यनेनाऽण्वेकान्तप्रतिक्षेपः। न ह्यणव एव इत्येकान्तः श्रेयान्, स्कन्धानामक्षबुद्धौ प्रतिभासनात्। तत्प्रतिभासस्य भ्रान्तत्वे बहिरन्तश्च परमाणूनामप्रतिभासनान्न प्रत्यक्षमभ्रान्तं स्यात्। तथा चार्थाभावप्रसङ्गः। अनुमानस्यापि परमाणुग्राहिणोऽसम्भवात्, भ्रान्तात् प्रत्यक्षतः कस्यचित् तल्लिङ्गस्याव्यवस्थानात्। 10

30B तत्र प्रथमं तावदणूनां स्वरूपमाह—आद्य उत्तरोत्तरद्व्यणुकादिस्कन्धापेक्षया प्रथमः। स्कन्धानां द्व्यणुकादीनां परिणामिहेतुः परिणामिकारणम्, आद्य इति पदमत्रापि सम्बध्यते, सर्वस्कन्धानां प्रथमं परिणामिकारणमित्यर्थः, द्रव्यतो द्रव्यावयवापेक्षयाऽनंशो निरवयवः, एवम्भूतो यः स परमाणुः। एकवचननिर्देशो जात्यपेक्षः। तत्र आद्यपदेनातिसूक्ष्मत्वमाह। स्कन्धपरिणामिपदेनैकान्तव्यतिरिक्तस्यावयविनोऽभावमाह। त एव हि परमाणवः स्कन्धीभवन्ति, न पुनस्तेभ्यः समुत्पद्य व्यतिरिक्तं द्रव्यं तेष्वेव समवैति। अवयवेभ्य एकान्त- 15
31A भेदिनोऽवयविनस्तेषु वृत्त्यभावस्य साधयिष्यमाणत्वात्। द्रव्यतोऽनंशपदेन भावांशैः स्पर्शादिभिः सांशत्वम्, स्वयं द्रव्यप्रदेशैरूपत्वाद् द्रव्यांशैर्निरंशत्वं चाह। 20

ननु चाणोः प्रदेशत्वे प्रदेशी कः स्यात्? स एव स्पर्शादिगुणाश्रयत्वादिति ब्रूमः। कथं स एव प्रदेशः प्रदेशी च विरोधादिति चेत्। न। उभयस्वभावस्यापि

१ * अत्र 'प्रसअ' इति टिप्पणं वर्तते। तत्र 'प्रस' इत्यस्य प्रथमसमासो बहुव्रीहिरित्येवार्थः। किन्तु 'अ' इत्यस्य अर्थः सम्यग् न ज्ञायते। अग्रेऽपि पृ० 148 B मध्ये ईदृशं टिप्पणं वर्तते, अतस्तत्रापि विलोकनीयम्॥ २ द्व्यणुक-त्र्यणुकादिभेदेन रक्त-पीतादिभेदेन चानन्तत्वात्॥ ३ * योगस्य सूत्रस्येत्यर्थः॥ ४ आद्यः स्कन्धेत्यादिना॥ ५ अणुस्कन्धा इति॥ ६ ननु यद्येवं शङ्का स्यात् तदा तत्संघातेत्यादिना सूत्रेण किमिति स्कन्धस्यैव लक्षणं कृतम्, न सूत्रान्तरेण परमाणूनामपि, इत्याशङ्कायाम्॥ ७ विनाश्यः॥ ८ धर्माधर्मादिभिर्व्यभिचारः स्यादिति 'मूर्तत्वे' इति विशेषणम्, मूर्तत्वादित्येव कृते पुद्गलेषु अनैकान्तिकः स्यात्॥ ९ स्कन्ध॥ १० केवलरूपोऽभूत्॥ ११ परमाणु॥ १२ आद्यः स्कन्धपरिणामिहेतुर्द्रव्यतोऽनंशः परमाणुः॥ १३ प्राक् संख्यापेक्षया 'आद्य'शब्दस्य प्रथमता व्याख्यायि, इदानीं परिणामिकारणापेक्षयेति॥ १४ द्रव्यं चासौ प्रदेशरूपश्च॥ १५ निर्विभागो भागः प्रदेशः॥ १६ अवयवी॥ १७ अणुः प्रदेशीति सम्बन्धः॥ 25 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

घटनात् । प्रदेशस्वभावस्तावत् तस्यास्ति, स्कन्धावस्थायां तद्भावान्यथानुपपत्तेः । प्रदेशिस्वभावश्च द्रव्यरूपत्वात् स्कन्धवत् । ननु द्रव्यत्वाद् घटवत् परमाणुरनेकद्रव्यांशवानस्तु । न । परमाणुत्वविरोधात्, अनेकांशवतो घटवदेव स्थूलत्वप्रसङ्गात् ।

31B परमाणूनामनेकप्रदेशत्वाभावे सर्वात्मनैकदेशेन च संयोगेऽणुमात्रपिण्डप्रसङ्गात् सावयवत्वप्रसङ्गाच्च परमस्कन्धस्य प्रतीतिविरोधात् सप्रदेशोऽणुर्न पुनरप्रदेश इति चेत् । न । सप्रदेशस्य सर्वदाऽप्यभेद्यत्वाऽयोगात्, मूर्त्तस्य ह्यनेकावयवस्य घटस्येव भेत्तुं शक्यत्वात् । परमस्कन्धप्रतीत्यभावस्तु उभयत्रापि तुल्यः । प्रदेशोऽपि ह्यणोरन्यान्तरप्रदेशैरेकदेशेन यदि सम्बध्यते तदाऽसौ देशोऽवयवी परमाणुवत् स्यात्, तथा चानवस्थाऽपरापरदेशप्रकल्पनात् । सर्वात्मना च सम्बन्धे पिण्डोऽणुमात्रः स्यात्, सर्वप्रदेशानां परस्परात्मसु सर्वात्मनाऽनुप्रवेश्

32A शात्, तथा च परमस्कन्धस्य प्रतीत्यभावः । [12]स्कन्धप्रतीत्यन्यथाऽनुपपत्त्या [13]प्रकारान्तरेणाणुप्रदेशानां सम्बन्धे तत एव परमाणूनामपि [14]प्रकारान्तरेण सम्बन्धोऽस्तु[15] । तस्माद् द्रव्यांशैर्निरंश एवाणुः ।

तत्र भावांशानाह—[16]सं पूर्वं प्रसाधितसत्ताकः परमाणुर्युगपदेककालम् अविरुद्धावविरोधिनौ द्वौ स्पर्शौ यस्य स तथा । इह सूक्ष्मद्रव्यसम्बन्धिनां शीतोष्णस्निग्धरूक्षाणां चतुर्णामेव मध्यादविरुद्धौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ द्वावेव स्पर्शौ परमाणावेकदा भवतः । न त्रयं नाप्येकः द्वयमपि न विरुद्धमित्यर्थः ।

तथाऽन्यैस्तैरेकरसादिः [17]सं इति सम्बन्धः । पञ्चविधरस-द्विविधगन्ध-पञ्चविधवर्णेषु मध्या-

32B दन्यतरोऽनिर्द्धारितरूपविशेष एकोऽद्वितीयो रस आदिग्रहणाद् गन्धो वर्णो वा यस्य स तथा । यथा परमाणावेकदाऽविरुद्धं स्पर्शद्वयं भवति तथैवानिर्द्धारितरूप एको रसो गन्धो वर्णो वा भवति, न पुनर्विरुद्धावविरुद्धौ वा द्वावित्यर्थः ।

तदेवमणोः स्वरूपमभिधाय स्कन्धस्याह—तेषांमणूनां यौ वक्ष्यमाणलक्षणौ सङ्घातभेदौ ताभ्यां जातो द्व्यणुकादिः; 'आदि'ग्रहणात् त्र्यणुकप्रभृत्यनन्तानन्ताणुकपर्यन्तस्य परिग्रहः, सांशः सावयवः । विशेषानुपादानाद् भावांशैर्द्रव्यांशैश्च सांशत्वम् । एवम्भूतो यः स स्कन्धः । तन्त्रेण सङ्घातो भेदः सङ्घातभेदौ च गृह्यन्ते । तत्र कश्चित् सङ्घाताद् भवति यथा द्वयोरण्वोः सङ्घाते

१ भावप्रदेशवानित्यर्थः ॥ २ प्रदेशस्वभावा° ॥ ३ विवादाध्यासितोऽणुः प्रदेशी, द्रव्यत्वात्, स्कन्धवत् ॥ ४ प्रदेशिस्वभावो भावप्रदेशवानित्यर्थः ॥ ५ अत्र भावप्रदेशवत्त्वेन स्कन्धो दृष्टान्त इति न दृष्टान्तासिद्धिः ॥ ६ स्कन्धरूपः ॥ ७ अणुः स्थूलः, अनेकांशवत्त्वात् ॥ ८ द्रव्यांशैः ॥ ९ द्रव्यांशैः ॥ १० कोऽर्थः ? सप्रदेशो विनाश्य एव ॥ ११ जीवव्यवच्छित्त्यै मूर्तेति ॥ १२ परः ॥ १३ नैरन्तर्येण ॥ १४ आचार्यः ॥ १५ कोऽर्थः ? अणुप्रदेशानां सम्बन्धं मा भस्त, किन्तु परमाणूनामेव सम्बन्धं मनुष्व ॥ १६ स युगपदविरुद्धद्विस्पर्शः ॥ १७ सूत्रम् ॥ १८ परमाणुः ॥ १९ तत्संघातभेदजो द्व्यणुकादिः सांशः स्कन्धः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

33A द्व्यणुकं त्रयाणां त्र्यणुकम् । कश्चिद् भेदात्, यथा त्र्यणुकादेकाण्वपगमे [1]द्व्यणुकं चतुरणुकात् त्र्यणुकम्। तथा कश्चिद् भेद-सङ्घाताभ्याम्, यथैकस्मिन्नेव समये द्व्यणुकादेकाणुभेदेऽपरसंहनने द्व्यणुकान्तरमिति ।

तत्र भावांशानाह— [2]चतुरिति । शीतोष्णस्निग्धरूक्षाश्चत्वार एव सूक्ष्मपरिणामपुद्गलनिष्पाद्यानां स्कन्धानाम्, नान्ये कठिनतादयः, सर्वपरमाणुष्वप्येष एव न्यायः । [3]बादर- 5
परिणामपुद्गलनिष्पाद्यानां तु चतुरूर्ध्वं यथासम्भवमंशभेदेनाऽष्टापि भवन्ति, [4]सूक्ष्मस्थायिनस्तु चत्वारो भवन्त्येवं । [5]सूक्ष्मेषु पुनरेषामपि न नियमः । वर्ण-रस-गन्धाः पुनः [6]सूक्ष्मेषु [7]बादरेषु चैकाद्या अपि सम्भवन्तीति ।

कः पुनः स्कन्धश्छद्मस्थेन्द्रियग्राह्यो भवतीत्याह— "[8]उद्भूत छद्मस्थेन्द्रियग्रहणयोग्यमध्यक्षत्वं प्रत्यक्षत्वं यस्य स तथाभूतः स्कन्ध ऐन्द्रियको भवति, इन्द्रियैर्गृह्यते "कचित्" 10
[सि० ६।२।१४५] इत्यणि "यावादिभ्यः" [सि० ७।३।१५] इति स्वार्थे के चैन्द्रियकः, छद्मस्थेन्द्रियग्राह्यो भवतीत्यर्थः । अयमर्थः — सर्व एव पुद्गला इन्द्रियापेक्षालक्षणमुपाधिमनपेक्ष्य सर्वदा प्रत्यक्षा एव, सर्वज्ञज्ञानेन गृह्यमाणत्वात् । [9]अन्यथा तदभाव-
33B प्रसङ्गः, सर्वदाऽप्यप्रत्यक्षस्य वस्तुनो जगत्यभावात् । एतावांस्तु विशेषः — निरुपाध्येवाध्यक्षत्वं यदा केषाञ्चित् पुद्गलानां सोपाधेरध्यक्षत्वरूपेण परिणमति तदा ते छद्मस्थेन्द्रियैरपि 15
गृह्यन्ते । न पुनः सर्वथाऽप्यसदेवाध्यक्षत्वमुत्पद्यते, सर्वथाऽप्यसतः षष्ठभूतस्येवोत्पादायोगात्। तस्मात् सामान्यरूपेण सदध्यक्षत्वं येषु विशेषरूपतामुपैति ते स्कन्धा ऐन्द्रियका भवन्ति, अन्ये त्वतीन्द्रिया इति ।

[10]ननु पटादिरूपव्यतिरेकेण चक्षुर्बुद्धावप्रतिभासमानोऽवयवी कथं चाक्षुषो नाम, गन्धा-
[11]देरपि चाक्षुषत्वप्रसङ्गादिति ? । न । पटाद्यवयविन एव चक्षुर्बुद्धौ प्रतिभासनात् तद्व्य- 20
34A तिरेकेण रूपस्य तत्राऽप्रतीतेः गन्धादिवत् । अपि च, चक्षुर्बुद्धौ रूपं प्रतिभासते न पुनस्तदभिन्नोऽप्यवयवीति ब्रुवाणः कथं नोन्मत्तः । न च रूपादभिन्नोऽवयवी रूपमेव भवति, एकान्ताभेदस्याप्यनभ्युपगमात्, [12]गुणस्वात्मवद् गुणगुणिभावस्याभावप्रसङ्गात् ततो [13]रूपावयविनोरभेदाद् रूपस्य चाक्षुषत्वेऽवयविनोऽपि चाक्षुषत्वम् ।

१ अंशभेदेनेति योज्यम् ॥ २ अपगमे ॥ ३ चतुरष्टस्पर्श-पञ्चरसवर्ण-द्विगन्धः ॥ ४ स्पर्शाः ॥ ५ 25
स्थूल ॥ ६ स्कन्ध ॥ ७ बादरेषु ॥ ८ स्कं० [=स्कन्धेषु] ॥ ९ स्कं [=स्कन्धेषु] ॥ १० स्कं [=स्कन्धेषु] ॥ ११ उद्भूताध्यक्षत्वमैन्द्रियकः ॥ १२ विशेषण ॥ १३ सर्व[ज्ञ ?]ज्ञानाग्रहणे ॥ १४ उपाधिरिन्द्रियलक्षणः । इन्द्रियप्रत्यक्षग्रहणयोग्यरूपेणेत्यर्थः ॥ १५ पुद्गलाः स्कन्धापन्नाः ॥ १६ बौद्धः ॥ १७ अप्रतिभासमानत्वाविशेषात् ॥ १८ चक्षुर्बुद्धौ ॥ १९ कुतोऽनभ्युपगम इत्याह— गुणेति । यथा गुणस्य निजरूपापेक्षया न गुणगुणिभावः, एवं गुणेभ्यो गुणिन एकान्ताभेदे गुणगुणिभावो न स्यादित्यर्थः ॥ २० गुणस्य स्वस्वरूपवत् ॥ 30
२१ यदि रूपमेवावयवी ॥ २२ एकान्ताभेदे सति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवं स्पार्शनत्वाद्यप्यवयविनो द्रष्टव्यम्, स्पर्श-रस-गन्धेभ्यः कथञ्चिदभेदात् तत्प्रत्यक्षत्वे
34B तस्योपि प्रत्यक्षत्वात्[1]। न चास्माकं स्पार्शनं दार्शनमेव वा द्रव्यमिति नियमः, स्पर्शादि-रहितस्य द्रव्यस्य द्रव्यरहितानां स्पर्शादीनां च प्रत्यक्षाविषयत्वात्, द्रव्याणामेवाऽसर्व-पर्यायाणां मति-श्रुतयोर्विषयत्वव्यवस्थापनात्। यदुक्तम्—

"मति-श्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु" [तत्त्वार्थ० १।२७] इति। तस्माच्चाक्षुषत्ववदवयविनः स्पार्शनत्वाद्यप्यस्ति, अभेदस्य सर्वत्रापि तुल्यत्वात्।

स्यादेवम्—स्कन्धस्य ग्रहणं यदि स्वावयवग्रहणपूर्वकं तदाऽन्तशः परमाणूनां तदवयवा-
35A नामतीन्द्रियत्वादग्रहणेन स्कन्धाऽग्रहणं स्यात्। अथ स्वावयवाऽग्रहणपूर्वकं तदा प्रदीप-कज्चुककवच्चिताशेषावयवस्याप्यवयविनो ग्रहणं स्यात्। कतिपयावयवग्रहणपूर्वकेऽपि स्कन्ध-ग्रहणे सर्वाग्रहणमेव, कतिपयावयवानामप्यन्तशः परमाणूनां व्यवस्थानात् तेषां च ग्रहणा-सम्भवात्। ततः परमार्थतो न स्कन्धः सिध्यति। अनाद्यविद्यावशात्तु एकत्वपरिणामपङ्का-पङ्किलेषु परमाणुष्वेव तदाकारप्रत्ययोऽविरलचिह्नेषु घनप्रत्ययवदिति। तन्न। द्रव्यानभ्यु-पगमपक्षेऽपि वस्त्वग्रहणस्य तुल्यत्वात्, परमाणूनामतीन्द्रियत्वात्।

35B परमाणूनामेव स कोऽपि विशिष्टः क्षणः प्रादुरस्ति यो मांसचक्षुषामपीन्द्रियविषयो भवतीति चेत्, न, कदाचित् क्वचित् कस्यचित् परमाणुप्रतीत्यभावात्। एक एव हि स्थवीयानाकारः परिस्फुटमवयविधर्मिणायामनुभूयते, नापरं किञ्चित्। परमाणव एव तमा-कारमसन्तमेवोपदर्शयन्तीति चेत्, ननु ते स्वयमप्रतिमाताः कथं तमाकारमुपदर्शयेयुः, सर्वस्य तदुपदर्शनप्रसङ्गात्। सत्त्वादिना प्रतिमाता एव त इति चेत्। न। परमाणु-त्वेनापि तेषां प्रतिभातत्वप्रसङ्गात्।

स्यान्मतम्—

"एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्।
कोऽन्यो न दृष्टो भागः स्याद्यः प्रमाणैः परीक्ष्यते॥" [प्रमाणवार्तिके ३।४२]

१ द्रव्यस्यापि॥ २ सावयवानां ग्रहणेऽवयवी गृह्यते अग्रहणे वा, विकल्पद्वयी॥ ३ अवयविनः॥ ४ सर्वस्य स्कन्धस्याग्रहणमेव॥ ५ ननु यदि स्कन्धो नास्ति तदा कथं घटोऽयं पटोऽयमिति समुदिताकारः प्रत्यय इत्याशङ्कायां पर एवाह॥ ६ एकत्वाकार॥ ७ * "केशाः·····चिकुराः·····चिहुरास्तु प्राकृते कस्य हादेशात्, संस्कृतेऽपीति दुर्गः, यदाह—"कुन्तला मूर्धजास्त्वल्लाश्चिकुराश्चिहुराः [ ] इति।" इति अभि-धानचिन्तामणिनाममाला[श्लो० ५६७]स्वोपज्ञवृत्तौ॥ ८ निबिडप्रत्ययोऽनाद्यविद्यावशो यथा॥ ९ अवयविद्रव्या॥ १० सर्वज्ञं मुक्त्वाऽन्यस्य कस्यचित्॥ ११ स्कन्धप्रतिभासस्यैव भावात्, घट एवायमित्येवं विकल्पबुद्धिर्जायते, न तु परमाणवोऽमीत्येवं विकल्पबुद्धिरुदेतीति॥ १२ निश्चयधियाम्॥ १३ परमाण्वादि-राशेः॥ १४ सत्त्वपरमाणुत्वयोरभेदादिति भावः॥ १५ परमाणूनाम्॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इति वचनात् सत्त्वेन प्रतिभासे[1] परमाणुत्वेनापि प्रतिभाता एव[2] ते । केवलं[3] तथानिश्चया-
36A भावात् तद्रूपाप्रतिभासनमुच्यते । अनुभवो[4] हि यथाविकल्पाभ्यासं निश्चयप्रत्ययं जनयति, यथा रूपदर्शनाविशेषेऽपि कुणप-कामिनी-भक्ष्यविकल्पाः । बुद्धिपाटवं तद्वासनाभ्यासः प्रकरणमित्यादयश्चानुभवाद् भेदनिश्चयोत्पत्तिसहकारिणः । न च विकल्पानुत्पादे तद् गृहीतमिति व्यवस्थापयितुं शक्यम्, यतो "यत्रैव जनयेदेनं[5] तत्रैवास्य प्रमाणता" [ ] भवतीति ।

कथमेवं[6] सति सत्त्वादणुत्वस्य भेदो न भवति, विरुद्धधर्माध्यासात्, कुम्भाम्भो-
36B रुहवत्? यदि पुनर्निश्चयस्यावस्तुविषयत्वान्न तद्भावाभावाभ्यां वस्तुस्वभावभेद इति मतं तदा कथं तेन[7] दर्शनस्य प्रमाणेतरभावव्यवस्था निश्चयोत्पत्त्यनुत्पत्तिभ्याम्? विपर्ययोपजननानु-पजननाभ्यामपि[8] तद्व्यवस्थानुषङ्गात् । निश्चय एव प्रामाण्यहेतुर्दृष्टाध्यवसायित्वात्, न विपर्ययः संशयो वा तद्विपरीतत्वादिति चेत् । ननु स्वलक्षणानालम्बनश्च निश्चयो दृष्टार्था-ध्यवसायी चेति व्याहतमेतत् । ततः स्वलक्षणाध्यवसायात् स्वलक्षणालम्बन एवेति वस्तु-विषयो निश्चयोऽन्यथाऽनुपपत्त्या सिद्धः । तथा च तद्भावाभावाभ्यां वस्तुस्वभावभेदोऽवश्यं-
37A भावीति परमाणुत्व-सत्त्वयोर्भेदः प्राप्तः, न चैवमिष्यते ।

तत्[9] परमाणुत्वेनाऽप्रतिभाताः परमाणवः सत्त्वेनाप्यप्रतिभाता एव । न चाप्रतिभाताः स्थवीयांसमाकारं दर्शयितुमीशते, अतिप्रसङ्गात्, इति परमाणूनामतीन्द्रियत्वात् स्थूल-स्कन्धस्य चानभ्युपगमात् पदार्थाग्रहणं समानमेव । अस्माकं च यदेवाऽवयवग्रहणं तदेवा-वयविग्रहणं यदेवावयविग्रहणं तदेवावयवग्रहणं परस्परं कथञ्चिदभेदादिति पूर्वापरग्रहण-प्रश्नावकाश एव नास्ति । न च परमाणूनां सर्वथाऽप्यतीन्द्रियत्वमेव, परिणतिविशेष-भृतामिन्द्रियकत्वात् । परिणतिविशेष एव च स्कन्ध उच्यत इति द्रव्यमैन्द्रियकमेव । तस्मात् परमाणुसङ्घातभेदजो द्व्यणुकादिः सांशः उद्भूताध्यक्षत्वश्चेन्द्रियकः स्कन्धः ।

एकत्वपरिणामोन्मुख्यप्रकर्षपर्यन्तः संघातः । स द्व्याद्यधिक-गुणेन स्निग्धस्य रूक्षस्य वा । विजातीयेन तु साम्येऽपि मध्यमोत्कृष्ट-गुणस्य । अधिकगुणः परिणमकः, समगुणः परिणम्योऽपि । भेदो विश्लेषपरिणामः ।

१ बु[द्धौ] ॥ २ परमाणवः ॥ ३ परमाणुत्वा(त्व)निश्च ॥ * अत्र यथाश्रुते 'परमाणुत्वानिश्चयात्' इति विवक्षा ज्ञेया । अस्मत्कल्पितपाठानुसारेण 'परमाणुत्वनिश्चयाभावात्' इति विवक्षा ज्ञेया ॥ ४ निर्विकल्पकं प्रत्यक्षम् ॥ ५ यस्मात् ॥ ६ विकल्पाभ्यासस्यानतिक्रमेण ॥ ७ विकल्पबुद्धिम् ॥ ८ प्रस्तावः ॥ ९ अंशे ॥ १० विकल्पबुद्धिम् ॥ ११ उत्तरम् ॥ १२ गृहीताग्रहीतयोर्विरोधात् सत्त्व-परमाणुत्वयोः ॥ १३ निर्विकल्पकस्य ॥ १४ विपर्ययस्य विकल्पस्य च भ्रान्तत्वाविशेषात् ॥ १५ दृष्टाध्यवसायित्वाभावात् ॥ १६ विकल्पः स्वलक्षणालम्बनः [अन्यथा] स्वलक्षणाध्यवसायानुपपत्तेः ॥ १७ निश्चय ॥ १८ '५' [=तस्मात्] ॥ १९ परमाणुत्व-सत्त्वयोरभेदात् त्वन्मते ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

37B तत्र सङ्घातं व्याचष्टे—[1]एकत्वपरिणामे स्कन्धपरिणतौ औन्मुख्यं ह्यादिपरमाणूनां द्व्यणुकादिस्कन्धपरिणामानुकूलपर्यायोत्पादारम्भः, औन्मुख्यस्य प्रकर्षः स्कन्धपरिणामानुकूलोत्तरोत्तरपर्यायवृद्धिः, प्रकर्षस्य पर्यन्त एकत्वपरिणतेरनन्तरः प्राचीनः परमाणुपर्यायः । तावद्व्यनुकूलपर्यायोत्पत्तिप्रकर्षगमनं यावदेकत्वपरिणामो नात्मलाभं लभते, एकत्वपरिणामे तु नास्ति प्रकर्षगतिः, अत एकत्वपरिणामात् प्राचीनः परमाणूनां पर्याय औन्मुख्यप्रकर्षपर्यन्तः, स च सङ्घातः । ततः सङ्घातात् केचित् स्कन्धाः प्रादुःपन्तीति ।

अथायं सङ्घातः किंरूपाणां परमाणूनां भवतीति । अत्राह—[2]सं पूर्वप्रपञ्चितरूपः सङ्घातो
38A द्व्याद्यधिकगुणेन द्व्यादिसङ्ख्यया, 'आदि'शब्दात् त्र्यादिपरिग्रहः, अन्यस्मात् परमाणोरधिको गुणः स्नेह-रूक्षलक्षणो यस्य [3]स तथा ।

अयमर्थः—एकगुणस्निग्धस्यापरेण त्रिगुणस्निग्धेन चतुर्गुणस्निग्धेन पञ्चगुणस्निग्धेनापि सह सङ्घातो भवति । तथा द्विगुणस्निग्धस्यापरेण चतुर्गुणस्निग्धेन पञ्चगुणस्निग्धेनापि भवति । एवं त्रिगुणादेरपि भाव्यम् । तथा त्रिगुणस्निग्धस्यापरेणैकगुणस्निग्धेन भवति । एवं चतुर्गुणादिस्निग्धस्याप्यपरेण ह्यादिगुणस्निग्धेन भाव्यम् । तथैकगुणरूक्षस्यापरेण त्रिगुणरूक्षेण चतुर्गुण-पञ्चगुणरूक्षेण वा । तथा द्विगुणरूक्षस्यापरेण चतुर्गुणरूक्षेण, पञ्चगुणरूक्षेणापि भवति । एवं त्रिगुणादेरपि रूक्षस्य भाव्यम् । तथा त्रिगुणरूक्षस्यापरेणैकगुणरूक्षेण
38B सङ्घातो भवति, एवं चतुर्गुणादिरूक्षस्याप्यपरेण द्व्यादिगुणरूक्षेण भाव्यम् ।

कस्य पुनर्द्व्याद्यधिकगुणेन सङ्घातो भवतीत्याह—स्निग्धस्य रूक्षस्य वा । उत्तत्र 'विजातीय'ग्रहणादत्र सजातीयेनेति सामर्थ्यगम्यम् । ततः स्निग्धस्यापरेण द्व्याद्यधिकगुणस्निग्धेन रूक्षस्याप्यपरेण द्व्याद्यधिकगुणरूक्षेण सङ्घातो भवतीति स्थितम् । तदत्र द्व्याद्यधिकपदेन समसङ्ख्यगुणानामेकाधिकगुणानां वा सदृशानां परमाणूनां सङ्घातामावमाह । तेनैकगुणस्निग्धस्यैकगुणस्निग्धेन, द्विगुणस्निग्धस्य द्विगुणस्निग्धेन, यावदनन्तगुणस्निग्धस्यानन्तगुणस्निग्धेन, तथैकगुणस्निग्धस्य द्विगुणस्निग्धेन, द्विगुणस्निग्धस्य त्रिगुणस्निग्धेन,
39A यावदनन्तगुणस्निग्धस्यैकाधिकानन्तगुणस्निग्धेन, एवमेव रूक्षस्य रूक्षेण समसङ्ख्यगुणेनैकाधिकगुणेन वा सङ्घातो न भवतीति सिद्धम्, तथाविधपरिणतिशक्तेरभावात् ।

१ **एकत्वपरिणामौन्मुख्यप्रकर्षपर्यन्तः संघातः** ॥ २ एकत्वपरिणामरूपे कार्ये ॥ ३ यदनन्तरमेकत्वपरिणाम उत्पद्यते ॥ ४ **स द्व्याद्यधिकगुणेन स्निग्धस्य रूक्षस्य वा** ॥ ५ परमाणुः ॥ ६ एकगुणस्य सतः द्वाभ्यामधिको यः स त्रिगुणः ॥ ७ एकगुणस्निग्धस्य एकगुणस्नेहेन सहादीनाम् ॥ ८ एकगुणस्निग्धस्य द्विगुणस्नेहेन सहादीनाम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु स्निग्धरूक्षगुणयोरुत्कर्षापकर्षतारतम्यं कथं प्रासिध्यद् येनोच्यते त्र्याद्यधिकगुणस्येति । उच्यते—तथा दर्शनात्, जलादजाक्षीरस्योत्कृष्टः स्निग्धगुणः, ततोऽपि गोक्षीरस्य, ततोऽपि महिषीक्षीरस्य, ततोऽपि करभीक्षीरस्येत्येवं स्निग्धताया उत्कर्षतारतम्यम् । तथा पांसुभ्यः केणिकानामुत्कृष्टो रूक्षगुणः, ताभ्योऽपि सैकराणामित्येवं रूक्षताया उत्कर्ष-
39B तारतम्यमुपदर्शयामः । एषामेव पूर्वापेक्षया स्निग्ध-रूक्षयोरपकर्षतारतम्यं द्रष्टव्यम् । 5

अथ कथं विजातीयानां सङ्घातो भवतीति, उच्यते—विजातीयेन तु विसदृशेन पुनः परमाणुना सह साम्येऽपि समानसङ्ख्यगुणत्वेऽपि सति, मध्यम उत्कृष्टो वा गुणः स्निग्धत्वलक्षणो रूक्षत्वलक्षणो वा यस्य परमाणोस्तस्य सङ्घातो भवति 'विजातीय'पदोपादानात् साम्यं गुणसङ्ख्यापेक्षया न पुनर्जात्यपेक्षया. सप्तमी च "यद्भावो भावलक्षणम्" [सि० २।२।१०६] इति योगेन, गुणसाम्यभवनक्रियया सङ्घातभवनक्रियाया लक्ष्यमाणत्वात् । 10
अपिः समुच्चयार्थः । सजातीयानां गुणसङ्ख्यावैषम्ये सङ्घातो भवति, विजातीयानां पुन-
40A र्गुणसङ्ख्याया वैषम्येऽपि साम्येऽपि भवतीति । तथाहि—द्विगुणस्निग्धस्यापरेण द्विगुणरूक्षेण त्रिगुणरूक्षेण वा तथा द्विगुणरूक्षस्याऽपरेण द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा, यावत् सङ्ख्याता-ऽसङ्ख्याता-ऽनन्तगुणस्य स्निग्धस्य रूक्षस्य वा सङ्ख्याता-ऽसङ्ख्याता-ऽनन्तगुणेन समधिकगुणेनापि वाऽपरेण रूक्षेण स्निग्धेन वा सङ्घातो भवति । तदत्र मध्यमोत्कृष्ट- 15
ग्रहणाद् जघन्यगुणस्य स्निग्धस्य रूक्षस्य वा अपरेण जघन्यगुणेन रूक्षेण स्निग्धेन वा सह
40B सङ्घातामावमाह । तेनैकगुणस्निग्धस्यैकगुणरूक्षेण, तथैकगुणरूक्षस्यैकगुणस्निग्धेन सङ्घातो न भवतीति स्थितम् ।

तदयं सङ्घातसमासः— सजातीयानां पुद्गलानां त्र्यादिभिर्गुणसङ्ख्यावैषम्य एव, जघन्यगुणवर्जानां विजातीयानां पुनर्गुणसङ्ख्यायाः साम्येऽप्येकेन द्वाभ्यां त्र्यादिभिर्वा वैषम्येऽपि 20
सङ्घातो भवतीति । उक्तं च परममुनिभिः—

"निद्धस्स निद्धेण दुआहिएण लुक्खस्स लुक्खेण दुआहिएणं ।
निद्धस्स लुक्खेण उवेइ बन्धो जहन्नवज्जो विसमे समे वा ॥"

[प्रज्ञापनासूत्रे गा० २००] इति ।

१ सूक्ष्मवालुका ॥ २ कर्करिकाणाम् ॥ ३ विजातीयेन तु साम्येऽपि मध्यमोत्कृष्टगुणस्य ॥ ४ 25
'६' [=विग्रहे षष्ठ्यन्तम्] ॥ ५ काका ॥ ६ स्निग्धरूक्षाणाम् ॥ ७ अयेनैवं(अभिधीयमानैः)स्सह यथासंख्यम् ॥ ८ उपलक्षणमेतत्, जघन्यस्य मध्यमोत्कृष्टेनापि न संघातः ॥ ९ आदिशब्दो व्याख्येयः, द्व्यादयधिकेनेत्यर्थः ॥ १० पूर्वार्धे सजातीयानां संघात उक्तः ॥ ११ वैषम्ये साम्ये वा ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

41A अन्ये त्वभिदधति– "एकगुणस्निग्धस्य द्विगुणस्निग्धेनैकगुणरूक्षस्य द्विगुणरूक्षेणापि सङ्घातो भवति" [ ] इति । न चायं राजपथः, वृद्धाम्नायेनागमोपनिबन्धदर्शनेन च विसंवाददर्शनात् ।

अन्यस्त्वाह—"एकगुणस्य द्व्यधिकादिगुणेनापि सजातीयेन सङ्घातो न भवति, तथा द्विगुणस्याप्यपरेण सजातीयेन द्व्यधिकेनैव सङ्घातो भवति, न तु त्र्याद्यधिकगुणेनापि, तेन पञ्चगुणेन षडादिगुणेन वाऽपरेण सजातीयेनापि सह न सङ्घातः । एवं सर्वत्रापि द्वाभ्या- 41B मेवाधिक्यमवसेयम् । तथा सजातीयानामिव विजातीयानां मध्यमोत्कृष्टगुणानामपि गुण-सङ्ख्यासाम्ये सङ्घातो न भवति" [ ] इति । तदप्यागमविसंवादीत्युपेक्षामर्हति ।

ननु सङ्घातः परिणामान्तरोत्पत्त्या सम्भवति । तत्र किमेकगुणस्निग्धस्त्रिगुणस्निग्धं परिणमयत्युताहो त्रिगुणस्निग्ध एकगुणस्निग्धम्, तथैकगुणरूक्षः त्रिगुणरूक्षं त्रिगुणरूक्षो वैकगुणरूक्षम्, तथा किं द्विगुणस्निग्धो द्विगुणरूक्षं त्र्यादिगुणरूक्षं वा, तथा द्विगुणरूक्षो 42A द्विगुणस्निग्धं त्र्यादिगुणस्निग्धं वा परिणमयतीति ?

उच्यते—द्व्यादिसङ्ख्यया ऽधिकः उत्कृष्टः स्निग्धलक्षणो रूक्षलक्षणो वा गुणो यस्य सो-ऽधिकगुणो हीनगुणस्य परिणमको भावान्तरापादको भवति, रेणोः स्निग्धगुडवत् । यथैव हि रूक्षाणां सप्तत्यादिभेदभिन्नानां द्व्यादिसङ्ख्यया ऽधिकस्निग्धगुणाः परिणामान्तरोत्पादका दृश्यन्ते तथैवैकगुणादेः परमाणोस्त्रिगुणादिः परमाणुः परिणमको भवति । तथा समगुणस्तुल्यगुण-सङ्ख्यः परमाणुरन्यस्य परमाणोः परिणम्योऽपि । 'अपि'शब्दात् परिणमकोऽपि भवति । अत्र 'अपि'ग्रहणात् 'अधिकगुणः परिणमक एव' इत्येवं पूर्वयोगेऽनुक्तमप्यवधारणं 42B गम्यते । अधिकगुणः परिणमक एव हीनगुणस्य । सममङ्ख्यगुणानां तु परस्परं परिणम्यत्वं परिणमकत्वं च द्रव्य-क्षेत्र-काल-भावापेक्षया भवतीत्यर्थः ।

तदेतं सङ्घातपदं व्याख्याय भेदपदं व्याचष्टे—भेदः इति स्कन्धपरिणामे सति परमा-णूनां विस्रसाप्रयोगाभ्यां विश्लेषपरिणामः पार्थक्यपरिणतिर्या स भेद इत्युच्यते ।

कथञ्चिदत्यक्तरूपाणां घनादिभावेनैकत्वपरिणतिः स्कन्धः । सत्त्वो-पचयाभावेऽपि तथाभावो न विरुद्धः, तुल्यमानयोरपि हि वज्रभेण्डयो-

१ * दृश्यतां तत्त्वार्थराजवार्तिक[५।३८]प्रभृतिषु ग्रन्थेषु ॥ २ त्रिगुणादिस्निग्धगुणेन ॥ ३ चतुर्गुणेन ॥ ४ अधिकगुणः परिणमकः ॥ ५ '६' [=विग्रहे षष्ठी विभक्तिः] ॥ ६ बिन्दवः ॥ ७ समगुणः परिणम्योऽपि ॥ ८ भेदो विश्लेषपरिणामः ॥ ९ पार्थक्यरूपा परिणतिः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रूपमहत्त्वादिदर्शनात् । तथाप्युत्पाद-व्यय-ध्रौव्याणि पूर्वपर्याय-क्षयात् तत्क्रियासिद्धेः । उत्तरपर्यायश्चोत्पद्यते । तदेव च द्रव्यं तथा परिणमते[1] ।

[2]द्व्यणुकादि-सांशपदे[3] श्रोतुः सुगमत्वात् स्कन्धपरिज्ञाने च तद्भेदतद्धर्मरूपत्वेन तत्परिज्ञानादवधीर्य[4] स्कन्धपदं व्याचष्टे–कथञ्चिद् न सर्वथा अत्यक्तरूपाणामनुज्झितपरमाणुत्वानां 5
43A परमाणूनां घनादिभावेन निब(वि)डतापरिणामेन 'आदि'ग्रहणादेकधारणा-ऽऽकर्षणादावन्यधारणा-ऽऽकर्षणादिग्रहः, एकत्वपरिणतिरेकत्वपरिणामोऽविश्लेषपरिणामो यः स स्कन्धः । घनादि-भावेनेति विशेषणमेकत्वपरिणतेरेव [5]रूपकथनम् । सर्वपरमाणूनां यो घनादिभावेन परिणामो वस्तुसन् कथञ्चिदभेदी स स्कन्धः । कथञ्चिदत्यक्तरूपाणामित्यनेन स्कन्धपरिणामेऽपि पर-
43B माणूनां परमाणुरूपाभावाभावमाह । अत एव स्कन्धभेदे पुनः परमाणव उत्पद्यन्ते, 10 अन्यथा सर्वथाऽप्यसतः परमाणुत्वस्योत्पादो न स्यात् ।

नित्यत्वादेणूनां[6] न प्रादुर्भाव इति चेत्, न, सर्वथा नित्यत्वस्याभावात् । सदकारण-वन्नित्यं व्योमवदिति चेत्, न, [7]पुद्गलद्रव्यस्य परिणामिनः स्कन्धभेदस्य च सहकारिण-स्तद्भावाभावाभ्यां [8]कारणत्वाभ्युपगमात् । तदुक्तम्–"भेदादणुः" [तत्त्वार्थ० ५।२७] इति । तस्मात् स्कन्धभावेऽपि परमाणूनां परमाणुत्वं कथञ्चिदस्त्येव । 15

१ * अत्र टीकायामेकं 46 A पत्रं लिखित्वा ग्रन्थकारेणैव [ ] एतादृशं चिह्नं विधाय अपाकृतम् । तत्र च ईदृशः पाठः परित्यक्तो वर्तते–

46 A "[ ]ज्ञानिर्वा विधातुं शक्या । केशानामेवाभावात् । धर्माणां चाश्रयः स एव भवति यो धर्मेभ्यः कथञ्चिदभेदी । न च सदसतोः कथञ्चिदप्यभेदो भवति । ततः कथञ्चिदभेदान्यथानुपपत्त्या द्रव्यावस्थायां पर्याया अपि कथञ्चित् सन्त एवेति कथमिवासतः कस्यचिदप्युत्पादो भवतीति । सम्प्रत्युपसंहरति–**तत्** तस्मा**दणूनां** 20 **सत्त्वोपचयाभावेऽपि** सत्त्वाधिक्याभावेऽपि **स्थूलता** स्कन्धपरिणाम **उपपद्यते** घट्त इति । स्यादेवम्–पटाद्यवस्थायामप्यणवः परस्परं विसकलितरूपा एवानेकवृत्तेरेकस्य कस्यचिदप्यभावादित्यत आह–**न च** नैवैते परमाणवस्तदानीम]"

एवं चैतदनुसारेण **द्रव्यालङ्कारसूत्रे** इतः परं **'तदणूनां सत्त्वोपचयाभावेऽपि स्थूलता उपपद्यते'** इति अधिकः सूत्रपाठः ग्रन्थकाराभ्यां पूर्वं लिखित आसीत्, पश्चात्तु ताभ्यामेव स परित्यक्त इति स्पष्टं प्रतीयते ॥ २ * दृश्यतां पृ० १८ पं० ९ ॥ ३ पूर्वसूत्रोपात्ते ॥ ४ 'अवधीर्य' इत्यनेन सम्बन्धः ॥ ५ **तद्भेद** द्व्य- 25 णुकादिभेद **तद्धर्मरूपत्वेन** सांशरूपत्वेन ॥ ६ द्व्यणुकादि-सांशयोः परिज्ञानात् ॥ ७ **कथञ्चिदत्यक्तरूपाणां घनादिभावेन एकत्वपरिणतिः स्कन्धः** ॥ ८ स्वरूप ॥ ९ परमार्थेन सन् ॥ १० अणवो नोत्पद्यन्ते, नित्यत्वात्, आकाशवत् ॥ ११ पूरणगलनधर्मरूपस्य पुद्गलद्रव्यस्य ॥ १२ 'अकारणवत्त्वात्' इत्यसिद्धो हेतुः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु स्कन्धलक्षणं तत्सङ्घातेत्यादिना पूर्वमभिहितमेव, तत् किं पुनरुच्यते ? न,
44A पूर्वं कारण-भेद-धर्मप्रतिपादनेन स्कन्धलक्षणं कृतम्, अधुना तु स्वरूपप्रतिपादनेनेति न दोषः ।

स्यान्मतिः—स्कन्धपरिणामे सति परमाणूनां स्वसत्तातः समधिकं यदि किञ्चिदुत्पद्यते तदसत् कुतः समुत्पन्नम् ? सर्वथाऽप्यसतः समुत्पादप्रतिषेधात् । अथ नोत्पद्यते, किन्तु यावदेव परमाण्ववस्थायां सत्त्वं तावदेव स्कन्धावस्थायामपि, कथं तर्हि स्कन्धभावः अधिकस्य कस्यचिदभावादिति ? तन्न, यस्मात् सैत्त्वोपचयाभावेऽपि परमाणुसत्त्वस्याधिक्योत्पादाभावेऽपि, तथाभावः परमाणूनां स्कन्धपरिणामोत्पादो न विरुध्यते । यद्यपि परमाणुसत्त्वस्य स्कन्धावस्थायामुपचयो नास्ति तथापि स्कन्धभावोऽचिन्त्यरूपत्वात् सङ्गच्छत एव ।

44B हेतुमाह—तुँल्यमानयोरपि तुल्यं मानं परमाणुसङ्ख्या परमाणुसत्त्वं वा ययोस्तथाभूतयोरपि वज्र-भेण्डयोः, वज्रं हीरकादिः, भेण्डं काष्ठविशेषः, अल्प-महत्त्वादिदर्शनात् । 'आदि'-ग्रहणात् सारत्वादिपरिग्रहः । समपरमाणुसङ्ख्ययोरपि वज्र-भेण्डयोर्वज्रमल्पं ससारं भेण्डं तु महन्निःसारं च प्रत्यक्षतो लक्ष्यते । यथा चैतत्तथा यद्यप्यणूनां स्कन्धा-ऽस्कन्धभावावस्थायां सत्त्वं समानमेव तथापि स्कन्धभावो न विहन्यते, तथा परिणतेरचिन्त्यत्वात्, अन्यथा भेण्डेऽप्यभावप्रसङ्गात् । ततस्तँ एव तथा परिणमन्ते नाधिकं किञ्चिदुत्पद्यत इति कस्यासतः समुत्पादः ?

45A अथ परमाण्ववस्थातः स्कन्धावस्थायां सत्त्वं यदि नाधिकं नापि हीनं किन्तु तावदेव कथं तर्ह्युत्पाद-व्यय-ध्रौव्याणि, अधिकस्यानुत्पादात् पूर्वस्य चाव्ययादिति ? उच्यते—तथाऽपीति, यद्यपि पूर्वं न हीयतेऽधिकं च नोत्पद्यते तथाऽपि उत्पाद-व्यय-ध्रौव्याणि सङ्गतान्येव पूर्वपर्यायस्य विश्लेषलक्षणस्य क्षयाद् विनाशात् । तस्य च क्षयो विज्ञायते तैत्क्रियासिद्धेः, तस्य पर्यायस्य या क्रिया कार्यं तस्या असिद्धत्वात् । यां हि क्रियां विश्लेषपरिणामिनः परमाणवश्चक्रिवांसस्तां घनपरिणामिनो न कुर्वते । एतावता व्ययमाह ।

45B तथोत्तरपर्यायश्च घनादिभावलक्षण उत्पद्यते । तस्य चोत्पादो विज्ञायते, तस्य पर्यायस्य या क्रिया तस्याः सिद्धेः विद्यमानत्वात् । पूर्वक एव हेतुरनञ् सम्बध्यते । या हि क्रिया घनपरिणामसम्भविनी सा दृश्यते । एतावता समुत्पादमाह ।

१ तत्संघातभेदत इति कारणम् । द्व्यणुकादिभेदः । सांश इति धर्मकथनम् । २ कथञ्चिदन्यथाभूतरूपेत्यनेन ॥ ३ सत्त्वोपचयाभावेऽपि तथाभावो न विरुद्धः ॥ ४ तुल्यमानयोरपि हि वज्र-भेण्डयोरल्पमहत्त्वादिदर्शनात् ॥ ५ परिणतेरचिन्त्यरूपत्वाभावे ॥ ६ स्कन्धाभाव ॥ ७ परमाणवः ॥ ८ तथाप्युत्पाद-व्यय-ध्रौव्याणि ॥ ९ पूर्वपर्यायक्षयात् ॥ १० सूत्रम् ॥ ११ उत्तरपर्यायश्चोत्पद्यते ॥ १२ तत्क्रियासिद्धेः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तैदेव चेति पुद्गलद्रव्यं तथा तथा पूर्वपर्यायविनाशेनोत्तरपर्यायोत्पादेन च परिणमते । न पुनरन्यो व्यनेशदन्यः प्रादुरभूत् । एतावतोभयावस्थयोः पुद्गलत्वावस्थानेन ध्रौव्यमाह । तस्मात् सत्त्वोपचयापचयाभावेऽप्युत्पादादयो घटन्त एव ।

न चैते तदाप्यनेकत्वपरिणतय एव, धरणा-ऽऽकर्षणभावात् । अविलक्षणेषु च कुतोऽयं संस्थानवित्तिभेदः ? वासनातः, रूपादिभेदोऽपि तत एवास्तु । अर्थं तु साधयिष्यामः ।

46 B सम्प्रत्यन्यथाप्येकत्वपरिणतिं साधयितुमुपक्रमते—नैं चैते परमाणवस्तदानीमपि स्थूलपरिणामकालेऽप्यनेकत्वपरिणतय एव । अत्र नञाऽवधारणस्यैवाभावः कथ्यते, नानेकत्वपरिणतेः, तस्याः कथञ्चिदस्माभिरपीष्टत्वात् । धैरणा-ऽऽकर्षणभावात्, वंशाद्यवयवभागे हि ध्रियमाणे समाकृष्यमाणे वा परभागस्याऽपि धरणा-ऽऽकर्षणे दृश्येते । यदि चाणवः स्थूलभावकालेऽपि परस्पराऽसंश्लेषिण एव तदा कथमेतदुपपद्यते ? तस्माद्धरणा-ऽऽकर्षणान्यथानुपपत्त्या नाऽणूनां सर्वथाऽप्यनेकत्वम् ।

किञ्च, अविलक्षणेषु चाधिकस्य कस्यचिदभावात् सर्वत्रैकरूपेषु च रूप-रस-गन्ध-स्पर्श-
47 A परमाणुषु सत्सु कुतोऽयमनुभवसिद्धः संस्थानस्य वृत्तादेर्वित्तिर्ज्ञानं तस्या भेदो वैचित्र्यं भवति? यथा हि घटे रूपादिपरमाणवः परस्परासंस्पर्शिनस्तथा पटादावपि, ततश्चोभयत्रापि विशकलितत्वाविशेषाद् घट-पटादिबुद्धीनामाभासभेदो न स्यात्, रूपादिपरमाणुमात्रग्राहित्वस्य सर्वासां तुल्यत्वात् । तस्माद् बुद्ध्याभासभेदनिबन्धनं रूपादिपरमाणुभ्योऽधिकमपि किञ्चिदभ्युपगम्यम् ।

अत्र परो हेतुमाह—वासनात इति । यद्यपि सर्वत्र बुद्धीनां परमाणुमात्रमेव विषय-
47 B स्तथाप्याभासभेदो न विरुध्यते, अनादिकालप्ररूढाविद्यावशात्तस्य समुत्पादात् । उत्तरयति— 'रूपादिभेदोऽपि रूपपरमाणवो रसपरमाणवो गन्धपरमाणवः स्पर्शपरमाणवः इत्येवं परमाणूनां यो भेदः सोऽपि तत एव वासनात एव संस्थानवित्तिभेदवदस्तु । यथा हि संस्थानवित्तिभेदो वासनावशात् पर्यकल्पि तथा किमिति परमाणूनां रूपादिभेदोऽपि न कल्पितः ? सोऽपि वासनाकृत एव कल्पनीयः स्यात्, तद्वित्तिभेदस्य संस्थानवित्तिभेदवदेव वासनाकृतत्वेनैव गतत्वात् ।

१ तदेव च द्रव्यं तथा परिणमते ॥ २ न चैते तदाप्यनेकत्वपरिणतय एव ॥ ३ सूत्रम् ॥ * आदौ धारणा' इति लिखित्वा पश्चाद् घृष्ट्वा धरणा' इति ग्रन्थकाराभ्यामेव संशोध्य कृतम् ॥ ४ अविलक्षणेषु च कुतोऽयं संस्थानवित्तिभेदः ॥ ५ आदिशब्दात् त्र्यस्र-चतुरस्र-आयामपरिग्रहः ॥ ६ वित्तीनाम् ॥ ७ सूत्रम् ॥ ८ रूपादिभेदोऽपि तत एवास्तु ॥ ९ परमाणुवित्ति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अपि च, वासनैव संस्थानविच्छित्तिभेदे निमित्तं वासनापि वा ? नाद्यः, घटोऽयमिति विकल्पस्य सनातनत्वप्रसङ्गात् । कदाचित् प्रबोधात् कादाचित्कत्वमिति चेत्, न, प्रबोधोऽपि सहकार्यन्तरं वा वासनापरिपाको वा ? आद्ये वासनैवेति पक्षोपघातः । अत एव परिपाकोऽपि नार्थान्तरकृतः । स्वरूपमात्रकृतत्वे तु सनातनत्वप्रसङ्ग एव । वासनापीति पक्षे
48A तु संस्थानवास्तवत्वं स्यात्, परमाण्वादीनां सर्वत्र साधारण्यात् । तस्माद्यथा विभिन्न- 5
ज्ञानान्यथानुपपत्तेः परमाणुभेदोऽभीष्टस्तथा संस्थानभेदोऽप्यस्तु, तद्बुद्धिभेदस्याप्यन्यथानुपपन्नत्वात् ।

नन्वयं परमाणुभेदोऽस्माभिरवाग्दशावस्थितैरास्थीयते, परमार्थदशायां पुनरयमपि नेष्यत एव, परमाणुमात्रस्याप्यनाश्रयणात्, ततो वासनाकृतत्वं परमाणुभेदस्येष्टमेवेति । तन्न, यस्मादर्थं तु बाह्याभ्यन्तरभेदभिन्नं वस्तु वास्तवमेवेति पुनः साधयिष्यामः । ततः परमाणवो 10
वस्तुसन्त एवेति तेषां भेदकल्पनाया वासनाकृतत्वप्रसञ्जनं युक्तमेव ।

नाकल्पिकायां भेदकालुष्यम् । न तर्हि *विकल्पिकायामपि, अगृहीते कल्पनाऽभावात् । प्रमाणं हि स्यात् । अस्वलक्षणत्वेऽन्योन्याश्रयः । अधिकार्थक्रियाकारिणश्च कुतोऽस्वलक्षणत्वम् ?

पुनरपि परः प्राह-नोकल्पिकायां न निर्विकल्पके ज्ञाने भेदकालुष्यं संस्थानेप्रतिभास- 15
भेदकलङ्को भवति ।

"इहेह तावत् परमाणूनां संसर्गग्रहे सति संस्थानावभासः स्यात् । न चाविकल्पं संसर्गग्राहि । असंसृष्टत्वं हि परमाणूनां रूपभेदो वा, पररूपदेशैपरिहारो वा, शून्याकाशयोगो वा, अन्तरालवर्तिभिन्नेन्द्रियग्राह्यवस्तुयोगो वा । तत्र न संसर्गावभासो
48B रूपाभेदप्रतिभासः, परमाणुमात्रपिण्डावभासप्रसङ्गात् । अत एव पररूपदेशस्य परिहारा- 20
भावोऽवभासोऽपि नैं । शून्याकाशस्तु नेन्द्रियगोचर इति तद्योगानवभासः कथं संसर्गावभासः स्यात् । अन्तरालवर्त्तिभिन्नेन्द्रियग्राह्यं वस्तु तु स्पर्शादिपरमाणवः, न चामीषां

१ '६' [= षष्ठी विभक्तिरत्र विग्रहे ज्ञेया] ॥ २ अपिशब्दो हेत्वन्तरसूचकः ॥ तेन वासना हेत्वन्तरं च कारणम् ॥ ३ वासनायाः सदा सद्भावादित्यर्थः ॥ ४ वासनायाः ॥ ५ '६' [षष्ठी विभक्तिरत्र विग्रहवाक्ये ज्ञेया] ॥ ६ परमार्थत्वम् ॥ ७ शून्यवादिभिः ॥ ८ अर्थं तु साधयिष्यामः ॥ ९ अस्माकं त्वां प्रति ॥ 25
१० * मूलादर्शे 'कल्पिकायामपि' इति पाठः ॥ ११ नाकल्पिकायां भेदकालुष्यम् ॥ १२ वृक्षत्वखण्डादिप्रतिभासः ॥ १३ बृहद्भौसिर आह ॥ १४ रूपं स्वभावः ॥ १५ '६' [= अत्र विग्रहवाक्ये षष्ठी ज्ञेया] ॥ १६ असंसृष्टत्वाभावः संसर्गः ॥ १७ स्वरूपाभेदप्रतिभासः ॥ १८ '६' [= षष्ठी विभक्तिरत्र विग्रहे ज्ञेया] ॥ १९ अत्राभाव एकदेशः ॥ २० संसर्गावभासः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चा(च?)क्षुषाऽप्रतिभासे संसर्गः प्रतिभातो भवति, न ह्यन्येन्द्रियजज्ञानविषयोऽन्येन्द्रियजे ज्ञानेऽवभासते । ततो निर्विकल्पधियां संसर्गावभास एव नास्ति, कुतस्तद्रूपसंस्थानस्य विच्छिभेदचिन्ता स्यात् । या पुनरियं संसर्गलक्षणसंस्थानावभासिनी धीः सविकल्पिका सा न प्रमाणम्" [प्रमाणविनिश्चयटीका पृ० ४६ A (?)] इति ।

तदयुक्तम् । संयोगापरपर्यायस्य नैरन्तर्यरूपस्य संसर्गस्य निर्विकल्पकेऽवभासनात् । नैरन्तर्यं च नाम शून्याकाशदेशायोगः । न च वक्तव्यं शून्याकाशदेशस्याऽप्रत्यक्षत्वकृतोऽयं नैरन्तर्यावभासो न वस्तुभूतपरमाणुनैरन्तर्यकृत इति, भिन्नदेशयोः शकुन्तयोरन्तरालाकाशाप्रत्यक्षत्वेऽपि नैरन्तर्याऽप्रतिभासनात् । तस्माद् वस्तूनां संयोगभावा-ऽभावकृतौ नैरन्तर्यप्रतिभासा-ऽप्रतिभासौ, न शून्याकाशग्रहणा-ऽग्रहणकृतौ । ततो नैरन्तर्यरूपस्य संस्थानस्याविकल्पधियां भासनाद्विच्छिभेदचिन्ता उपायसी ।

परिहारान्तरं तु वार्त्तिकेन आह— नैं तर्हीति । यदि निर्विकल्पेऽसंसृष्टपरमाणुरूपमात्रावभास एवेष्यते न तु संसर्गरूपसंस्थानावभासस्तर्ह्येवं सति विकल्पिकायामपि बुद्धौ संस्थानावभासो न स्यात् । अगृहीते निर्विकल्पधियामप्रतिभाते वस्तुनि कल्पनाऽभावाद् विकल्पानुत्थानात् । प्रत्यक्षपृष्ठभाविना हि विकल्पेन यदेव निर्विकल्पके प्रतिभाति तदेव 49A ध्यवसीयते नाधिकं किञ्चित् । तदुक्तम्—

"अधिगते तु स्वलक्षणे तत्सामर्थ्यजन्मा विकल्पस्तदनुकारी कार्यतस्तद्विषयत्वात् स्मृतिरेव, न प्रमाणम्, अनधिगतवस्तुरूपानधिगतेः" [हेतुबिन्दौ पृ० ३] इति ।

यदा च निर्विकल्पके संस्थानावभासो नास्ति तदा विकल्पे कुतोऽयं समायातः ?

अपि च, अस्यैवं गृहीतग्राहितया यदप्रामाण्यमभ्यधायि तदपि दूरापास्तप्रसरं स्यात्, निर्विकल्पकाऽगृहीतस्यापि संस्थानस्याध्यवसायोत्। तेन विकल्पाभासान्यथानुपपत्त्या निर्विकल्पकधियामपि संस्थानावभासोऽभ्युपेयः । स च परमाणुमात्रे वस्तुनि न घटामञ्चति ।

१ संसर्गरूपसं° ॥ २ जैनः ॥ ३ वस्तुसन्तः परमाणवः ॥ ४ युक्ताऽस्माकम् ॥ ५ न तर्हि विकल्पिकायामपि ॥ ६ परमाणूनां रूपं स्वभावः, तदेव, मात्रशब्दोऽवधारणे, तस्यावभासः ॥ ७ अगृहीते कल्पनाऽभावात् ॥ ८ निर्विकल्पकेन ॥ ९ स्वलक्षणाध्यवसायी ॥ १० कार्यमत्र स्वलक्षणे प्रवर्तनं तदध्यवसायश्च तेन । * दृश्यतां पृ० 144 A ॥११ कार्यरूपत्वात् तस्य विकल्पस्य ॥ १२ नाकारणं विषय इति वचनात् ॥ १३ विकल्पस्य ॥ १४ सति ॥ १५ विकल्पस्य प्रामाण्यम् ॥ १६ तस्मात् ॥ १७ विकल्पोल्लेखा ॥ १८ बुद्धौ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यादेवम्—नायं नियमो यन्निर्विकल्पकागृहीतं विकल्पो नाध्यवस्यतीति, वस्तुनस्त्रि-
49 B कालावस्थायित्वैस्य सामान्यस्यं चाधिकस्यापि ग्रहणादिति । तन्न । हिर्यस्मादेवमधिकार्थ-ग्राहकत्वाभ्युपगमे विकल्पः प्रमाणं स्यात् । यथा हि घटप्रत्यक्षादधिकार्थग्राहि पटप्रत्यक्षं पृथगेव प्रमाणं तथा विकल्पोऽपि निर्विकल्पविषयादधिकं वस्तुनो द्रव्यापेक्षया त्रिकालविषयत्वं सामान्यं च सदृशपरिणामरूपं परमार्थसदध्यवस्यन् पृथगेव प्रमाणम् । 5

ननु नाऽनधिगतार्थग्राहकत्वमात्रेणैव ज्ञानस्य प्रामाण्यम्, द्विचन्द्रग्राहिणोऽपि प्रसङ्गात्, किन्त्वनधिगतस्वलक्षणग्राहकत्वेन । यदुक्तम्--

"तस्मादनधिगतार्थविषयं प्रमाणमित्यप्यनधिगते स्वलक्षण इति विशेषणीयम्" [हेतुबिन्दौ पृ. ३] इति ।

50 A ततोऽनधिगतत्रिकालावस्थायित्वादिग्राहिणोऽपि विकल्पस्य न प्रामाण्यम्, त्रिकाला- 10
वस्थायित्वादेरस्वलक्षणत्वादिति ।

तन्न, यस्मात् त्रिकालावस्थायित्वादेरस्वलक्षणत्वेऽस्वलक्षणत्वाभ्युपगमेऽन्योन्याश्रयो दोषः स्यात् । यदि त्रिकालविषयत्वं सामान्यं चावस्तु स्यात्तदा तदध्यवसायिनो विकल्पस्याऽस्वलक्षणविषयत्वेनाप्रामाण्यं स्यात् । यदि च विकल्पस्याप्रामाण्यं स्यात्तदा त्रिकालावस्थायित्वादेरवस्तुत्वं स्यात् । न खलु प्रमाणोपस्थापितोऽर्थोऽपरमार्थसन् भवति । 15

50 B स्यान्मतम्—न प्रमाणग्राह्यैः स्वलक्षणम्, किन्तु यस्यार्थस्य सन्निधाना-ऽसन्निधानाभ्यां ज्ञानप्रतिभासभेदः स स्वलक्षणम् । ज्ञानप्रतिभासभेदकश्चार्थोऽर्थक्रियासमर्थ एव । यदुक्तम्—

"तदेव परमार्थसत्, अर्थक्रियायोग्यलक्षणत्वाद्वस्तुनः" [न्यायबिन्दुः १।१४,१५] इति। ततोऽर्थक्रियाकारित्वं स्वलक्षणत्वम् । तच्च विकल्पविषयस्य नास्ति । यदाह—

"न च सामान्यं काञ्चिदर्थक्रियामुपकल्पयति स्वलक्षणप्रतिपत्तेरूर्द्धं तत्सामर्थ्योत्पन्न- 20
विकल्पज्ञानग्राह्यम्" [हेतुबिन्दुः पृ० ३] इति ।

१ नित्यत्वस्य ॥ २ घटत्वपटत्वादेः ॥ ३ प्रमाणं हि स्यात् ॥ ४ त्रयः काला विषयो यस्य वस्तुनस्तस्य भावस्त्रिकालावस्थायित्वमित्यर्थः ॥ ५ जैनाभिप्रायेण उक्तम् ॥ ६ विकल्पः ॥ ७ ज्ञानस्य ॥ ८ आदेः सामान्यम् ॥ ९ अस्वलक्षणत्वेऽन्योन्याश्रयः ॥ १० ननु विकल्पस्य प्रामाण्यं स्यात् तदुपस्थापितोऽर्थोऽवस्तु स्यादित्याह—न खेति ॥ ११ प्रत्यक्षप्रमा° ॥ १२ अर्थः ॥ १३ अर्थक्रियायां योग्यं लक्षणं स्वभावो यस्य वस्तुनः ॥ १४ उपसंहारः ॥ १५ स्वलक्षणप्रतिपत्तिसामर्थ्य ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

51A तन्न विकल्पाप्रामाण्यनिबन्धनं त्रिकालावस्थायित्वादेरस्वलक्षणत्वं किन्त्वर्थक्रियाऽयोग्यत्व-निबन्धनमिति नान्योन्याश्रय इति ।

अत्राह—अधिकार्थक्रियाकारिणश्च परमाणुमात्रार्थक्रियातः क्षणमात्रावस्थायिनोऽर्थक्रियातो विशेषार्थक्रियातो वा सकाशादधिकार्थक्रियाकारिणः संस्थानस्य त्रिकालावस्थायित्वस्य सदृशपरिणामरूपसामान्यस्य च कुतोऽस्वलक्षणत्वम् ? किन्त्वर्थक्रियायोग्यत्वेन स्वलक्षणत्वमेव स्यात् । विशङ्कलितपरमाणुमात्रार्थक्रियातो हि घटादिसंस्थानमधिकामेव धारणा ऽऽकर्षण-लक्षणां तथा क्षणमात्रार्थक्रियातस्त्रिकालावस्थायित्वमधिकामेव दाह-पाकादिकां—क्षणमात्रार्थ-
51B क्रियातश्च त्रिकालावस्थायित्वार्थक्रियाया इदमेवाधिक्यं यत् क्षणमात्रेऽर्थक्रिया न सम्भवति, त्रिकालावस्थायित्वे च सम्भवतीति, एतच्च तृतीये प्रकाशे सप्रकाशं प्रकाशयिष्यामः—तथा विशेषमात्रार्थक्रियातः सामान्यमधिकामेव सदृशप्रत्ययरूपामर्थक्रियां करोति ।

तत् संस्थानादेरर्थक्रियायोग्यत्वेन परमार्थसत्त्वात् तद्ग्राहिणश्च विकल्पस्यानधिगत-स्वलक्षणग्राहकत्वेन प्रामाण्यात् प्रमाणेतरविकल्पप्रतिभासिसंस्थानभेदो बाह्यपरमार्थसद्वस्तुभेद-निबन्धनो न वासनामात्रनिबन्धन इति सिद्धम् ।

दूषणान्तरमाह—

कथं चातीन्द्रियाणामविकल्पसंविदि तदापि प्रतिभासः ? भेदोत्पत्तेः । कदा पुनः क्षणिकेष्वियं नास्ति ? वैशिष्ट्यं तु स्थूलताया अन्यन्न विद्मः ।

52A कथं चातीन्द्रियाणामिन्द्रियाविषयाणां परमाणूनामविकल्पसंविदि विकल्पकलङ्क-नङ्किताया धियां तदापि निचयावस्थायामपि प्रतिभासो भवति ।

अयमर्थः— एकार्थक्रियाकारित्वेनोत्पन्नक्षणेऽपि परमाणवः सर्वथाऽप्यनुज्झित-परमाणुस्वरूपा एव, यथावस्थितवस्तुदर्शनैर्जैनैरिव कथञ्चित् परमाणुरूपपरित्यागस्य भवद्भि-रनाश्रयणात् । अपरित्यक्तपरमाणुस्वरूपाश्च परमाणवः सदाऽप्यवाग्दृशामगोचर एव,
52B अन्यथा प्रचयक्षणात् प्रागप्युपलम्भः स्यात् । अतो निर्विकल्पकधियामेकत्वपरिणत्यभावे परमाणूनां प्रतिभासो न युज्यते ।

---

१ विकल्पाप्रामाण्यं निबन्धनं यस्यास्वलक्षणस्य ॥ २ प्रसः [=प्रथमसमासः=बहुव्रीहिरित्यर्थः] ॥ ३अधिकार्थक्रियाकारिणश्च कुतोऽस्वलक्षणत्वम् ॥ ४, ५ [= '६' विग्रहे षष्ठ्यन्तम्] ॥ ६ चसः [=चतुर्थसमासः=कर्मधारय इत्यर्थः] ॥ ७ अधिकार्थक्रियाकारित्वमेव भावयति ॥ ८ तस्मात् ॥ ९ सामान्य ॥ १० चसः [=चतुर्थसमासः=कर्मधारय इत्यर्थः] ॥ ११ कथं चातीन्द्रियाणामविकल्पसंविदि तदापि प्रतिभासः ॥ १२ अवाग्दृशां गोचरत्वे ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

परः प्रश्नोत्तरमाह–'भेदेन भिन्नत्वेन, अप्रचयावस्थातोऽन्यत्वेनेत्यर्थः, परमाणूनामुत्पादाद्धेतोरेकार्थक्रियाकारित्वेनोत्पन्नक्षणकालेऽविकल्पसंविदि प्रतिभासो भवतीति सम्बन्धः । यथा प्रचयात् पूर्वं परमाणवोऽसंस्पर्शिनः प्रचयेऽपि यद्यपि तथाभूता एव तथापि पूर्वं नाक्षोपलम्भः किन्तु प्रचयं एव, पूर्वापरक्षणयोरेकान्तेनान्यत्वात् । यदि
53A हि य एवाऽप्रचयावस्थायां परमाणवस्त एव प्रचयावस्थायामपि स्युस्तदा किमिति पूर्वं नोपलब्धाः पश्चादुपलभ्यन्त इति प्रश्नावसरः स्यात् । किन्तु पूर्वापरावस्थयोरेकान्तभिन्ना एवेति कः प्रश्नावकाशः ? न खलु यदि पिशाचो नोपलभ्यते तदा घटः किमित्युपलभ्यत इति सकर्णो वदति । तत् परमाणुरूपापरित्यागेऽप्यविकल्पसंविदि प्रतिभासो न विरुध्यते ।

उत्तरमाह–कदा कस्मिन् काले क्षणिकेषु क्षणमात्रावस्थायिषु भावेष्वियं भेदेनोत्पत्तिर्नास्ति ? सर्वदाऽप्यस्तीत्यर्थः । यद्यन्यत्वोत्पादमात्रेणोपलम्भा-ऽनुपलम्भौ व्यवस्थाप्येते
53B तदा प्रचयात् पूर्वमपि परमाणवः क्षणिकत्वाच्छतकृत्वोऽन्यत्वेनोत्पन्नाः, सर्वार्थानां परस्परं वैलक्षण्यात् । तत एकक्षणादूर्ध्वं द्वितीये क्षणे परमाणूपलम्भः स्यात्, पूर्वक्षणादन्यद्वितीयक्षणस्योत्पादात् । तद्यदि परमाणवः सर्वदाऽपि परमाणुरूपा एव तदान्यत्वेनोत्पादेऽपि प्रत्यक्षावभासो न घटत एव ।

स्यादेवम्– न भेदेनोत्पत्तिमात्रेणोपलम्भः, किन्त्वेकार्थक्रियाकारित्वविशिष्टाद् भेदेनोत्पादात्, अतो न व्यभिचारः, अप्रचयावस्थायां वैशिष्ट्यस्याभावादित्यत आह– वैशिष्ट्यं तु स्थूलताया अन्यन्न विद्मः । वैशिष्ट्यं तु स्थूलतायाः कथञ्चिदेकत्वपरिणति-
54A रूपाया अन्यद् भिन्नं न विद्मः । एकान्तानेकत्वपरिणतिषु परमाणुषु भेदेनोत्पत्तिमात्रं प्रचयात् पूर्वमप्यस्ति । प्रचयावस्थायां तु वैशिष्ट्यमेतदेव जातं यदुत पूर्वमेकत्वपरिणतिर्नासीत्, सम्प्रति तु सा समस्तीति ।

ननु नैकत्वपरिणतिर्वैशिष्ट्यम्, किं तर्हि ? अन्योन्यप्रत्ययापेक्षया सकललोकसाधारणकर्मापेक्षया चाऽनेकत्वपरिणतीनामेवाणूनामविभागवर्त्तित्वम् । यदुक्तम्–

१ भेदोत्पत्तेः ॥ २, ३ असंयुक्ताः ॥ ४ '७' [सप्तम्यन्तम्] ॥ ५ कदा पुनः क्षणिकेष्वियं नास्ति ॥ ६ यदि परमाणुत्वं कथञ्चित् जह्युः परमाणवस्तदानीमेव प्रत्यक्षावभासो घटते ॥ ७ कारण ॥ ८ अदृष्ट ॥ ९ वैशिष्ट्यमिति सम्बन्धः ॥ १० * "आह च" इत्यभिधाय स्वरचिताः ४५ श्लोका अर्चटेन हेतुबिन्दुटीकायां [पृ० १०४–१०७] लिखिताः, तेष्विदं वक्ष्यमाणं श्लोकद्वयं वर्तते। "अनन्तरोक्तमर्थजातं सातिरेकं स्वकृताभिः कारिकाभिः प्रतिपादयितुं परमुखेणाह– आह चेति "इति पण्डितदुर्वेकमिश्र विरचिते हेतुबिन्दुटीकालोके पृ० ३४४ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

54 B "अन्योन्यप्रत्ययापेक्षास्ते तथास्थितमूर्त्तयः ।
कर्म्मणां चापि सामर्थ्यादविनिर्भागवर्त्तिनः ॥
सन्निवेशेन ये भावाः प्राणिनां सुखदुःखदाः ।
कर्मभिर्जनितास्ते हि तेभ्य एवाविभागिनः ॥"
[हेतुबिन्दुटीका श्लो० ३३–३४, पृ० १०६] 5

तत् कुत एकत्वपरिणतिः सिध्यति, धारणा-ऽकर्षणयोगविभागवर्त्तित्वादेवोपपद्यमानत्वादिति ?

तदप्यचारु, अविनिर्भागवर्तित्वस्यापि कथञ्चिदेकत्वपरिणत्यनभ्युपगमे परस्परा-
55 A संश्लेषिणामणूनामघटनात् । अपि चान्योन्यप्रत्ययैर्लोककर्मभिर्वा परमाणूनां किमविनि-
र्भागवर्त्तित्वं कृतमाहो एकत्वपरिणतिरित्यर्थे न नियामकमुत्पश्यामः, एकत्वपरिणतावपि
सर्वस्य सिद्धत्वाद् दोषाभावाच्च । 10

नन्वस्ति दोषो देश-कार्त्स्न्याभ्यां वृत्त्यघटनं रक्तत्वा-ऽरक्तत्वादिविरुद्धधर्माध्यासेना-
ऽनेकत्वापत्तिश्च । नैष दोषः, एकत्वपरिणतेः कथञ्चिदवयवेभ्योऽभेदेन वृत्तिघटनात्,
एकान्तभेदिन एव देश-कार्त्स्न्याभ्यां वृत्त्यघटनात्, अवयवाऽभेदेन कथञ्चिदनेकत्वस्या-
प्यवयविनोऽभ्युपगमाच्च । यद्वक्ष्यामः– "अत एवैकत्वा-ऽनेकत्व-कम्पा-ऽकम्पाद्युपपद्यते"
55 B [पृ० ४३, 68 A] इति । 15

तदविकल्पज्ञाने प्रतिभासान्यथानुपपत्त्याऽपि परमाणूनां प्रचयावस्थायामेकत्व-
मात्मनो भिन्नाभिन्नमङ्गीकर्त्तव्यम् । अयं चात्र न्यायः सूचितः– यदिन्द्रियग्राह्यं तत्
परमाण्वधिकरूपवत् । यच्चैवं न भवति तन्न तथा, यथैकः परमाणुरप्रचिता बहवो

१ सन्तः ॥ * ननु अस्ति एकस्मिन्नवयविनि धारणाकर्षणे कथमुपपद्येयातामित्याह– **अन्योन्ये**ति । ते भागाः । एकसामग्र्यधीनत्वादन्योन्यकारणाधीनापेक्षाः सन्तस्तथास्थितघपुषो येनैकस्याकर्षणे धारणे वाऽन्येषामपि ते भवत इति । न केवलं दृष्टहेतुबलात् तेषां तथा स्थितिः, अपि तु अदृष्टवशादपीति दर्शयन्नाह– **कर्मणां चे**ति । लोकस्यासाधारणचेतनात्मकर्म्मणामपि **सामर्थ्यात् तेऽविनिर्भागवर्तिनः**, परस्परं विभागेन न वर्तन्ते । ननु चाकारणस्य कर्मणः सामर्थ्योपवर्णनमयुक्तमित्याशङ्क्याह–**सन्निवेशे**नेति । हिर्यस्मादर्थे । "कर्मजं लोकवैचित्र्यम्" [अभिधर्मकोशे ४।१] इति वचनात् **कर्मभिर्जनिता** इत्याह । तेषामेव प्राणिनां साधारणैरसाधारणैर्वा कर्मभिः, **तेभ्यः** कर्मभ्य **एव** तदाधिपत्यादेवेति यावत् **अविभागिनो** विभागेन न वर्तन्ते" इति पण्डितदुर्वेकमिश्रविरचिते **हेतुबिन्दुटीकालोके** पृ० ३५१–३५२ ॥ २ परमाणवः ॥ ३ संस्थानेन ॥ ४ अदृष्टैः ॥ ५ कर्मभ्यः ॥ ६ स किमवयवी अवयवेषु देशेन कात्स्न्येन वा वर्तत इत्यादि ॥ ७ जैनोत्तरम् ॥ ८ अवयविनः ॥ ९ न दोषोऽत्रापि ॥ १० परमाणूनामात्मनः स्वरूपात् सकाशात् प्रचयावस्थायामेकत्वं भिन्नाभिन्नमङ्गीकृत्यम् ॥ ११ विवादाध्यासितं घटादि परमाण्वधिक-रूपवत्, इन्द्रियग्राह्यत्वात्, यत् परमाण्वधिकरूपवन्न भवति न तदिन्द्रियग्राह्यं यथैकः परमाणुः, अप्रचिता बहवो वा परमाणव इति व्यतिरेकानुमानम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वा। इन्द्रियग्राह्यत्वं हि परमाणूनां [1]रूपविशेषोत्पादेन व्याप्तम्। [2]अन्यथा सदा दर्शनप्रसङ्गः। रूपविशेषं [3]चैकत्वपरिणतेरन्यं न विद्मः। अविनिर्भागवर्त्तित्वे चोक्तप्रायम्।

तदग्रहे तदग्रहात् तयोरभेदः, न, रसेन व्यभिचारात्। तदस्ति तेषां [4]तदैकत्वपरिणतिः।

पुनरपि परः प्राह—तदिति तेषामवयवरूपाणां परमाणूनामग्रहे परिच्छेदाभावे [5]तस्य संस्थानरूपस्य [6]कथञ्चिदेकत्वपरिणतिरूपस्य वाऽवयविनोऽग्रहात् तयोः परमाणुसंस्थानयोरभेदः। यथा घटापरिच्छेदेऽपि पटः परिच्छिद्यत इति घटात् पृथक्सत्ताकोऽसाविष्यते तथा यदि परमाणुव्यतिरेकेणापि स्वातन्त्र्येण संस्थानं परिच्छिद्येत तदा
56A परमाणुभ्यः पृथक्सत्ताकं तदपीष्येत। किन्तु सर्वत्रापि परमाणुग्रहणपूर्वकमेवावयविनो ग्रहणम्, अतोऽवयवरूपाः परमाणव एवासौ न पुनस्तदतिरिक्तः, [7]अवयवाग्रहणेऽपि [8]क्वचित् तद्ग्रहणप्रसङ्गात् पटवत्। ज्ञाने तु स्थूलाकारप्रतिभासस्तदाहित एव भ्रान्तः, यदुक्तम्—

"बहूनां च निरवयवानां प्रतिभासः समुदायविषयः सावयव आभासते"
[ ] इति।

56B [9]तत्र तावत् घटात् पटो "व्यतिरेकी च पृथक् च गृह्यत इति युक्तम्, [10]तयोरत्यन्तभेदात्। अवयवाऽवयविनौ तु भेदिनावपि कथञ्चिदभेदिनौ, अतः कथं स्वातन्त्र्येण ग्रहणम्, सहैव ग्रहणनियमनिबन्धनत्वादभेदस्य। स्थूलप्रतिभासस्तु भ्रान्तो बाधकप्रमाणसम्भवे सति व्यवस्थापयितुं शक्यो नान्यथा। तच्च नास्ति। "[12]वृत्त्यघटना-
57A नेकत्वकल्पनयोस्तु प्रतिविधानं करिष्याम इति यत् किञ्चिदेतत्।

तथाप्युच्यते—नेति, नावयवाऽवयविनोरभेदः। "[13]रसेन रसपरमाणुभिः 'तदग्रहे तदग्रहात्' "[14]इति हेतोर्व्यभिचारात्। स्पर्शग्रहणपूर्वकं हि भवति रसग्रहणम्, न खलु
57B जिह्वाग्रेणास्पृष्टस्य वस्तुनो रसपरिच्छेदो भवति। न च स्पर्शपरमाणुमात्रा एव रस-

१ परमाण्वधिकरूपविशेषोत्पेति ॥ २ रूपविशेषोत्पादाभावे केवलावस्थायामपि दर्शनं स्यादित्यर्थः ॥ ३ * 'तदैकपरिणतिः' इति मूलादर्शे ॥ ४ तदग्रहे तदग्रहात् तयोरभेदः ॥ ५ नैयायिकं प्रति ॥ ६ जैनं प्रति ॥ ७ यदि परमाण्वतिरिक्तः स्यात् तदाऽवयवेत्यादि ॥ ८ अवयवि ॥ ९ परमाण्वाहित ॥ १० जैनोत्तरम् ॥ ११ भिन्नः ॥ १२ घटपटयोः ॥ १३ एतद्ग्रन्थकारापेक्षयाऽत्यन्तं भेदो यावता सत्त्वादिनाऽभेदोऽपि ॥ १४ नन्वस्ति बाधकं वृत्त्यघटनादीत्याह—वृत्त्येति ॥ १५ रसेन व्यभिचारात् ॥ १६ इत्यस्य हेतोः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

परमाणवः, तेद्भेदस्य स्वयंवेद्यत्वात्, तद्वदवयवागृहीतावग्रहणेऽप्यवयविनो न परमाणुरूपावयवमात्र एवैकत्वपरिणतिरूपोऽवयवीति ।

एतेन यदप्युक्तम्–

"यत् सत् तन्निरवयवं यथा ज्ञानम्, सच्च दृश्यमानं नीलम्, सावय[व]त्वे हि दिग्भागभेदनिमित्तो विरुद्धो धर्मः सत्त्वस्यासत्त्वाख्यो भवति । तेन स्वभावविरुद्धोपलब्ध्या सावय[व]त्वाद् व्यावर्त्तमानं सत्त्वं निरवयवत्वेन व्याप्यत इति स्वभावः" [ ] इति ।

तदपि प्रत्युक्तम् । यतः परमाणूनां धर्मित्वे सिद्धैसाधनम्, द्रव्यांशैर्निरवय[व]त्वात्[2] । स्थूलस्य तु धर्मित्वे आश्रयासिद्धैत्वं प्रत्यक्षबाधा च । अत एव प्रसङ्गत्वमपि न । व्याप्तेरसिद्धत्वाच्च, दिग्भागभेदनिमित्तविरुद्धधर्मसंसर्गेण ज्ञानस्याप्यसत्त्वप्रसङ्गात्, न चामूर्त्तत्वान्न दिगभिसम्बन्धो विरोधाभावादिति ।

सम्प्रत्युपसंहरति– तेत् तस्मादस्ति न पुनर्नास्ति तेषां परमाणूनां तदा प्रत्यक्षग्रहणकाले एकत्वपरिणतिः कथञ्चिदेकत्वपरिणामः । स्थौल्यं संस्थानमेकत्वपरिणतिः स्कन्धोऽवयवीत्येकार्था ध्वनयः ॥ छ ॥

58A तदेवं बौद्धान् प्रति एकत्वपरिणामं प्रसाध्य नैयायिकान् प्रत्याह–

सा स्यादवयवाभेदिनो द्रव्यम् । एकान्तभेदे का तेषु तद्वृत्तिः? समवायः । सा कथं न नभसि? अजनकत्वात् । तर्हि अग्नौ धूमस्याऽस्तु । न, असमवायिकारणत्वात् । समवायनिबन्धनस्तद्भावः कथं न तस्य?

१ स्पर्श-रसपरमाणूनाम् ॥ २ '७' [=सप्तम्यन्तं पदम्] ॥ ३ धर्मोत्तरानुमानम्–विवादाध्यासितं नीलं निरवयवम्, सत्त्वात्, यथा ज्ञानम् ॥ ४ व्याप्याभ्युपगमे सत्त्वाभ्युपगमे व्यापकप्रसञ्जनम्–निरवयवत्वमपि ॥ ५ प्रतिषेध्यं सावयवत्वम्, तस्य स्वभावोऽसत्त्वमभाव इत्येकोऽर्थः, तस्य विरुद्धं सत्त्वम्, तस्योपलब्धिः ॥ ६ असत्स्वरूपात् ॥ ७ स्वभावहेतुः ॥ ८ **परमाणूनां धर्मित्व** इति, सच्च दृश्यमानं नीलं परमाणुरूपमित्यनेन प्रकारेण धर्मित्वे ॥ ९ सिद्धसाधनमिति । सिद्धि(द्ध)साधनं नाम दूषणमसिद्धहेतावन्तर्भवति । यतो हेतुर्हि सन्दिग्धसाध्यस्य सिद्ध्यर्थं प्रयुज्यते । अस्य तु हेतोः साध्यमग्रेऽपि सिद्धम् । सिद्धत्वादेव अधिकसाध्याभावादसिद्धत्वम् ॥ १० परमाणूनाम् ॥ ११ स्थूलो घटादिः ॥ १२ तव ॥ १३ प्रत्यक्षबाधात एव ॥ १३ प्रसङ्गत्वमपीति । यत्राश्रयासिद्धत्वं तत्र प्रसङ्गहेतुसिद्धिः क्रियते, केनोल्लेखेन? 'यदि स्थूलं सञ्चेष्यते तदा निरवयवमपीष्यताम्' । सोऽपि न ॥ १५ व्याप्तेरसिद्धत्वाच्चेति । व्याप्तेः सिद्धौ सत्यां प्रसङ्गहेतुर्घटते, अत्र तु सत्त्वनिरवयवत्वयोर्व्याप्तिरेवास्माकमसिद्धा ॥ १६ प्रसङ्गत्वमपि न ॥ १७ **तदस्ति तेषां तदैकत्वपरिणतिः** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सा पूर्वप्रसाधितैकत्वपरिणतिः परमाणूनां कथञ्चिदेकत्वपरिणामरूपा स्यात् कथञ्चिद-
वयवावयविभेदिनी परमाणुभ्यः कथञ्चिदभिन्ना द्रव्यमिति वेदितव्यम् । यदेतद् नैयायिका
द्रव्यमित्याहुः सा परमाणूनामेकत्वपरिणतिरेवोच्यते ।

अत्र च न द्रव्यं साध्यते, तस्य परैरपीष्टत्वात् । किं तर्हि ? कथञ्चिदवयवावयविनोर-
58B भेदः, तयोः सर्वथापि परैर्भेदस्येष्टत्वात् इति कथञ्चिदभेदमेव साधयितुं परं पृच्छति— 5
59A एकान्तभेदे सर्वथाप्यवयवावयविनोर्भेदाभ्युपगमे तेषु परमाणुलक्षणावयवेषु तस्यावयविनो
वृत्तिः का ? वृत्तिशब्देन किमुच्यते ? अस्माकं तावद् द्रव्यस्यावयवेषु वृत्तिः कथञ्चिदभेद
एवोच्यते, भवतां पुनरेकान्तभेदवादिनां केति ?

59B परः प्राह— समवायः । वृत्तिशब्देन समवायः सम्बन्ध उच्यते, एतदेव नः
सिद्धान्ते अवयवेष्ववयविनो वर्त्तनं यस्तेषु तस्य समवायः सम्बन्धः । अत्राह— 10
सौ समवायरूपा वृत्तिरवयविनः कथं न नभसि ? यथा ह्यवयवेषु समवायसद्भावादवयवी
वर्त्तत इत्युच्यते तथा नभस्यप्युच्यतां समवायस्यैकत्व-सर्वगतत्वाभ्यां तत्रापि भावात् ।
आकाशमपि समवायिकारणं कथं नोच्यत इत्यर्थः ।

पर आकाशे वृत्त्यभावे हेतुमाह— अजनकत्वात् । सा समवायरूपा वृत्तिराकाशे-
60A ऽवयविनो नोच्यते किन्तु स्वावयवेष्वेव, आकाशस्यावयविनं प्रत्यजनकत्वात् । यो हि 15
येन जन्यते स तत्रैव समवेतः सन् समवायाद्वृत्त इत्युच्यते । तच्चैतदवयवेष्वेवास्ति
नाकाशे, जनकत्वा-ऽजनकत्वाभ्याम् । अतः समवायसद्भावाविशेषेऽप्यवयवेष्वेवावयविनो
वृत्तिरुच्यते, नाकाशे ।

अत्राह—तर्हीति । यदि तदुत्पादात् तत्र च समवायसद्भावाद्वृत्तिरुच्यते, तर्ह्येवं
60B व्यवस्थायामग्नौ धूमस्याऽस्तु सेति सम्बध्यते । यदि हि समवायसद्भावेऽपि जनकत्वा- 20
भावेनावयविनः समवायरूपा वृत्तिराकाशे न भवति तर्ह्यग्नौ धूमस्य समवायरूपा
वृत्तिरस्तु, अग्नेः सकाशाद्धूमस्योत्पादात् समवायस्य चैकत्व-सर्वगतत्वाभ्यां सद्भावात् ।

61A परः प्राह—नेति, उत्पादकत्व-समवाययोगयोरपि नाग्नौ धूमस्य समवायरूपा वृत्तिः,
असमवायिकारणत्वात् अग्नेः । नाग्निधूमस्य समवायिकारणं किन्तु निमित्तकारणम्,

१ सा स्यादवयवाभेदिनी द्रव्यम् ॥ २ एकत्वपरिणतेः पर्यायः ॥ ३ एकान्तभेदे का तेषु तद्- 25
वृत्तिः ॥ ४ सूत्रम् ॥ ५ सा कथं न नभसि ॥ ६ सूत्रम् ॥ ७ जनकत्वम् ॥ ८ तर्ह्यग्नौ
धूमस्यास्तु ॥ ९ सतोः ॥ १० सूत्रम् ॥ ११ समवायिरूपं कारणं नाग्निः, किन्तु निमित्तकारणम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

समवायिकारणं तु स्वावयवा एव । अतोऽग्नेरुत्पादेऽपि धूमस्य न तत्र समवायरूपा वृत्तिरुच्यते, उत्पादकत्ववत् समवायिकारणत्वस्यापि लक्षणत्वादिति न समवायरूपवृत्तिलक्षणस्यातिव्याप्तिरिति ।

[1]समवायः समवायसद्भावो निबन्धनं कारणं यस्य स तथाभूतस्तद्भावः समवायिकारणत्वं कथं न तस्याग्नेर्भवति । धूमावयवा हि [2]स्वावयविनो जनकत्वेन समवायसद्भावेन च समवायिकारणमुच्यन्ते । तदेतदग्नेरप्यस्ति, अग्नेरुत्पादादेकत्व-सर्वगतत्वाभ्यां समवायसद्भावाच्च । ततश्चोत्पादकत्वात् समवाययोगेन समवायिकारणत्वाच्चाग्नौ धूमस्य समवायरूपा वृत्तिः स्यात् । न चैवम् । अत एकान्तभेदाभ्युपगमे परमाणुष्ववयविनः समवायरूपा वृत्तिर्न घटत इति कथञ्चिदभेदोऽभ्युपेयः । 61 B

तथापि नांशेन, अनंशत्वात् । सर्वात्मनापि, तच्छून्यतापादात् बहुत्वप्रसङ्गाच्च । अनंशस्य अंशानंशकल्पनावद् वृत्तेरप्ययोगः, एकान्तभेदिवृत्तेस्तद्व्याप्तेः । अधिकोत्पत्तौ च तुलानतिविशेषः स्यात्, उपलक्षणं च, महत्त्वात् उपलभ्यत्वात् । गुरुत्वं च, पतनधर्मकत्वात् गुणानां गुणान्तरारम्भाच्च । जलादयो मत्स्यादीनामेव गुरुत्वं प्रतिबध्नन्ति, पतनस्खलनदर्शनात् । नैवमवयविनः । यदा त्वणव एव तथा परिणमन्ते तदा न दोषः ।

अथवा भवेदवयवेष्ववयविनः समवायरूपा वृत्तिस्तथापि नांशेन [3]नैकदेशेनावयविनोऽवयवेषु वृत्तिर्घटते । अवयवी हि प्रत्यवयवं किमेकदेशेन वर्तते उत सर्वात्मना? तत्र नैकदेशेन, अनंशत्वादवयविनोऽशामावात् । अवयविनो हि स्वावयवा एवांशाः, तेषु च वृत्तिचिन्ता प्रारब्धा, अंशान्तराणि च न सन्तीति कथमेकदेशेन वृत्तिर्घटेत ? न केवलं नांशेन, सर्वात्मनापि कात्स्न्र्येनाप्यवयविनोऽवयवेषु वृत्तिर्न घटते, कुतः? [4]तच्छून्यतापादात्[5] । [6]तेषां [7]यस्मिन्नवयवी वर्त्तते ततोऽन्येषामवयवानां शून्यतापादादवयविराहित्यापत्तेः प्रसङ्गात् । अथवा तेनाऽवयविनाऽऽक्रान्तावयवस्य [8]शून्यतापत्तिप्रसंङ्गात्, 62A

१ समवायनिबन्धनस्तद्भावः कथं न तस्य ॥ २ धूमावं° ॥ ३ सूत्रम् ॥ ४ अवयविराहित्यप्रसङ्गात् ॥ ५ अवयवानां मध्ये ॥ ६ अवयवे ॥ ७ सर्वात्मना ॥ ८ पूर्वा° ॥ ९ अवयविराहित्यप्रसङ्गात् ॥ १० यदा सर्वात्मना एकमवयवं व्याप्य द्वितीयमपि सर्वात्मना व्याप्नोति तदा पूर्वस्यावयवस्यावयविराहित्यं स्यात्, न ह्येककालं सर्वात्मनाऽवयवद्वयं व्याप्तुं शक्नोतीत्यभिप्रायः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ततोऽन्यत्र वृत्तेः । न केवलमतेः, बहुत्वप्रसङ्गाच्च न सर्वात्मना वृत्तिर्घटते, प्रत्यवयवं
62 B अवयवी परिसमाप्य वर्त्तते, सर्वेऽपि चावयवा अवयविना व्याप्ता दृश्यन्ते, अतो बहुत्वं प्राप्नोति । यावन्तोऽवयवास्तावन्तोऽवयविनः प्राप्नुवन्तीत्यर्थः । अतोऽवयवेष्ववयविनो भेदाभ्युपगमे वृत्तिर्न घटत एव ।

ननु यस्यांशेन सर्वात्मनापि च वृत्तिः सम्भवति तत्रांशानंशविकल्पना शोभां 5
विभृयात्, यथा कुन्दकलिकासु सूत्रतन्तोः । यत्र पुनरंशा एवाऽसम्भविनस्तत्रांशा-
63 A नंशवृत्तिविकल्पना केवलं बहुभाषित्वमेव सूचयति । तदंशानंशकल्पनानपेक्षमवयवी वर्त्तत इत्येतावदेवोच्यतेऽस्माभिरिति ।

न, अनंशस्येति । यथाऽनंशस्यांशानंशकल्पनाया अयोगस्तथा वृत्तेरपि, न वै निरंशः सन् कोऽपि क्वापि वर्त्तमानोऽस्माकमसत्सीत् । यस्मादेकान्तभेदिवृत्तेरेकान्तेन भेदिनो 10
वर्त्तनस्य तद्व्याप्तेः ताभ्यां देश-सर्वात्मभ्यां व्याप्तत्वात् । भिन्नो हि पदार्थः क्वचि-
63 B द्वर्त्तमानः कश्चिद्देशेन वर्त्तते, यथा कुन्दकोरकेषु सूत्रतन्तुः, कश्चित् सर्वात्मना यथा भाजने नारङ्गफलम् । तदयमप्यवयवी यद्यवयवेषु वर्त्तेत तदा देश-कार्त्स्न्याभ्यामेव, प्रकारान्तरेण वृत्तेरदर्शनात्, तद्देश कार्त्स्न्ययोर्भेदिवृत्तिव्यापकयोरभावात् तद्व्याप्याया वृत्तेरप्यवयविन्यभावः प्राप्नोति । अस्ति च वृत्तिः । तस्मादभेद एव कथञ्चिदङ्गीकर्त्तव्यः । 15

64 A अपि च, यदि परमाणुभ्योऽधिकोऽवयवी उत्पद्यत इत्युच्यते तदाऽधिकोत्पत्तौ च तुलानतिविशेषः स्यात् । यावद्धि विशकलितमृत्तिकाकणाक्रान्तस्य तुलादण्डस्य नमनं ततोऽधिकतरमेव पिण्डाक्रान्तस्य प्राप्नोति, यदि सत्यमवयवी स्वावयवेभ्योऽधिकः समुत्पद्यते । न च तुलानतिविशेषो दृश्यते ।

स्यान्मतम्— सन्नपि तुलानतिविशेषो न गृह्यतेऽवयविनः सूक्ष्मत्वादित्यत आह— 20
[1]उपलक्षणं चेति, स्यादिति सम्बन्धः । न केवलमधिकोत्पत्तौ तुलानतिविशेषः स्यात्,
64 B तुलानतिविशेषस्योपलक्षणं चेति चार्थः । कुतः ? महत्त्वादवयविनो महाद्रव्यत्वात् । यद्यवयवी सूक्ष्मः स्यात्तदाल्पतरत्वेन सन्नपि तुलानतिविशेषो नोपलभ्येत, किन्त्ववयवी महान्। अतः कथमनुपलम्भ्यः तुलानतिविशेषस्यापि, [2]महत्त्वात् ? महत्त्वं पुनरवयविनः सिद्धम्, [3]उपलभ्यत्वादक्षगोचरत्वात् । न खलूपलभ्यत्वं [4]महत्त्वं व्यभिचरति । [5]तदुक्तम्— 25

१ तच्छून्यतापादाद्धेतोः ॥ २ सूत्रम् ॥ ३ अनंशस्यांशानंशकल्पनावद् वृत्तेरप्ययोगः ॥ ४ एकान्तभेदिवृत्तेस्तद्व्याप्तेः ॥ ५ नारङ्गस्य भाजने सर्वात्मना प्रवेशो वृत्तिः ॥ ६ सूत्रम् ॥ ७ सूत्रम् ॥ ८ उपलम्भः स्यादित्यर्थः ॥ ९ सूत्रम् ॥ १० तुलानतिविशेषस्य ॥ * अत्र [1]लम्भो विशेषस्यापि महत्त्वादिति इति पूर्वं लिखित्वा ग्रन्थकारैरेव पश्चात् संशोध्य [1]लम्भः तुलानतिविशेषस्यापि महत्त्वात् इति कृतम् ॥ ११ कुतः ॥ १२ सूत्रम् ॥ १३ कार्यं कर्तृ ॥ १४ कारणम् ॥ १५ भवद्भिः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

" महत्त्वादनेकद्रव्यवत्त्वाद् रूपविशेषाच्च द्रव्यं प्रत्यक्षम् " [वैशेषिकसूत्रे ४।१।६] इति । तस्मादधिकोत्पत्तौ तुलानतिविशेषस्तदुपलम्भश्च स्यादिति ।

स्यादेतत्—अधिकोत्पत्तावपि गुरुत्वाभावेन तुलानतिविशेषो न भवतीति । तन्न । यस्माद् गुरुत्वं च स्यादिति सम्बन्धः । पतनधर्मकत्वादवयविनोऽधःपातदर्शनात् ।
65A न खलु गुरुस्पर्शाभावेऽधःपातः सम्भवति, तस्य तद्धेतुकत्वात् । यदघोचाम— 5
"अधोगतेर्गुरुः" [पृ० ३] इति । न च स्वगतगुरुत्वाभावेऽप्याश्रयगुरुत्वादेवाधः-पातः, रूपादीनामप्यभावप्रसङ्गात् , आश्रयरूपादिभिरेव प्रत्यक्षत्वादिघटनात् ।

यत्तूक्तम्—

" अवनतिविशेषानुपलम्भश्च कार्ये मक्षिकादिगुरुत्वसम्पर्केणापि समान इति । तथाहि—तन्तुषु मीयमानेषु मक्षिकादिसम्पर्केऽप्यवनतिविशेषो नोपलभ्यते । न च 10
तद्गुरुत्वस्यासत्त्वम् " [प्रशस्तपादभाष्यटीका व्योमवती पृ० ६३०] इति ।

65B तदयुक्तम् । तन्तुगुरुत्वाद् मक्षिकागुरुत्वस्यातिस्वल्पत्वेन नतिविशेषस्यातिसूक्ष्मत्वात् प्रतिपत्तृनैपुण्याभावाच्च सतोऽप्यनुपलक्षणम् , न पुनरस्त्येव न । यत्र पुनर्मक्षिकागुरुत्वमधिकं प्रतिपत्तृनैपुण्यं च भवति तत्र नतिविशेषोऽवश्यमुपलभ्यत एव । न खलु केवलगुञ्जाफलाक्रान्तस्य मक्षिकालक्षाधिलगुञ्जाफलाक्रान्तस्य च तुलादण्डस्य तावतीमेव नतिमति- 15
निर्मललोचनाः पश्यन्ति । गुरुत्वं चाप्रत्यक्षं परेऽभ्यमंसत, अतस्तदुक्तेनैव हेतुना साध्यते । यदाहुस्ते—

66A " गुरुत्वं जल-भूम्योः पतनकर्मकारणमप्रत्यक्षं पतनकर्मानुमेयं संयोग-प्रयत्न-संस्कारविरोधि " [प्रशस्तपादभाष्ये] इति ।

तदवयविनो गुरुत्वभावात्तुलानतिविशेषोपलम्भः प्राप्नोति । 20

१ सूत्रम् ॥ २ सूत्रम् ॥ ३ गुरुत्वमपि कुत इत्याह ॥ ४ गुरुत्वहेतुकत्वात् ॥ ५ पतनकार्यदर्शनाद् गुरुत्वं कारणमनुमीयते ॥ ६ अवयवि ॥ ७ अवयवरूप ॥ ८ इति वाच्यम्, कुतः ? ॥ ९ अवयविद्रव्ये ॥ १० मक्षिकादि ॥ ११ णां [=मक्षिकाणां] ॥ १२ एक ॥ १३ लक्षसंख्यया बहुत्वं लक्ष्यते ॥ १४ एकगुञ्जा ॥ १५ किन्त्वधिकां नतिं पश्यन्तीत्यर्थः ॥ १६ नन्ववयविनो गुरुत्वस्य प्रत्यक्षत्वं किमिति नोक्तम् ? किमिति हेतुतासाधनं कृतमित्याह— गुरुत्वमिति ॥ १७ 'पतनधर्मकत्वात्' इत्येवंरूपेण ॥ १८ संयोगप्रयत्नसंस्कारा 25
विरोधिनो यस्य, तत्र संयोगो विरोधी पततो बदरस्य कुण्डयोगेनाधःपाताभावः, पक्षी स्वकायं प्रयत्नेन धरति, धनुषा मुच्यमानो बाणो वेगाख्येन संस्कारेण न पतति ॥ १९ वेग ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न केवलं पतनधर्मकत्वादवयविनो गुरुत्वम्, तथा गुणानां गुणान्तरारम्भाच्च। यथा ह्यवयवगुणा रूपादयोऽवयविनि रूपादिगुणानादधति तथा गुरुत्वमपि। न च गुणानां गुणान्तरारम्भणमसिद्धम्, भवद्भिरभ्युपगतत्वात्। तदुक्तम्–

" अपाकजरूप-रस-गन्ध-स्पर्श-परिमाणैकत्वैकपृथक्त्व-गुरुत्व-द्रवत्व-स्नेह-वेगाः कारणगुणपूर्वकाः " [प्रशस्तपादभाष्ये] इति ।

ततः कथमवयविनो गुरुत्वाभावेन तुलानतिविशेषो न स्यात् ?

ननु यथा समस्तस्येन केवलेन चाम्भसा समाक्रान्तस्य तुलादण्डस्य तावत्येव
66B नतिर्दृश्यते अथ चाम्भसो भिन्नो मत्स्यो गुरुत्ववांश्च तथाऽधिकावयव्युत्पत्तावपि स्यादिति।

उच्यते–जलादयः, आदिशब्देन दुग्धघृतादिग्रहः, मत्स्यादीनामेव, आदिशब्दात् काष्ठादिग्रहः, गुरुत्वं प्रतिबध्नन्ति तुलानत्यादिकार्यकरणासमर्थं कुर्वन्ति। एवकारः सर्वत्र प्रतिबन्धकत्वाभावार्थः। गुरुत्वकार्यं तुलानतिविशेषः। जलादिभिश्च मत्स्यादीनां गुरुत्वं सदपि स्वकार्याकरणक्षमं क्रियते, अतः कथं जलादिभ्यो मत्स्यादीनामाधिक्येऽपि तुलानतिविशेषः स्यात् ? यत्र तु पाषाणादौ जलादिना गुरुत्वं न प्रतिबध्यते तत्र भवत्येव नतिविशेषः।

गुरुत्वप्रतिबन्धश्च पतनस्खलनदर्शनात् मत्स्यादेरधः पततो जलादिना स्खलन-
67A दर्शनादवसीयते। अत एव च मत्स्यादयो जलादीनामुपरिष्टादेव प्लवन्ते, नाधो निमज्जन्ति।

नैवमवयविनः, यथा पतनस्खलनदर्शनेन मत्स्यादिगुरुत्वस्य जलादिना प्रतिबन्धोऽवसीयते नैवमवयवैरवयविगुरुत्वस्य प्रतिबन्धोऽवसातुं शक्यः। मत्स्यादयः पाषाणादयश्चान्यत्र क्वचित् पतन्तो दृष्टाः। यदा जलादौ पाषाणादय एवाधः पतन्ति न मत्स्यादयस्तदाऽवसीयते जलादिना मत्स्यादीनां गुरुत्वं प्रतिबद्धमिति। अवयवी
67B तु सर्वदाऽपि स्वावयवाधारः क्वचिदपि नाधः पतन्नुपलब्धोऽतः कथं पतनस्खलनदर्शनेनास्य गुरुत्वप्रतिबन्धः प्रत्येतुं शक्यः ! न च मेर्वादिवदधःपतनानुपलम्भेऽप्यवयविनो गुरुत्वप्रतिबन्धोऽस्तीति वाच्यम्, संयोग-प्रयत्न-संस्काराणामेव गुरुत्वं प्रति भवता विरोधित्वाभ्युपगमात्। न चैतदवयविन्यस्तीति। तद् गुरुत्वस्याप्रतिबद्धत्वात् तलानतिविशेषः स्यादिति।

---

१ सूत्रम् ॥ २ जलादयो मत्स्यादीनामेव गुरुत्वं प्रतिबध्नन्ति ॥ ३ कोऽर्थः ? मत्स्यादीन् प्रति प्रतिबन्धकत्वं जलस्य, न पाषाणादीन् प्रति ॥ ४ मत्स्यादीनां गुरुत्वप्रति ॥ ५ सूत्रम् ॥ ६ बन्धः कथं ज्ञायते इत्याह ॥ ७ * दृश्यतां पृ० ४१ पं० १८ ॥ ८ विरोधि कारणम् ॥ ९ किन्तु समवाय एवास्ति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नन्वयं तुलानतिविशेषो युष्मत्पक्षेऽपि प्राप्नोति, कथञ्चिदेकत्वपरिणतेरधिकाया उत्पादादिति । उच्यते– यदा त्वणव एव नाधिकं किञ्चित् तथा घनादिभावेन परिणमन्तेऽनेकत्वपरिणाममपहाय कथञ्चिदेकत्वपरिणाममुपयन्ति तदाऽस्माकं तुलानति-
68A विशेषदर्शनलक्षणो दोषो न भवति । वयं हि त एवाणवस्तावन्मात्रसत्ताका एवैकत्व-भावमनुभवन्ति न पुनस्तेभ्यः किञ्चिदधिकमुत्पद्यत इति प्रपन्नाः, अतोऽधिकस्य लवस्याप्यनुत्पादात् कुतो नतिविशेषदर्शनप्रसङ्गः स्यात् ?

तदयमवयवेभ्यः स्यादभिन्नः । अत एव एकत्वा-ऽनेकत्व-कम्पा-ऽकम्पाद्युपपद्यते । तत् स्यादवयवाभेदी स्कन्धो द्रव्यम् ।

सम्प्रति प्रस्तुतमुपसंहरति–तँत् तस्मादयमवयवी अवयवेभ्यः सकाशात् स्यात् कथञ्चिदभिन्नः, एकान्तभेदे पूर्वोदितदोषप्रसङ्गात् । अत एवेति यत एवावयवेभ्य कथञ्चिदभिन्नोऽवयवी ँअत एवैकत्वा-ऽनेकत्व-कम्पा-ऽकम्पाद्युपपद्यते घटमानकम् । आदिशब्दाद् रक्तत्वारक्तत्वादिग्रहः । एकोऽवयवी, अवयवेभ्यो भेदात् । अत एवाचलश्च । अवयव-
68B चलनेऽप्यचलनात् । तथाऽनेकैः, अवयवेभ्योऽभेदात् । अत एव चलश्च, अवयवचलने चलनात् । एवं रक्तत्वारक्तत्वाद्यपि भावनीयम् ।

ननु कथमेकस्यैवैकानेकत्वाद्युपपद्यते विरोधादिति । उच्यते–किमिदमेकत्वमने-कत्वस्य विरुद्धमिति पृष्टो व्याचष्टां भवान्–ँकिमेकान्तेन उत कथञ्चित् ? तत्र न पूर्वम्, अनभ्युपगमात् । द्वितीयं पुनरनेकत्वनान्तरीयकमेव । अन्यथा कथञ्चित्त्वमेव न स्यात् । विरोधात् कथञ्चित्त्वमेवासिद्धमिति चेत् । न । विरोधो हि द्विष्ठः, तत्र कथञ्चिदेकत्वस्य किमेकान्तानेकत्वेनेति कथञ्चिदनेकत्वेनेति पूर्वकमेवावर्त्तते । अथा-नुपलम्भात् कथञ्चिदेकत्वाघटनमुच्यते तदप्यसङ्गतम्, कथञ्चिदेकत्वस्यैवोपलम्भात् । तथाहि–घटपटवत् सर्वदाऽवयवावयविनोः पार्थक्येनाऽनुपलम्भादभेदोपलम्भः । अयमस्य पटस्याञ्चल इति प्रत्ययाद् भेदोपलम्भश्चेति । अस्तु तर्हि तस्यैव युगपत् तँदेशत्व-मतँदेशत्वं च विरोधः । न । विरोधलक्षणाभावात् । न हि तद्देशसंसर्गविधौ नियमेन

---

१ यदा त्वणव एव तथा परिणमन्ते तदा न दोषः ॥ २ तदयमवयवेभ्यः स्यादभिन्नः ॥ ३ अत एवैकत्वा-ऽनेकत्व-कम्पा-ऽकम्पाद्युपपद्यते ॥ ४ अवयवी ॥ ५ किमेकान्तेनेति । किमेकान्तैकत्वमेकान्तानेकत्वेन सह आहोस्वित् कथञ्चिदेकत्वं कथञ्चिदनेकत्वेन सह विरुद्धमिति विकल्पद्वयम् ॥ ६ तत्रैव देशेऽस्तित्वं तत्रैव नास्तित्वमेवंलक्षणमित्यर्थः ॥ ७ प्रसः [=प्रथमसमासः=बहुव्रीहिरित्यर्थः] ॥ ८ सोऽदेशो यस्य ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

देशान्तरसंसर्गनिषेधः । तद्देशत्व-तददेशत्वयोस्तु स्याद्विरोधः । तच्च नेष्यते, देशान्तरविधानेन तद्देशत्वस्यानिषेधात् । एवं कम्पा-ऽकम्प-रक्ता-ऽरक्ता-ऽऽवृता-ऽनावृत-गृहीता-ऽगृहीतत्वादीनामपि विरोधः परिहरणीयः ।

एतेन यदुक्तम्—

"नापि स्थूल एको विषयस्तथावभासी, पाण्यादिकम्पे सर्वस्य कम्पप्राप्तेः । अकम्पने च चलाचलयोः पृथक् सिद्धिप्रसङ्गाद्वस्त्रोदकवत् । एकस्यावरणे सर्वस्यावरणप्रसङ्गः, अभेदात् । न वा कस्यचिदावरणमित्यविकलं दृश्येत ।" तथा "रक्ते चैकस्मिन् रागः, अरक्तस्य वा गतिः । अवयवरागे वाऽवयविरूपमरक्तमिति रक्तारक्तं दृश्येत । तस्मान्नैकः कश्चिदर्थोऽस्ति यो विज्ञानं सरूपयति" [प्रमाणविनिश्चयः पृ० २६२ A] इति,

तत् प्रत्युक्तम्, सर्वस्यापि कम्पा-ऽकम्पादेरविरोधेनावयवाभेदादनेकत्वेन च घटनात् ।

सम्प्रत्यवयवेभ्योऽवयविन एकान्तभेदनिराकारकमनुमानमुच्यते—अवयवी नावयवेभ्य
69 A एकान्तभिन्नः, कार्यद्रव्यत्वे सति तत्संयोगाविषयत्वात् । यः पुनर्यस्मादेकान्तभिन्नः स तेन सह कार्यद्रव्यत्वे सति संयोगाविषयोऽपि न भवति, यथा घटात् पटः । एकान्तभेदः कार्यद्रव्यत्वे सति तत्संयोगविषयत्वेन व्याप्तः, तद्विरुद्धश्चायं कार्यद्रव्यत्वे सति तत्संयोगाविषयत्वलक्षणो हेतुरिति व्यापकविरुद्धोपलब्धिः । तदवयवावयविनोः कथञ्चिदभेद एव सम्बन्ध इति स्थितम् ।

69 B सम्प्रति प्रस्तुतमुपसंहरति—तत् तस्मादवयवाभेदी अवयवेभ्यः कथञ्चिदभिन्नः स्कन्धो द्रव्यं परपरिकल्पितं द्रव्यमुच्यते, नान्यत् किञ्चित् ।

१ यत्रैवं प्रयोगः क्रियते—अत्र देशेऽस्ति, तत्र देशान्तरनिषेधो न हि । यत्र तु 'अत्रैवास्ति' इत्यवधारणसहितः तत्र देशान्तरनिषेधः स्यादिति भावः ॥ २ किमेकान्तकम्प एकान्ताकम्पेन आहोस्वित् कथञ्चित् कम्पः कथञ्चिदकम्पेन सह विरुध्यत इति विकल्प्य पूर्वप्रकारेण परिहारः ॥ ३ बृहद्धर्मोत्तरेण ॥ ४ अवयविनः ॥ ५ पाणेः ॥ ६ अवयविनः ॥ ७ अवयवे ॥ ८ सर्वस्यावयविन इति द्रष्टव्यम् ॥ ९ अथ न रागस्तर्हि अरक्तस्य वा गतिर्नैव स्यात् ॥ १० ज्ञानम् ॥ ११ किंचान्यद् दूषणम् ॥ १२ अवयविनः ॥ १३ तैरवयवैः सह संयो° ॥ १४ 'संयोगाविषयत्वात्' इत्येवोच्यमाने परस्य सत्तया व्यभिचारः स्यात् यतः सत्तायाः समवाय एवेष्यते परैरिति 'कार्यद्रव्यत्वे' इति विशेषणम् । कार्यत्वे सतीति क्रियमाणे गुणैर्व्यभिचारः स्यादिति द्रव्यपदम् । इति परस्य व्यभिचारनिरासार्थं विशेषणानि । द्रव्यत्वे सतीति क्रियमाणे आकाशादिभिर्व्यभिचारः स्यात् ॥ १५ प्रतिषेध्यस्य एकान्तभेदस्य व्यापकं 'कार्यद्रव्यत्वे सति संयोगविषयत्वम्', तस्य विरुद्धं कार्यद्रव्यत्वे सति संयोगाविषयत्वम्, तस्योपलब्धिः ॥ १६ तत् स्यादवयवाभेदी स्कन्धो द्रव्यम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मनस्तमःशब्दोद्द्योतादयस्तद्भेदाः । भावमनोहेतुः करणविशेषात्तः स्कन्धो मनः अचेतनासर्वगतापरमाणुद्रव्यत्वात् पौद्गलिकम्, अन्यथा स्पर्शवत्त्वाभावेन तदभावः । मूर्तकरणत्वाच्च चक्षुरादिवत् । अतश्च स्पर्शवत् । न च शरीरान्यत्वे सर्वविषयज्ञानहेतुरित्येवास्पर्शवत्। परमाण्वन्यत्वे सति अपौद्गलिकत्वादात्मा अस्पर्शवान् । विभुत्वं च स्यात्, अचेतनास्पर्शद्रव्यत्वात्, निष्क्रियत्वं च । तद् मनः पौद्गलिकम् ।

तदेवमणूनां स्कन्धस्य च स्वरूपमभिधाय स्कन्धभेदानभिदधाति–मन इति । आदिशब्देन छाया-कर्म-प्राणापानादिग्रहः । तस्य पुद्गलभेदस्य स्कन्धस्य भेदाः[3] प्रकाराः ।

तत्र मनःस्वरूपमुच्यते–भावमनोहेतुर्यः स्कन्ध इति सम्बन्धः । भावमनो जीवस्य परिणामविशेषः[4], तस्य हेतुः[5] यतः पुद्गलस्कन्धाज्जीवस्य भावमनो भवतीत्यर्थः करण-विशेषो[6] मनःपर्याप्तिनामा जीवस्य शक्तिविशेषः, तेनाऽऽत्त आत्मना[7] गृहीतः स्कन्धोऽनन्तानन्तमनोयोग्यवर्गणापरिणामरूपो[8] मन इत्युच्यते । स्कन्ध इत्येकवचनं जात्यपेक्षम्, न ह्येको द्वौ त्रयो वा पुद्गलस्कन्धा मनीभवन्ति, किं तर्हि ? बहवः ।

सम्प्रति मनसः पौद्गलिकत्वं साधयति–अचेतनेति । पुद्गलाः प्रयोजनमुत्पादका अस्य "प्रयोजनम्" [सि० ६।३।११७] इतीकणि पौद्गलिकम्, पुद्गला अवयवभूता अस्य सन्ति "अतोऽनेकस्वरात्" [सि० ७।२।६] इतीके "प्रज्ञादिभ्योऽण्" [सि० ७।२।१६५] इति स्वार्थिकेऽणि वा पौद्गलिकं मन इति प्रकृतम् । तत्र 'अचेतन'पदोपादानाज्जीवेन न व्यभिचारः असर्वगतोपादानान्नाकाशादिना, 'अपरमाणु'-पदोपादान्न परमाणुना, द्रव्योपादानान्न गुण-कर्म-सामान्य-विशेषादिभिः । मनः पौद्गलिकम्, अचेतनासर्वगतापरमाणुद्रव्यत्वात् घटादिवदिति ।

१ * मूर्तकरणत्वाद्वा चक्षुरादिवत् । मूर्तत्वेन स्पर्शवत्त्वाच्च । न च सर्वविषयज्ञानहेतुरित्येव अस्पर्शवत् । द्रव्यत्वे सति सकृत् सर्वमूर्ताभिसम्बन्धार्हत्वादात्माऽस्पर्शवान्, नैव मनः । विभुत्वं च स्यात्' इति मूलादर्शे सूत्रपाठः ॥ * ॥ २ **मनस्तमःशब्दोद्द्योतादयस्तद्भेदाः** ॥ ३ पुद्गलो हि पूर्वं द्विभेद उक्तः 'अणवः स्कन्धाश्च' [पृ० १८ पं० ७] इति, तत्र स्कन्धलक्षणस्य भेदस्य भेदा एते ॥ ४ **भावमनोहेतुः करणविशेषात्तः स्कन्धो मनः** ॥ ५ क्षयोपशमो ज्ञानं वा ॥ ६ करणभूतेन ॥ ७ कर्त्रा ॥ ८ **अचेतनासर्वगतापरमाणुद्रव्यत्वात् पौद्गलिकम्** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विपक्षे बाधकमाह— अन्यथा यदि पौद्गलिकत्वं नेष्यते तदा स्पर्शवत्त्वाभावेन तदभावस्तस्याचेतनासर्वगतापरमाणुद्रव्यत्वस्याभावः स्यात् । तदियं व्यापकानुपलब्धिः । अचेतनासर्वगतापरमाणुद्रव्यत्वं स्पर्शवत्त्वेन व्याप्तं घटादावुपलब्धम्, तस्य च व्यापकं पौद्गलिकत्वम्, ततो यदि मनः पौद्गलिकं न स्यात्तदा स्वव्यापकनिवृत्त्या स्पर्शवत्त्वं निवर्तेत । तथा चाचेतनासर्वगतापरमाणुद्रव्यत्वमपि । 5

71 A न केवलमचेतनासर्वगतापरमाणुद्रव्यत्वात्, तथा [3]मूर्त्तकरणत्वाच्च पौद्गलिकं मनः, चक्षुरादिवदिति साधर्म्यम् । आदिशब्देन शेषेन्द्रियग्रहः । मूर्त्तग्रहणं भावमन-इन्द्रियाऽऽकाशादिभिः करणग्रहणं च परमाणुभिर्व्यभिचारनिरासार्थम् । पौद्गलिकं मनः, जीवस्यार्थपरिच्छेदकर्मणि मूर्त्तरूपकरणत्वात्, द्रव्यरूपचक्षुरादीन्द्रियवत् ।

न चक्षुरादीनां मूर्त्तकरणत्वेन पौद्गलिकत्वम्, किं तर्हि ? प्रतिनियतभूतगुणव्यञ्जकत्वेन । यत्पृथिव्यादिभूतगुणव्यञ्जकं यदिन्द्रियं तत् तस्य पृथिव्यादिभूतस्य कार्यम्, तथा च तद्रूपमिति चेत् । न । स्वविषयसन्निकर्षैः स्वगुणैश्च व्यभिचारात् । यथा हि घ्राणं पृथिवीगन्धस्याभिव्यञ्जकमेवं घ्राणार्थसन्निकर्षो घ्राणस्थो गन्धश्च । यथा वा चक्षुः स्वविषयरूपाभिव्यञ्जकमेवं चक्षुर्विषयेण सन्निकर्षश्चक्षूरूपं च । तथा च 71 B गुण-सन्निकर्षयोर्भूतगुणव्यञ्जकत्वात् पार्थिवादित्वप्रसङ्गः, एवं स्पर्शन-रसनयोरपि, कर्ण-शष्कुल्यवष्टब्धाकाशरूपश्रोत्रेन्द्रियेण व्यभिचाराच्च । कार्यद्रव्यत्वे सतीति विशेषणादेदोष इति चेत्, क एवं सति वक्रोक्तिमृतेऽस्मत्पक्षाद् भेदः? य एवार्थो मूर्त्तकरणत्वादित्यस्य स एवार्थः कार्यद्रव्यत्वे सति प्रतिनियतभूतगुणव्यञ्जकत्वादित्यस्यापि । अभिव्यञ्जकं हि करणमेवेति यत् किञ्चिदेतत् ।

72 A अथ मनसः स्पर्शवत्त्वमाह—अतश्च स्पर्शवत् । अतश्च प्रमाणसिद्धात् पौद्गलिकत्वाद् मनः स्पर्शवदेवाभ्युपगन्तव्यम् । ततो यदुक्तम्—

"न च मनसः स्पर्शवत्त्वे प्रमाणमस्ति, मनस्त्वजातीयस्य स्पर्शवत्कार्यस्यानुपलब्धेः" [प्रशस्तपादभाष्यटीका व्योमवती पृ० ४२७] इति,

तत् प्रत्युक्तम् । न च मनस्त्वजातीयस्य स्पर्शवत्कार्यस्यानुपलम्भोऽस्ति । यस्मादनित्यत्वाद् मनःस्कन्धस्यौदारिकादिस्कन्धपरिणामाभ्युपगमेन स्पर्शवत्कार्यसम्भवात् । 25

१ अन्यथा स्पर्शवत्त्वाभावेन तदभावः ॥ २ प्रतिषेध्यम् अचेतनासर्वगतापरमाणुद्रव्यत्वम्, तस्य व्यापकं स्पर्शवत्त्वम्, तस्यानुपलब्धिः ॥ ३ मूर्तकरणत्वाच्च चक्षुरादिवत् ॥ ४ भावेन्द्रियम् ॥ ५ श्रोत्रमाकाशम् ॥ ६ परः ॥ ७ यच्च तत् पृथिव्यादिभूतं च, तस्य गुणः, तस्य व्यञ्जकत्वम् ॥ ८ 'इन्द्रियं चार्थेन' इति सन्निकर्षः ॥ ९ एतेषामपि पौद्गलिकत्वं स्यात् ॥ १० ओस् [=षष्ठीद्विवचनम्=चक्षुर्विषययोः सन्निकर्ष इत्यर्थः] ॥ ११ तत्र गुणसन्निकर्षाभ्यां व्यभिचारः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न चैवं स्पर्शवत्त्वे सति शरीरान्तराशु सञ्चरतो मनसो वायोरिव प्रतिस्खलने क्वचिदिन्द्रियान्तरेणासम्बन्धाच्चिरं रूपादिविषयस्यापरिच्छेदप्रसङ्गः, मनसः शरीरव्यापित्वेन सञ्चारस्यैवाभावात् । न च व्यापकत्वेन मनसो युगपत् सर्वेन्द्रियसम्बन्धात् युगपत् सर्वेन्द्रियज्ञानोत्पत्तिप्रसङ्गः, सर्वेन्द्रियावरणक्षयोपशमस्य भिन्ननिमित्तापेक्षत्वेन युगपदसम्भवात् । तेन यदुक्तम्–"तथा स्पर्शवत्त्वे सति मनसः शरीरे सञ्चरतो वायोरिव प्रतिस्खलने क्वचिदिन्द्रियान्तरेणाऽसम्बन्धादनेककालं रूपादेर्विषयस्याग्रहणमपि स्यात् । न चैतत् सुषुप्तावस्थामन्तरेण दृष्टम्" [प्रशस्तपादभाष्यटीका व्योमवती पृ० ४२७] 5

72B इति, तदपि निरस्तम् । तस्मात् पौद्गलिकत्वाद् मनः स्पर्शवत् सिद्धम् ।

स्यादेवम्– 'मनोऽस्पर्शवत्, [1]शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वात्, आत्मवत्' इति प्रमाणबाधितं मनसः स्पर्शवत्त्वं कथं पौद्गलिकत्वमुपकल्पयेदित्याह– [2]नं च शरीरान्यत्वे सर्वविषयज्ञानहेतुरित्येवास्पर्शवत् । न चेति । शरीरान्यत्वे सर्वविषयज्ञानहेतुरित्येवं(व) मनो न चास्पर्शवदिति सम्बन्धः । कुतः ? परमाण्वन्यत्वे सति अपौद्गलिकत्वादात्माऽस्पर्शवान् । परमाण्वनिष्पाद्यत्वादात्माऽस्पर्शवान् स्पर्शरहितः सिद्धः । परमाणुभिर्व्यभिचारपरिहारार्थं परमाण्वन्यत्वे सतीति विशेषणम् ।

शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वादिति हेतुरप्रयोजकः । आत्मा हि परमाण्वन्यत्वे सत्यपौद्गलिकत्वात् स्पर्शरहितः, न पुनः शरीरान्यत्वे सर्वविषयज्ञानोत्पादकत्वात् । अस्य च साध्यव्यापकत्वं यथा–यो योऽस्पर्शः स स परमाण्वन्यत्वे सत्यपौद्गलिकः, यथाऽऽकाशादीनि । यः पुनः शरीरान्यत्वे सर्वविषयज्ञानोत्पादकः न स परमाण्वन्यत्वे सत्य पौद्गलिकः, यथा ज्ञानसामग्रीपतितोऽर्थ इत्युपाधिलक्षणयोगादुपाधि- 15
73B त्वम् । [3]निश्चितानैकान्तिको वा ज्ञानसामग्रीपतितेन सर्वविषयज्ञानोत्पादकेनार्थेनैवेति । अत आत्मदृष्टान्तेन शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वाद्धेतोर्नास्पर्शवत्त्वं मनसः सिध्यति । आत्मनि प्रकारान्तरेण तस्य सिद्धत्वात् तत् पौद्गलिकत्वाद् मनसः स्पर्शवत्त्वं सिद्धम् ।

१ उत्तरम् ॥ २ स एव वक्ति ॥ ३ * अस्पर्शवत्त्वाद् द्रव्यानारम्भकत्वम् । अस्पर्शवत्त्वं मनसः शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वादात्मवत् सिद्धम् । अस्माच्चात्मवदेव सजातीयद्रव्यानारम्भकत्वम्" इति **प्रशस्तपादभाष्यटीकायां न्यायकन्दल्याम्** पृ० २२५ ॥ ४ * अत्र पाठस्य घृष्टत्वात् सम्यक् पठितुं न शक्यते, अतो °**दित्याह** इति पाठोऽप्यत्र सम्भवेत् ॥ ५ सूत्रम् ॥ ६ सूत्रम् ॥ ७ शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वादिति । कोऽर्थः ? स्पर्शवत्यपि दर्शनात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यदप्युक्तम्—

"न च मूर्त्तत्वेन स्पर्शोऽनुमातव्यः, तद्विरहेण चाऽमूर्त्तत्वम्, मूर्त्तत्वस्य स्पर्शविरहे विरोधाभावात्। अवैभवनिमित्तं हि मूर्त्तत्वम्" [प्रशस्त० किरणावली पृ० १०३] इति,

74 A तदपि नातिनिपुणम्, अस्पर्शवतोऽचेतनद्रव्यस्याऽवैभवस्यैव पापीयस्त्वात्, अविभोरचेतनद्रव्यस्य स्पर्शवत्त्वेन व्याप्तत्वात्, व्यापकाभावे व्याप्यसद्भाव एव च विरोध इति। 5

एतदेवाह—विभुत्वं चेति। यदि स्पर्शभावो मनसः स्यात्तदा विभुत्वं च स्यात्, अचेतनास्पर्शद्रव्यत्वात्, अचेतनस्याऽस्पर्शस्य च सतो द्रव्यत्वात्। अचेतनपदेनात्मना अस्पर्श-
74 B पदेन परमाण्वादिभिर्व्यभिचारनिरासः। यदचेतनमस्पर्शवच्च द्रव्यं तदस्माकं भवतां च मते विभ्वेव, यथा धर्माऽधर्मा-ऽऽकाशानि। प्रसङ्गश्चायं विपर्ययनिष्ठस्ततो न [*]हेत्वसिद्धिः, विपर्ययहेतोर्व्यापकाभावस्य सिद्धत्वात्। 10

अयमत्र निष्यन्दः— प्रसिद्धव्याप्यव्यापकभावयोर्मध्यादेकं व्याप्यं वादिनमभ्युपगमय्य व्यापकाभ्युपगमः प्रसज्यते। यदि स्पर्शरहितं मनः प्रपद्येथास्तदाऽचेतना-
75 A स्पर्शद्रव्यस्यावश्यं वैभवदर्शनाद् वैभवमप्यस्य मन्येथाः। भवति हि व्याप्यस्य शिंशपात्वस्य सम्भवेऽवश्यं व्यापकस्य वृक्षत्वस्य सम्भवः। ततः प्रसङ्गविपर्ययः क्रियते। यदि मनसो वैभवं न स्यात् तदाऽचेतनास्पर्शद्रव्यत्वमपि न स्यात्, भवति हि व्यापकस्य वृक्षत्वस्याभावेऽवश्यं व्याप्यस्य शिंशपात्वस्याभावः। व्यापकवैभवाभावश्चोभयवादिसम्प्रतिपन्नः। 15

कः पुनर्विभुत्वे दोषः? ज्ञानयौगपद्यम्। मनसो विभवे हि एकेन्द्रियग्राह्या इव नानेन्द्रियग्राह्या अपि रूपादयः सकृदेव ज्ञायेरन्, कारणयौगपद्यात्। तज्ज्ञानायौगपद्यमिच्छता मनसो वैभवं नैष्टव्यम्। अस्पर्शवत्त्वे च तदुपतिष्ठते। तदेनेकदोषोपस्थापकमस्पर्शत्वमेव मनसो नैष्टव्यमिति। 20

न केवलं विभुत्वम्, तथा निष्क्रियत्वं च मनसः स्यात् अचेतनास्पर्शद्रव्यत्वादाकाशवत्। प्रसङ्गविपर्ययभावनाऽत्रापि पूर्ववदेव। सम्प्रत्युपसंहरति—तत् तस्मादचेतनासर्वगतापरमाणुद्रव्यत्वाद् मूर्त्तकरणत्वाद् मूर्त्तत्वेन स्पर्शवत्त्वाच्च मनः पौद्गलिकमिति स्थितम्।

१ * "नाऽमूर्तत्वम्, मूर्तस्य स्पर्शविरहे विरोधाभावात्, विभवस्य च परममहत्त्वेन सह विरोधादित्याह— 25
क्रियावत्त्वान्मूर्तं मन इति।" इति मुद्रितायां **किरणावल्यां** पाठभेदः॥ २ **विभुत्वं च स्यात्**॥ ३ सूत्रम्॥ ४ अचेतनास्पर्शद्रव्यत्व॥ ५ सूत्रम्॥ ६ **तन्मनः पौद्गलिकम्**॥ ७ * द्रश्यतां पृ० ४५ टि० १॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु मनःस्कन्धस्य परमाणुभ्य उत्पादो न घटते, आरम्भकभावाघटनात् ।
75 B न खलु विजातीयमारम्भकम्, "विजातीयानामनारम्भकत्वम्" [प्रशस्त० किरणावली पृ० ४१] इति वचनात् । सजातीयं च मनसो मन एव स्यात् । किन्त्वेवं मनःप्रादुर्भावे कारणभूतानेकमनःप्रसङ्गः, "द्रव्याणि द्रव्यान्तरमारभन्ते" [वैशेषिकसूत्रे १।१।८] इति वचनात् । न चैकशरीरेऽनेकमनःसद्भावोऽस्ति, प्रतिशरीरमेकत्वेन तस्य व्यवस्थानात्, अन्यथा युगपदेव ज्ञानोत्पत्तिः स्यादिति । 5

तन्न, अवान्तरजातिभेदेऽपि सामान्यपुद्गलत्वैकजात्यपेक्षया सजातीयानां परमाणूनामारम्भकत्वघटनात् । अवान्तरजातिभेदापेक्षयापि विजातीयत्वाभ्युपगमे तन्तुपटयोरप्यारम्भ्यारम्भकभावाभावप्रसङ्गात्, परस्परासम्भव्यवान्तरजात्याधारतया तयोरपि
76A विजातीयत्वात् । ततो यथा पार्थिवत्वसामान्यापेक्षया सजातीयत्वेन तन्तवः पटारम्भका भवन्ति तथा पुद्गलत्वसामान्यापेक्षया सजातीयत्वेन परमाणवो मनस इति न दोषः । अथवा मनोवर्गणारूपाः पुद्गला ये मनस्त्वेन परिणमन्ते ते मृत्पिण्ड इव घटस्य मनसः सजातीयाः सन्त्येव, किं कुटिलभणितिभिः ? मनसः प्रतिशरीरमेकत्वं पुनरदृष्टनिबन्धनम्, विचित्रा हि कारणशक्तयः, अन्यथेन्द्रियाणामपि पञ्चत्वव्याघातप्रसङ्ग इति । 10 15

ननु मन एवासिद्धमतः कस्य पौद्गलिकत्वं स्यात् ? इत्येवं वादिनं प्रति मनःसाधकमनुमानमुच्यते—

विकल्प उपादान-प्रत्ययापेक्षः, प्रतिनियतविषयज्ञानत्वात्, चाक्षुषादिवत्, प्रत्ययश्च मनः । अन्यथाऽतिप्रसङ्ग इति ।

विकल्प इति विकल्पज्ञानं धर्मि, उपादान-प्रत्ययापेक्षः, उपादानं परिणामि- 20
76 B कारणम्, प्रत्ययाः सहकारिणः, तदपेक्षस्तज्जन्य इति साध्यम् । प्रतिनियतविषयज्ञानत्वादिति हेतुः । चाक्षुषादिवदिति निदर्शनम् । आदिशब्दाद् रासनादिग्रहः । यथा चक्षुरादि-

१ कारणभावा ॥ २ "तस्मात् सजातीयानामेवारम्भकत्वं न विजातीयानामिति स्थितम्" इति प्रशस्तपादभाष्यस्य उदयनाचार्यविरचितायां किरणावल्यां टीकायाम् पृ० ४१ ॥ ३ मनसस्तावत् पुद्गला एवारम्भकाः । ते सजातीयस्य सत आरम्भकत्वाद्धेतोः प्रत्येकं मनोरूपा एष्टव्याः, अतोऽनेकत्वप्रसङ्गः ॥ 25 ४ अनेकद्रव्यं द्रव्यमिति ॥ ५ मनसः ॥ ६ मनसोऽनेकत्वात् ॥ ७ * °यापेक्षः, ज्ञानत्वात्, इति मूलादर्शे पाठः ॥ ८ विकल्प उपादान-प्रत्ययापेक्षः ॥ ९ प्रतिनियतविषयज्ञानत्वाच्चाक्षुषादिवत् ॥ १० प्रतिनियतो विषयो ग्राह्यो यस्य । एतावता सर्वविषयग्राहकस्य केवलज्ञानस्य निरासः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञानमालयज्ञानलक्षणमुपादानं प्रत्ययांश्च चक्षुरादीनपेक्षते तथा विकल्पोऽपि । प्रेत्ययश्चेति यः प्रत्ययो विकल्पेनापेक्ष्यते स चास्मन्मते मन इत्यभिधीयते ।

ननु प्रत्ययो मन एव भवतीति कथम्, अदृष्टादेरपि सम्भवादित्यत आह—

77A [1]अन्यथेति, यदि प्रत्ययो मनो नेष्यते, किं तर्हि ? [2]अन्यशङ्कयाऽऽत्मा प्रलोभ्यते, तदाऽतिप्रसङ्गः स्यात्, अन्यत्राप्यनुमानेऽन्यशङ्कया प्रस्तुतविघातस्य कर्तुं शक्यत्वात् । 5

इदमुक्तं भवति—सत्स्वपि रूपा-ऽऽलोक-मनस्कारेषु निमीलितलोचनाद्यवस्थासु विज्ञानस्याभावात् पुनश्चोन्मीलितलोचनाद्यवस्थासु भावाद् विज्ञानकार्ये कारणान्तरसापेक्षमित्येवं भवद्भिरपीन्द्रियाणामतीन्द्रियाणामनुमानमन्वज्ञायि, यद् [3]वृत्तिः—

"इन्द्रियादीनां तु विज्ञानकार्यस्य कादाचित्कत्वात् सापेक्षत्वसिद्धया प्रसिद्धिरुच्यते 'किंमप्यस्य कारणमस्ति' इति" [ ] । 10

ततश्चेन्द्रियानुमानेऽपि शक्यं वक्तुं यत् तत् कारणान्तरं तददृष्टादि भविष्यति । ततश्चे-

77B न्द्रियसत्ताऽपि सन्दिग्धा स्यात् प्रत्यक्षानुमानयोरघटनादित्येवमतिप्रसङ्गः ।

स्यान्मतम्—इन्द्रियानुमाने कारणान्तरमदृष्टमयुक्तम्, तस्य सदा सन्निहितत्वेन निमीलितलोचनाद्यवस्थास्वपि ज्ञानोत्पादप्रसङ्गादिति । तदेतन्मनोऽनुमानेऽपि समम् । शक्यं ह्यत्रापि वक्तुम्—नादृष्टं विकल्पस्य प्रत्ययः, सदा सन्निहितत्वेन सुप्त-मूर्च्छितावस्थायामपि तदुत्पादप्रसङ्गात् । इतिर्मनोऽवसरविसर्जनं व्याहरति । उक्तं मनःस्वरूपम् । 15

यथानिर्देशं तमःस्वरूपमुच्यते—

तेजसैवाऽपवर्त्यः स्कन्धस्तमः । पौद्गलिकत्वं तु विधि-स्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वात् । स्पर्शवत्त्वेऽपि [4]परिणामविशेषात् प्रदीपप्रभावदप्रतिघातः । रजोवत् स्पर्शानुपलम्भोऽपि । खण्डादर्शनं च । न 20
च भाऽभावः, अल्प-कृष्ण-महत्त्वप्रतिभासायोगाद् विधिग्रहाच्च । अत एव नालोकादर्शनम् । न चानाश्रयो गुणः । नाप्यारोपप्रत्ययोऽस्खलितः सर्वभावो वा । तत् पौद्गलिकं तम इति ।

१ प्रत्ययश्च मनः ॥ २ अन्यथातिप्रसङ्ग इति ॥ ३ अदृष्टादिशङ्कया ॥ ४ धर्मोत्तरवार्तिकम् ॥ ५ विज्ञानस्य कार्यस्य ॥ ६ शक्तिः ॥ ७ केनोल्लेखेन ॥ ८ ज्ञानस्य ॥ ९ प्रस्तुतविघातस्य कर्तुं शक्यत्वादित्येवंरूपः ॥ १० * 'परिणामभेदात्' इति मूलादर्शे पाठः ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तेजसेति । तेजसैव सूर्या-चन्द्रमः-प्रदीप-रत्नाद्यालोकेनाऽपवर्त्यः स्वरूपात् प्रच्याव्यः
A परिणामान्तरमापाद्यः स्कन्धो यः स तम इत्युच्यते । तत्र तेजसापवर्त्य इत्येतावदुक्ते चन्द्रज्योत्स्ना-जलादिभिर्व्यभिचारः स्यादित्यवधारणम्, तेषामन्येनाप्यपवर्त्यत्वात् ।

[a]पौद्गलिकत्वं त्विति तमसः पौद्गलिकत्वं पुनर्विधि-स्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वात् । अभावानुल्लेखो विधिः । अपरायत्तत्वं स्वातन्त्र्यम् । विधिपदेनाभावस्य स्वातन्त्र्यपदेन गुणादीनां चक्षुःपदेन चाऽऽत्मादेर्निरासः ।

अयं च प्रमाणार्थः — तमः पौद्गलिकम्, विधि-स्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वात्, पटादिवदिति । विधि-स्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वं रूपवत्त्वेन व्याप्तम् । रूपवत्त्वञ्चावश्यं पौद्गलिकमेव । न चाश्रयासिद्धिः, 'तमः'शब्दवाच्यस्य कस्यचिद्धर्मिण उभयसिद्धत्वात् । न च हेतुरसिद्धविशेषणोऽसिद्धभेदः, अन्धकारोऽयमिति प्रत्यये घटाभावोऽयमिति प्रत्ययवदभावोल्लेखस्यानुभवात् । न हि निशि मषीनिचयाकारमन्धकारमवधारयन्मुग्धधीरभावाभासमात्मनो ज्ञानमनुभवति ।

ननु 'आलोकाभावोऽयम्' इति प्रत्ययस्तमोविषय इत्युभयसिद्धम्, न चात्राभावोल्लेखानुभवोऽस्ति, तत् कथं नासिद्धविशेषणो हेतुरिति ? तन्किमेतावता तमस एकान्तेनाऽभावरूपत्वं सिद्ध्येत् ? एवं ह्यस्यालोकाभाववत्त्वं स्यान्नालोकाभावरूपत्वम् । न हि घटः 'पटाभावोऽयम्' इति प्रत्ययविषयत्वेन पटाभावरूपो भवति, किन्तु पटाभाववानेव । कथं तर्हि आलोकाभावोऽयमन्धकार इति प्रतीतिः समानाधिकरणा ? आलोकाभावा-ऽन्धकारयोः कथञ्चित्तादात्म्यादिति ब्रूमः, भावांशा-ऽभावांशयोः सर्वत्र कथञ्चिद्भेदात् । अत एव पटाभाववानयं पटाभावरूपो वेति द्वयमपि भेदा-ऽभेदार्पणया घटे न विरुध्यते ।

अयमर्थः— तमो द्रव्यं भावा-ऽभावांशरूपम् । तत्र य एष इदं तम इति प्रत्ययो भावरूपावभासी स भावांशविषयः, अभावांशरूपानुल्लेखात् । य एष पुनरालोकाभावोऽयमिति प्रत्ययोऽभावरूपावभासी सोऽभावांशविषयः, भावांशरूपानुल्लेखात् । तत आलोकाभावप्रत्ययस्य तमोविषयत्वेऽपि विधिरूपप्रत्ययविषयत्वं तमसो न विरुध्यत इति ।

एतेन यदाह—

श्रीकैलाससागरसूरि ज्ञानमन्दिर
श्रीमहावीर जैन आराधना केन्द्र
कोबा (गांधीनगर) पि ३८२००७

१ तेजसैवापवर्त्यः स्कन्धस्तमः ॥ २ चन्द्रज्योत्स्ना हि सूर्यतेजसाऽपवर्त्यते घनादिभिश्च । एवं जलाद्यपि ॥ 2
३ पौद्गलिकत्वं तु विधिस्वातन्त्र्याभ्यां चक्षुर्ग्राह्यत्वात् ॥ ४ आकाशादीनाम् ॥ ५ किं तर्हि ? अभावोल्लेखानुभवोऽस्त्येव ॥ ६ आचार्यः ॥ ७ उदयनः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"विधिमुखस्तु प्रत्ययोऽसिद्धः। ने हि नञोऽप्रयोग इत्येव विधिः, प्रलय-विनाश-ऽवसानादिषु व्यभिचारात्। नञर्थान्तर्भावेन वाक्यार्थे पदप्रयोग इति तु समं समाधानमन्यत्राभिनिवेशात्" [प्रशस्त० किरणावली पृ० १३] इति,

तदपाक्रियत, प्रलयादिप्रत्ययानां नञोऽप्रयोगेऽपि निषेधरूपत्वस्य युक्तत्वात्, क्षय-प्रलय-विनाश-ऽवसानध्वनीनामेञ्जसा नञ इवाभाववाचित्वात्। नैवं तमोन्धकारादीन् शब्दानभाव- 5
वचनान् शाब्दिकाः सङ्गिरन्ते। ततो नञ्प्रयोगाभावाविशेषेऽप्यन्धकारप्रत्ययो विधिरूप एव, प्रलयादिप्रत्ययस्तु निषेधरूपः, इति स्थितं तमसः पौद्गलिकत्वम्।

ननु महतः पुद्गलस्कन्धस्य स्पर्शवत्त्वेन प्रतिघातधर्मकत्वात्तमसि सञ्चरतः पुरुषस्य
80A प्रतिबन्धः स्यात्, न चैवम्, अतो न स्पर्शवत्तमः, तथा चापौद्गलिकमिति। उच्यते—
स्पर्शवत्त्वेऽपीति। प्रदीपप्रभावदिति साधर्म्यम्। अप्रतिघातस्तमसः प्रतिघातकारित्वाभावः। 10
यथा स्पर्शवत्यामपि प्रदीपप्रभापटल्यामटतामसुमतां प्रतिबन्धो न भवति। तथा स्पर्श-वत्यपि तमसि सञ्चरतां तत्परिणामविशेषादप्रतिबन्धः। प्रदीप-नयनादिप्रभाणामनुद्भूत-स्पर्शत्वेन प्रतिघातकत्वाभावोऽस्माकं मतेन सिद्ध इति चेत्, एवं तर्हि तमःस्कन्धेऽपि प्रतिघातकत्वाभावोऽनुद्भूतस्पर्शत्वादेवास्तु।

80B ननु प्रभाजातीये क्वचिदपि स्पर्श उपलब्ध इत्यन्यत्र तस्यानुद्भूतत्वं कल्पयितु- 15
मुचितम्। तमोजातीये तु क्वचिदपि स्पर्शो नोपलब्ध इति तस्य कथमनुद्भूतत्वं कल्प-यितुं शक्यम्? प्रत्युत तस्य नास्तित्वमेव कल्पयितुं युक्तम्।

अत्राह—रेजोवदिति। जालिकारन्ध्रप्रविष्टभास्करप्रभादण्डान्तर्दृश्याः पांशुकणा रजः। तस्येव तमसः सन्नपि स्पर्शः क्वचिदपि न वेद्यते। परिणामविशेषादिति हेतुरत्रापि सम्बध्यते। न केवलमप्रतिघातः, स्पर्शानुपलम्भोऽपीति अपिशब्दार्थः। यथा रजःकणानां 20
क्वचिदपि स्पर्शो नोपलभ्यतेऽथ च नास्तीति न कल्प्यते तथा यद्यपि तमसः क्वचि-
81A दपि स्पर्शो नोपलभ्यते तथापि नास्तीति न कल्प्यते। ततश्च सतः स्पर्शस्यानुद्भू-तत्वं कल्पयितुं दीपादिप्रभाणामिवोचितमेवेत्यनुद्भूतस्पर्शत्वेनाप्रतिघातः।

१ स एव भावयति ॥ २ प्रलय-विनाशादिषु शब्देषु नञोऽप्रयोगेऽपि न विधिमुखप्रत्ययः, किन्तु निषेध-मुखः ॥ ३ अथैवं भणिष्यन्ति 'सर्ववस्तूनामभावः' इति भणितव्ये प्रलयादीनां प्रयोग इति नञर्थता युक्ता 25
तर्हि 'भाऽभावः' इति वक्तव्ये तम इत्यादीनां प्रयोग इति समता ॥ ४ ज्ञानानाम् ॥ ५ मुख्यवृत्त्या ॥
६ स्पर्शवत्त्वेऽपि परिणामविशेषात् प्रदीपप्रभावदप्रतिघातः ॥ * दृश्यतां पृ० ५५ टि० ४ ॥
७ * अत्र मतेन इति पदं किञ्चिद् घृष्टमिव भाति ॥ ८ काङ्क्षा ॥ ९ अग्निप्रभादौ ॥ १० स्पर्शस्य ॥
११ रजोवत् स्पर्शानुपलम्भोऽपि ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु रजःकणानामनुपलम्भेऽपि स्पर्शस्यासत्त्वं न भवति, तत्कार्याणां स्पर्शवतामुपलम्भेन तेष्वपि स्पर्शसत्तानिश्चयात् । [1]नैवं तमसः स्पर्शवत् कार्यमुपलभ्यते । यो हि सूक्ष्मधीस्तम एव नेच्छेत् स कथं स्पर्शवत् तत्कार्यमिच्छेदिति । तन्न । [2]आलोकपर-
81 B माणूनामेव तमःकार्यरूपत्वात् । क्षपासु कृतक्रीडास्तमःपरमाणव एवोदयावनीधरशिरसो विकसत्कुसुम्भकुसुमशोणरुचिं भजति भानुमति प्रभापरमाणुपरिणामलक्ष्मीं श्रयन्त इति हि नः सिद्धान्तः । आलोकश्च स्पर्शवानिति सर्वसम्मतमेवेति स्पर्शवत्कार्योपलम्भादपि रजसामिव तमसां स्पर्शसत्तानिश्चयोऽस्ति । न च स्पर्शवता स्पर्शवत् कार्यं जन्यत एव,
82 A नायनरश्म्यादिभिर्व्यभिचारात् । तत् साक्षादनुपलब्धोऽपि रजःस्विव तमसि स्पर्शोऽस्ति । स चायं सन्नप्यनुद्भूतत्वेन सूर्या-चन्द्रमः-प्रदीपप्रभाणामिव प्रतिघातहेतुर्न भवति । ततो न प्रतिघाताभावेनास्पर्शवत्त्वं नापि स्पर्शाभावेनापौद्गलिकत्वम् ।

स्यान्मतिः— यदि स्पर्शवत्पुद्गलप्रचयरूपं तमस्तदा महान्धकारे भूगोलकस्येव तदवयवभूतानि खण्डावयविद्रव्याणि किमिति नोपलभ्यन्त इत्यत आह—खण्डादर्शनं चेति ।
82 B 'विशेषातिदिष्टः प्रकृतं न बाधते' इति न्यायात् परिणामविशेषात् प्रदीपप्रभावदित्येतदत्रापि योज्यते । न केवलं परिणामविशेषात् प्रदीपप्रभावदप्रतिघातो रजोवत् स्पर्शानुपलम्भस्तथाखण्डादर्शनं खण्डावयविद्रव्याणामदर्शनं चेति । यथा हि प्रदीपप्रभापरमाणुभिः परिणामविशेषवशादनुद्भूतस्पर्शमनिबि(वि)डावयवमप्रतीयमानखण्डावयविद्रव्यविभागमप्रतिघाति प्रभामण्डलमुपजन्यते तथा परिणामविशेषात् तमःपरमाणुभिरपि ।

तदेवं पौद्गलिकत्वपक्षोदितं दूषणमपाकृत्य ये भाऽभावरूपं तमो व्याचक्षते तन्म-
83 A तमपाकरोति । [3]न च भायाः प्रकाशस्याभावोऽभावरूपं भवति । तम इति प्रकृतम् । अल्प-कृष्ण-महत्त्वप्रतिभासायोगात् । अल्पं तमः कृष्णं तमो महच्च तम इति प्रतिभासः पुरुषाणामस्ति । स एष तमसो भाऽभावरूपत्वे कथं स्यात् । न खल्वभावस्य नीरूपस्याल्पमहत्त्व-कृष्णादयो धर्माः सम्भवन्ति, अभावत्वस्यैवाभावप्रसङ्गात् । न केवलमल्पादिप्रतिभासायोगात्तथा विधिप्रहाच्चेति । विधिना विधिरूपेण भावरूपेणेत्यर्थः । न भाऽभावरूपं
83 B तम इति योगः । 'बहलतमालपल्लवकुवलयदलालिकुलश्यामलं तमः पुरः पश्यामि' इत्येवं विधिना प्रत्ययः प्रादुरस्ति, न पुनः 'भाऽभावं पुरः पश्यामि' इत्येवं निषेधरूपेण, ततः कथं नाम तमो भाऽभावो भवेत् ?

१ रजसि ॥ २ नैवमित्यपि पर एव ब्रूते ॥ ३ सुगतः ॥ ४ तमःपरमाणव एव आलोकपरमाणुतया परिणमन्त इत्यर्थः ॥ ५ नावश्यं कारणानि कार्यवन्ति भवन्ति ॥ ६ न च भाऽभावः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु चक्षुरिन्द्रियं सर्वत्र विषयं परिच्छिन्ददालोकसापेक्षमेवाद्राक्षम्, ततस्तमःपरिच्छेदे कमालोकमपेक्षते इति। तन्न। आलोकसद्भावव्यञ्जनीयेष्वेव विषयेषु चक्षुष आलोकसापेक्षत्वात्। द्विधा हि प्रवृत्तिश्चक्षुरिन्द्रियस्य—आलोकसद्भावापेक्षा आलोकनिरपेक्षा च। घटादिषु मनुष्यादिचक्षुषामालोकसद्भावापेक्षा, तेष्वेव मार्जारादिचक्षुषामालोकनिरपेक्षेति।
84A तत्श्चेदमपि तम आलोकाभावज्ञेयम्, आलोकविपक्षत्वात्, आलोकसद्भावे तमस एवासत्त्वादित्यालोकानपेक्षेणापि चक्षुषा परिच्छिद्यते। अपि चालोकाभावस्तावत् कथमप्यालोकनिरपेक्षेणापि चक्षुषा गृह्यते तथा तमोऽप्यस्तु। न चाभावो न प्रत्यक्षः भवन्मते तस्य प्रत्यक्षत्वाभ्युपगमात्।

यदि तमश्चाक्षुषं कथं तर्हि निमीलितलोचनस्यापि तमोदर्शनमिति? येदि चाक्षुषं तर्हीन्द्रियान्तरैरग्राह्यमस्तु, मनोग्राह्यत्वे तु को दोषः? चाक्षुषा अपि हि घटादयो
84B मनसा विकल्प्यमाना दृश्यन्ते। एतावत्तु स्याद् वक्तव्यम्—विकल्पोत्पादस्य किं निबन्धनमिति। तत्र सत्यतमोनुऽभवाहितः संस्कारो निबन्धनमिति ब्रूमः। तस्मादल्प-कृष्ण-महत्त्व-प्रतिभासाऽयोगाद्विधिग्रहाच्च न भाऽभावरूपं तम इति।

ननु न भाऽभावरूपं तमः, अभावस्यैव कस्यचिदभावात्, किन्त्वालोकादर्शनमेव। यदालोकविषयं ज्ञानं नोत्पद्यते तदेव तम इति व्यवह्रियत इत्यत आह—अत एवेति, अल्प-कृष्ण-महत्त्वप्रतिभासायोगाद्विधिग्रहाच्च नालोकादर्शनं नालोकज्ञानानुत्पत्तिरूपं तमः।
85A तमसो ह्यल्प-कृष्ण-महत्त्वादयो धर्माः प्रतीयन्ते, 'जलमेदुराम्बुधरसोदरं पुरस्तमः पश्यामि' इत्येवं च विधिरूपेण तमोज्ञानम्, तदेतदुभयमप्यालोकज्ञानानुत्पत्तिरूपत्वे तमसः कथं स्यात्? तदालोकादर्शनरूपमपि तमो न भवति।

स्यादेवम्—आलोकेऽपि गर्भगृहप्रदेशादौ बहिर्देशादागतस्य प्रतिपत्तुरसत्यपि तमसि वस्तुज्ञानानुत्पत्तौ तमःप्रतिभासोऽस्ति, ततो ज्ञानानुत्पत्तिमात्रमेव तम इति। तन्न। यतः प्रचुरतरालोकोपहतलोचनः पुमांस्तत्रावस्थितान् अर्थान् यथावदवगन्तुमसमर्थो
85B जलरूपतया मरीचिकाचक्रमिवालोकमेव तमोरूपतया प्रतिपद्यते। न च मिथ्यातमःप्रतिभासेनाऽमिथ्यातमःप्रतिभासस्य साम्यमापादयितुमुचितम्, सत्यजलादिप्रतिभासस्याऽप्यसत्यजलादिप्रतिभासेन साम्यापादनप्रसङ्गात्।

किञ्च, ज्ञानानुत्पत्तिव्यतिरेकेणापरस्य तमसोऽनाश्रयणे विशदज्ञानोत्पत्तिव्यतिरेकेणान्यस्यालोकस्याप्यभ्युपगमो मा भूत्, असत्यपि चालोके बहलान्धकारनिशीथिनीसमये नक्तञ्चराणामञ्जनादिसंस्कृतचक्षुषां च सप्रकाशं सकलवस्तुप्रतिभासदर्शनात्।

१ आचार्यः ॥ २ ऽज्ञानमेव ॥ * दृश्यतां पृ० ५६ टि० २ ॥ ३ अत एव नालोकादर्शनम् ॥ ४ * दृश्यतां न्यायकुमुदचन्द्रे पृ० ६६६, ६७०, ६७१ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

लोकप्रतीतिबाधस्तूभयत्रापि तुल्यः । यथैव हि मध्याह्नेऽतितीव्रालोके बहिर्गन्तुमसमर्था वयमिति लौकिकी प्रतीतिरस्ति तथा बहलान्धकारायां क्षपायां बहिर्गन्तुम-
86A समर्था वयमित्यपि प्रतीतिरस्ति । तन्न ज्ञानानुत्पत्तिमात्रं तमः, आलोकस्याप्यभावप्रसङ्गात् ।

ननु न तमः पुद्गलद्रव्यम्, किं तर्हि ? रूपविशेषोऽयमिति । अत्राह–ने चानाश्रय आश्रयरहितो गुणः सम्भवति । रूपं तावद् गुणः, गुणश्च द्रव्याश्रयः, न च तमसि प्रतिभासमाने तदाधारभूतं द्रव्यं किमपि प्रतिभासते । न च द्रव्याप्रतिभासेऽपि स्वतन्त्रो गुणप्रतिभासः सम्भवति, तत् कथं रूपविशेषरूपं तमः स्यात् ।

स्यान्मतम्– न तमःसंविदा पुरोऽवस्थित एव रूपविशेषो गृह्यते, किं तर्हि ? अन्यत्रोपलब्धो नीलिमा तत्रारोप्यते । अत एव दीर्घं ह्रस्वं महदल्पं तम इत्यपि प्रति-
86B भासो नासङ्गतः, तावद्देशव्यापिनो नीलिम्नः समारोपादिति । तन्न । यतो नैापि आरोपकारी प्रत्यय आरोपप्रत्ययोऽस्खलितो भवति । स्खलित एव भवतीत्यर्थः । यदि तमःप्रत्ययोऽन्यत्रोपलब्धस्य नीलिम्नः समारोपकारी स्यात्तदा नात्र नीलिमा, किं तर्हि ? अन्यतः समानीय समारोपित इत्येवं स्खलद्वृत्तिः स्यात् । न खलु माणवके वह्निप्रत्ययोऽस्खलद्वृत्तिः । ततो नास्यान्यतः समारोपितो रूपविशेषो विषयः । किन्तु पारमार्थिकस्तमःस्कन्धः । न केवलं नारोपप्रत्ययोऽस्खलितः, तथा सर्वभावी वा नापीति
87A सम्बध्यते । सर्वेषां भवतीत्येवं शीलः सर्वभावी । यद्ययं तमःप्रत्ययः समारोपितरूपविशेषविषयः स्यात्तदा सर्वेषामविशेषेण न स्यात् । न खलु माणवके वह्निप्रत्ययः सर्वेषामगृहीतसङ्केतानामपि पुरुषाणामुपजायते । एतेन यदुक्तम्–

"तस्माद्रूपविशेषोऽयमत्यन्तं तेजोऽभावे सति सर्वतः समारोपितस्तम इति प्रतीयते" [प्रशस्तपादभाष्यटीका न्यायकन्दली पृ० २४] इति,

तत् प्रतिध्वस्तम् ।

१ न चानाश्रयो गुणः ॥ २ °स्वभावम् ॥ ३ नाप्यारोपप्रत्ययोऽस्खलितः ॥ ४ * "अत्र कश्चिदाह–यदि तमो द्रव्यं रूपद्रव्यस्य स्पर्शाव्यभिचारात् स्पर्शवद्द्रव्यस्य महतः प्रतिघातधर्मत्वात् तमसि संचरतः प्रतिबन्धः स्यात्, महान्धकारे च भूगोलकस्येव तदवयवभूतानि खण्डावयविद्रव्याणि प्रतीयेरन्निति तदयुक्तम्, यथा प्रदीपान्निर्गतैरवयवैरदृष्टवशादनुद्भूतस्पर्शमनिविडावयवमप्रतीयमानखण्डावयविद्रव्यप्रविभागमप्रतिघाति प्रभामण्डलमारभ्यते तथा तमःपरमाणुभिरपि तमोद्रव्यम् । तस्मादन्यथा समाधीयते–तमःपरमाणवः स्पर्शवन्तस्तद्रहिता वा ? न तावत् स्पर्शवन्तः, स्पर्शवतस्तत्कार्यस्य क्वचिदनुपलम्भात् । अदृष्टव्यापाराभावात् स्पर्शवद्द्रव्यानारम्भका इति चेत्, रूपवन्तो वायुपरमाणवोऽदृष्टव्यापारवैगुण्याद् रूपवत् कार्यं नारभन्त इति किं न कल्प्येत ? किं

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

87B सम्प्रति तमोवादमुपसंहरति—तेत् तस्मात् पौद्गलिकं तमः, न भाऽभावो नाप्या-
88A लोकादर्शनं नाप्यन्यतः समारोपितो रूपविशेषः । इतिस्तमोविचारपरिसमाप्त्यवद्योतकः ।

तदेवं तमःस्वरूपं निरूप्य शब्दस्वरूपं निरूपयति—

वाग्योगनिसृष्टः स्कन्धः शब्दः संघातभेदजो वा । बाह्येन्द्रियविषयत्वाद् गन्धादिवद् नाकाशगुणः, आकाशगुणत्वाभावेन 5

वा न कल्पितमेतदेकजातीयादेव परमाणोरदृष्टोपग्रहाच्चतुर्धा कार्याणि जायन्त इति । कार्यैकसमधिगम्याः परमाणवो यथा कार्यमुन्नीयन्ते, न तद्विलक्षणाः, प्रमाणाभावादिति चेत्, एवं तर्हि तामसाः परमाणवोऽप्यस्पर्शवन्तः कथं तमोद्रव्यमारभेरन्? अस्पर्शवत्त्वस्य कार्यद्रव्यानारम्भकत्वेनाव्यभिचारोपलम्भात् । कार्यदर्शनात् तदनुगुणं कारणं कल्प्यते, न तु कारणवैगुण्येन दृष्टकार्यविपर्यासो युज्यत इति चेत्, न वयमन्धकारस्य प्रत्यर्थिनः, किन्त्वारम्भकानुपपत्तेर्नीलिममात्रप्रतीतेश्च द्रव्यमिदं न भवतीति ब्रूमः । तर्हि भासामभाव 10
एवायं प्रतीयेत, न, तस्य नीलाकारेण प्रतिभासायोगात् । मध्यन्दिनेऽपि दूरगगनाभोगव्यापिनो नीलिम्नश्च प्रतीतेः । किञ्च, गृह्यमाणे प्रतियोगिनि संयुक्तविशेषणतया तदन्यप्रतिषेधमुखेनाऽभावो गृह्यते, न स्वतन्त्रः । तमसि च गृह्यमाणे नान्यस्य ग्रहणमस्ति । न च प्रतिषेधमुखः प्रत्ययः । तस्मान्नाभावोऽयम् । न चालोकादर्शनमात्रमेवैतत्, बहिर्मुखतया तम इति छायेति च कृष्णाकारप्रतिभासनात् । **तस्माद् रूपविशेषोऽयमत्यन्तं तेजोऽभावे सति सर्वतः समारोपितस्तम इति प्रतीयते** । दिवा चोर्ध्वं नयनगोलकस्य 15
नीलिमावभास इति वक्ष्यामः । यदा तु नियतदेशाधिकरणो भासामभावस्तदा तद्देशसमारोपिते नीलिम्नि छायेत्यवगमः । अत एव दीर्घा ह्रस्वा महती अल्पीयसी छायेत्यभिमानः, तद्देशव्यापिनो नीलिम्नः प्रतीतेः । अभावपक्षे च भावधर्माध्यारोपोऽपि दुरुपपादः ।

तदुक्तम्—

"न च भासामभावस्य तमस्त्वं वृद्धसम्मतम् । छायायाः कार्ष्ण्यमित्येवं पुराणे भूगुणश्रुतेः ॥१॥ 20

दूरासन्नप्रदेशादि महदल्पचलाचला । देहानुवर्तिनी छाया न वस्तुत्वाद्विना भवेत् ॥२॥" इति । दुरुपपादश्च क्वचिच्छायायां कृष्णसर्पभ्रमः । चलतिप्रत्ययोऽपि गच्छत्यावारकद्रव्ये यत्र यत्र तेजसोऽभावस्तत्र तत्र रूपोपलब्धिकृतः । एवं परत्वादयोऽप्यन्यथासिद्धाः । तत्र चालोकाभावव्यञ्जनीयरूपविशेषे तमसि आलोकानपेक्षस्यैव चक्षुषः सामर्थ्यम् तद्भावभावित्वात्, यथाऽऽलोकाभाव एव त्वन्मते । **नन्वेवं तर्हि सूत्रविरोधः** "द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद् भाऽभावस्तमः" [वैशेषिकसूत्रे ५।२।१९] इति, न विरोधः, भाऽभावे 25
सति तमसः प्रतीतेः 'भाऽभावस्तमः' इत्युक्तम्" इति श्रीधरभट्टविरचितायां **प्रशस्तपादभाष्यटीकायां न्यायकन्दल्याम्** पृ० २१–२६ ॥

१तत् पौद्गलिकं तम इति ॥ २ * "यः पुनर्निशि नीलिमेवावलोक्यते नासौ नभसः । कस्य तर्हि? न कस्यचित् । कथं पुनर्गुणो न कस्यचित्? सत्यम्, गुण एवायमप्रसिद्धः । ननु प्रतीतिबलेन सिद्ध एव । सिद्धयेद् यदि प्रसिद्धिरेव सिध्येत्, सा तु कारणाभावान्न सिद्धा । ननु चक्षुरेव कारणम्, न, 30
आलोकोपकारानपेक्षस्य चक्षुषोऽप्रकाशकत्वात् । **तेन अप्रतीतावेवायं प्रतीतिभ्रमो मन्दानाम्** । अत एव दिवाऽनुपलम्भः अन्यथा सौरीभिः भामिरनुगृहीतं चक्षुः स्फुटतरं व्योम्नि नीलिमानं प्रकाशयेत्" इति **शालिकनाथ**विरचितायां प्रकरणपञ्चिकायाम् पृ० १४३ । "**आलोकज्ञानाभाव इति प्राभाकरैकदेशिनः**" इति **सर्वदर्शनसंग्रहे** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्याप्तत्वात् । गुणत्वे च व्यापित्वम्, व्योम्नो निष्प्रदेशत्वात् । 卐 परोक्षत्वादनुपलम्भो वा । न चामूर्तं मूर्तगुणम् । स च पौद्गलिकः, विधि-स्वातन्त्र्याभ्यां बाह्येन्द्रियग्राह्यत्वात् । 卐 तच्छब्दो द्रव्यं पौद्गलिकम् ।

वाग्योगेति । काययोगात्तैर्भाषायोग्यपुद्गलद्रव्यैर्साचिव्यजनितो जीवप्रदेशपरिणाम- 5
विशेषो वाग्योगः, तेन निसृष्टो बहिःक्षिप्तोऽनन्तानन्तपरमाणुप्रचयरूपः स्कन्धः शब्दः । यदि वाग्योगनिसृष्टः स्कन्धः शब्दः कथं तर्हि मेघादिशब्दानां शब्दत्वमिति ? अत्राह—सङ्घात-भेदजो वेति, स्कन्धः शब्द इत्यनुवर्त्तते । यः केषाञ्चित् सङ्घातेन सङ्घट्टेन केषाञ्चिच्च भेदेन विश्लेषेण भाषाद्रव्यपुद्गलस्कन्धो जायते सोऽपि शब्दः । तत्र सङ्घातजो मेघ-करताला-
88 B दिजन्मा, भेदजो द्वैधीभवद्वंशदलादिजन्मा । शब्दजोऽपि शब्दः सङ्घातजन्मैव, शब्द- 10
परिणामपरिणतभाषाद्रव्यसम्बन्धेन शब्दत्वपरिणमितभाषाद्रव्यरूपत्वात् ।

चेतना-ऽचेतनजन्मनोः शब्दयोर्नैकं लक्षणमस्तीति पृथगुच्यते । तत्र सामान्येन शब्दो द्वेधा—भाषालक्षणो विपरीतश्च । भाषात्मको द्वेधा—अक्षरात्मकोऽनक्षरात्मकश्च । संस्कृतादिभेदभिन्न आर्य-म्लेच्छव्यवहारहेतुरक्षरात्मकः पञ्चेन्द्रियाणाम्, अनक्षरात्मको द्वीन्द्रि-यादीनामपि । स एष द्वेधाऽपि प्रायोगिक एव । प्रयोग-विस्रसानिमित्तभेदेनाऽभाषा- 15
त्मकोऽपि द्वेधा । प्रयोगनिमित्तश्च षड्ढा ततादिभेदात् । तत्र चर्मतननात् ततो मृदङ्गादि-
89 A प्रभवः । वीणा-त्रिसैरिकादितन्त्रीप्रभवो वितत: । कांस्यतालादिजो घनः । वंशादि-निमित्तः शौषिरः । ककच-काष्ठादिसङ्घर्षप्रभवो साङ्घर्षः । वंशांशुकादिविपाटनजो वैश्रसिक इति । विस्रसानिमित्तो मेघादिप्रभवोऽनेकप्रकारः ।

शब्दस्वरूपमभिधाय परोपगतमाकाशगुणत्वं दूषयति—बाह्येति । बाह्येन्द्रियं द्रव्येन्द्रियं 20
श्रोत्रं तस्य विषयत्वादिति हेतुः । गन्धादिवदिति दृष्टान्तः । नाकाशगुण इति साध्यम्, शब्द इति विशेष्यं सम्बध्यते । विवक्षावृत्तित्वान्न व्यभिचारः । पटाकाशसंयोगेन व्यभि-
89 B चार इति चेत्, न, तस्योभयगुणत्वेनाकाशगुणत्वैकान्ताभावाद् बाह्येन्द्रियविषयत्वा-

१ * अत्रेदं बोध्यम्—टीकादर्शेऽत्र पत्रद्वयं नास्ति, अतष्टीकायां कीदृशं मूलं स्वीकृतं कथं च व्याख्यातमिति न ज्ञायते । अतो मूलादर्शानुसारेण 卐 卐 एतदन्तर्गतः पाठोऽत्र उपन्यस्त इति ध्येयम् ॥ २ वाग्योगनिसृष्टः 25
स्कन्धः शब्दः ॥ ३ गृहीत ॥ ४ साहाय्यम् ॥ ५ भाषाद्रव्यं चासौ पुद्गलस्कन्धश्च भाषाद्रव्यरूपः पुद्गल-स्कन्ध इत्यर्थः ॥ ६ तुला—तत्त्वार्थराजवार्तिके ५ । २४, पृ० ४८५ ॥ ७ अपिशब्दात् पञ्चेन्द्रियाणामपि हुंकारादिः ॥ ८ जीवव्यापार ॥ ९ विपरीतोऽपि ॥ १० त्रितन्त्रीका वीणा ॥ ११ बाह्ये-न्द्रियविषयत्वाद् गन्धादिवद् नाकाशगुणः ॥ १२ बाह्येन्द्रियग्राह्यो नभोगुणश्चायम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भावाच्च, संयोगिनो गगनस्यातीन्द्रियत्वात् पटस्येन्द्रियविषयत्वेऽपि तेत्संयोगस्य तद्-योगात्, यदुक्तम्—

"द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् ॥" [ ] इति ।

बाह्या अपि च प्राहुः— "[3]न हि कदाचित् प्रत्यक्षा-ऽप्रत्यक्षद्रव्यवृत्तिः संयोगः प्रत्यक्षो भवति" [ ] इति । कुतः पुनर्बाह्येन्द्रियविषयत्वे आकाशगुणत्वं न भवतीति ? उच्यते— आकाशगुणत्वाभावेन व्याप्तत्वात् बाह्येन्द्रियविषयत्वस्येति सम्बन्धः । बाह्येन्द्रियविषयत्वं ह्याकाशगुणत्वाभावेन व्याप्तम् । यो हि बाह्येन्द्रियविषयः सोऽवश्यमाकाशगुणो न भवति । गन्धादीनामाकाशगुणत्वाभावो मूर्त्तगुणत्वाद् घटादीनां तु द्रव्यत्वात् सिद्ध इति न व्यभिचारः । तदयं बाह्येन्द्रियविषयत्वादिति हेतुर्विरुद्धव्याप्तोपलब्धिः, आकाशगुणत्वस्य प्रतिषेध्यस्य विरुद्धेनाकाशगुणत्वाभावेन बाह्येन्द्रियविषयत्वस्य व्याप्तत्वात् ।

90A

अपि च, यद्याकाशगुणत्वं स्याच्छब्दस्य तदाऽऽकाशगुणत्वे च शब्दस्याभ्युपगम्यमाने व्यापित्वं स्यात्, यस्माद् व्योम्न आकाशस्य निष्प्रदेशत्वान्निष्प्रदेशत्वेन भवद्भिरङ्गीकृतत्वात् । आकाशं हि व्यापकं निष्प्रदेशं च परैरिष्टमतस्तस्य गुणो भवन् शब्दो महत्त्वपरिमाणवद् व्यापी स्यात् । अन्यथा शब्दारूपिता-ऽनारूपितदेशयोर्भिन्नत्वेनाकाशस्य सप्रदेशत्वप्रसङ्गः ।

90B

ननु पटाकाशसंयोग आकाशगुणोऽपि न व्यापी, तत् कथं न व्यभिचारः ? तन्न । संयोगस्योभयगुणत्वेनाकाशगुणत्वैकान्ताभावात् । यो ह्याकाशस्यैवैकस्य व्यापकस्य निष्प्रदेशस्य गुणः स एव व्यापकः प्रसज्यते । संयोगस्तु सप्रदेशाव्यापकैस्यापि गुणः ? ततः कथं तेन व्यभिचारः स्यात् ।

नन्वात्मनो विभुत्वेऽपि सुखादीनामव्यापित्वं दृष्टमिति । न । आत्मनो विभुत्वस्यानभ्युपगमात् । येषां तु विभुस्तेषां सुखादीनां व्यापित्वप्र [91A.....91B 92A..92B...]

93A

भावित्वादिति वा सिद्धम्, शब्दसमवायिभूतस्य द्रव्यस्यैव कस्यचिदनभ्युपगमात् ।

१ ख-पट्योः ॥ २ पटाकाशसंयोगस्य बाह्येन्द्रियविषयत्वायोगात् ॥ ३ * तुला—"प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात् संयोगस्य" इति वैशेषिकसूत्रे ४।२।१ ॥ ४ गुणत्वे च व्यापित्वम् ॥ ५ व्योम्नो निष्प्रदेशत्वात् ॥ ६ व्यापक आकाशगुणत्वात् ॥ ७ घटादेः ॥ ८ * इतः परं 91–92 इति पत्रद्वयं नोपलभ्यते ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यथा च शब्दो न गुणस्तथा द्रव्यमपि अमूर्तं न भवति । तथाहि—नामूर्त्तः शब्दः, बाह्येन्द्रियग्राह्यद्रव्यत्वात्, पटादिवत् । ननु शुषिरस्य चक्षुषा स्पर्शनेन च साक्षात्करणाद् "यत् शुषिरं तद् आकाशम्" [ ]इति वचनाद् बाह्येन्द्रियग्राह्यद्रव्यत्वमाकाशेऽस्ति तथापि तदमूर्त्तमेवेति हेतुर्व्यभिचारी । न, शुषिरस्य घनद्रव्याभावरूपत्वादुपचारतस्तत्राकाशव्यपदेशात् । घनद्रव्याभावश्च द्रव्यान्तराभावरूपस्ततो न तत्र चक्षुषः स्पर्शनस्य वा न व्यापारः ।

स्यादेवम्—अमूर्तं द्रव्यं शब्दः, परममहत्त्वाश्रयत्वाद्, आकाशवदित्यनुमानबाधितोऽयं पक्षः । न, परममहत्त्वाश्रयत्वस्यासिद्धत्वात् । न परममहान् शब्दः, आत्म-
93B मनोऽन्यत्वे सति द्रव्यत्वापरजातिमत्त्वात् बाह्येन्द्रियप्रत्यक्षत्वाद्वा, पटादिवत् । बाह्येन्द्रियप्रत्यक्षया महासत्तया व्यभिचार इति चेत्, न, सत्तायाः सर्वथा परममहत्त्वाऽनभ्युपगमात् । परममहतो द्रव्यस्य नभसः सत्ता हि परममहती, न चासौ बाह्येन्द्रियप्रत्यक्षा । न च सकलद्रव्यपर्यायव्यापिन्येकैव सत्ता प्रसिद्धा, तस्या उपचारतस्तथा प्रतिपादनात् । परमार्थतस्तैदेकत्वे विश्वस्य विश्वरूपत्वविरोधात् । सर्वभावानां परस्परमसांकर्याच्च, यदाहुः—"न सत्ता सत्तान्तरमुपैति" [ ] इति । तच्छब्दो न गुणः, नाप्यमूर्तं द्रव्यम् । किं तर्हि ? मूर्त्तद्रव्यम् । सम्प्रत्युपसंहरति—तेदिति । द्रव्यमित्यनेन गुणत्वाभावस्योपसंहारः । पौद्गलिकमित्यनेनामूर्त्तत्वाभावस्य ।

94A तदेवं शब्दस्य स्वरूपमभिधायोद्द्योतस्य प्रतिपादयति—

तमोऽपवर्तकः स्कन्ध उद्द्योतः, बाह्येन्द्रियग्राह्यद्रव्यत्वात् पौद्गलिकः । प्राणा-ऽपानादयोऽप्येवमिति ।

तमोऽपवर्तकः स्कन्ध उद्द्योत इति । तमो विपञ्चितस्वरूपमेव । तस्याऽपवर्त्तको-ऽपनायको यः पुद्गलस्कन्धः स उद्द्योतः । तस्य पौद्गलिकत्वं निरूपयति[10]—बाह्येति । बाह्येन्द्रियं चक्षुः । तत्परिच्छेद्यद्रव्यत्वात् पटादिवदुद्द्योतः पौद्गलिकः । रूपाद्यभावो विपक्षबाधकम् । तदेवं सूत्रोपात्तभेदानां स्वरूपमभिधायादिशब्दगृहीतानामप्यतिदिशति—
94B प्रेणेति । आदिशब्दात् समानोदान-व्यान-च्छाया-कर्मादिग्रहः । मुखनासिकेन निष्क्रमण-प्रवेशनात् प्राणः । मलादीनामधो नयनादपानः । समं नयनात् समानः ।

१ छायातपादि द्रव्यान्तरम् ॥ २ मीमांसकः ॥ ३ आत्ममनसोः परे व्यापकत्वममंसत. अतस्ताभ्यां व्यभिचारनिवृत्त्यर्थम् 'अन्यत्वे सति' इति विशेषणम् ॥ ४ नवसु द्रव्येषु वर्तमानस्य द्रव्यत्वस्य सत्का, कोऽर्थः ? तदन्तर्गता याऽपरा जातिर्घटे घटत्वम्, पटे पटत्वलक्षणा, तद्वत्त्वात् ॥ ५ शिष्यं प्रति सर्वम् ॥ ६ सत्तायाः ॥ ७ जगतः नानारूपत्व° ॥ ८ सत्तायाश्च परममहत्त्वे भावानां सांकर्यं स्यात् ॥ ९ तच्छब्दो द्रव्यं पौद्गलिकम् ॥ १० बाह्येन्द्रियग्राह्यद्रव्यत्वात् पौद्गलिकः ॥ ११ प्राणापानादयोऽप्येवमिति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वं नयनादुदानः । नाडीमुखेषु वितननाद् व्यानः । एते च हृदि गुदे नाभौ कण्ठदेशे सर्वशरीरे च यथाक्रममवतिष्ठन्ते, यदाह–

"हृदि प्राणो गुदेऽपानः, समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च, व्यानः सर्वशरीरगः ॥" [ ] इति ।

अन्ये त्वाचक्षते–प्राणो नासाग्र-हृन्नाभि-पादाङ्गुष्ठाग्रवृत्तिः । अपानः कुकाटिका-पृष्ठ-पायु-पार्ष्णिवृत्तिः । समानो हृन्नाभि-सर्वसन्धिवृत्तिः । उदानो हृत्कण्ठ-तालु-भ्रूमध्य-मूर्धवृत्तिः । व्यानस्त्वग्वृत्तिरिति । एवं मनस्तमःशब्दोद्द्योतादय इवैते पौद्गलिका हेतुभिरुपपादनीयाः । तत्र प्राणादयो वायुरूपत्वात् स्पर्शवन्तः । स्पर्शवतां च पौद्गलिकत्वमयत्नसिद्धमेव ।

95A छायापिपौद्गलिकी, रूप-स्पर्शवत्त्वात्, आलोकवत् । ने चास्या रूपादिमत्त्वमसिद्धम् । यतो यथैवालोके भासुरं रूपमुष्णः स्पर्शश्च लोकस्य प्रसिद्धस्तथा छायायामपि रूपं शीतः स्पर्शश्च । यदुक्तम्–

"आतपः कटुको रूक्षश्छाया मधुरशीतला ।
कषायमधुरा ज्योत्स्ना सर्वव्याधिहरं तमः ॥" [ ] इति ।

95B यथा क्षीरादिषु माधुर्यप्रतीतिर्नैवं छायायाम्, किन्तु क्षीरादिद्रव्यनिषेवणाद् यौ गुण-दोषौ दृष्टौ छायानिषेवणादपि तौ दृश्येते इति तत्र स्पर्श-रसावुपचर्येते, न तु तौ मुख्याविति चेत् । एवं तर्ह्यातप-ज्योत्स्नयोरपि रस-स्पर्शौ न मुख्यौ, किन्त्वौपचारिकाविति व्यप्यस्तु । न चाद्यमानप्रत्ययग्राह्यायाश्छायाया रूपादय औपचारिकाः कल्पयितुमुचिताः, आलोक-ज्योत्स्नयोरपि तथैव प्रसङ्गात् । तद् रूप-स्पर्शवत्त्वाच्छाया
96A ज्योत्स्नादिवत् पौद्गलिकी, प्राणादिवदनात्मत्वे सति गतिमत्त्वाच्च पौद्गलिकी । गतिमत्त्वं च 'शनैश्छाया गच्छति वेगेन गच्छति' इति लोकप्रतीतितः प्रसिद्धम् । स्यान्मतम्–तापावारकच्छत्रादिगतं कर्म छायायामध्यारोप्य छाया गच्छतीति लोकाः प्रतियन्तीति गतिमत्त्वमसिद्धम् । तन्न, छायाया वस्तुत्वानभ्युपगमे छत्रादिकर्मण एवारोपयितुमशक्यत्वात् । सत्येव हि वृक्षादावश्वाद्यारूढः पुमानश्वकर्म तत्रारोपयति, नासति । ततस्तावन्न कर्माध्यारोपान्यथानुपपत्त्या छायाया वास्तवत्वं सिद्धम्, तथा च सति

१ * तुला–न्यायकुमुदचन्द्रे पृ० ६६८–६७० ॥ २ * तुला–प्रशस्तपादभाष्यटीका व्योमवती पृ० ४६ । न्यायकुमुदचन्द्रे पृ० ६६९ । स्याद्वादरत्नाकरः पृ० ८५५ । सम्मतिटीका पृ० ६७२ । "आतपः कटुको रूक्षः छाया मधुरशीतला । त्रिदोषशमनी ज्योत्स्ना सर्वव्याधिकरं तमः ॥" इति राजनिघण्टौ ॥ ३ परः ॥ ४ * तुला–न्यायकुमुदचन्द्रे पृ० ६७२ ॥ ५ गमनम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गतिमत्त्वमपि मुख्यमेवास्तु । वस्तूनां गतिमत्त्वस्य यथादर्शनमविरोधात् । तस्माद्गति-मत्त्वादपि छाया पौद्गलिकं द्रव्यम् ।

कर्मापि पौद्गलिकं द्रव्यम्, आत्मनः पारतन्त्र्यनिमित्तत्वात्, निगडादिवत् । पारतन्त्र्यं चात्मनो हीनशरीरादिसम्बन्ध एव, दुःखहेतुत्वात्, कारागारवत् । देवादि-शरीरमपि मरणदुःखहेतुर्भवत्येवेति न पक्षैकदेशासिद्धः । 5

येन यत् केनचिदुक्तम्–

"तनुभुवनादि कार्यं पुरुषगुणपूर्वकं विचित्रकार्यत्वाद् रथादिवदिति । यथा हि रथादिकर्त्ता मोक्तुरभिप्रायं विचित्रमपेक्षमाणस्तथैव तद्रचनां करोत्येवं शरीरादिकर्त्ता" [प्रशस्तपादभाष्यटीका व्योमवती पृ० ६३८] इति, 10

तत् प्रत्युक्तम् । यदि हि धर्माधर्मरूपं कर्म आत्मगुणः स्यात्तदा न पारतन्त्र्यमात्मनो
97A न स्यात्, न खलु यो यस्य गुणः स तस्य पारतन्त्र्यनिमित्तम्, पृथिव्यादेरिव रूपादयः । पारतन्त्र्यं चात्मनः कर्मनिमित्तमिति सकललोकप्रसिद्धमेव ।

अपि च, ज्ञानपूर्वकत्वेनापि हेतुश्चरितार्थः कथं न भवति ? तत् कथं पुरुषगुणौ धर्माधर्मौ सिध्यतः ? न च शरीरोत्पत्तेः पूर्वमस्मदाद्यात्मनि बुद्ध्यादयो न सन्त्येवेति 15 श्रेयः । न खलु सा काचिदात्मनोऽवस्था समस्ति यस्यामात्मनो ज्ञानवियोगः, आत्मन एवाभावप्रसङ्गात्, उपयोगलक्षणत्वात्तस्य । तन्नात्मगुणः कर्म, किन्तु पौद्गलिकं द्रव्यमेव, आत्मनः पारतन्त्र्यहेतुत्वात् । क्रोधादिपरतन्त्र आत्मा भवति, न पुनः क्रोधा-दयः पौद्गलिकाः, ततो व्यभिचारः । न व्यभिचारः, आत्मपरिणामरूपाणां पारतन्त्र्य-
97B रूपत्वात्, मोहनीयकर्मभेदरूपाणां तु पौद्गलिकत्वाव्यभिचारात् । 20

ननु यदि कर्म मूर्तं स्यात्तदा तेनात्मनो ज्ञानरूपस्याऽमूर्तस्यावरणं न स्यात् । न हि मूर्त्तममूर्त्तस्यावरणं भवितुमर्हति, ततोऽविद्यारूपमेव तदिति । तन्न, मूर्तेनापि मदिरादिनाऽमूर्त्तस्य ज्ञानादेरावरणदर्शनात् । कथमेवं शरीरादेर्न तदावरणत्वमिति चेत्, अविरुद्धत्वादिति ब्रूमः । मूर्त्तत्वाविशेषेऽपि हि यदेव ज्ञानेन विरुद्धं तदेव तस्यावरणं

१ भवति हि विशेषस्य सामान्यं हेतुः ॥ २ मरणरूपं दुःखम्, तस्य ॥ ३ कर्मापि पौद्गलिके(कमि ?)- 25 त्यनुमानेन ॥ ४ पुरुषस्य आत्मनो यो गुणः पुण्यपापादिः, तत्पूर्वकम् ॥ ५ '६' [षष्ठ्यन्तं विग्रहे पदम्] ॥ ६ रथ ॥ ७ ईश्वराख्यः ॥ ८ अदृष्टस्य पौद्गलिकत्वसाधनेन ॥ ९ 'पुरुषगुणपूर्वकम्', कोऽर्थः ? पुरुषज्ञानपूर्वकम् ॥ १० हेतुः 'विचित्रकार्यत्वात्' इत्येवंरूपः ॥ ११ न तु पारतन्त्र्यस्य निमित्तानि ॥ १२ ज्ञानं प्रति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

युक्तम् । अन्यथाऽमूर्त्तत्वाविशेषाद् अविद्यावद् आकाशादिरपि कथं न ज्ञानमावृणोति ? तस्मात् कर्मापि पौद्गलिकमेव द्रव्यम् । इतिकरणः स्कन्धविचारावसानद्योतकः ।

98A सम्प्रति पूर्वोदितप्रमेयं संक्षेपेण श्लोकैः सङ्गृह्णाति–

स्पर्श-रस-गन्ध-वर्णा अन्योन्यमविनाभुवः ।
मूर्तिस्तदङ्किता ये ते पुद्गला द्विविधाश्च ते ॥ १ ॥

अणुः स्कन्धश्च तत्राणुराद्यं स्कन्धनिबन्धनम् ।
द्रव्यतो भागनिर्मुक्तो भावतो भागवानपि ॥ २ ॥

तत्संघात-विभेदोत्थः स्कन्धो द्व्यण्वादिरंशवान् ।
विचित्रभावोऽध्यक्षश्चोद्भूताध्यक्षत्वयोगतः ॥ ३ ॥

मनस्तमःशब्दोद्द्योताः स्कन्धस्यैव प्रभित्तयः ।
पौद्गलिकत्वमेषां तु प्रसिद्धं स्वस्वलिङ्गतः ॥ ४ ॥

इति संग्रहश्लोकाः ॥

[1]स्पर्शेत्यादि । अन्योन्यमविनाभुव इत्यनेन सर्वपुद्गलजातेश्चतुर्गुणत्वमाह । तदङ्किता-स्तया स्पर्श-रस-गन्ध-वर्णरूपया मूर्त्या चिह्निता ये द्विविधाश्च त इति पुद्गलाः

द्वैविध्यमेवाह–[2]अणुः स्कन्धश्चेत्यादि । जात्यपेक्षमेकवचनम् । आद्यं स्कन्धनिबन्धनम् प्रथमं द्व्यणुकादिस्कन्धस्य परिणामकारणम् ।

[3]तत्संघातेत्यादि । तेषामणूनां सङ्घात-विभेदोत्थः सङ्घात भेदप्रभवः स्कन्धः, स च द्व्यण्वादिः 'आदि'शब्दात् त्र्यणुकादिपरिग्रहः । अंशवान् द्रव्यावयवैः सावयवः । विचित्रभावो विचित्रा भावाः स्पर्श-रस-गन्ध-वर्णा यस्य स तथा । वैचित्र्यं च कश्चिद्
98B द्विस्पर्शो यावदष्टस्पर्शः । एवं रसादिवैचित्र्यमपि वाच्यम् । अध्यक्षश्च, कश्चित् स्कन्धः प्रत्यक्षश्च भवति । कुतः ? उद्भूतमिन्द्रियग्राह्यत्वविशेषणार्हपरिणामापन्नमध्यक्षत्वं तेन योगतः सम्बन्धात्, सदाऽपि सर्वेऽपि परमाणवः स्कन्धाश्च कस्यचित् प्रत्यक्षा एव ।

१ स्पर्श-रस-गन्ध-वर्णा अन्योन्यमविनाभुव । मूर्तिस्तदङ्किता ये ते पुद्गला द्विविधाश्च ते ॥ २ अदृश्यभूताः ॥ ३ अणुः स्कन्धश्च तत्राणुराद्यं स्कन्धनिबन्धम । द्रव्यतो भागनिर्मुक्तो भावतो भागवानपि ॥ ४ तत्सङ्घातविभेदोत्थः स्कन्धो द्व्यण्वादिरंशवान् । विचित्रभावोऽध्यक्षश्चोद्भूताध्यक्षत्वयोगतः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एतावाँस्तु विशेषः—ये यदातीन्द्रियत्वपर्यायम् अपहाय ऐन्द्रियकत्वपर्यायमुपपद्यन्ते ते तदा प्राकृतजनानामपि प्रत्यक्षा भवन्तीति ।

मेन इत्यादि । बहुवचनं प्राणा-ऽपान-च्छाया-कर्मादिपरिग्रहार्थम् । प्रभित्तय इति प्रभेदाः । एषां मनआदीनां स्वस्वलिङ्गतः पूर्वप्रपञ्चितादात्मीयात्मीयादनुमानात् । पूर्वो-
99A दितसङ्ग्रहाय श्लोकाः सङ्ग्रहश्लोकाः । 5

स्यादेतत्—परमाण्वादिरर्थ एवासिद्धस्ततः कस्य लक्षणं भेदाश्च प्रागुपवर्णिताः । तदसिद्धिश्च तद्ग्रहणोपायाभावात् । स[1] हि यदि निराकारज्ञानग्राह्यो भवेत्तदा प्रतिकर्म व्यवस्था न स्यान्निबन्धनाभावात्, बोधमात्रस्य सर्वत्राविशेषात् । अथ साकारग्राह्य-स्तदानन्तरं तुल्यविषयं ज्ञानमपि ग्राह्यं स्याद् उभयत्रापि सादृश्याविशेषात् । न चानुपपद्यमानग्राहकोऽपि भावः सत्त्वेनोपगन्तुमुचितः, षष्ठभूतादेरपि तथाभावप्रसङ्गात् । 10

99B आह—

स्कन्धग्रहणपरिणामेन च ज्ञानेन तद्ग्रहः । स च संवेदनात् । तदेवार्थग्रहः । क्षयोपशमानुभावतः परिच्छेदावक्लृप्तिः, प्रतिकर्म विक्रियाभेदात् ।

[10]स्कन्धग्रहणपरिणामेन च स्कन्धावबोधस्वभावपर्यायेण च ज्ञानेन प्रत्यक्षप्रमाणेन तद्ग्रह- 15
स्तस्य स्कन्धस्य ग्रहः । चः समुच्चयार्थः । पूर्वमर्थः प्रपञ्चितः, सम्प्रति तद्ग्राहकं प्रमाणमिति । स्कन्धग्राहकप्रमाणप्रसिद्धौ परमाणुग्राहकप्रमाणप्रसिद्धिः सिद्धैव, परमाणु-व्यतिरेकेण स्कन्धस्यैवाभावादिति स्कन्धस्यैवोपादानं कृतम् ।

अयमभिसन्धिः—नैकान्तनिर्विशेषणेन ज्ञानेन नाप्यर्थसारूप्यकलङ्काङ्कितेन, किं तर्हि ? अर्थग्रहणपरिणामविशेषणेनार्थो गृह्यत इति तद्ग्रहणोपायाभावोऽसिद्धस्तथा 20
चार्थाभावोऽपि ।

100A नन्वर्थग्रहणपरिणामो ज्ञानस्य न कोऽप्यनुभूयते, बोधमात्रस्यैव वेदनादिति । उच्यते—से[11]चेति अर्थग्रहणपरिणामो ज्ञानस्य संवेदनात् स्वसंवेदनप्रत्यक्षेण सिद्धः । न

१ मनस्तम.शब्दोद्द्योता. स्कन्धस्यैव प्रभित्तयः । पौद्गलिकत्वमेषां तु प्रसिद्धं स्वस्वलिङ्गतः ॥ इति संग्रहश्लोकाः ॥ २ ज्ञानवादिनः ॥ ३ परमाण्वादिः ॥ ४ प्रतिपदार्थम् ॥ ५ घट एव गृहीतो न 25
पटादिरिति व्यवस्था ॥ ६ साकारेण ज्ञानेन ॥ ७ उत्तरेण ज्ञानेन पूर्वं ज्ञानं विषयश्च ग्राह्यः स्यात् ॥ ८ प्रसः [=प्रथमसमासो बहुव्रीहिरित्यर्थः] । अनुपपद्यमानं ग्राहकं ज्ञानं यस्य ॥ ९ आचार्यः ॥ १० स्कन्ध-ग्रहणपरिणामेन च ज्ञानेन तद्ग्रहः ॥ ११ बोधमात्रेण ॥ १२ स च संवेदनात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

खलु प्रसारितलोचनाः पुमांसः पुरः पटं पश्यन्तः सन्तः परित्यक्तार्थग्रहणपरिणामं बोधमात्रमेवानुभवन्ति ।

ननु यद्यर्थग्रहणपरिणामं ज्ञानमभूत्तथापि कथमनेनार्थो गृहीत इति । उच्यते—
100B तदेवार्थग्रह इति । तदेवार्थग्रहणपरिणामसंवेदनमेव ज्ञानेनार्थग्रहोऽर्थपरिच्छेदो भण्यते । इदमेव हि ज्ञानेनार्थग्रहणं यदर्थग्रहणपरिणामस्य ज्ञानस्य संवेदनम्, तच्चेदस्ति किमन्यदजातमधिकमवशिष्यते येनार्थो न गृहीतः स्यात् ।

स्यादेवम्-अर्थसारूप्यं ज्ञानस्य नेष्यतेऽर्थग्रहणपरिणामश्च सर्वत्राप्यविशिष्टस्ततः कथं प्रतिकर्म व्यवस्था स्यात्? न, क्षयोपशमानुभावतः परिच्छेदावक्लृप्तिरिति । ज्ञानावरणीयादिकर्मण उदीर्णांशस्य विपाकेनानुभवोऽनुदीर्णांशस्य च भस्मच्छन्नाग्निवदनुदयश्च यः स क्षयेण युक्त उपशमः क्षयसाहित्यादुपशमोऽपि क्षय इति क्षयश्च स उपशम-
101A श्चेति वा क्षयोपशमो भण्यते । तस्यानुभावात् परिच्छेदस्यावक्लृप्तिरवधारणम् । विज्ञानमर्थाकारं नोत्पद्यत एव, किन्तु प्रत्यर्थं भिन्नपरिणाममुत्पद्यते, क्षयोपशमसामर्थ्याद्धि घटज्ञानं घटग्रहणपरिणाममेवोत्पद्यते पटज्ञानं च पटग्रहणपरिणाममेव, तथैव च स्वसंवेदनप्रत्यक्षेण संवेद्यते, इदमेव च घटग्रहणं यत् तद्ग्रहणपरिणामज्ञानसंवेदनम् । ततो घटग्रहणपरिणामे एव क्षयोपशमवशात् समुत्पन्ने ज्ञाने तथैव च संवेद्यमाने कुतः पटग्रहणप्रसक्तिः, पटग्रहणपरिणामस्य ज्ञानस्यासंवेदनात्?

101B एतदेवाह—प्रतिकर्मेति । कर्म कर्म प्रति प्रतिकर्म, प्रतिपरिच्छेद्यमित्यर्थः, विक्रियाया ज्ञानविकारस्य ग्रहणपरिणामस्य भेदाद् भिन्नत्वात् । अन्य एव हि पटपरिच्छेदिनो ज्ञानस्य परिणामोऽन्यश्च घटपरिच्छेदिनः । यद्ग्रहणपरिणामं च ज्ञानं वेद्यते तस्यैव ग्राहकं व्यवस्थाप्यते । ततोऽर्थसारूप्याभावेऽपि क्षयोपशमवशात् प्रतिनियतस्यैवार्थस्य ग्राहकं ज्ञानं भवति न सर्वस्येति । यदवोचाम—

"क्षयोपशान्तिप्रभवप्रभावतो मतिर्भवन्ती नियतार्थवेदिनी ।
निमित्तवेद्यैः प्रतिकर्म भेदतः कथं नु विद्याद्विषयान्तराण्यपि ॥" [ ]

एतेन

"अस्त्यनुभवविशेषोऽर्थकृतो यत इयं प्रतीतिर्न सारूप्यादिति "चेत्"

१ भेदनिबन्धनप्रत्ययः कथम्? ॥ २ '७' सप्तम्यन्तं पदम् ॥ ३ प्रतिकर्म विक्रियाभेदात् ॥ ४ स्वभावः ॥ ५ बुद्धिः ॥ ६ निमित्तं क्षयोपशमलक्षणम्, वेद्या बाह्याः पदार्थाः ॥ ७ जानीयात् मतिः ॥ ८ अनुभवस्य बोधमात्रस्य ॥ ९ यतोऽर्थकृताद् विशेषात् ॥ १० घटज्ञानं मम समुत्पन्नमित्येवमादिका ॥ ११ विनिश्चयसूत्रम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

इत्येवं परमतमाशङ्क्य यदुक्तम्—"अथ किमिदानीं सतो रूपं न निर्दिश्यते? अनिरूपितेन नामाऽयमात्मना भावान् व्यवस्थापयति 'इदमस्य, इदं न' इति सुव्यवस्थिता भावाः' [प्रमाणविनिश्चयः पृ० २६१ A] इति,

102A तत् प्रत्युक्तम् । यतो निरूपितमेव विशेषस्य रूपम्—विज्ञानगतः क्षयोपशमसामर्थ्यप्रभवः प्रतिनियतार्थग्रहणपरिणामः स्वसंवेदनप्रत्यक्षो विशेषः । 5

अपि च, यो हीन्द्रियप्रत्यक्षवस्तुधर्मो भवेदसौ शङ्खग्राहिकयाऽपि निर्देष्टुं शक्येत यथाऽयमीदृश इति, यस्तु स्वसंवेदनप्रत्यक्षो वस्तुनो रूपविशेषः सोऽनुभवस्मारणेनैव निर्देष्टुं शक्यो न तु शङ्खग्राहिकया, तेद्वस्तुनोऽपि ह्यनुभवस्मारणद्वारेणैव निर्देशात् । तदर्थमारूप्यानभ्युपगमेऽपि प्रतिकर्म विक्रियाभेदात् क्षयोपशमानुभावतः परिच्छेदावकल्पिः । ततोऽर्थग्रहणोपायसम्भवान्न तेदभावेनाऽर्थाभावो वक्तव्यः । 10

स्वप्नादौ तु प्रमाणाभासम् । शुद्धहेतुजं तु प्रमाणमर्थाविनाभाव्येव । कस्यचिद् भ्रान्तत्वोपलम्भः सजातीयस्य तथाभावं गमयति । न ह्यर्वाग्दृशो वित्तिः सोपप्लवेति योगिनोऽपि । तद् व्यभिचारेऽपि नार्थाभावः ।

102B स्यान्मतम्—प्रमाणनिबन्धनाः पदार्थव्यवस्थितयः, अर्थग्राहकं च प्रमाणं सुप्त-मदमूर्च्छितावस्थास्वर्थादृतेऽपि संवेद्यमानमुपलभ्यते, ततो जाग्रदवस्थास्वपि कुतः[11]स्ततोऽर्थसत्तानिश्चय इति । तन्न । यतः स्वप्नादौ त्विति । यदिदं सुप्त-मदमूर्च्छितावस्थासु अर्थज्ञानमुपजायमानमुपलभ्यते न तत् प्रमाणम्, अपि तर्हि? प्रमाणाभासं प्रमाणसदृशम् । ततः प्रमाणनिबन्धनाः पदार्थव्यवस्थितय इत्यस्य न्यायस्य न व्यभिचारोऽस्ति, प्रमाणस्य स्वविषयाव्यभिचारात्, स्वप्नादिज्ञानस्य चाप्रामाण्यात् । अप्रामाण्यं चास्य मिद्धाद्युपप्लुते आत्मनि ज्ञानकारणस्य क्षयोपशमस्य कालुष्यात् । 15 20

१ न्यायमत ॥ २ बौद्धेन ॥ ३ * "अथ किमिदानी सतो रूपं न निर्दिश्यते? 'इदमस्य' इति निर्देष्टुं न शक्यत इति चेत्, अनिरूपितेन नामायमात्मना भावान् व्यवस्थापयति 'इदमस्य, इदं न' इति सुव्यवस्थिता भावाः" इति **प्रमाणविनिश्चयस्य** Tibetan translation **भोटभाषानुवादानुसारेण** पाठः प्रतीयते । **भासर्वज्ञ**विरचिते **न्यायभूषणे** तु "अथ किमिदानीं सतो रूपं न निर्दिश्यते? नेदमित्थं शक्यं व्यपदेष्टुम्, अनिरूपितेन नामायमात्मना भावान् व्यवस्थापयति 'इदमस्य, इदं न' इति सुव्यवस्थिता भावाः"—पृ० ४७ ॥ ४ सतोऽर्थकृतस्य विशेषस्य ॥ ५ नैयायिक ॥ ६ स्वभावेन ॥ ७ ज्ञानादेः । ८ स्वभावविशेषः ॥ ९ तस्य ज्ञानगतविशेषस्य वस्तु आधारो ज्ञानम्, तस्य वस्तुनः ॥ १० अर्थग्रहणोपायाभावेन ॥ ११ हेतोः ॥ १२ प्रमाणात् ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

103A शुद्धहेतुजं त्विति । मिद्धादिकलङ्कानङ्किते सत्यात्मनि यदत्यन्तपाटवभृतः क्षयोपशमात् पुनः प्रादुरस्ति प्रमाणं प्रमाणभूतं ज्ञानं तदर्थाविनाभाव्येव । विना भवतीत्येवंशीलं विनाभावि, न विनाभावि अविनाभावि, अर्थस्य स्वविषयस्याविनाभावि अर्थाविनाभावि । अथवाऽर्थं विना न भवतीत्येवंशीलमित्येवं विग्रहः । "सन्तापाय न शक्तः असान्तापिकः सदुपदेशः" [सि० बृ० ३।१।५१] इतीव च भवतिनाऽसम्बद्धस्यापि नञः सामर्थ्यात् समासः । पटुक्षयोपशमप्रभवमर्थग्राहि विज्ञानमवश्यमर्थं न व्यभिचरतीत्यर्थः । तत् कुतः प्रमाणनिबन्धनो नार्थसत्तानिश्चयो भवेत् ?

103B स्यान्मतिः—एकदा तावदर्थादृतेऽपि ज्ञानमपश्यं ततोऽन्यत्रापि तथाभावशङ्का न निवर्त्तते । तदपि न । यतः कस्यचिदिति स्वप्नाद्यवस्थाभाविनो ज्ञानस्य, भ्रान्तत्वोपलम्भोऽर्थाभावेऽपि भवनदर्शनम्, सजातीयस्यान्यस्यापि स्वप्नाद्यवस्थाभाविनो दृष्टपूर्वज्ञानसदृशस्य ज्ञानस्य तथाभावमर्थादृतेऽपि भवनलक्षणं भ्रान्तत्वं गमयति । यथा हि घननिबिडश्यामाकाराया रम्भायाः कन्दोद्भवत्वोपलम्भोऽन्यस्या अपि तथाभूताया एव तथाभूतत्वं गमयति तथा स्वप्नाद्यवस्थाभाविनो ज्ञानस्य भ्रान्तत्वोपलम्भोऽपि ।

104A न ह्यर्वाग्दृशो वित्तिः सोपप्लवेति योगिनोऽपि । हि यस्माद् नार्वाग्दृशो वित्तिर्विज्ञानं सोपप्लवा ग्राह्यग्राहकाकारोपप्लवसहिता इति हेतोर्योगिनोऽपि सर्वज्ञस्यापि वित्तिः सोपप्लवा भवति । यदि ह्येकत्र कस्यचित् केनापि रूपेण दृष्टिरन्यस्य तज्जातीयस्यान्यजातीयस्य वा तथाभावं साधयतीत्येकान्तः, तदा प्राक्तनपुरुषप्रतीतीनां ग्राह्यग्राहकाकारोपप्लवोपलम्भो योगिप्रतीतीनामपि तथाभावं साधयेत्, न चैवम्, ततः स्वप्नाद्यवस्था-
104B भाविनो ज्ञानस्य भ्रान्तत्वोपलम्भोऽन्यस्यापि तथाभूतस्यैव तथाभावं गमयति, न जाग्रदवस्थाभाविनः पटुक्षयोपशमप्रभवस्यापि ज्ञानस्य ।

१ शुद्धहेतुजं तु प्रमाणमर्थाविनाभावि एव ॥ २ '५' [=पञ्चभ्यन्तं पदम्] ॥ ३ * "नञ् । ३।१।५१ । नञित्येतन्नाम नाम्ना समस्यते, स च समासोऽन्यस्तत्पुरुषसंज्ञो भवति । न गौः अगौः । अनुष्ट्रैः । अस्तः । निवर्त्यमानतद्भावश्चोत्तरपदार्थः पर्युदासे नञ्समासार्थः । स चायं चतुर्धा—तत्सदृशः, तद्विरुद्धः, तदन्यः, तदभाव इति । अब्राह्मणः अशुक्ल इति तत्सदृशः क्षत्रियादिः पीतादिश्च प्रतीयते । अधर्मः असित इति तद्विरोधी पाप्मा कृष्णश्च प्रतीयते । अनग्निः अवायुरिति अग्नि-वायुभ्यामन्यः प्रतीयते । अवचनम् अवीक्षणम् इति वचन-वीक्षणाभावः प्रतीयते । .....प्रसज्यप्रतिषेधे तु नञ पदान्तरेण सम्बध्यत इति उत्तरपदं वाक्यवत् स्वार्थे एव वर्तते । तत्रासामर्थ्येऽपि यथाभिधानं बाहुलकात् समासः । सूर्यमपि न पश्यन्ति असूर्यपश्या राजदाराः, पुनर्न गीयन्ते अपुनर्गेयाः श्लोकाः, ...सन्तापाय न शक्तः असान्तापिकः सदुपदेशः 'तस्मै योगादेः शक्ते' [६।४।९४] इतीकण्" इति सिद्धहेमबृहद्वृत्तौ ॥ ४ कस्यचिद् भ्रान्तत्वोपलम्भः सजातीयस्य तथाभावं गमयति ॥ ५ श्यामाकाराया रम्भायाः ॥

तेत् तस्माद्व्यभिचारेऽपि स्वमादौ ज्ञानस्यार्थाभावे उत्पाददर्शनेऽपि नार्थाभावः, ज्ञानमर्थं विनाप्युत्पद्यमान दृष्टम्, किमनेनार्थतत्त्वेनाभ्युपगतेनेत्येवं नार्थाभावो वाच्यः । प्रमाणाभासस्यैवार्थाभावे समुत्पादात्, प्रमाणस्य तु नियमेनार्थसद्भाव एव भावात् ।

स्यादेवम्-ज्ञानार्थयोरभेद एव, नियमेन सहैवोपलम्भात्, चन्द्रद्वयवत् ।

105A यद् विनिश्चयः— 5

" सहोपलम्भनियमादभेदो नीलतद्धियोः ।
अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति ॥" [प्रमाणविनिश्चयः पृ० २६३B] इति ।

अत्राह—

सहोपलम्भनियमोऽपि उभयोः सहभावनियमायाऽस्तु, न भेदाभावाय, विच्छिन्नग्रहणसंवेदनात् । तथाप्यभावे ज्ञानाभावोऽप्यस्तु, 'सह'ध्वनेरुभयनिष्टत्वाच्च । प्रमाणान्तरसिद्धे परमार्थाभेदे कल्पितभेदविषयत्वं स्यात् । 10

सहोपलम्भनियमोऽप्युभयोः योऽयं ज्ञानार्थयोर्युगपदेवोपलम्भनियमः सोऽप्युभयोरिति ज्ञानार्थयोः सहभावनियमाय युगपत् सत्त्वनियमायाऽस्तु । अयमर्थः— योऽयं सहोपलम्भनियमो ज्ञानार्थयोरेकत्वसाधनाय त्वयोपादीयते स यदि परं तयोः सहसत्तां साधयेत् । परमार्थतः पुनस्ततः सहसत्तापि साधयितुं न शक्या, ज्ञानसत्त्वाभावेऽप्यर्थसत्ताया भावात् । 15

105B किमर्थं पुनः सहोपलम्भनियमो माऽस्त्वित्याह—न भेदाभावायेति । यो ज्ञानार्थयोर्भेदस्तदभावाय माऽस्तु । ज्ञानार्थयोरेकत्वं साधयितुमसमर्थ इत्यर्थः । विच्छिन्नग्रहणसंवेदनात् । विच्छिन्नस्य ज्ञानाद्भिन्नसत्ताकस्यार्थस्य यद् ग्रहणं ज्ञाने प्रतिभासनं तस्य संवेदनात् संवेदनप्रत्यक्षेण ग्रहणात् । 'स्वतो हि भिन्नसत्ताकस्य बहिरवस्थितस्य ग्राहकं विज्ञानमुपलभ्यते । न खलु घटज्ञानम् 'अहमेव घटः' इत्येवमभिधत्ते, किं तर्हि ? 20

१ तद्व्यभिचारेऽपि नार्थाभावः ॥ २ एकस्मिन् चन्द्रविषये चन्द्रद्वयोपलम्भः ॥ ३ अभेदो भेदो न, कोऽर्थः ? ज्ञानादन्योऽर्थो भिन्नो नास्तीत्यर्थः ॥ ४ ननु द्वयोर्वस्तुनोर्भेदाभेदव्यवस्था । ततो भेद इति वचनाद् बलादपि वस्तुद्वयमायातम् । न । अभेद इति कोऽर्थः ? भेदो न भवति । ज्ञानात् किमपि भिन्नं वस्तु नास्तीत्यर्थः ॥ ५ नन्वस्ति भेदः—पूर्वं वस्तूपलम्भः, पश्चाज्ज्ञानोपलम्भ इति । न । अप्रत्यक्ष उपलम्भो ज्ञानं यस्य पुंसस्तस्यार्थदृष्टिरर्थदर्शनं 'प्रत्यक्षोऽयमर्थः' इति न सिध्यति ॥ ६ सहोपलम्भनियमः ॥ ७ सहोपलम्भनियमात् ॥ ८ स्वस्मात् ज्ञानात् ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

'अयं बहिरवस्थितो घटः' इत्येवम् । अत एव स्नान-पानार्थिनो घटं मृगयमाणा-
106A स्तमुपलभ्य बहिर्मुखा धावन्ति नान्तर्मुखाः । अन्यथा घट-ज्ञानयोरेकत्वेऽन्तर्मुखं धावेयुः । ततः स्वतो भिन्नार्थग्राहिणो ज्ञानस्य संवेदनेन बाधितत्वात् सहोपलम्भनियमो न भेदाभावाय प्रभवति ।

तथाऽपीति विच्छिन्नार्थग्रहणसंवेदने सत्यपीत्यर्थः । अभाव इत्यर्थाभावेऽभ्युप- 5
गम्यमाने ज्ञानाभावोऽप्यस्तु अर्थस्येव ज्ञानस्याप्यभावो भवेत् । यथा बाह्यार्थस्य प्रत्यक्ष-सिद्धस्याप्यभाव उच्यते तथा ज्ञानस्य प्रत्यक्षसिद्धस्याप्यभावः किं नोच्यते ? अथ ज्ञानं संवेदनसिद्धमित्यभ्युपगम्यते तदाऽर्थोऽपि तथैवास्तां संवेदनसिद्धेरुभयत्राप्य-विशेषात् ।

न केवलं सहोपलम्भनियमो विच्छिन्नग्रहणसंवेदनात् ज्ञानार्थयोर्न भेदाभावाय, 10
106B तथा 'सह'ध्वनेः 'सह'शब्दस्योभयनिष्ठत्वाच्च राशिद्वयनान्तरीयकत्वाच्च न भेदाभावाय । सर्वत्र हि 'सह'शब्दप्रयोगोऽनेकवस्तुसम्भवे सत्येव भवति । ततो यदि ज्ञानार्थयोरने-कत्वं नास्ति तदा सहोपलम्भनियमादित्यत्र कुतस्त्योऽयं 'सह'शब्दप्रयोगः । तद् विच्छिन्न-ग्रहणसंवेदनात् सहध्वनेरुभयनिष्ठत्वाच्च ज्ञानार्थयोः सहोपलम्भनियमेऽपि न भेदाभावः ।

ननु समारोपितार्थविषयाः सर्वे ध्वनयः, ततः कल्पितभेदनिबन्धनः 'सह'शब्दप्रयोगः 15
कथं परमार्थभेदं साधयेत् ? तदुक्तम्—"ततः कल्पितभेदनिबन्धनः 'सह'शब्दप्रयोग इति को विरोधः" [प्रमाणविनिश्चयटीका पृ० १८५ A] इति ।

107A अत्राह—प्रमाणान्तरसिद्धे प्रस्तुतप्रमाणादन्येन प्रमाणेन प्रसिद्धे परमार्थभेदे ज्ञानार्थयो-स्तत्त्वत एकत्वे कल्पितभेदविषयत्वं स्यात्, सहोपलम्भनियमादित्यत्र 'सह'शब्दप्रयोगस्य विकल्पारोपितभेदविषयत्वं भवेत् । सहोपलम्भनियमादित्ययमेव हि हेतुर्ज्ञानार्थयोर- 20
भेदसाधकोऽत्रैव च 'सह'शब्दप्रयोगस्ततो हेतुनाऽभेदे साधिते सति 'सह'ध्वनेः कल्पित-विषयत्वं 'सह'ध्वनेः कल्पितविषयत्वे च हेतोः सकाशादभेदसिद्धिरित्यन्योन्याश्रयदोषः स्याद्यदि 'सह'ध्वनेः कल्पितविषयत्वमुच्यत इति । सर्वध्वनीनां विकल्पितार्थ-विषयत्वं पुनः पुरः प्रपञ्चतः प्रत्याख्यास्यामः ।

एतेन यदुक्तम्— 25

१ अभिधत्ते ॥ २ तथाप्यभावे ज्ञानाभावोऽप्यस्तु ॥ ३ सहध्वनेरुभयनिष्ठत्वाच्च ॥ ४ प्रमाणान्तरसिद्धे परमार्थभेदे कल्पितभेदविषयत्वं स्यात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"विकल्पज्ञेयभेदार्थः 'सह'शब्दोऽपि भेदिनि[1] ।

स तुल्यः कल्पनोत्थेऽपि[2],

[3]योऽप्याह—न 'सह'शब्दोऽर्थान्तरेण विना क्वचिदस्तीति नीलतद्धियोः सहोपलम्भादेव नीलस्य भेदसिद्धेर्विरुद्धो हेतुरिति तदपि तस्यासमीक्ष्यभाषित्वम् । यतो भेदिन्यप्यर्थे विकॅल्पज्ञेयमेव भेदमवेक्ष्य 'सह'शब्दः, विकल्पविषयत्वमन्तरेण शब्दार्थत्वाभावात् । स च विकल्पविषयो भेदो [5]नीलतद्धियोरप्यस्ति 'नीलं दृश्यते' इति भेदावमर्शात् ।

नैकव्याप्तेर्विरुद्धता ॥

यत् पुनरुच्यते विरुद्धो हेतुः स्यादिति तत् पापात् पापीयः । साध्यविपर्ययव्यापनाद्विरुद्धत्वं भवति, न च सहोपलम्भो भेदेन व्याप्तः, अपि त्वेकत्वेनैव" [ ] इति, तदपि निरॉकारि । यदि नाम भेदिन्यर्थे विकल्पविषयगोचरः 'सह'शब्दस्तत् किमेतावताऽर्थान्तरनान्तरीयकत्वं न स्यात्, विकल्पस्य परमार्थसद्विषयत्वेन [10]भेदिन्यपि[11] 'सह'ध्वनेरर्थान्तरनान्तरीयकत्वाव्यभिचारादिति ।

एकोपलम्भेऽपि कोऽवश्यं भेदाभावः ? एकस्याप्यनेकग्रहणाविरोधात् ।

स्यादाकूतम्—सहोपलम्भनियमादित्यत्र 'सह'शब्द एकशब्दार्थः । एकोपलम्भनियमादित्यर्थः । य एव हि ज्ञानोपलम्भः स एव ज्ञेयोपलम्भो य एव च ज्ञेयोपलम्भः स एव ज्ञानोपलम्भः । न खलु ज्ञान-ज्ञेययोः पृथक् पृथगुपलम्भोऽस्ति । तदुक्तम्—

"तेनैवायं नियमार्थो दर्शितः । ज्ञेयोपलम्भो ज्ञानोपलम्भात्मक एव, नान्यथा । ज्ञानोपलम्भोऽपि ज्ञेयोपलम्भात्मक एवेति, अन्यथा स्वनिवर्त्तनम्" [प्रमाणविनिश्चयटीका पृ० १८९ B–१९० A] इति ।

ततः कुतः सहशब्दस्योभयनिष्ठत्वेन हेतुर्भेदाभावाय न प्रभवेदिति ? । न । यस्मादेकोपॅलम्भेऽपि सहोपलम्भ इत्यस्यैकोपलम्भार्थत्वेऽभ्युपगम्यमानेऽपि, कोऽवश्यं नियमेन सार्वत्रिक इत्यर्थः भेदाभावोऽभेदः । यद्यपि ज्ञानार्थयोरेक एवोपलम्भस्तथाऽपि तयोरेकत्वं न भवति । एकोपलम्भनियमस्यैकत्वसाधननियमे विपक्षे बाधकप्रमाणाभावात् ।

१ अर्थे ॥ २ नील–नीलधीलक्षणे पदार्थे ॥ ३ बौद्ध एव यच्छब्देन नैयायिकमतमाशङ्कते ॥ ४ विकल्पश्चाप्रमाणम् ॥ ५ विकल्पकल्पितयोः ॥ ६ तुर्यपादः ॥ ७ आचार्येण ॥ ८ sर्थः ॥ ९ पदार्थे ॥ १० विवादाध्यासितं 'अपि'शब्दसहितं 'भेदिन्यपि' इति परोक्तमनूदितम् ॥ ११ सहशब्दः ॥ १२ एकोपलम्भेऽपि कोऽवश्यं भेदाभावः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एकस्यापि ज्ञानस्याऽनेकग्रहणाविरोधादनेकस्य ग्राह्यस्यार्थस्य परिच्छेदाविरोधात् । उपलम्भस्य ह्येकत्वं ग्राह्यस्यैकत्वं गमयेद् यद्येकेनोपलम्भेनैक एवार्थो गृह्यत इति नियमः
108B स्याद्, यावतैकेनाप्युपलम्भेनाऽनेकोऽप्यर्थो गृह्यते, ततः कथमुपलम्भैकत्वमुपलभ्यैकत्वमवश्यं गमयेत् ।

स्यान्मतिः—उपलम्भैकत्वमुपलभ्यानेकत्वे न वार्यते, एकेनाप्युपलम्भेनानेकार्थग्रहणाविरोधात् । नियम एव तु वार्यते उपलम्भैकत्वनियमोऽवश्यमुपलभ्यैकत्व एव भवति । अस्ति च ज्ञानार्थयोरुपलम्भैकत्वनियमः, तत उपलभ्यैकत्वेनापि भाव्यमिति ।

तत्रोपलभ्यानेकत्वेऽप्युपलम्भैकत्वनियमं साधयितुं प्रस्तावनां रचयति—

तावद् भेदेऽपि रूपादीनां सहनियमोऽस्ति, मा भूत् सर्वस्यापि, इति स्वभावविशेषादसौ । तत एवैकोपलम्भनियमोऽप्यस्तु ।

109A तावच्छब्दो लोकभार्षायां प्रत्युत्तरप्रदानोपक्रमे वा । भेदेऽपि सति स्कन्धावस्थायां रूपादीनां रूप-रस-गन्ध-स्पर्शानां सहावस्थाननियमोऽस्ति । मा भूत् सर्वस्यापि पदार्थगणेरिति हेतोः स्वभावविशेषादचिन्त्यरूपविशेषादसौ सहभावनियमो वक्तव्यः । अस्ति तावद् रूपादीनां सहभावनियमः । न चायं तादात्म्येन, अनभ्युपगमात् । अत एव न हेतुफलभावेन, सहभावित्वाच्च । न च नियामकान्तरमस्ति । अनियामकश्चेद्[12] भवेत्, सर्वस्य स्यात् । तस्मात् तादात्म्य-तदुत्पत्तिभ्यामृतेऽपि रूपादीनां स्वभावविशेषादेषः ।

नन्वस्ति रूपादीनामेकसामग्र्यधीनत्वं सहावस्थाननियमे हेतुः । रूपादयो ह्येक-
109B सामग्रीतः प्रसृतास्ततो भेदेऽपि सहावतिष्ठन्त इति । तत् किमेतावता रूपादीनां परस्परं तादात्म्यं हेतुफलभावो वा व्याहृतः स्यात्? कारणजनितस्तु रूपभेदो रूपादीनां परस्परमहेतुफलभूतानां स्वभावविशेषान्नातिरिच्यते । यो हि स्वैतस्तादात्म्य-तदुत्पत्त्यभावेऽपि भावानां क्वचिदविनाभावस्तमेव स्वाभाविशेषमातिष्ठामहे ।

१ किमुक्तं भवति? यथैकेन ज्ञानेन बहवो घटादयः परिच्छिद्यन्ते तथा स्वसंविदितत्वाज्ज्ञानस्यात्मानमर्थं चानेकरूपं परिच्छेत्स्यति एकमेव ज्ञानम्, को विरोधः? ॥ २ '२' [=द्वितीयाविभक्त्यन्तं पदम्] ॥ ३ नील-तद्धियोरित्यत्र ॥ ४ भेदेऽपि ॥ ५ तावद् भेदेऽपि **रूपादीनां सहनियमोऽस्ति मा भूत् सर्वस्यापीति स्वभावविशेषादसौ** ॥ ६ त्रा(ता?)वा ॥ ७ परमाणावपि रूपादयः सन्ति, परं यत् 'स्कन्धावस्थायाम्' इत्युक्तं तद् बौद्धेन सह निर्विवादार्थम् ॥ ८ **मा भूत् सर्वस्यापीति स्वभावविशेषादसौ** ॥ ९ सहभावनियमः ॥ १० कार्यकारणभावेन ॥ ११ न केवलम् अनभ्युपगमात्, सहभावित्वाच्च न हेतुफलभावः ॥ १२ सहभावनियमः ॥ १३ परस्परं स्वभावेन ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तेत एव स्वभावविशेषादेकोपलम्भनियमोऽपि उपलभ्यानामनेकत्वेऽप्युपलम्भैकत्वनियमोऽपि अस्तु । यथा स्वभावविशेषात् केषाञ्चित् सहैव सत्तानियमस्तथा केषाञ्चिदुपलभ्यानामनेकत्वेऽप्युपलम्भैकत्वनियमोऽप्यस्त्विति अयमर्थः । परस्परं व्यैकान्तभेदिनामपि कुतश्चित् स्वभावविशेषात् तावत् केषाञ्चित् सहैवावस्थाननियमो दृष्टस्तत एव केषाञ्चि-
110A देकोपलम्भनियमोऽपि भवेत्, को दोषः स्यात्? विचित्राचिन्त्यशक्तयो हि भावा न छद्मस्थबुद्धिभिर्विचारयितुं शक्याः । तथा च ज्ञानार्थयोः पृथक् सत्त्वेऽप्येकोपलम्भनियमोऽपि न विरुध्यते ।

एतेन यदुक्तम्—

"एतदुक्तं भवति न भिन्नयोर्नियतः सहोपलम्भोऽन्योन्यसम्बन्धमन्तरेण । स च तादात्म्यनिमित्तकस्तावत् स्वयमनभिप्रेतैः । तदुत्पत्तावपि वह्नि-धूमयोरिव सहोपलम्भव्यभिचारः । विषयविषयिभावलक्षणस्तु साकारपक्षे निराकृत एव । निराकारपक्षेऽप्युक्तम्" [प्रमाणविनिश्चयटीका पृ० १८६ A] इति,

110A तत् प्रतिव्यूढम् ।

स्यादेतत्—ग्राह्यभेदः प्रतिबन्धाभावात् सहोपलम्भानियमेन व्याप्तः, अस्ति च ज्ञानार्थयोर्भेदः, तथा च सहोपलम्भानियमोऽपि प्राप्नोति । तथा च "यद् येन नियतसहोपलम्भं तत् ततो न व्यतिरिच्यते यथैकस्माच्चन्द्रमसो द्वितीयः, नियतसहोपलम्भश्च ज्ञानेन सह ग्राह्याकारो नीलादिः" [प्रमाणविनिश्चयटीका पृ० १८९] इत्यभिधायोक्तम्—"भेदः सहोपलम्भानियमेन व्याप्तः प्रतिबन्धाभावात्, तस्य विरुद्धः
111A सहोपलम्भनियमः, तेन व्यापकविरुद्धेन भेदो निराक्रियते" [प्रमाणविनिश्चयटीका पृ १८९B–१९०A]

ततो यदि ज्ञानार्थयोरभेदो न स्यात्तदा सहोपलम्भनियमोऽपि न स्यादिति ।

तदपि न,

१ तत एवैकोपलम्भनियमोऽप्यस्तु ॥ २ स्वभावविशेषादेव एकोपलम्भनियमसमर्थनेन ॥ ३ धर्मोत्तरे ॥ ४ त्वया मया च सहोपलम्भो न तादात्म्यनिमित्तकोऽभिप्रेतः ॥ ५ प्राग्भावि कारणम्, पश्चाद्भावि कार्यं यतः ॥ ६ अर्थ ॥ ७ ज्ञान ॥ ८ साकारे ज्ञाने पूर्वस्यापि ज्ञानस्य ग्राह्यत्वं स्यात् ॥ ९ बोधमात्रस्याविशेषात् नियतग्राहकत्वाभावमणनेन ॥ १० ग्राह्याणां भेदः ॥ ११ एकोपलम्भ ॥ १२ '५' [=पञ्चम्यन्तं पदम्] ॥ १३ इदं वक्ष्यमाणम् ॥ १४ प्रतिषेध्यो ज्ञानार्थयोर्भेदः, तस्य व्यापकः सहोपलम्भानियमः, तेन विरुद्धः सहोपलम्भनियमः, तेन भेदो बाध्यते ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भेदो हि सामग्रीभेदमञ्जसा अनुरुणद्धि । उपलम्भनियमस्तु ज्ञानस्वसंविदितोत्पत्तिकृतः ।

[1]हियस्माद् भेदो ग्राह्यानेकत्वं सामग्रीभेदं कारणसामग्र्या नानात्वमञ्जसा मुख्यतोऽवश्यमेवेत्यर्थः अनुरुणद्धि । पदार्थानेकत्वं हि कारणानेकत्वेन व्याप्तम्, न पुनः सहोपलम्भानियमेन । ततश्च सहोपलम्भानियमो निवर्त्तमानोऽपि न पदार्थानेकत्वं निवर्त्तयितुं शक्नोति, सामग्रीभेदप्रभवस्य तस्य निवर्त्तयितुमशक्यत्वात् । तथा च सहोपलम्भनियमोऽपि स्याद् ग्राह्यानेकत्वं चेति को दोषः ?

111B किं पुनः कारणं घट-पटयोः सह पृथक् चोपलम्भः, ज्ञानार्थयोः पुनः सर्वदा सहैवोपलम्भः, अथ च परस्परं भेद उभयत्राप्यविशिष्ट इति ? उच्यते–उपलम्भनियमस्तु ज्ञानार्थयोरुपलम्भैकत्वनियमः पुनर्ज्ञानस्वसंविदितोत्पत्तिकृतः, ज्ञानस्य स्वसंविदितस्य सतो योत्पत्तिस्तन्निबन्धनः ।

ज्ञानं हि स्वसंविदितमेवोदयते, स्वसंवेदनं च ज्ञानोपलम्भो नान्यत् । अर्थोपलम्भोऽप्यर्थग्रहणपरिणामस्य ज्ञानस्य तादूप्येण संवेदनमेव । तथा च सत्येक एव सर्वदाऽप्युपलम्भो भवति । अर्थग्रहणपरिणामरूपज्ञानवेदनस्यार्थोपलम्भरूपत्वात् तस्यैव
112A च ज्ञानोपलम्भत्वात् । यदि हि प्रथमं ज्ञानमस्वसंविदितमुत्पद्यते तच्चार्थोपलम्भ इति कथ्येत पश्चादुत्पन्नज्ञानग्राहि ज्ञानान्तरं जायेत तच्च ज्ञानोपलम्भ इति गीयेत तदा स्यादेकोपलम्भानियमः । यदा च ज्ञानं प्रादुर्भवदनुभवदेवात्मानमशेषविशेषमवैति प्रतिनियतरूपज्ञानसंवेदनं चार्थोपलम्भ उच्यते तदा कथमिवैकोपलम्भनियमो न भवेत् । न चैवं घटोपलम्भ एव सर्वदापि पटोपलम्भः, एकैकाभावेऽपि भावदर्शनात् । तस्माद्
112B ग्राह्यैकत्वाभावेऽप्येकोपलम्भनियमोऽन्यथा सिद्धो ग्राह्यानेकत्वेऽपि न दुष्यतीति । एतावता ग्रन्थेनैकोपलम्भनियमादिति हेतोर्विपक्षे बाधकप्रमाणाभावेन स्वसाध्यं प्रत्यन्यथानुपपन्नत्वाभाव उद्भावितः ।

शङ्करनन्दनस्त्वाह–

" सहसंवेदनं तावन्न सहावस्थानमेतिवर्त्तते । सत्यपि हि संवेदने यदि नास्त्येव

१ * 'ज्ञानस्वसंविदितत्वोत्पत्तिकृतः' इति टीकादर्शे टिप्पणे पाठः ॥ २ भेदो हि सामग्रीभेदमञ्जसाऽनुरुणद्धि ॥ ३ उपलम्भनियमस्तु ज्ञानस्वसंविदितत्वोत्पत्तिकृतः ॥ ४ अर्थग्रहणपरिणामरूपेण ॥ ५ प्रथमोत्पन्नज्ञानग्राहि ॥ ६ यदा घट-पटौ एकत्र स्थितौ ज्ञायेते तदा एकोपलम्भेन गृह्येते, यदा तु पृथग्भूतौ तदा भिन्नोपलम्भेनेति 'सर्वदापि' इति पदम् ॥ ७ उपलम्भस्य ॥ ८ ज्ञानस्वसंवेदनेन ॥ ९ एकाव॰ ॥ १० ज्ञानार्थयोः ॥ ११ '२' [=द्वितीयान्तमेतत् पदम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नीलं न किञ्चित् संवेद्येत । तस्मात् सहसंवेदननियमेऽस्त्येव सहावस्थाननियमः । तदयमतादात्म्ये प्रकारान्तरेण वक्तव्यः । तच्च न हेतु-फलभावः, वह्निशून्यस्यापि धूमस्य दर्शनात् । न च प्रकाश्य-प्रकाशकभावः, सर्वेषां स्वात्ममात्रपर्यवसितत्वेन तस्याऽघटनात् ।
113A न चाप्रतिबन्धे सम्भवति । न हि यद्यत्रानायत्तरूपं तस्य तेन सहावस्थाननियमो भवति । तस्मात्तादात्म्यादेवायं सहावस्थाननियमः । ततो यदि नाम ज्ञानस्य स्वसंविदिततयोत्पत्तेस्तादात्म्याभावेऽपि सहोपलम्भनियमस्तथापि सहावस्थाननियमो न सिध्यति" [ ] इति ।

स तावदतिस्पष्टं पृष्टो व्याचष्टाम्—ये भगवता सर्वज्ञेन युगपद् बहवो वार्त्तमानिका पदार्थास्तदाकारात्मवेदनेन प्रकारान्तरेण वा परिच्छिद्यन्ते तेषां सहावस्थाननियमो यद्यस्ति स कं
113B सम्बन्धमवलम्बते ? न तावत् कार्यकारणभावम् , सर्वेषां परस्परं तदभावात् व्यभिचारित्वाच्च । न च तादात्म्यमनभ्युपगमात् । अत एव प्रकारान्तरमपि न । अथ नास्ति, न तर्हि यौगपद्यवार्त्तमानिकत्वविशेषणद्वयसम्भवः । ततो यथा हेतुफलभावाद्यभावेऽपि तेषां सहावस्थाननियमस्तथा ज्ञाना-ऽर्थयोरपि भविष्यति । न च द्वाभ्यामेव सम्बन्धाभ्यामखिलमिदं जगदितेतरमभिसम्बध्यते, विचित्ररूपत्वाद्भावानां कस्यापि कथञ्चित् क्वचिदभिसम्बन्धात् । न च ये सर्वज्ञैकाधिगम्याः सूक्ष्मा वस्तूनां विशेषाः प्राकृतैः प्रकाशयितुं न शक्यन्त
114A इति न सम्भवन्त्येव ते, तथाभूतानां बहूनां सम्भवात् । ततो यदि नाम प्रतिबन्धान्तरं न शक्यते प्रकाशयितुं तथापि सहावस्थाननियमान्यथानुपपत्त्याऽस्तीति गम्यत एव, उपेयस्यौपयिकनान्तरीयकत्वात् । तस्मात् सहावस्थाननियमादपि नार्थज्ञानयोरभेदसिद्धिः ।

स्यादेवम्—यत् प्रकाशते तज्ज्ञानम् , प्रकाशन्ते च नीलादयः । इत्थं च प्रतिबन्धसिद्धिः । नीलादयो यदि भिन्नज्ञानवशात् प्रकाशन्ते तदा प्रकाश एव न स्यात् । अर्थप्रकाशो हि ज्ञानम् । यश्च तद्रूपो न भवति स कथं प्रकाशताम् । न ह्यश्वेत

१ तादात्म्याभावे सति ॥ २ पदार्थानां स्वतन्त्रत्वात् ॥ ३ सर्वमपि स्वकारणैर्जनितम्, ततो न किञ्चित् कस्यापि प्रकाशकं प्रकाश्यं वा ॥ ४ कस्मिंश्चिदपि प्रतिबन्धेऽसति सहावस्थाननियमः संभवति ॥ ५ पदार्था इति सामान्योक्तावपि अत्र सर्वेषां शिष्यचित्तक्षणानां ज्ञानानि ग्राह्याणि, यतो ज्ञानैः सह परस्परं तादात्म्यं नांगीकृतमस्ति, किन्तु अन्यैः पदार्थैरिति ॥ ६ सर्वज्ञज्ञानान्यज्ञानानाम् ॥ ७ अनभ्युपगमादेव ॥ ८ सहावस्थाननियमः ॥ ९ सर्वज्ञज्ञानान्यज्ञानलक्षणबाह्यपदार्थानाम् ॥ १० अस्मदीयज्ञान-बाह्यपदार्थयोः ॥ ११ परस्परम् ॥ १२ यदस्ति तज्ज्ञानम्, प्रकाशकत्वात् ॥ १३ पदार्थः ॥ १४ प्रकाशरूपः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एव प्रासादः श्वेतत इति भवति । अर्थः प्रकाशत इति सामानाधिकरण्यं च न स्यात् । न ह्यन्यत्र स्थितेन नीलिम्ना पटो नील इति व्यपदिश्यते । अथ स्वयं ज्ञानरूपत्वात्
114B तर्हि सिद्धं प्रकाशमानत्वाद् ज्ञानरूपत्वं नीलादीनामिति ।

तैदिह तावत् सर्वज्ञज्ञानेन विनेयचेतसां प्रकाशोऽस्ति । न चामीषां सर्वज्ञज्ञानादतेऽन्यः प्रकाशो नाम । न चैतानि तैदूपाणि, सर्वज्ञज्ञानस्य भिन्नसन्तानरूपत्वात् । 5
यच्च विनेयचेतसां स्वसंविदितत्वं नाम स्वं रूपं न सं एव प्रकाशो वक्तव्यः । तस्य भिन्नसैन्तानं प्रत्यप्रयोजकत्वात् । अन्यथा छद्मस्थानामपि परचित्तसाक्षात्करणप्रसङ्गः । ततो यथा पैररूपेणाऽपि सर्वज्ञज्ञानेन विनयचेतांसि प्रकाशन्ते तथाऽर्थोऽपि भैविष्यति । न चायं जड इति विनेयचेतस्तुल्यतां नार्हति, विज्ञानरूपत्वस्यैं स्वसंविदितत्व एवोपयोगित्वात् परप्रत्यक्षतां प्रति पुनरतिप्रसङ्गेन निरुपैयोगित्वात् । सामानाधिकरण्यमपि
115A विनेयचेतोभिः सैमानयोगक्षेमम् । 10

यदि चैा(वा?)र्थग्रहणपरिणैामं ज्ञानमर्थप्रकाशस्तैद् यदा "संवेदनेन प्रकाशते तदार्थः प्रकाशत इत्युच्यते ।

ननु परचेतांस्यपि पृथग्भूतेन ज्ञानेन नैव प्रकाशन्ते । तथाहि—भगवान् परचित्तं प्रतिपद्यमानस्तदैाकारमात्मचित्तमेव वेदयते । तद्यदत्र प्रकाशते तैच्चित्तरूपमेव, ततो भिन्नेन प्रकाशेन प्रकाशो न भवतीति नियमस्य न व्यभिचारः । न चैवं पर- 15
115B चेतसामर्थवदभावप्रसङ्गः, "तेषां स्वसंवेदनप्रत्यक्षसिद्धत्वादिति । तदेतदर्थेऽपि सैमानम्, अैर्थग्रहणपरिणामस्य ज्ञानधर्मस्य ज्ञानाभिन्नत्वेनाभ्यनुज्ञानात् । न चैवमर्थाभावः प्राप्नोति, बाह्यार्थस्यानुमानात् साधयिष्यमाणत्वात् ।

स्यादेतत्—यैस्य प्रकाशः "प्रैकाशकाज्जातिरिच्यते न तत् प्रकाशकाद् भिन्नम्, यथा ज्ञानं स्वप्रकाशकात् "संवेदनात्, अस्ति चार्थप्रकाश-प्रकाशकयोरभेद इति । 20

१ अन्यत्र नृत्स्येन ज्ञानेन कथमर्थः प्रकाशते ॥ २ नीलादयः प्रकाशन्त इति सम्बन्धः ॥ ३ उच्यते ॥ ४ सर्वज्ञज्ञानरूपाणि ॥ ५ सर्वज्ञज्ञानप्रकाशः ॥ ६ विनेयचेतसां स्वसंविदितत्व ॥ ७ सार्वज्ञसन्तानं प्रति ॥ ८ भिन्नसन्तानस्येनापि ॥ ९ प्रकाशिष्यते इत्यर्थः ॥ १० अजडत्वेन कृत्वा ज्ञानेन परस्य ॥ ११ भिन्नसन्तानस्थस्य ज्ञानस्यात्मा प्रत्यक्षः कार्य इत्येव नोपयोगित्वम् ॥ १२ यथा सर्वज्ञज्ञानेन विनेयचेतांसि प्रकाशन्ते इति सामानाधिकरण्यं तथा ज्ञानेनाऽर्थः प्रकाशत इति तुल्यता ॥ १३ *अत्र चार्थं इति पाठः यद्वा 25
चार्थं इति पाठ इति सम्यग् निश्चेतुं न शक्यते, हस्तलिखितादर्शे 'च व' इत्यनयोः समानप्रायत्वात् ॥ १४ '१' [=प्रथमाविभक्त्यन्तमेतत्]। * अत्र अक्षरस्य घृष्टत्वात् °णामः इति °णामं इति वा पाठो भाति, प्रथमाविभक्त्यन्तमेतत् पदम् ॥ १५ ज्ञानम् ॥ १६ स्वस्वरूपेण ॥ १७ परचित्ताकारम् ॥ १८ ज्ञानरूपमेव ॥ १९ चेतसाम् ॥ २० अर्थाकारे ज्ञाने वेद्यमानेऽर्थः प्रकाशत इति कृत्वा ॥ २१ कुतः ॥ २२ अर्थस्य ॥ २३ ज्ञानात् ॥ २४ स्वस्वरूपात् ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

116A तदपि [1]विनेयचेतोभिर्व्यभिचारित्वादुपेक्षामर्हति । सर्वज्ञचेतसा हि परिच्छिद्यमानानां विनेयचेतसां प्रकाशः प्रकाशकान्नातिरिच्यते न च [2]तानि [3]प्रकाशकान्न भिद्यन्ते ।

ननु यज्ज्ञानं [4]तत् सर्वमनालम्बनं, स्वप्नज्ञानवदिति । तदत्र ज्ञानत्वादिति हेतोरुत्पन्नस्य साध्यज्ञानस्य यदि निरालम्बनत्वविशिष्टं नीलज्ञानं विषयस्तदा तेनैव व्यभिचारः । अथ न विषयः, कथं तर्हि हेतुना नीलज्ञानस्य निरालम्बनत्वं परः प्रतीयात्, निर्विषयत्वाविशेषेण सालम्बनत्वस्यापि प्रतीतिप्रसङ्गात् ।

यदिवा स्वप्नज्ञानस्य कथं निरालम्बनत्वमधिगतोऽसि ? जाग्रदवस्थायां [5]बाधकोत्पादादिति चेत्, तत् तर्हि सालम्बनं स्यात्, [6]तद्विरुद्धविषयग्रहणमन्तरेण बाधकत्वायोगादिति तेन व्यभिचारः ।

अस्तु तर्ह्यदृष्टान्तकमेवानुमानं व्याप्तेर्विपक्षे बाधकादेव सिद्धत्वादिति चेत्, किमिदं बाधकम् ? परस्य परेणनिष्टत्वविरोध इति चेत् । कोऽयं परस्य परनिष्टत्वाभावः । यदीतरेतरामेकान्तभेदः स प्रत्युत सालम्बनत्वं प्रयोजयति, [13]एकान्तभेदे आलम्बनस्यालम्बकस्य वा कस्यचिदपि व्यवस्थापयितुमशक्यत्वात् । अथ परस्य पारूप्यानभिज्ञत्वम्, तदस्तु नाम, क्वचित् जैडेन जैडरूपस्याजैडरूपस्य वाऽपरिज्ञानात् । न हि घटो घटान्तररूपमात्मज्ञानरूपं वा वेत्तीति नोऽभ्युपगमः । अजडेनाऽपि पारूप्यं न बुध्यत इति तु वाचोयुक्तिरसाधीयसी । तद्धि स्पष्टं बोधरूपमेव न भवति यत् परं किमपि नावबुध्यते, स्पष्टबोधरूपस्य परापेक्षत्वात् । न ह्यग्नेः छेद्ये काचिच्छिदा नाम । त्वमपि वा ब्रूया यदि किमपि नीलादिवेद्यनिरपेक्षं स्पष्टं बोधरूपमनुभवसि । ओंकार एव नीलादिकं वेद्यमस्तीति चेत्, तस्य पुनर्नीलपीतादिभेदेन वैचित्र्यं कुतस्त्यम् ? न तावत् स्वसन्ततिमात्रतः, तस्या एकरूपत्वात् कार्यवैचित्र्यस्य च कारणवैचित्र्यानुपारित्वात् । ततः सन्तानान्तरसाहित्यतो वक्तव्यम् ।

117B तच्चार्थादन्यन्न जानीमः । ततो यत्सम्पर्कादसौ विज्ञानगत आकारो भिद्यते स एव ज्ञानविषय इति सिद्धं सालम्बनत्वम् ।

१ विनेयचेतांसि बौद्धैरेव भिन्नानि मेनिरे ॥ २ चेतांसि ॥ ३ सर्वज्ञज्ञानात् ॥ ४ सर्वे प्रत्यया निरालम्बनाः ॥ ५ जाग्रदवस्थायां न कोऽप्यर्थो दृष्टः ॥ ६ ज्ञानस्य ॥ ७ कुतः ॥ ८ स्वप्नज्ञानेन गृहीतो यः पदार्थस्तस्य विरुद्धो योऽभावलक्षणो विषयस्तद्ग्रहणमन्तरेण ॥ ९ जाग्रदवस्थाभाविना ज्ञानेन ॥ १० अन्तर्व्याप्त्यैव ॥ ११ ज्ञानस्य ॥ १२ अर्थनिष्ठत्वं ॥ १३ कुतः ॥ १४ यतः सर्वे भावाः स्वस्वभावव्यवस्थिता इति ॥ १५ अर्थेन ॥ १६ अर्थस्य ॥ १७ ज्ञानस्य ॥ १८ आवयोः ॥ १९ ज्ञानेन ॥ २० स्वप्नावस्थाव्यवच्छित्त्यै ॥ २१ ज्ञानस्य ॥ २२ ज्ञानस्य या स्वसन्ततिः ॥ २३ न चैवमेव भवतीति वाच्यमित्याह ॥ २४ वैचित्र्यम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथ ज्ञानस्य स्वगतेयमसत्प्रकाशनशक्तिर्यया बाह्यार्थाभावेऽपि नीलपीताद्याकारवैचित्र्यमुद्वहत इत्युच्यते । अर्थाभावेऽपीति कुतो लभ्यम् ? ज्ञानमात्रस्यैव घटनादिति चेत्[1], तदिदं स्वयमेव विचारयितव्यतया सन्देहतुलाधिरूढं कुतोऽर्थाभावं निश्चाययेत् ? अथार्थस्य प्रमाणबाधितत्वादिति ब्रूषे[2], तत्र तावद्यावन्ति प्रमाणानि प्रत्यपाद्यन्त तावन्त्यप्रमाणत्वसमर्थनेनाऽबाधकपक्षे न्यक्षिप्यन्त । सम्प्रति प्रमाणान्तरमनुसर[3]। 118A न चाप्रमाणको भावोऽभावो वा कस्याप्युपपद्यते । तस्माद्बाह्यार्थाभावे सति विज्ञानशक्तिपरिकल्पनमुपशोभते, स एव चासिद्ध इति यत् किञ्चिदेतदपीति ।

तदेवं परप्रणीतं बाह्यार्थाभावसाधकं प्रमाणमुन्मूल्यार्थाभावाभ्युपगमे परस्य मुक्तकदूषणान्यपि दातुकामः प्राह—

अन्यथा भ्रान्तेतरास्थितिः, निबन्धनाभावात् । सक्लेशसन्ततेरपि विभागोऽस्ति । वासनासन्ध्यसन्धी अपि सदा स्याताम्, विशेषकाभावात् । कादाचित्कौ तूपादानादपरमपेक्षेते । न चातत्त्वार्थे विभागप्रणयनप्रयासः श्रेयान् । अपरमार्थभावना परमार्थावतारायेति महती श्रद्धा । न खलु ध्यानशतैरपि भाविताः मरीचिकाः पयसोभवन्ति । तदर्थ एव सर्वं साधीयः ।

अन्यथा भ्रान्तेतरास्थितिः, यदि ज्ञानार्थयोरभेद इष्यते तदा भ्रान्तेतराऽस्थितिः, इदं ज्ञानं भ्रान्तमिदमभ्रान्तमियं स्थितिर्न स्यात्, निबन्धनाभावात् व्यवस्थाहेतोरभावात् । अर्थव्यभिचारा-ऽव्यभिचारनिबन्धना हि प्रमाणानां भ्रान्ता-ऽभ्रान्तव्यवस्था । अर्थश्च सर्वथापि नेष्टः, ततो निबन्धनाभावात् किंकृतेयं स्थितिर्भवेत् ? तथा च द्विचन्द्रैकचन्द्र- 118B ज्ञानयोरविशेषः स्यात् ।

स्यान्मतम्—क्लेशप्रहाण्यप्रहाणी ज्ञानाभ्रान्तत्व-भ्रान्तत्वयोर्निबन्धनम् । क्षीणक्लेशस्य ज्ञानमभ्रान्तम्, अन्यस्य भ्रान्तमिति । तन्न, यस्मात् सक्लेशसन्ततेरपि अविद्यादिकलुषज्ञानसन्तानस्यापि भवन्मते विभागो भ्रान्ताभ्रान्तत्वव्यवस्थाऽस्ति । तस्यैव हि पुरुषस्य किञ्चिद् विज्ञानं प्रमाणमिष्यते किञ्चिच्चाप्रमाणम् । स चैष विभागः कथमेकस्मिन्नेव ज्ञानसन्तानेऽविद्याजनितत्वाविशेषे सङ्गच्छते ।

१ घटनम् ॥ २ 'अर्थाभावेऽपि इति कुतो लभ्यम्' इत्यस्य प्रश्नस्य द्वितीयं समाधानमिदं परेणोक्तम् ॥ ३ अर्थाभावसाधकानि ॥ ४ अन्यत् प्रमाणमर्थाभावसाधन गृहीत्यर्थः ॥ ५ सक्लेशसन्ततेरपि विभागोऽस्ति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यान्मतिः—वासना विद्यमानाऽपि यत्र निजरूपानुगुणं कार्यं न करोति तत्र
119B प्रामाण्यव्यवस्थाऽन्यत्र स्वप्रामाण्यस्थितिरिति, तदयुक्तम्, यस्मात् वासनायाः सन्ध्यसन्धी अपीति, वासनायाः सन्धिः स्वानुरूपकार्यकरणम् असन्धिस्तु स्वानुरूपकार्याकरणम्, तावपि सदा सर्वकालं स्याताम्, विशेषकाभावात् सन्ध्यसन्धिलक्षणविशेषकारिणः कस्यचिदपि पदार्थस्याभावात् । तथाहि—विज्ञानतत्त्वमेवैकमिष्यते नापरम्, ततो विज्ञानरूपस्योपादानकारणस्य सर्वदापि सद्भावाद्वासनायाः सन्धिर्वा स्यादसन्धिर्वा, ततो व्यवहारापेक्षयाऽपि सर्वमपि विज्ञानं प्रमाणं वा स्यादप्रमाणं वा । न चैवम्, अतः कादा-
120A चित्कौ वासनासन्ध्यसन्धी कदाचिद्धा विनावुपादानादपरमपेक्षेते स्वोपादानकारणात् किञ्चिदन्यत् प्रत्ययान्तरं कादाचित्कम्, यतः कादाचित्कौ भवतस्तदपेक्षेते । स चास्माकमर्थः ।

अपि च, यदि नार्थस्तत्त्वं तदा किमिति लोकानां तत्र प्रवृत्यप्रवृत्यर्थं प्रमाणाऽप्रमाणलक्षणं कृतम् । यस्मान्नैं चातत्त्वार्थम्, तत्त्वं परमार्थः, न तत्त्वमतत्त्वमर्थक्रियार्थिनामर्थे प्रवृत्ति-निवृत्तिव्यवहारः, तदर्थं तन्निमित्तं विभागप्रणयनप्रयासः प्रमाणाप्रमाणयोर्लक्षणभेदकथनप्रयासः श्रेयान् । सर्वा अपि हि प्रेक्षापूर्वकारिणां प्रवृत्त्यो नानर्थफलाः, किं तर्हि ? परमार्थफलाः, ततो यदि बाह्यार्थः परमार्थ एव न भवति तदा किमिति
120B तत्क्रियार्थिनां तत्र प्रवृत्ति-निवृत्तिहेतवे प्रमाणा-ऽप्रमाणलक्षणं प्रणायि ? तल्लक्षणप्रणयनान्यथानुपपत्त्यापि बाह्यार्थः सिध्यति ।

ननु परमार्थनये जनमवतारयितुं व्यावहारिकप्रमाणा-ऽप्रमाणलक्षणमुक्तम् । विदितव्यावहारिकप्रमाणा-ऽप्रमाणलक्षणो हि पुमान् परमार्थनये समवतरति । यदाहुः—

"पारमार्थिकमपि प्रमाणं न निर्हेतुकम्, न च भावनाव्यतिरिक्तो हेतुः, भावना च सांव्यवहारिकप्रमाणपरिच्छिन्नार्थविषया, ततश्च तत् सांव्यवहारिकं प्रमाणं सम्यग्निरूपितं पारमार्थिकज्ञानहेतुः सम्पद्यते, ततस्तद्विषयो यत्नः परमार्थविषय एव ।
121A मिथ्याज्ञानेन हि विषयीकृता भावा नित्यादिभिराकारैर्भाव्यमाना न पारमार्थिकज्ञाननिबन्धनं भवन्ति, अनित्यादिभिस्त्वाकारैर्भाव्यमाना निबन्धनं भवन्त्येव, तस्मादेतो व्यामोहं व्यावर्त्य परमार्थनयेऽवतारयितव्यो जनः, स्थूलविषयत्वाद्देस्य व्यामोहस्य, एतद्व्यामोहनिवृत्तिपूर्विका च परमार्थप्राप्तिः" [ ] इति ।

तस्मात् परमार्थविवारणफलो विभागप्रणयनप्रयासः कथं न श्रेयान् स्यादिति ?

१ वासनासन्ध्यसन्धी अपि सदा स्याताम्, विशेषकाभावात् ॥ २ कादाचित्कौ तूपादानादपरमपेक्षेते ॥ ३ न चातत्त्वार्थं विभागप्रणयनप्रयासः श्रेयान् ॥ ४ अर्थे ॥ ५ तत्त्वज्ञानम् ॥ ६ सत् ॥ ७ सांव्यवहारिकेण प्रमाणेन ॥ ८ सांव्यवहारिकात् प्रमाणात् ॥ ९ * "प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम् ।" [१।७] इति बौद्धाचार्यधर्मकीर्तिविरचिते प्रमाणवार्तिके ॥ १० नित्यत्वादिरूपस्य ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्र परस्य जडत्वमुपदर्शयन्नुत्तरमाह—अपरमार्थस्य जलधारणाद्यर्थक्रियाकारिणो
121B घटाद्यर्थस्य भावनाऽनित्या-ऽनात्मकादिरूपेण चिन्तनं परमार्थावताराय परमार्थनये जनमव-
तारयितुं प्रभवतीति वदतो वादिनो महती श्रद्धा लक्ष्यते। स्वसिद्धान्तोदितार्थश्रद्धालव एव ह्येवं
वदन्ति न पुनस्तार्किकाः। घटादिरर्थो हि सर्वप्रकारमविद्यमानोऽपि विचित्र भावनाभिर्भाव्यत
इत्येतदपि तावदागमैकशरणैः श्रद्धालुभिरेवावगन्तुं शक्यम्, यत् पुनरसौ तथा भाव्यमानः 5
परमार्थनयावताराय प्रभवति तदत्यन्तश्रद्धावतामपि मनाग् मनसो [1]विचिकित्सामुप-
122A जनयति। अत्रैवार्थे दृष्टान्तमाह— [2]नैं खलु ध्यानशतैरपि विचित्रप्रकारध्यानैरपि भाविता
मरीचिकाः पयसीभवन्ति पयोऽर्हामर्थक्रियां कुर्वन्ति। अपि च, मरीचिकानां पयसश्च
स्वलक्षणत्वाद्यापि कथमपि ध्यानानुभावतो मरीचिकाः पयसीभवन्ति इति श्रद्धीयते,
घटादयस्तु भावाः सर्वथाऽप्यपरमार्थसन्तो भाव्यमानाः परमार्थहेतवो भवन्तीत्येतच्छ्रद्धा- 10
गम्यमपि न भवति। तदर्थापलापिनां परमार्थावतारार्थमपि बाह्यार्थप्रवृत्तिनिवृत्तिहेतु-
प्रमाणाप्रमाणलक्षणप्रणयनं न साधीयः। [3]तैत् तस्मादर्थ एव बाह्यार्थे घटादौ सत्येव
सर्वं साधीयः सर्वं प्रमाणेतरव्यवस्थादिकं युक्तं भवति।

122B ननु यदि बाह्यार्थः परमार्थस्तदैकरूप एव शब्दादिरर्थः कथमेककालं जन्तूनां
प्रीति-सन्तापादिहेतुर्भवति। तथाहि—तेनैव गीतध्वनिना हरिणो ह्रियते, प्राणिविशेषः 15
पुनः कोऽपि श्रवणादेव दुःखी भवति, तथा तेनैव गन्धेन मनुष्यः सुकरश्च, तथा
तेनैव रसविशेषेण लवणाख्येनोष्ट्रो मनुष्यश्च, तथा श्लेष्मप्रकृतिः पित्तप्रकृतिश्च यथा-
योगं सुखी दुःखी च भवति। तस्माद्यथैकोऽर्थो नीला-ऽनीलरूपो न भवति नीलत्वा-
ऽनीलत्वयोर्विरोधात्तथा नैकोऽर्थ इष्टानिष्टरूपो भवति, तयोर्विरोधादेव। भवति
चैकस्मिन्नप्यर्थे बहूनां प्रतिपत्तॄणां युगपदिष्टाद्याभासः [4]प्रैत्ययः, ततो नार्थः परमार्थ इति। 20

अत्रोच्यते—

**स द्रव्याद्याहितविश्वशक्तिः क्रमाक्रमाभ्यां सातासातोदय-
क्षयहेतुः। सदसद्रूपते अपि यत्रैकत्र कस्तत्रान्यानवसरः?**

123A [5]सैं इति स शब्दादिरर्थो द्रव्याद्याहितविश्वशक्तिर्द्रव्य-क्षेत्र-भावैः सहकारिभिरुप-
[6]जनितविचित्रपरिणामः क्रमाक्रमाभ्यां पर्याय-यौगपद्याभ्यां सातासातोदयक्षयहेतुः, सातं 25
सातवेदनीयं कर्म, तदितरदसातम्, तयोरुदयो विपाकः फलदानकालः, क्षयो नाशः,
तयोर्हेतुर्निमित्तं भवति। शब्द-गन्ध-रसादिरर्थो हि द्रव्यादिभिराहितविचित्रशक्तिर्युगपत्

१ अपरमार्थभावना परमार्थावतारायेति महती श्रद्धा ॥ २ जुगुप्साम् ॥ ३ न खलु ध्यान-
शतैरपि भाविता मरीचिकाः पयसीभवन्ति ॥ ४ तदर्थ एव सर्वं साधीयः ॥ ५ प्रतिभासः ॥
६ ज्ञानम् ॥ ७ स द्रव्याद्याहितविश्वशक्तिः क्रमाक्रमाभ्यां सातासातोदयक्षयहेतुः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्रमेण वा जन्तूनां यदि प्रीति-तापादिकमुपजनयति तदा को दोषः । एकरूपत्वे हि भावानामेतद्विरुध्यते, नानेकरूपत्वे ।

नन्वेको युगपद्विरुद्धक्रियाद्वयकारी कथं घटत इति, उच्यते– सदिति, सद्रूपता
123B सत्त्वमसद्रूपता चासत्त्वम्, अपिरतिशयोक्तौ, एकस्यैव तावद् युगपत् सत्त्वासत्त्वे दुरुपपादे, ततस्ते अपि यत्रास्मत्सिद्धान्ते एकत्रैकस्मिन् वस्तुन्यङ्गीक्रियेते, कस्तत्राघटमानविधान- 5
पटीयसि सिद्धान्तेऽन्यानवसरोऽन्यस्य युगपद्विरुद्धप्रीति-तापादिक्रियाहेतुत्वस्यानवकाशः स्यात्, अवकाश एवेत्यर्थः । यथैकमपि घटादिवस्तु सामान्यविशेषात्मकं सदसद्रूपमभिलाप्यानभिलाप्यं नित्यानित्यं च युगपदेव भवति प्रमाणेन तथैव प्रतीयमानत्वात् प्रमाणप्रतीते चार्थे विरोधाभावात् तथैकोऽपि शब्दादिर्यदि युगपदनेकस्य क्रमेणैकस्य प्रीति-सन्तापहेतुर्भवति तदा भवतु नाम, को दोषः, तस्य तथैव स्वहेतुभ्यः समुत्पादात् । 10
इदमत्र रहस्यम्–एक एवार्थ एकस्मिन्नेव समये एकस्यैव पुंसः प्रीति-तापादिहेतुर्भवन् विरुध्यते, न पुनरेकस्यैव समयभेदेन समयाभेदेऽपि वानेकस्य । एकश्चैकदैकस्यैव प्रीति-तापादिहेतुर्नास्त्येव, ततः कुतो विरोध इति ।

अत एवाणोरेकस्य षडंशतापि । भावभेदेऽप्येकत्वमविरोधि, स्यादभेदात् । अणुत्वं च, अल्पतराभावात् । तन्निबन्धनः स्कन्धोऽपि एकानेकात्मकः । तत् नानारूपत्वात् क्रमज्ञानं नानासन्तानजन्यम्, अन्यथाऽहेतुत्वमपि । 15

124A अत एवेति । यत एवैकोऽपि प्रीति-तापादिहेतुर्यत एव चैकस्मिन्नपि घटादौ सदसद्रूपते भवतः अत एवास्मादेव निदर्शनादणोः परमाणोरेकस्यापि द्रव्यरूपतयाऽद्वयस्यापि षडंशतापि षड्दिग्योगेन षट्स्पर्शपर्यायवत्तापि भवति । यथैकस्य विरुद्धा- 20
नेककियाकारित्वं सदसद्रूपत्वं वा न विरुध्यते युक्तिभिरुपपादितत्वात् तथैकस्याप्यणोरनेकांशत्वं न विरुध्यत एव । नन्वंशा द्रव्याभेदिनस्तत्कथं परमाणुद्रव्यमनेकमेव न
124B स्यादिति । न, भावभेदेऽपि भावरूपांशानामनेकत्वेऽपि एकत्वमविरोधि, परमाणुद्रव्यस्यैकत्वं न विरुध्यते । स्यात् कथञ्चित् परमाणुद्रव्यतो भावांशानां भेदात् । यदि हि द्रव्य-पर्याययोरेकान्तेनैवाभेदो भवेत् तदानेकपर्यायाभेदेन द्रव्यस्यैकत्वं 25

१ सदसद्रूपते आपे यत्रैकत्र, कस्तत्रान्यानवसरः ?॥ २ पुरुषस्य प्रीति-तापादिहेतुः ॥ ३ *नानारूपसन्तानजन्यम्, अन्यथाऽहेतुत्वमिति इति मूलादर्शे पाठः ॥ ४ अत एवाणोरेकस्य षडंशतापि ॥ ५ स्पर्शः संयोगमात्रम् ॥ ६ प्रीति-तापादि ॥ ७ भावभेदेऽपि एकत्वमविरोधि स्यादऽभेदात् ॥ ८ * अत्र मूलादर्शे टिप्पणे च 'अभेदात्' इति पाठो वर्तते । टीकायां तु भेदा इति लिखित्वा तदनन्तरं चत्वारि पञ्च वा अक्षराणि घृष्टानि वर्तन्ते, ततः परं त् इति वर्तते ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सर्वथाऽपि हीयेत । यदा तु भेदोऽप्यस्ति तदैकत्वमपि न विरुध्यते। अणुत्वं चाऽविरोधीति सम्बन्धः । अल्पतरामावात् , विवक्षितादणोरन्यस्य कस्यचिदप्यल्पस्याभावात् । परमाणवो हि भावांशैः सांशा अप्यनेकत्वं स्थूलत्वं च न भजन्ते, द्रव्यांशैरेव सांशस्य तद्रूपत्वात् । एतेन यदुक्तम्–

"मध्यव्यवस्थितस्याणोः पूर्व-पश्चिम-दक्षिणोत्तरा-ऽधोर्ध्वव्यवस्थितैः परमाणुभिर्योगो ऽस्ति । न चैकेनैव रूपेण सर्वैरपि सम्बध्यते, यदि हि यत्रासौ सम्बध्यमान एको व्यवस्थितस्तत्रापरोऽपि भवेत्तदा स्यादेकेनैव रूपेण सर्वेषामभिसम्बन्धः । तच्च नास्ति, परमाणूनां सप्रतिघत्वात् । अस्ति चाभिसम्बन्धः । ततो मध्यव्यवस्थितस्य षडंशत्वप्रसङ्गः" [ ] इति ।

तदबाधकमेव, भावांशैः सांशत्वस्याभ्यनुज्ञानात् । न चाणुत्वव्याघातः, अल्पान्तरस्यामावात् । यदा तु परमाणवः स्कन्धोपादानकारणमेकानेकात्मकाः सिद्धास्तदा
125A तैन्निबन्धनस्तज्जन्मा स्कन्धोऽपि स्कन्धरूपो घटादिरप्यर्थ एकानेकात्मकः प्रमाणोपपन्नो जातः, कारणावैतथ्ये हि कार्यस्यावितथत्वात् ।

सम्प्रत्युपसंहरन्नर्थसाधकमनुमानमाह–तदिति । नानारूपत्वाद् विचित्ररूपत्वात् क्रमेज्ञानं नानासन्तानजन्यम्, एकसन्ततिविज्ञानानि विचित्राणि विभिन्नविजातीयकारणसन्तानकार्याणि। अन्यथेति यदि नानासन्तानजन्यत्वं नेष्यते तदा निर्हेतुकत्वं नानारूपत्वस्याऽहेतुत्वं
125B स्यात्। कार्यनानात्वं हि कारणनानात्वेन व्याप्तम्, कारणनानात्वं च सन्ताननानात्वम्, न पुनः क्षणनानात्वम् । न खलु क्षणभेदात् कार्यभेदो युक्तो यतः प्रबन्धवति चक्षुर्विज्ञानोत्पादे परस्परविभिन्ना अपि चक्षुःक्षणा एककार्यकारिणो दृश्यन्ते, हेतुप्रत्ययसन्तानाविशेषात्। तस्माद् यद्भेदेऽपि यन्न भिद्यते न तत् तद्भेदभेदम्, यथा बीजभेदे धूमः। क्षणभेदेऽपि च कार्यमभिन्नमतो न तथा । सन्ताननानात्वं पुनः कार्यनानात्वं न कदाचिदपि व्यभिचरति । ततः कारणसन्ताननानात्वेन कार्यनानात्वं व्याप्तम् । अस्ति चैकस्यामपि सन्ततौ नील-पीतादिभेदेन ज्ञाननानात्वम् । ततस्तदपि विजातीयभिन्नसन्तानजन्यम्, ज्ञानसन्तानाच्च विजातीयः सन्तानोऽर्थ एव । यदवोचाम–

---

१ तन्निबन्धनः स्कन्धोऽपि एकानेकात्मकः ॥ २ तन्नानारूपत्वात् क्रमेज्ञानं नानासन्तानजन्यम् ॥ ३ नीलपीताद्यर्थ ॥ ४ अन्यथाऽहेतुत्वमपि ॥ ५ उपादान-सहकारिसन्ताना ॥ ६ तद्भेदात् भेदो यस्य ॥ ७ बहुभिः शाल्यादिभिर्भिन्नैर्यथा दह्यमानैरपि एक एव धूमो भवन् [न] तद्भेदभेदी मण्यते ॥ ८ क्षणभेदभेदी ॥ ९ ज्ञानसन्ततौ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"[1]सहेतुरेकत्र विदां विचित्रता [2]निमित्तिभेदो हि [3]निमित्तभेदतः ।
[4]सहोपलम्भस्तु [5]सहावधारणः [6]स्ववित्तिवित्तिप्रसवप्रभावितः ॥"

126A तदयं नानामन्तानजन्यत्वे साध्ये नानारूपत्वादिति हेतु[:] स्वभावः । निर्हेतुकत्वप्रसङ्गो विपक्षे बाधकम् ।

न चावस्तु प्रतिभासः, विकल्पस्य सम्यगनुभवत्वात् अदुष्टेन्द्रियजत्वात् तदविनाभावात् । क्वचिदविकल्पस्यापि व्यभिचारः ।

अथामी परमाणवो वस्तुमन्तो भवन्तु, निर्विकल्पकबुद्धौ प्रतिभासनात् । स्कन्धस्तु वास्तवो न युक्तः, तद्ग्राहिणो विकल्पस्यावस्तुविषयत्वेन तस्यावस्तुत्वादिति । तन्न । यतो नावस्तु अपरमार्थमन् प्रतिभासो विकल्पस्य सम्यगनुभवत्वात् सम्यग्ज्ञानरूपत्वात् । सम्यगनुभवत्वं चाऽदुष्टेन्द्रियजत्वात्, काचकामलादिदोषैरनुपहतेभ्य इन्द्रियेभ्यः समुत्पादात् । अदुष्टेन्द्रियजत्वं च तदविनाभावात् तैरदुष्टेन्द्रियैर्विनाऽभावादनुत्पादाद् विकल्पस्य,
126B न खलु पुरोवस्थितघटग्राहि घटोऽयमिति ज्ञानमिन्द्रियाभावे कदाचिदपि प्रादुरस्ति । तददुष्टेन्द्रियजत्वेन सम्यगनुभवत्वान्निश्चयात्मिका धीः प्रमाणम् । तथा च तत्प्रतिभासो वस्त्वेव, ततः कथं स्कन्धो वस्तु न स्यात् ।

ननु मरीचिकायामिन्द्रियजोऽपि जलविकल्पो भ्रान्तो दृष्टस्ततोऽन्यत्रापि भ्रान्तत्वशङ्का न निवर्त्तत इति । न । यतः [7]कचित् कस्याश्चिदवस्थायामविकल्पस्यापि निर्विकल्पकस्यापि व्यभिचारोऽर्थाभावेऽप्युत्पादो भ्रान्तत्वं विद्यते । चन्द्रद्वयावभासिनी हि निर्विकल्पिकाऽपि धीर्भ्रान्ता । न चास्यां भ्रान्तायामन्या अपि निर्विकल्पिका धियो भ्रान्ता एव । तथा यद्यपि किञ्चिदेकं विकल्पज्ञानं भ्रान्तमजनिष्ट तथापि नान्यानि सर्वाण्यपि भ्रान्तान्येव ।

127A स्यादेतत्—घटोऽयमिति ज्ञानमिन्द्रियजमप्यर्थान्नोत्पद्यते, व्यवधानेनोत्पादात् । लोचनोन्मीलोन्मीलनान्तरं हि प्रथमं निर्विकल्पकमुदयते, ततः सांकेतिकशब्दानुस्मरणम्, ततः शब्दयोजनम्, ततो विकल्पोत्पादः । तदुक्तम्—

१ प्रसः [=प्रथमसमासो बहुव्रीहिरित्यर्थः] । **सहेतुः** सहेतुका **विचित्रता** एकत्र एकस्यां ज्ञानसन्ततौ **विदां** ज्ञानानाम् ॥ २ कुतः ॥ ३ निमित्तं विद्यते येषां तानि **निमित्तीनि** ज्ञानानि तेषां भेदो नानात्वम् ॥ ४ कारण ॥ ५ **सहावधारण** इति सहाऽवधारणेन नियमेन वर्तते सहावधारणः, सहोपलम्भनियम इत्यर्थः, ज्ञानार्थयोः सहोपलम्भनियम इत्युक्तं भवति ॥ ६ **सह वित्त्या** ज्ञानेन वर्तते या **स्ववित्तिर्ज्ञानं**, स्वसंविदितं ज्ञानमित्यर्थः, तस्य **प्रसव** उत्पादः, तत्प्रभावात् ॥ ७ स्कन्धस्य ॥ ८ **न चावस्तु प्रतिभासो विकल्पस्य सम्यगनुभवत्वात्** ॥ ९ **क्वचिदविकल्पस्यापि व्यभिचारः** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

" अर्थोपयोगेऽपि पुनः स्मार्त्तं शब्दानुयोजनम् ।
अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् ॥" [प्रमाणविनिश्चयः पृ० २५३ A पं० १] इति ।

अत्रोच्यते–

न चार्थस्य स्मृत्यादिव्यवधा, आविष्टाभिलापस्यास्य यथा- 5
सङ्केतक्षयोपशमुपादानभेदादुत्पादात्, अन्तर्बहिर्भाषाद्रव्येभ्यो वा ।

न चार्थस्य ग्राह्यस्य स्मृत्यादिभिर्विकल्पोत्पादे व्यवधा ? आदिशब्दाच्छब्दयोजना-
127B परिग्रहः । यस्मादाविष्टाभिलापस्य शब्दोल्लेखसम्पृक्तस्य यथासङ्केतक्षयोपशममिति सङ्केतेन क्षयोपशमस्तस्यानतिक्रमेण यथासङ्केतक्षयोपशमम् । उपादानं परिणामिकारणम्, उपादानमेव भिद्यते विशिष्यतेऽन्यस्मादित्युपादानभेदः, तस्माद्विकल्पस्योत्पादात् । स एष 10
कोऽपि क्षयोपशमस्यातिप्रकर्षो य एकदा सङ्केतप्रभावितः स्मरणादिव्यवधानानपेक्ष एव निश्चयज्ञानमुत्पादयति तथैवानुभवात् । तदुक्तम्–

"न हि सर्वत्रैव स्मृत्यपेक्षो वाच्ये वाचकप्रयोगः तथाऽननुभवात्, अन्तर्जल्पाकारबोधोपलब्धेः" [अनेकान्तजयपताकायां तृतीयेऽधिकारे पृ० १८०] इति ।

इदमुक्तं भवति–ज्ञानधर्मः कश्चिद्ग्राह्याधीनो यथाऽर्थग्रहणपरिणामः, बोह्याद्ते 15
तदनुपपत्तेः । कश्चित् तद्विपरीतो यथा बोधरूपत्वम्, बाह्यानपेक्षादपि परिणामिमात्रात्
129A तदुत्थानात् । तद्वदयं शब्दोल्लेखोऽपि विशिष्टक्षयोपशमाहितज्ञानधर्मः परिणामिमात्रभावी बाह्यनिरपेक्षः । अत एव सविकल्पानुयायी । शब्दग्रहणपरिणामस्तु यो ज्ञानधर्मः स बोह्यं ग्राह्यमनुरुणद्धि । अत एव श्रोत्रविज्ञान एवास्य सम्भवः । अन्यो हि शब्दोल्लेखः, अन्यश्च शब्दग्रहणपरिणाम इति । 20

१ विकल्पज्ञानम् ॥ २ * न्यायमञ्जरी–न्यायवार्तिकतात्पर्यटीका–सम्मतिटीका–सिद्धिविनिश्चयटीकादिग्रन्थेषूद्धृतोऽयं श्लोकः ॥ ३ * द्रव्येभ्योऽपि वा इति मूलादर्शे पाठः ॥ ४ न चार्थस्य स्मृत्यादिव्यवधा ॥ ५ आविष्टाभिलापस्यास्य यथासङ्केतक्षयोपशमम् उपादानभेदात् उत्पादात् ॥ ६ ज्ञानरूपम् ॥ ७ अनेकान्तजयपताकासूत्रम् ॥ ८ अननुभवोऽपि कुतः ? अन्तर्जल्पाकारः शब्दोल्लेखो यत्र, स चासौ बोधश्च, अन्तःशब्दोल्लेखवान् बोधः ॥ ९ बाह्यमर्थं विना ॥ १० ज्ञानरूपात् ॥ ११ बोधरूपत्व ॥ १२ जनित ॥ १३ ज्ञानरूपपरिणामिमात्रभावी ॥ १४ * °रिणाममात्रभावी इत्यतः 129 A पत्रस्य प्रारम्भः, 128 पत्राङ्कस्य यद्यपि प्रमादादिना केनापि कारणेन अत्राभावः, तथापि ग्रन्थोऽत्र अखण्डित एव भाति ॥ १५ मानसस्पर्शनादि ॥ १६ शब्दोल्लेखोऽन्तर्जल्पाकारः ॥ १७ शब्दलक्षणमर्थम् ॥ १८ अयं घट इति बहिर्मुखप्रतिभासात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु बाह्यतयाऽध्यवसीयते शब्दोल्लेखः । तदयं बाह्यव्यवस्थानिबन्धनत्वेन बाह्यकृतः। अन्यथा नीलादिप्रतिभासोऽपि तथा न प्राप्नोति । बाह्यतयाऽध्यस्तस्य ह्याकारस्य बाह्यव्यवस्थानिबन्धनस्य बाह्यकृतत्वं व्यापकं बाह्यार्थवादिनः । न चायमप्यर्थेनैव जन्यते । जनकत्वं हि भेदैकत्वेन व्याप्तम्, कारणभेदस्याभेदैकत्वे विश्वस्याभेदकत्व-प्रसङ्गात् । अर्थान्तरकार्यस्य चाधानमभेदकत्वम् । अतो विरुद्धव्याप्तोपलब्ध्या शब्दोल्लेख- 5
129B जनकत्वमर्थस्य प्रतिषिध्यते । तदस्याऽर्थादन्यो बाह्यः शब्दो जनकः । न चेन्द्रियाद् विज्ञानोत्पादकालेऽर्थात्मानोऽर्थसन्निधौ वा शब्दाः सन्ति । तदिन्द्रियार्थोत्पन्नं ज्ञान-मविकल्पकमेव । सविकल्पकं तु मानसं विज्ञानमर्थेन्द्रियानपेक्षमिति ।

अत्राह–अन्तरिति उत्पादादिति योगः । वाशब्द उपादानभेदापेक्षः । यद्यु-पादानभेदात् स्मृत्यादिव्यवधानानपेक्षस्य विकल्पस्याविष्टाभिलापस्योत्पादो न घटते 10
तदाऽन्तरुपादानसमीपे बहिर्ग्राह्यार्थसन्निधौ यानि भाषाद्रव्याणि शब्दपरिणामयोग्याः पुद्गलास्तेभ्यो वा घटताम् ।

अयमर्थः– अर्थादर्थग्रहणपरिणामः, भाषाद्रव्येभ्यस्तु शब्दोल्लेखः । यदि चायं
130A बाह्यतयाऽध्यवसीयते तदा बाह्यकृतोऽस्तु नाम । बाह्यव्यवस्थानिबन्धनं तु न भवत्येव, ग्रहणपरिणामो हि बाह्यव्यवस्थानिबन्धनम्, अयं तु शब्दोल्लेखः । अन्यो हि ज्ञानस्य 15
शब्दग्रहणपरिणामोऽन्यश्च शब्दोल्लेखः । न च [13]जन्यत्वादर्थग्रहणपरिणामवदयमपि ग्रहणपरिणाम एव किं न भवतीति वाच्यम् । न हि यावता ज्ञाने [14]व्यापारस्तावता ग्रहणपरिणामो ज्ञानस्य, इन्द्रियैर्व्यभिचारात् । ततो बाह्यतयाध्यवसीयमानौ ज्ञानस्य शब्दार्थोल्लेखौ बाह्यकृतावित्यत्र नास्ति विप्रतिपत्तिः ।

अपि च, शब्दोल्लेखस्य बाह्यतयाऽध्यवसायः किमर्थं[15]मेना यथा 'नीलाकारं मे 20

१ शब्दोल्लेखो बाह्यकृतः, बाह्यव्यवस्थानिबन्धनत्वात्, यथा नीलाकारादि ज्ञानम् ॥ २ बाह्यत्वेन ॥ ३ शब्दोल्लेखः ॥ ४ कारणान्तरजन्यकार्याजनकत्वेन । कोऽर्थः ? सर्वमपि कारणम् आत्मीयं नियतं कार्यं जनयति, न तु भिन्नकारणजन्यं कार्यमिति ॥ ५ कारणान्तरजन्यकार्याजनकत्वे इष्यमाणे ॥ ६ अर्थान्तरं शब्दः, तस्य कार्यं शब्दोल्लेखः, तस्य आधानं करणं यत्र बाह्येन वस्तुना तदभेदकत्वम् ॥ ७ विवादाध्यासितो नीलादिरर्थो नीलादिशब्दजन्यशब्दोल्लेखजनको न भवति, भेदकत्वात्, कारणान्तरजन्यकार्याजनकत्वात् । अत्र प्रतिषेध्यं शब्दोल्लेखजनकत्वम्, तस्य विरुद्धमजनकत्वम्, तेन शब्दोल्लेखाजनकत्वेन विशेषेण सामान्यं कारणान्तरजन्य-कार्याजनकत्वं व्याप्तम्, तस्योपलब्धिः, तया ॥ ८ शब्दोल्लेखस्य ॥ ९ न तदुत्पत्तिरपि ॥ १० अन्तर्बहिर्भाषा-द्रव्येभ्यो वा ॥ ११ नार्थः शब्दजन्यशब्दोल्लेखजनकः, अभेदकत्वप्रसङ्गात् । प्रतिषेध्यस्य जनकत्वस्य विरुद्धमजनकत्वम्, तेन व्याप्तस्याभेदकत्वस्योपलब्धिप्रसङ्गः ॥ १२ ज्ञानलक्षणस्योपादानस्य समीपे ॥ १३ कार्यत्वात् ॥ १४ शब्दोल्लेखः ॥ १५ जन्यत्वाविशेषात् ॥ १६ जनकत्वव्यापारः ॥ १७ सम्बन्धित्वेन ॥ १८ अर्थरूपेण ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

130B ज्ञानमुत्पन्नमतो नीलेन भाव्यम्,' उत शब्दात्मना यथा 'शब्दाकारं मे ज्ञानमुत्पन्नवतः शब्देन भाव्यम्' इति ? उभयथाप्यसिद्धिः । न हि शब्दोल्लेखो बहिस्थघटवस्तुतया बहिस्थघटशब्दतया वाऽध्यवसीयते । किन्तु बहिस्थं घटवस्तु घटशब्दवाच्यमित्येवम् । एतच्चोपादानभेदजनितत्वे वा भाषाद्रव्यजनितत्वे वा शब्दोल्लेखस्य घटते, किं बहिः शब्दसन्निधाना-ऽसन्निधानाभ्याम् । न [2]चैवं निर्विकल्पकेऽपि शब्दोल्लेखप्रसङ्गः । सत एव हि शब्दोल्लेखस्य कारणं मृग्यते, न पुनरसतः समुत्पादः । न चाप्यवश्यं कारणानि कार्यवन्त्येव । तन्न भाषाद्रव्याणि निर्विकल्पकेऽपि शब्दोल्लेखमुपजनयन्ति । 5

सम्प्रति यद्यस्माद् ज्ञाने भवति तद् दर्शयति—

अवहितेन्द्रियस्य बोधात् तत्त्वम् । अर्थात् तद्ग्रहणपरिणतिः । भाषाद्रव्येभ्यः 'अहिरहिः' इत्यभिलापोल्लेखः । अन्यथा स्मृतावपि स न स्यात् । 10

[3]अवहितेति परिच्छेदं प्रत्यवधानवन्तीन्द्रियाणि यस्य तथाभूतस्य प्रतिवस्तु-बोधात् बोधरूपात् परिणामिकारणादात्मन इत्यर्थः तत्त्वं विकल्पज्ञाने बोधरूपत्वम् ।

तथाऽर्थाद् विषयात् तस्याऽर्थस्य [4]ग्रहणपरिणतिः परिच्छेदपरिणामो विकल्पज्ञाने भवति । 15

तथा [5]भाषाद्रव्येभ्यः शब्दपरिणामयोग्यपुद्गलेभ्योऽहिरहिः सर्पः सर्प इत्येवं योऽभिलापः शब्दस्तस्य विकल्पज्ञाने [6]उल्लेखो भवति । तस्माद् यथाऽर्थसन्निधानवशतोऽर्थग्रहणपरिणामो ज्ञाने भवति तथा भाषाद्रव्यसन्निधानतः शब्दोल्लेखः । एतेन यदुक्तम्—

"[7]तद्धर्थसामर्थ्येनोत्पद्यमानं तद्रूपमेवानुकुर्यात्, न ह्यर्थे शब्दाः सन्ति तदात्मानो वा येन [8]तस्मिन् प्रतिभासमाने "[9]तेऽपि प्रतिभासेरन्" [प्रमाणविनिश्चयः पृ० २५२ B] 20 इति,

131B तत् प्रत्युक्तम् । यतो यद्यप्यर्थात्मानो न भवन्ति शब्दास्तथाप्यर्थसमीपे भाषाद्रव्याणि सन्तीति ।

१ एतच्च शब्दोल्लेखस्वरूपं 'बहिःस्थं घटवस्तु घटशब्दवाच्यम्' इति ॥ २ ज्ञानविशेष ॥ ३ शब्दोल्लेखस्य भाषाद्रव्येभ्यो जनितत्वेऽङ्गीक्रियमाणे ॥ ४ **अवहितेन्द्रियस्य बोधात् तत्त्वम्** ॥ ५ **अर्थात् तद्ग्रहण-परिणतिः** ॥ ६ कर्म ॥ ७ **भाषाद्रव्येभ्योऽहिरही(ऽहिरहिरि ?)त्यभिलापोल्लेखः** ॥ ८ विकल्पज्ञानं शब्दोल्लेखात्मकम् ॥ ९ अर्थ ॥ १० अर्थे ॥ ११ शब्दाः ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्यथेति यदि स्मृत्युपनीतं शब्दं विना ज्ञाने शब्दोल्लेखो नेष्यते तदा स्मृतावपि स न स्यात् । गृहीतसङ्केतस्य हि पुंसो घटशब्दो घटवाचक इत्येवमर्थे शब्दनियोजनरूपं स्मरणमुत्पद्यते । न च तदानीं स्मृत्यन्तरं साक्षाच्छब्दो वास्ति । ततः स्मृत्युपनीतं शब्दमन्तरेण नार्थे शब्दनियोजनमित्यस्य स्मृत्यैव च व्यभिचारः । तेन यदुक्तम्—

"शब्दस्य सङ्केतकालभावितत्वं स्मरणं च व्यापकम् । व्याप्यं शब्देन विशिष्टत्वग्रहणमर्थस्य । ततो न सङ्केतं तैस्तस्मरणं चान्तरेण शब्देन विशिष्टो गृह्यते" [प्रमाणविनिश्चयटीका पृ० ५७ A पं० ४] इति,

132A तत् प्रत्युक्तम्, योग्यदेशावस्थितादर्थाद्वाचकशब्दस्मरणेन सविकल्पकेन व्यभिचारात् । तद् यथा किञ्चिदतिस्वभ्यस्तविषयं विज्ञानं प्रमाणान्तरसंवादव्यवधानमन्तरेणापि स्वतः प्रमाणम्, अन्यच्चानभ्यस्तविषयं प्रमाणान्तरसंवादव्यवधानेन परतः, तथाऽनेकधा व्यापारितशब्दस्य किञ्चिदर्थे निश्चयविज्ञानमनपेक्षितस्मृत्यादिव्यवधानमुत्पद्यते, तद्विपरीतं चान्यथा ।

अपि च, स्मृत्यादिव्यवधानेनार्थो जनयतीत्यल्पमिदमुच्यते, निर्विकल्पकस्यापि व्यवधानेनैवाऽस्माभिरुत्पादाभ्युपगमात् । सर्वोऽपि ह्यर्थः साक्षाज्ज्ञानावरणीयकर्मक्षयोपशमं जनयति ततो ज्ञानम् । अत एव क्वचिदिन्द्रियार्थसन्निपातेऽपि न ज्ञानोद्भवः ।

132B किञ्च, सर्वमपि कारकमवान्तरव्यापारेषु कर्तृत्वमनुभूय विवक्षितं कर्म करोति । अर्थस्यापि च सविकल्पकज्ञानोत्पादे स्मृत्यादयोऽवान्तरव्यापाराः । न च व्यापाराः कारकं व्यवदधति । लोकशास्त्रप्रसिद्धानां कारकाणामुच्छेदप्रसङ्गात् । तदर्थो यद्यपि स्मृत्यादिकमावहन्नेव विकल्पमुपजनयति तथापि साक्षादेव जनकः । कारणस्य ह्यन्तरे कारणान्तरापाते व्यवधानं न व्यापारापाते । न च योग्यदेशस्थादर्थाद् विज्ञानोत्पादेऽर्थान्तरमन्तरा प्रविशति, स्मृत्यादयस्त्ववान्तरव्यापारा नार्थान्तरम्, तावत एव समुदायस्य विकल्पोत्पादहेतुत्वात् । ततो यदुच्यते—

"अपेक्ष्यमाणत्वं साक्षाज्जनकत्वेन व्याप्तम्, परम्परयाऽतीतस्यापि व्यापारदर्शनात् । तद्भावभावित्वमेव ह्यपेक्षा । साक्षाच्चाजनकत्वे तद्भावभावित्वस्याभावः" 133A [प्रमाणविनिश्चयटीका पृ० ६१ B] इति,

१ अन्यथा स्मृताविप स न स्यात् ॥ २ आविष्टाभिलापो योऽर्थो गृह्यते तद् व्याप्यमित्यर्थः ॥ ३ शब्द ॥ ४ वाचकशब्दस्मरणं विनापि अभ्यासदशायां सविकल्पकमुत्पद्यत इत्यर्थः ॥ ५ तस्मात् ॥ ६ सविकल्पकं ज्ञानं कर्म ॥ ७ अभ्युपगम्यापि स्मृत्यादीनामव्यवधायकत्वमाह ॥ ८ '५' [=तस्मात्] ॥ ९ कारणभाव एव भाविस्वं कार्यस्य ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तन्निसारम्, अवान्तरव्यापारैस्तद्भावभावित्वस्यानिषेधात्। व्यापारवत एव हि निमित्तस्य कार्यं प्रति निमित्तत्वात्। यदि चापेक्ष्यमाणत्वं साक्षाज्जनकत्वेन व्याप्तं न तर्ह्यनुमानं लिङ्गमपेक्षेत, स्वरूपनिश्चय-सम्बन्धस्मरणव्यवहिताल्लिङ्गाल्लिङ्गिज्ञानोत्पत्तेः। अतीतस्य तु
133B भाव एव नास्तीति कुतस्तद्भावभावित्वचिन्ता। तदपि च परम्पराकारणमिष्टमेव। तस्मादर्थादुत्पद्यमाने विकल्पे शब्दोल्लेखः स्मृताविव स्मृत्याद्यनपेक्षो वा स्मृत्यादि- 5
सापेक्षो वा भवतु, न कश्चिद्विरोधः। एवं चैतदपि प्रत्युक्तम्–

"विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम्।
गृहीत्वा सङ्कलय्यैतत् तथा प्रत्येति नान्यथा॥
सङ्केतस्मरणोपायं दृष्टेसङ्कलनात्मकं।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम्॥" [प्रमाणविनिश्चयः पृ० २५३] इति। 10

134A सर्वस्यापि विशेषणादिग्रहणस्यावान्तरव्यापारत्वेन सहकारित्वेन चाव्यवधायि(यि?)-कत्वात्।

ननु यदि ग्राह्यार्थसमीपवर्तीनि शब्दपरिणामयोग्यपुद्गलद्रव्याणि विज्ञाने शब्दोल्लेखमुपकल्पयन्तीत्युच्यते, तदाऽर्थवच्छब्दोऽपि चाक्षुषादिविज्ञाने प्रतिभातीत्यायातम्। न चैतद्युक्तम्, श्रोत्रविज्ञानस्यैव शब्दविषयत्वादित्यत आह– 15

उच्चार्यमाणो ध्वनिस्तज्जन्मा अन्य एव। स एव च श्रावणः।

उच्चार्यमाणस्तालुवोष्ठपुटसंयोगेन पुरुषेण निष्पाद्यमानो ध्वनिः शब्दस्तेभ्यो भाषाद्रव्येभ्यो जन्म यस्यासौ तज्जन्मा, भाषाद्रव्यैः परिणामिकारणत्वेन निष्पादित इत्यर्थः,
134B अन्य एव विकल्पप्रतिभासिशब्दोल्लेखादन्यजातीय एव। ततश्च यद्यपि शब्दोल्लेखवच्चाक्षुषादि ज्ञानमुपजायते तथापि न शब्दो विषयः, तद्ग्रहणपरिणामस्य श्रोत्रज्ञान एव भावात्। 20

१ विपक्षे बाधकमाह॥ २ धूमत्वेन निश्चितो धूमः॥ ३ °स्मरणाभ्याम्॥ ४ जात्यादि॥ ५ व्यक्त्यादि॥ ६ समवायादि॥ ७ पूर्वं विशेषणं गृह्यते पश्चाद्विशेष्यमितियादिक्रमभावो लौकिकी स्थितिः॥ ८ तेन रूपेण प्रत्येति घटोऽयं पटोऽयमिति॥ *कारिकेयं **प्रमाणवार्तिके** [२।१४४]ऽपि विद्यते। **न्यायमञ्जरी-न्यायवार्तिकतात्पर्यटीका-सम्मतिटीका-सिद्धिविनिश्चयटीकादिग्रन्थेष्वपि** उद्धृतेयं कारिका॥ ९ 'ह' [=विग्रहे षष्ठयन्तम्]॥ १० विकल्पनम्॥ ११ निर्विकल्पके॥ १२ विकल्पनम्॥ ● इयं कारिका **प्रमाणवार्तिके** [२।१७४]ऽपि विद्यते। **सम्मतिटीकादिग्रन्थेष्वपि** उद्धृतेयं कारिका॥ १३ समाधिः॥ १४ सहकारिभावेन॥ १५ भाषाद्र°॥ १६ सर्वेन्द्रियभवे॥ १७ उच्चार्यमाणो ध्वनिस्तज्जन्माऽन्य एव॥ १८ ध्वनिः॥ 25 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अपि च, यो भाषाद्रव्यैः परिणामिकारणत्वेन जन्यते शब्दस्तस्यैव श्रोत्रविज्ञान-ग्राह्यत्वनियमस्तदाह–सं एव च भाषाद्रव्यजन्मा ध्वनिः श्रावणः श्रवणेन्द्रियस्यैव ग्राह्यः । योऽयं सर्वेन्द्रियप्रभवे विकल्पज्ञाने ग्राह्यार्थसमीपदेशवर्तिभाषाद्रव्यैः शब्दोल्लेख उपकल्प्यते सर्वेन्द्रियविज्ञानाऽविरोधी न तस्यैकेन्द्रियविज्ञानावस्थाननियमः । यः पुनर्भाषाद्रव्यैरेव शब्दपरिणामपरिणतैर्विज्ञाने स्वग्रहणपरिणामो जन्यते स नियमेन 5
135A श्रोत्रेन्द्रियविज्ञानावस्थाय्येव ।

एतेन यदुक्तम्–"यद्यभिलापवद्विज्ञानं तदा चेतना-ऽचेतनैयोस्तादात्म्यमायातम्, न चैतद्युक्तम्" [ ] इति, तत् प्रत्युक्तम्, भाषाद्रव्यपरिणामस्य शब्दस्य विज्ञाने-ऽनभ्युपगमात् । अर्थसारूप्यमात्रमपि ह्यस्माभिर्विज्ञाने नाभ्युपगम्यते, किमुत शब्दाभेदोऽभ्युपगंस्यते ? तद्विकल्पज्ञानमुत्पद्यमानं स्मृत्यादिनिरपेक्षमेवोत्पद्यते, ततो नार्थस्य 10
व्यवधानमस्ति । तथा चार्थेन्द्रियप्रभवत्वेन सम्यगनुभवत्वाद्विकल्पो नाप्रमाणम्, ततश्च तत्प्रतिभासो नावस्तुत्विति स्थितम् ।

135B स्यान्मतिः–इन्द्रियार्थप्रभवस्यापि विकल्पज्ञानस्य विकल्पकत्वमेव निजं रूपमप्रमाण्यनिबन्धनम्, यथा मनोराज्यादिविकल्पानाम्, ततोऽप्रामाण्याद्विकल्पप्रतिभासोऽवस्त्वेवेत्यत आह– 15

न चास्य स्वरूपमेव भ्रान्तिहेतुः, अविकल्पस्यापि प्रसङ्गात् ।

नँ चास्य विकल्पकज्ञानस्य स्वरूपमेव विकल्पकत्वस्वभाव एव भ्रान्तिहेतुर्भ्रान्तत्वस्य निबन्धनम् । अविकल्पस्यापि प्रसङ्गात्, निर्विकल्पकस्यापि द्विचन्द्रादिज्ञानवद् निर्विकल्पकत्वं भ्रान्तिहेतुः स्यादित्यर्थः ।

स्यादेवम्–यद् विज्ञानं ग्राह्यस्य पूर्वदृष्टेनैकत्वं परिच्छिनत्ति तत् सविकल्पकम् । पूर्व- 20
दृष्टेनैं च वस्तुनै एकत्वं क्षणिकत्वादसदेव, ततः सविकल्पकत्वे सति वस्तुतोऽसदर्थग्राहकत्वं भवति, अतः सविकल्पकत्वं भ्रान्तिहेतुरुच्यते । निर्विकल्पकत्वे तु सति असदर्थ-
136A ग्राहकत्वं न भवति अतो निर्विकल्पकत्वं भ्रान्तिहेतुर्नोच्यत इति । ।

तन्न,

१ स एव च श्रावणः ॥ २ अभिलापस्याचेतनत्वाद् विज्ञानस्य च चेतनत्वादित्यर्थः ॥ ३ विकल्पप्रतिभासो 25
विकल्पे प्रतिभासमान आकारः स्कन्धरूप इत्यर्थः ॥ ४ न चास्य स्वरूपमेव भ्रान्तिहेतुः ॥ ५ निर्विकल्पक ॥ ६ निजं स्वरूपम् ॥ ७ मनोराज्यादिविकल्पानां तु अप्रामाण्यम् अर्थादनुत्पन्नत्वात् ॥ ८ घटादिनाऽभेदः ॥ ९ स एवायं तत्सदृशो वेति ॥ १० वस्तुना ॥ ११ इदानीन्तनस्य ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पूर्वदृष्टैकत्वग्रहेऽपि अर्थोत्पत्तिस्तुल्या, वस्तुनस्त्रिकालान्वयस्य सद्भूतत्वात् ।

[1]पूर्वदृष्टैकत्वग्रहेऽपि पूर्वकालदृष्टेन वस्तुनेदानीं गृह्यमाणस्य तादात्म्यपरिच्छेदेऽपि, अर्थोत्पत्तिर्विकल्पस्य परमार्थसतोऽर्थादुत्पादस्तुल्या निर्विकल्पकज्ञानेन समा । वस्तुनः पदार्थस्य यत्त्रिकालान्वयस्त्रिकालावस्थानम्, तस्य सद्भूतत्वात् प्रमाणाबाधितत्वात् परमार्थसत्त्वादित्यर्थः । वस्तुनो हि त्रिकालान्वयित्वं प्रमाणोपपन्नम् । यच्च प्रमाणोपपन्नं तत् परमार्थसदेव, अतः कथं विकल्पस्याऽसदर्थग्राहकत्वं स्यात् ? तदसदर्थग्राहकत्वं
136B विकल्पस्य नास्त्येव । स्वरूपं चेद् भ्रान्तिहेतुरुच्यते तदा निर्विकल्पकस्यापि प्राप्नोति ।

नन्वेवं पूर्वदृष्टापरदृष्टयोरेकत्वग्रहाभ्युपगमे विकल्पस्यामन्निहितग्राहित्वप्रसङ्गः, पूर्वदृष्टस्यामन्निहितत्वात् । तथा चाक्ष्येन्द्रियजस्यापि मानसज्ञानेनाभेदः स्यात् । अभेदे चामन्निहितार्थग्राहितयाऽतीतानागतगोचरत्वं वस्तुप्रभेदाऽनित्यत्वदुःखहेतुत्वविषयत्वं ज्ञातरूपाऽन्यथाऽनुपपत्त्याऽज्ञातरूपानुमरणमर्थसन्निधानानपेक्षत्वमिच्छामात्रेवृत्तित्वं[16] च मानसधर्मा ऐन्द्रियकस्यापि विकल्पस्य स्युः । अथैतेऽस्य[17] न भवन्ति तदा मानसस्यापि मा भूवन् । तदुक्तम्–

"विचारकत्वे चेन्द्रियमनोविज्ञानयोरभेदप्रसङ्गात् । अभेदे चातीतानागतवस्तुप्रभेदग्रहणाग्रहणोहानूहार्थभावापेक्षानपेक्षादिप्रसङ्गः" [प्रमाणविनिश्चयः, पृ० २५३ B] इति ।

137A अत्राह–

१ पूर्वदृष्टैकत्वग्रहेऽपि अर्थोत्पत्तिस्तुल्या ॥ २ वस्तुनः ॥ ३ एकत्वपरिच्छेदेऽपि ॥ ४ कोऽर्थः ? अर्थादेव निर्विकल्पकं सविकल्पकं च ज्ञानमुत्पन्नम् ॥ ५ वस्तुनस्त्रिकालान्वयस्य सद्भूतत्वात् ॥ ६ विकल्पकत्वम् ॥ ७ विशेषाः ॥ * अत्र 5 सदृशं चिह्नं हस्तलिखितादर्शे उपरितने भागे विद्यते, अतो प्रभेदाऽ इति लिखितमस्माभिः, किन्तु अग्रे १३ टिप्पणे 'नित्यत्व' इति पाठो वर्तते, अतः सन्देहः । "अतीतानागतवस्तुप्रभेदा अनित्यत्वदुःखादिनिवृत्तिनिमित्तभेदस्वरूपाः (?), ते ऐन्द्रियकज्ञानेनापि गृह्येरन्, मानसज्ञानेन वा न गृह्येरन्" इति तु प्रमाणविनिश्चयटीकाया भोटभाषानुवादे [पृ० ६६ A] भाति ॥ ८ एतद्विषयत्वम् ॥९ यथा कृतकत्वं चेदङ्गीकरोषि तदाऽज्ञातमप्यनित्यत्वमङ्गीकुरु ॥ १० यस्य ज्ञानस्य मानसस्य ॥ ११ '३' [=तृतीया विभक्तिरत्र विग्रहे ज्ञेया] ॥ १२ एकं किञ्चिच्चिन्तयन् यदा तत्र प्रतिभाति तदा तन्निवार्य द्वितीयं चिन्तयतीति इच्छामात्रायत्तता ॥ १३ विकल्पस्य ॥ १४ पूर्वापरदृष्टार्थैकत्वग्रहः ॥ १५ पूर्वोपात्तधर्माः क्रमेण योज्याः ॥ १६ नित्यत्वदुःखहेतुत्व ॥ * अत्र '[अ]नित्यत्व' इति पाठोऽपि सम्भवेत्, दृश्यतां टि० १७ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न च पूर्वदृष्टत्वग्रहादेवातीतगोचरत्वादयः, नोइन्द्रियजस्यैव सामर्थ्यात् । इन्द्रियं हि रूपाद्याभास इव भेदान्तरेऽपि समर्थम् ।

नै चेति, न च पूर्वदृष्टत्वग्रहादेव पूर्वापरदृष्टयोरेकत्वं परिच्छिद्यत इत्येतावतैवाऽतीतानागतगोचरत्वादयो मानसधर्मा इन्द्रियजस्यापि विकल्पस्य भवन्ति । पूर्वापरदृष्टयोरेकत्वग्रहेऽपि हि विकल्पस्य नासन्निहितविषयत्वम्, पूर्वदृष्टस्य द्रव्यापेक्षया सम्प्रत्यपि विद्यमानत्वेन सन्निहितत्वात्, उत्पादव्ययध्रौव्ययुक्तस्यैव वस्तुनः सत्त्वात् ।
137B ततः कुतोऽसन्निहितविषयत्वाद् मानसादभेदेन विकल्पस्यातीतगोचरत्वादयो मानसधर्माः प्रसज्येरन् ।

अथवा वार्त्तिकेनैव कारणमुच्यते—नोइन्द्रियजस्यैव विकल्पस्यातीतग्रहादौ शक्तत्वात् । [1]हियस्मादिन्द्रियं रूपाद्याभास इव, आदिशब्दाद्रसाद्याभासपरिग्रहः, भेदान्तरेऽपि रूपाद्याभासलक्षणविशेषाद्विशेषान्तरेऽपि स्वंजन्मनो विकल्पस्य कर्त्तव्ये समर्थम् । यथाहीन्द्रियमसन्निहितविषयत्वाविशेषेऽपि स्वंजन्मनो विकल्पस्य मनोजन्मनो विकल्पाद्रूपाद्याभास-
138A लक्षणं विशेषं करोति तथाऽतीतानागताविषयत्व-वस्तुप्रभेदाग्रहण-ऽनूहकत्वा-ऽर्थभावापेक्षत्वेच्छाऽनिवर्त्यत्वलक्षणमपि विशेषं करोति, तत् कुतोऽसन्निहितविषयत्वेनेन्द्रियज-मानसविकल्पयोरभेदप्रसञ्जनेऽपीन्द्रियजस्यातीतगोचरत्वादयो मानसधर्मा भवेयुः । मानसस्य तु भवन्त्येव, एतन्निर्वर्त्तकस्येन्द्रियस्य तत्राभावात् ।

अथ पूर्वापरदृष्टयोरेकत्वग्रहाभ्युपगमेऽतीतगोचरत्वं भवद्भिरपीष्टमेव, तत् किमुच्यते—अतीतगोचरत्वादयो न भवन्तीति । उच्यते—द्रव्यापेक्षयाऽपि यदिदानीमसद्वस्तु यथा भरतादयः [2]तद्विषयमतीतविषयत्वमिन्द्रियजविकल्पस्य वार्यते । यत् पुनरिदानीं द्रव्यापेक्षया सदेव पर्यायापेक्षया पुनरसत् तद्विषयमतीतविषयत्वमिष्टमेव ।

138B इदमत्र हृदयम्—इन्द्रियविकल्पस्तावदसन्निहितविषय एव न भवति, त्रिकालान्वयिनः पुरोऽवस्थितस्य वस्तुनो ग्रहणात् । अथापि विनष्टपर्यायापेक्षयाऽसन्निहितविषयत्वमुच्यते

१ न च पूर्वदृष्टत्वग्रहादेवातीतगोचरत्वादय. ॥ २ नोइन्द्रियजस्यैव सामर्थ्यात् ॥ ३ इन्द्रियं हि रूपाद्याभास इव भेदान्तरेऽपि समर्थम् ॥ ४ '५' [=विग्रहे पञ्चम्यन्तम् । स्वस्माज्जन्म यस्य स स्वजन्मा, तस्य] ॥ ५ तदभिप्रायेण ॥ ६ इन्द्रियजन्यस्य ॥ ७ रूपाद्याभासस्य विशेषस्य ॥ ८ अस्तु तावत् पर्यायापेक्षया इन्द्रियजविकल्पस्यातीतविषयत्वम् ॥ ९ भरतादिरूपेण ॥ १० भरतादिद्रव्यवि° ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तथाप्यतीतगोचरत्वादयो न भवन्ति, नोइन्द्रियस्यैव तत्करणे सामर्थ्यादिन्द्रियस्यासमर्थत्वात् । विचित्रशक्तयो हि भावा भवन्तीति ।

ननु रूपाद्याभासवदिति दृष्टान्तः परासिद्धः, न खलु परे प्रत्यक्षपृष्ठभाविनि विकल्पे रूपाद्यवभासमशिश्रियन्निति । तन्न, परैरपीष्टत्वात् । तदुक्तम्–"इन्द्रियकृतस्तु रूपग्रहणप्रतिनियमोऽस्तु" [प्रमाणविनिश्चयटीका पृ० ६६ A पं० ४ ?] इति । तस्मादिन्द्रियार्थजो विकल्पो निर्विकल्पकमिव प्रमाणमेव ते । 5

139A स्यादेतत्–यदीन्द्रियजो विकल्पो वस्त्ववभासी, तदा कथं स्पर्शनविकल्पे वर्णाभासो भवति ? तथाहि– निशास्वप्नव्यापृते नेत्रे घटादीन् स्पृशतः सतः दृश्यवस्तुगता बुद्धिर्घटोऽयमिति जा[यते ।] न चान्येन्द्रियजग्राह्यमर्थमन्येन्द्रियजो विकल्पो गृह्णन् वस्तुविषये[ा भवितुमर्हतीत्या]ह– 10

स्पार्शनादौ तु स्मार्तो वर्णाद्याभासः, अस्पष्टत्वात्–ऐन्द्रियस्य स्पष्टत्वात्–अनुभवाभावेऽभावाच्च । आशुभवनादेकत्वभ्रमः ।

स्पार्शनादाविति । आदिशब्दाच्चाक्षुषादिपरिग्रहः । स्मार्तः स्मृतिरूपः वर्णाद्याभासः । आदिशब्दात् स्पर्शग्रहः । [स्पार्शन-चाक्षुषविकल्पयोर्योऽयं] वर्ण-स्पर्शप्रतिभाससङ्कीर्णावभासः स स्मृतिरेव । तथाहि–स्पर्शनेन्द्रियजे हि विकल्पे स्पर्श एवावभासते, यः पुनस्तदानीं 15

139B [वर्णाविभासो भवति स व]र्णस्य तदानीं स्मरणात् । तत् कुतोऽन्येन्द्रियजैर्ग्राह्यमर्थमन्येन्द्रियजो विकल्पो गृह्णाति "येनार्थाभावेऽप्युत्पादो भवे[त् तस्य । वर्णाद्याभासस्य स्मार्तत्वे हेतुमाह–]अस्पष्टत्वात् । यथा घटं स्पृशन् पश्यन् वा स्पर्शं रूपं वाऽतिस्पष्टमनुभवति न तथा रूपं स्पर्शं वा, तस्य सामान्येनैव रूप-स्पर्शविभासात् । यदि त्विन्द्रियजे ज्ञाने रूप-स्पर्शावभासः स्यात् तदाऽतिस्पष्टः स्यात्, ऐन्द्रियस्य स्पष्टत्वात् 20 इन्द्रियजज्ञानप्रतिभासस्य स्पष्टत्वा[त् । वर्णाद्याभासस्य स्मार्तत्वे हेत्वन्तरमाह–अनु]भवाभावेऽभावाच्च । यः पूर्वं घटं नाद्राक्षीन्न चास्प्राक्षीन्नासौ घटं स्पृशन् पश्यन् वा वर्णस्पर्शावनुभवति । सो[ऽयमनुभवाभावेऽभावो वर्णाद्याभासस्य स्मार्तत्वे हेतुः] । तस्माद-

140A स्पष्टत्वादनुभवाभावेऽभावाच्च वर्णाद्याभासोऽयं स्मार्त्त एव ।

१ अतीतपर्यायविकल्पकरणे ॥ २ बौ[द्धाः] ॥ ३ विकल्पे ॥ ४ [नीला ?]द्याभासः ॥ * अत्र 139 पत्रं चतुर्ष्वपि पार्श्वेषु किञ्चित् किञ्चित् खण्डितं वर्तते, अतः कश्चिद् मूलभागः कश्चिच्च टिप्पणभागः खण्डितः, अतः खण्डितांशपूरणाय यावानंशोऽस्माभिः कल्पितः स [ ] एतादृशे चतुरस्रकोष्ठके निवेशितः ॥ ५ चाक्षुषविकल्पग्राह्यत्वाद् वर्णाभासस्येति भावः ॥ ६ '६' [षष्ठ्यन्तं पदम्] ॥ ७ अन्येन्द्रियजविकल्पग्राह्यम् ॥ ८ स्पार्शनादौ तु स्मार्तो वर्णाद्याभासः ॥ ९ यथासङ्ख्यम् ॥ १० विकल्पं ॥ ११ ग्रहणेन ॥ १२ विकल्पस्य ॥ १३ स्पृशतः पुंसो रूपं सामा[न्येनैवावभासते, एवं पश्यतः स्पर्शः सामान्येनैवावभासते] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु यदि वर्णाद्याभासः स्मार्त्तः स्यात्तदा क्रमानुभवः स्यात्, अथ च स्पर्शवर्णानुभवकाल एव वर्ण-स्पर्शावनुभूयेते । तस्मात् प्रतिभाससङ्करोऽस्त्येवेति । अत्राह—आस्विति । आशु शीघ्रं स्पार्शनादिप्रत्यक्ष-स्मृत्योर्भावादेकज्ञानग्राह्यत्वविभ्रमः स्पर्शवर्णयोर्भवति । यदैव स्पर्शानुभवः प्रादुर्भवति तदैव वर्णस्मृतिरपि । ततोऽत्यन्तं शीघ्रं भवनात् क्रमो नानुभूयते । तत् स्पर्शनजे विकल्पे स्पर्श एवावभासते न वर्णः, नेत्रजे तु वर्ण एवावभासते न स्पर्शः. ततः परस्परविषयसाङ्कर्याभावान्नेन्द्रियजो विकल्पोऽर्थभावानपेक्षः । तस्मादिन्द्रियार्थोत्पादात् सम्यगनुभवत्वेन निश्चयात्मा विकल्पः प्रमाणमेव । तथा च तत्प्रतिभासस्य वस्तुतैवेति स्थितम् ।

140B

एतेन "यत् प्रत्यक्षं तन्नाभिलापसंसर्गयोग्यप्रतिभासं यथा निर्विकल्पकम् । यदभिलापसंसर्गयोग्यप्रतिभासं न तत् प्रत्यक्षं, यथा शाब्द-लैङ्गिकविकल्पौ" [ ] इति प्रसङ्ग-विपर्ययौ प्रत्याख्यातौ । न हि निर्विकल्पस्य प्रत्यक्षत्वप्रयुक्तमभिलापसंसर्गायोग्यप्रतिभासत्वम्, अपि तर्हि? तथाप्रतिभासहेतुसामग्रीविरहप्रयुक्तम् । नाप्यभिलापसंसर्गयोग्यप्रतिभासत्वप्रयुक्तमप्रत्यक्षत्वं शब्द-लैङ्गिकविकल्पयोः, अपि त्वनिन्द्रियकारणत्वप्रयुक्तमिति ।

ननु यदि घटोऽयमिति विज्ञानं निश्चयात्मकं प्रमाणं तदा घटस्य सर्वात्मनापि निश्चयः प्राप्नोति, तदन्यस्यानिश्चितस्याभावात्, भावे वाऽतत्स्वभावत्वम् । न हि यो यदेकयोगक्षेमो न भवति स तत्स्वभावो युक्तः, तन्मात्रनिबन्धनत्वाद्

141A भेदव्यवहारस्य । सर्वात्मनिश्चये च प्रमाणान्तरावृत्तिः स्यात्, एकेनैव प्रमाणेन निश्चयात्मनाऽशेषस्यापि वस्तुधर्मस्य निश्चयादनित्यत्वादौ भ्रान्तिसद्भावायोगादिति ।

अत्राह—

निश्चयात्मकत्वेऽपि अवायस्य नियतपर्ययपरिच्छेदः, क्षयोपशमस्य द्रव्याद्यपेक्षयाऽल्पशक्तित्वात् । धूमो देशादिभेदैरवच्छिन्नं वह्निं गमयति, इन्द्रियं साक्षाद् बहुतरविशेषैः ।

१ आशुभवनादेकत्वभ्रमः ॥ २ आशुभावित्वमेव भावयति ॥ ३ प्रतिभासमानस्याकारस्य वस्तुतैवेत्यर्थः ॥ ४ एतेन यत् प्रत्यक्षमित्यादि । यत्र परसिद्धेन हेतुना असिद्धं साध्यं साध्यते स प्रसङ्गः तर्क इत्येक एवार्थः । प्रत्यक्षं प्रत्यक्षमिति प्रसिद्धं हेतुकृतम् । प्रसङ्गस्तु विपर्ययनिष्ठो भवति, स च साध्याभावे साधनाभावरूप इति ॥ * तुला—उदयनाचार्यविरचितायां प्रशस्तपादभाष्यटीकायां किरणावल्यां [पृ० १८५] समाप्तप्रायमेतत् पं० १४ पर्यन्तम् ॥ ५ बौद्धोक्तौ ॥ ६ अभिलापसंसर्गयोग्यप्रतिभासहेतु ॥ ७ मानसकारणप्रयुक्तमित्यर्थः ॥ ८ निश्चितादाकारादन्यस्य ॥ ९ अनिश्चिताकारस्य ॥ १० निश्चिताकारास्वभावत्वम् ॥ ११ एकयोगक्षेमाभावनिबन्धनत्वात् ॥ १२ '६' [=षष्ठयन्तं विग्रहे ज्ञेयम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]निश्चयात्मकत्वेऽपीति । वस्तुरूपनिश्चयात्मकमिन्द्रियजं ज्ञानमिहावायः । स यद्यपि निश्चयात्मा वस्तुरूपग्राही च तथापि तेन नियतपर्ययपरिच्छेदो नियतानां कियतामपि पर्यायाणां वस्तुधर्माणां निश्चयो भवति । क्षयोपशमस्य द्रव्याद्यपेक्षया द्रव्याद्यपेक्षस्येत्यर्थः । "हेतुकर्तृकरणेत्थम्भूतलक्षणे" [सि० २।२।४४] इत्यनेनेत्थम्भूतलक्षणा चेयं तृतीया । आदिशब्दात् क्षेत्र-भावग्रहः । अल्पशक्तित्वात् प्रतिनियतपर्ययनिश्चायि- 5
ज्ञानजनकशक्तित्वात् ।

141B ज्ञानावरणीयकर्मक्षयोपशमात् प्रमाणानि प्रादुःषन्ति । कर्मक्षयोपशमश्च प्रतिनियतद्रव्य-क्षेत्र-भावापेक्षः । ततो येन द्रव्यादिना यावत्पर्ययनिश्चायिज्ञानजननदक्षः क्षयोपशमः प्रबोधितः स तावत्पर्ययनिश्चायकमेव प्रमाणमुपजनयति । प्रमाणमपि निश्चयात्मकतयोत्पन्नमपि तावत एव पर्यायान्निश्चिनोति नाधिकान् । दुरतिक्रमा हि कारणानामाज्ञा न 10
पराभूत्वापेक्षैः कार्यैर्लङ्घयितुं शक्यते । तद्यद्यपि वस्तुग्राही निश्चयात्मा चेन्द्रियजो विकल्पस्तथाऽपि न वस्तुनः सर्वधर्मानवगच्छति, कियतामेवावगमे क्षयोपशमेनादिष्टत्वात् । अत एव प्रमाणान्तराण्यप्युपपद्यन्ते, अनिश्चितरूपाणामपि कियतां वस्तुपर्यायाणां सत्त्वात् ।

142A द्रव्याद्यपेक्षया क्षयोपशमस्य प्रतिनियतग्राहिज्ञानजननशक्तत्वमेव स्पष्टयति— [2]धूम इति । देशादिभेदा देशादिविशेषास्तैरवच्छिन्नं विशेषितम् । आदिशब्दादागरवादि- 15
ग्रहः । यो हि धूमदर्शनात् क्षयोपशमः समुल्लसति, तेनोत्पन्नं ज्ञानं वह्निमात्रं गमयदपि देशादिविशेषैर्विशेषितं गमयति । तथा [3]इन्द्रियं साक्षाद्बहुतरैर्विशेषैरिति वह्निं गमयतीति सम्बन्धः । अत्र साक्षाच्छब्दोपादानात् [4]पूर्वत्र पेगेक्षता गम्यते । इन्द्रियैर्यः क्षयोपशमः प्रबोध्यते तेनोत्पन्नं ज्ञानं वह्निं साक्षादात्मानं गमयति तथा बहुतरैर्विशेषै-
142B [5]र्मातुरूपोष्णस्पर्शादिभिर्विशिष्टं च गमयति । तस्माद्विचित्रहेतुप्रभवः क्षयोपशमो 20
विचित्रशक्तिः, तत्प्रभवं विज्ञानमपि विचित्रशक्त्येव भवति । ततो निश्चयात्मकमपि ज्ञानं न सर्वात्मना स्वविषयं निश्चिनोति, तथा च प्रमाणान्तरस्याप्यवकाशः ।

अन्यदपि क्षयोपशमसामर्थ्यं दर्शयति—

क्षयोपशमादेव च क्रमः—जनकाध्यापकं पश्यन् जनकत्वं निश्चित्य अध्यापकत्वं निश्चिनोति । 25

१ निश्चयात्मकत्वेऽप्यवायस्य नियतपर्ययपरिच्छेदः, क्षयोपशमस्य द्रव्याद्यपेक्षयाऽल्पशक्तित्वात् ॥ २ कालश्चैत्येके ॥ ३ धूमो देशादिभेदैरवच्छिन्नं वह्निं गमयति ॥ ४ अगोरयम् ॥ ५ '५' [=पञ्चम्यन्तं विग्रहे पदम्, तस्मादुत्पन्नमिति अर्थः] ॥ ६ इन्द्रियं साक्षाद् बहुतरविशेषैः ॥ ७ तार्णपार्णादिभिः ॥ ८ सूत्रे ॥ ९ वह्नेः ॥ १० '५' [=पञ्चम्यन्तं पदम्, तस्मादुत्पन्नमित्यर्थः] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

क्षयोपशमादेव च क्रमः । युगपदनन्तधर्मात्मकेऽपि वस्तुनि योऽयं धर्माणां क्रमेण निश्चयः सोऽपि क्षयोपशमादेव । यत्र यत्र क्षयोपशमः प्रथमं भवति स स
143A प्रथमं निश्चीयत इत्यर्थः । क्रममेव दर्शयति—जनकेति । जनकः पिता स चासावध्यापकः पाठयिता चेति विशेषणसमासः । तं जनकाध्यापकं पश्यन् दृगादवलोकयन्, 'पुत्रशिष्यः' इति सामर्थ्यलभ्यम्. जनकत्वं निश्चित्याध्यापकत्वं निश्चिनोति । जनकाध्यापकत्वा- 5
विशेषेऽपि हि पितरमायान्तं दृष्ट्वा बालकः प्रथमं पिता मे आगच्छतीति वदति पश्चादुपाध्याय इति, पितृत्वनिश्चयन एव प्रथमं क्षयोपशमस्याविर्भावात्, पश्चादुपाध्यायत्वनिश्चयने । तदयमीन्द्रियजो विकल्पो वस्तुसामर्थ्यभावी निश्चयात्मा च तथाऽपि न
143B वस्तुनः सर्वात्मना निश्चयः, क्षयोपशमस्य प्रतिनियतधर्मनिश्चायिज्ञानजनने एव सामर्थ्यात्। अत एवैकस्मिन् प्रमाणे प्रवृत्तेऽपि सर्वेषां वस्तुधर्माणामनिश्चयादनिश्चित- 10
धर्मनिश्चयाय प्रमाणान्तराणि प्रवर्त्तन्ते ।

स्यान्मतम्—यद्यपीन्द्रियजो विकल्पोऽर्थसामर्थ्यभावी तथापि न प्रमाणम्, गृहीतग्राहित्वात् । स्वप्नेऽपि हि नेत्रोन्मीलनान्तरभाविनाऽवग्रहेण प्रथमं सर्वात्मना वस्तुनि परिच्छिन्ने पश्चात् तत्रैवावायधीरुदयते, गृहीतग्राहि चाप्रमाणमेव । तदुक्तम्—

"अधिगते तु स्वलक्षणे तत्सामर्थ्यजन्मा विकल्पस्तदनुकारी कार्यतस्तद्विषयत्वात् 15
144A स्मृतिरेव, न प्रमाणम्, अनधिगतवस्तुरूपानधिगतेः" [हेतुबिन्दुः पृ० ३] इति ।

१ जनकाध्यापकं पश्यन् जनकत्वं निश्चित्याध्यापकत्वं निश्चिनोति ॥ २ पुत्ररूपः शिष्यः ॥ ३ '७' [=सप्तम्यन्तमिदं पदम्] ॥ ४ स्वसिद्धान्तश्रद्धालोर्वचः ॥ ५ * दृश्यतां पृ० ३१ पं० १६ पृ० ३२ पं० ८ । "तस्मादनधिगतार्थविषयं प्रमाणमित्यपि 'अनधिगते स्वलक्षणे' इति विशेषणीयम् । अधिगते तु स्वलक्षणे तत्सामर्थ्यजन्मा विकल्पस्तदनुकारी कार्यतस्तद्विषयत्वात् स्मृतिरेव, न प्रमाणम्, अनधिगतवस्तुरूपानधिगतेः" 20
इति बौद्धाचार्यधर्मकीर्तिविरचिते हेतुबिन्दौ पृ० ३ । "तदेवं नीलं दृष्ट्वा 'नीलम्' इति ज्ञाने प्रतिभासमानं सामान्यं न काञ्चिदर्थक्रियामुपकल्पयतीति प्रसाध्य अनर्थक्रियाकारिविषयस्यापि विकल्पस्य प्रत्यक्षपृष्ठभाविनः प्रामाण्यप्रसङ्गादित्याशिरिति "तत्रापूर्वार्थविज्ञानम्" [ ] इति प्रमाणलक्षणे मीमांसकैर्विशेषणमुपादेयमिति दर्शयन्नाह—तस्माद् यत एवमनर्थक्रियासाधनविषयतया दर्शनपृष्ठभाविनो विकल्पस्य प्रामाण्यमयुक्तं तस्मादस्मदभिमतं "प्रमाणमविसंवादि ज्ञानम्" [प्रमाणवा० १ । ३] इति प्रमाणलक्षणं 25
व्युदस्य अनधिगतार्थविषयं प्रमाणम् "तत्रापूर्वार्थविज्ञानं प्रमाणम्" इत्यपि एतस्मिन्नप्याहोपुरुषिकयाऽन्यस्मिन् प्रमाणलक्षणे क्रियमाणे अतिव्याप्तिपरिहाराय विशेषणीयं विशेषणमुपादेयम् । कथं विशेषणीयम्? अनधिगते स्वलक्षणे इति । अनेन हि विशेषणेन अनुमानविकल्पस्य च प्रामाण्यं सिध्यति आलोचनाज्ञानपृष्ठभाविनश्च विकल्पस्य प्रामाण्यं व्युदस्यत इति सर्वं सुस्थम् ।

तदेवं विधिविकल्पस्यानर्थक्रियासाधनविषयतयाऽनधिगतसामान्याधिगमेऽपि प्रामाण्यं निराकृत्य 'च'शब्द- 30
समुच्चितं स्मृतित्वं प्रतिषेधविकल्पेन साधारणमप्रामाण्यकारणं दर्शयन्नाह—अधिगते तु स्वलक्षणे आलोचनाज्ञानेन तत्सामर्थ्यजन्मा स्वलक्षणाधिगमबलभावी विकल्पस्तदनुसारी साक्षादनुत्पत्तेर्दर्शनसंस्कारावेध-

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वशाद्यास्पष्टनीलस्वलक्षणाकारानुकारी, दृश्यविकल्प्ययोश्चैकीकरणादेवमुच्यते, वस्तुतस्तु न किञ्चिदसावनुकरोति, स **स्मृतिरेव**, कुतः? **कार्यतस्तद्विषयत्वात्**, न परमार्थतः, कार्यमत्र स्वलक्षणे पुरुषस्य प्रवर्तनं तदध्यवसायश्च । यतश्च कार्यतस्तद्विषयत्वात् स्मृतिरेवातो न प्रमाणं दर्शनबलोत्पन्नो विकल्पः । तथाहि—स्मृतेरप्यनुभूतस्वलक्षणांशविषयाया न परमार्थतस्तद्विषयत्वम्, स्वलक्षणस्येन्द्रियबुद्धाविव स्फुटरूपतया स्मृतावप्रतिभासनात्, किन्तु यथोक्तात् कार्यत एव । तच्च विधिविकल्पेऽपि समानमिति कथमसौ स्मृतिर्न स्यादिति । 5

तत्रैतत् स्यात्—नन्वनुमानविकल्पः स्मृतिरूपोऽपि प्रमाणमिष्यते । तथाहि—यदेवानग्निव्यावृत्तं वस्तुमात्रं महानसादावनुभूतमासीत् तदेव प्रदेशविशेषे धूमदर्शनात् स्मर्यते, तद्वद् विधिविकल्पोऽपि प्रमाणं भविष्यतीत्याह—**अनधिगतस्य** वस्तुनो **रूपस्य अनधिगते**रिति । एवं मन्यते—यत् महानसादावनग्निव्यावृत्तं वस्तुमात्रं प्रागनुभूतं न तत् तद्देशादिसम्बन्धितया एव अनुमानविकल्पेन स्मर्यते, किन्तु यत्र प्रदेशे प्राग्ननुभूतं तत्सम्बन्धितया । ततः साध्यधर्मिदृष्टान्तधर्मिग्राहिदर्शनद्वयानधिगतस्यानग्निव्यावृत्तस्य वस्तुरूपस्यायोगव्यवच्छेदेनाधिगमाद् युक्तमस्य प्रामाण्यं न तु दर्शनपृष्ठभाविनो विकल्पस्य तद्विपरीतत्वादिति ।" इति **अर्चटभट्टविरचितायां हेतुबिन्दुटीकायाम्** पृ० ३३–३४ । "अनधिगतार्थविषयं प्रमाणम्' इति प्रमाणलक्षणं परेण कारिकया दर्शितमिति दर्शयन्नाह—**तत्रापूर्वेति** । **अहमहमिकया** क्रिया **आहोपुरुषिका**, तया करणभूतया । **तत्** स्वलक्षणमस्पष्टरूपतया अनुकरोतीति तदनुकारीति विवक्षितमिति प्रकटयन्नाह—**अस्पष्टनीलस्वलक्षणानुकारी** अस्पष्टनीलस्वलक्षणाभासमित्यर्थः । सर्व एव हि विकल्पोऽस्पष्टस्वलक्षणाभः । नीलादि पश्यतस्तु विकल्पो यः स्पष्टार्थप्रतिभासाभिमानः स तद्विकल्पसमसमयजन्मनो निर्विकल्पस्य प्रसादात् । यथा चैतत् तथोभे(चे) समीचीनमाचार्यो **विनिश्चय**मिति(य इति) तत एवा[व]गन्तव्यम् । कथं पुनरस्पष्टनीलस्वलक्षणानुकारि न तु निर्विकल्पवत् स्पष्टस्वलक्षणानुकारीत्याशङ्क्य योज्यम्—**साक्षाद्व्यवधानेन** अनुत्पत्तेः ततः स्वलक्षणादिति प्रकरणात् । यदि ततः तत्रोत्पन्नं तर्हि तस्य नियतनीलाद्याकारपरिग्रहः कुतस्य इत्याशङ्क्य योज्यम्—**दर्शनेने**ति । **दर्शनेनानुभवेनाहितः संस्कारो** वासना तस्याऽऽक्षेप आक्षेपः तद्वशात्, **यो** व्यक्तमेतदित्यस्मिन्नर्थे । 10 15 20

ननु यत् तत्रावभासते तत् स्वलक्षणम्, येन(नाऽ?)स्पष्टनीलस्वलक्षणानुकारीत्युच्यत इत्याह—**दृश्येति** । **दृश्यविकल्प्ययोरेकीकरणात्** दृश्य-विकल्प्यावर्थावेकीकृत्यास्य प्रवृत्तेरित्यर्थः । दृश्यविकल्प्यैकीकरणं च तस्य तथोत्पत्तेरेव द्रष्टव्यम् । तदवभासिनोऽबाह्यत्वादेव न परमसावनुकरोतीत्याशयः । **स** विकल्पः । तद्रूपो-(पा)नालम्बने कथं गृहीतग्राहित्वलक्षणं स्मृतित्वमित्याशङ्क्याह—**तथाहि** इति । 25

स्मृतिरूपत्वमेवानुमानविकल्पस्य प्रतिपादयन् परः प्राह—**तथाहीत्यादि** । अग्नित्वादिना रूपेणानवच्छिन्नत्वात् **अनग्निव्यावृत्तं वस्तुमात्रमित्याह** । **महानसः** सूपकारशाला । **आदि**शब्दादयस्कारकुड्यादेर्ग्रहणम् । **प्राक्** पूर्वं व्याप्तिग्रहणकाल इत्याकूतम् । **प्रदेशविशेषे** पर्वतादौ । **तद्वद्** अनुमानविकल्पवत् ।

नन्वधिगतावधिगन्तुरप्यनुमानविकल्पस्य प्रामाण्यप्रदर्शनेनास्यापि तथाभूतस्य प्रामाण्यमावेदितमेवेति किमनेनोक्तानतिशायिना **उक्तेनापीत्याशङ्क्याह—एवं मन्यत** इति । पूर्वपक्षिणा एतस्मिन्नुक्तऽप्येवं ब्रुवाणो नियतमेवं वक्ष्यमाणकं **मन्यते** चेतसि निवेशयति । **यदि**त्यादिना मननीयमेव दर्शयति । **आदि**शब्दात् कालस्य परिग्रहः । **साध्यधर्मिग्राहि** पर्वतादिग्राहि । **दृष्टान्तधर्मिग्राहि** महानसादिधर्मिग्राहि । तत्र दृष्टान्तधर्मिग्राहिणा दर्शने[न] नैव पर्वतादिविशिष्टमनग्निना व्यावृत्तं वस्तु गृहीतम् । नापि तदाह न पर्व(नापि पर्व)तादिसाध्यधर्मिग्राहिणान्वयाद्यवेदिनो(ना)पि । तथात्र विप्रति(तथात्वेऽविप्रति)पत्तिप्रसङ्गात् तद्विशिष्टमनग्निव्यावृत्तं वस्तु गृहीतमिति दर्शनान्वया(दर्शनद्वया)नधिगतमुक्तम् । **अयोगव्यवच्छेदेन** सम्बन्धव्युदासेन । **तद्विपरीतत्वात्** अनुमानविकल्पविपरीतत्वात् । तेन यदा(यथा)दृष्टस्यैव निश्चयनात्" इति **दुर्वेकमिश्रविरचिते हेतुबिन्दुटीकालोके** पृ० २८७–२८८ ॥ ६ अधिगतस्वलक्षणसामर्थ्यजन्मा ॥ ७ कार्यमत्र स्वलक्षणे प्रवृत्तिस्तदध्यवसायश्च ॥ 30 35

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्राह—

अव्यक्तसन्मात्रग्रहाद् विशेषावसायो भिन्नगोचरः प्रमाणम् ।
नेत्रमुन्मीलयतः सन्मात्रावगमोऽनुभवसिद्धः ।

अव्यक्तेति । अव्यक्तं विशेषांशव्यक्तिरहितं यत् सन्मात्रं सामान्यमात्रं तस्य यो ग्रहोऽवग्रहज्ञानं तस्माद् भिन्नगोचर इति सम्बन्धः । भिन्नगोचरत्वे स्वरूपकथनद्वारेण हेतुमाह—विशेषावसायो विशेषांशस्य निश्चयोऽवाय इत्यर्थः । विशेषावसायो यतो नाव्यक्तसन्मात्रावसायस्ततो भिन्नगोचरो भिन्नविषयः सन् प्रमाणम् । वस्तुनो द्वावंशौ सामान्यं विशेषश्च । तत्र सामान्यमवग्रहग्राह्यम्, विशेषः पुनरवायावसेय इति कुतो गृहीतग्राहित्वं
144B येनाप्रामाण्यं स्यात् ? भवद्भिरपि चोक्तम्—"एकस्मिन्नपि वस्तुनि घटादौ विकल्प्यमाने विकल्पप्रतिभासोऽनेकावस्थासाधारणः, प्रत्यक्षप्रतिभासस्त्वसाधारणः । तस्मात् साधारणासाधारणविषयतया तयोर्भेदः" [ ] इति ।

अपि च, यदि निर्विकल्पकप्रतिभासे एव सविकल्पके स्यात् तदाऽस्यार्थान्वयव्यतिरेकानुविधायित्वमेव हीयेत, विनिवृत्तेऽपि वस्तुनि विकल्पावस्थायां वस्तुप्रतिभासस्यानुवृत्तेः । तन्नावग्रहा-ऽवायधियोरेकविषयत्वम् ।

ननु वस्तुसामर्थ्यभाव्यवग्रहः सर्वात्मनापि वस्तु गृह्णात्येव, अन्यथा वस्तुसामर्थ्यभावित्वमेवास्य न स्यात् । ततो विशेषांशस्याप्यवग्रहेण ग्रहणात्तद्विषय एवोत्तरो विकल्पो गृहीतग्राही अप्रमाणमेवेति । नैवम् । यतो नेत्रमुन्मील्यतो विकाशयतः
145A सन्मात्रावगमः, मात्रग्रहणेन विशेषांशावगमनिरासः, अव्यक्तसन्मात्रस्यैव परिच्छेदोऽनुभवसिद्धः स्वसंवेदनसिद्धः । निद्रामुद्रां ह्यपहाय पुमान् पुरः पटादि वस्तु पश्यन् प्रथममात्मनोऽव्यक्तसन्मात्रांशावगममनुभवादेवावगच्छति । द्वयमनुना योगेन क्रियते—अनुभवेनावग्रहस्य सत्ता साध्यते, तथा अस्यैव सन्मात्रग्राहित्वं चेति ।

ननु यदि प्रथममवग्रहज्ञानं वस्तुसामर्थ्यभाव्यप्येकांशावभासि स्यात्तदा वस्तुसामर्थ्यभाव्येव न स्यादिति । उच्यते—

न च क्षयोपशमाधीना छद्मस्थधीर्वस्तुभाविताऽपि यथावस्तु ।
अनन्तात्मनः कियदग्रहोऽप्यदोषाय ।

१ अव्यक्तसन्मात्रग्रहाद् विशेषावसायो भिन्नगोचरः प्रमाणम् ॥ २ यतस्त्रिकालानुयायित्वेन अन्यैर्वस्तुभिः सह सदृशतया गृह्णाति पदार्थम् ॥ ३ यतो वर्तमानकालत्वेन सजातीयविजातीयव्यावृत्ततया वस्तु गृह्णाति ॥ ४ '१' [=प्रथमाविभक्त्यन्तम्] ॥ ५ निर्विकल्पिकगतप्रतिभासस्य ॥ ६ नेत्रमुन्मीलयतः सन्मात्रावगमोऽनुभवसिद्धः ॥ ७ सूत्रेण ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ने च क्षयोपशमाधीना क्षयोपशमायत्ता च्छद्मस्थधीः प्राकृतपुरुषबुद्धिर्वस्तुभावितापि वस्तुमिः कृतापि, भावितं वासितं कृतमित्येक एवार्थः, यथावस्तु वस्तुनोऽनतिक्रमेण भवति। यावद्भिः पर्यायैर्वस्तु युक्तं तावद्भिर्नावगच्छतीत्यर्थः। यद्यपि प्राकृतपुरुषधी-र्वस्तुसामर्थ्यभाविनी तथापि क्षयोपैशमपारवश्यदावदग्धा सती न सर्वात्मना वस्तु-धर्मानवगन्तुं शक्नोति। 5

145B यद्यवग्रहो वस्तुन एकदेशमेव गृह्णाति तदा वैस्तुनो भेदः प्राप्नोति, गृहीता-ऽगृहीतांशयोर्विरुद्धधर्माध्यासेन भेदादिति। उच्यते–अँनन्तात्मन इति। अनन्ता आत्मानः स्वभावाः पर्याया यस्य तस्य वस्तुनः कियदग्रहोऽपि प्रमाणेन कियतोऽप्यंशस्यापरिच्छेदो-ऽपि न दोषाय, वस्तुनोऽनेकत्वस्येष्टत्वात्।

तत् प्रमाणस्याबाधस्य सामान्यविशेषरूपः प्रतिभासो वस्त्वेव। 10
अन्यथाऽनुगतव्यावृत्तबुद्धि-शब्दावपि न स्याताम्, एकरूपत्वात्।

सम्प्रत्युत्तरवादस्य प्रस्तावनां रचयन् विकल्पप्रामाण्यवादमुपसंहरति–तँदिति। प्रमाणस्य प्रमाणलक्षणयुक्तस्य। वस्त्वेव परमार्थसदेव। एवं च प्रमाणोपनीतत्वात् सामान्यविशेषात्मकः स्कँन्धोऽपि वस्त्वेव। अयं च विकल्पप्रामाण्ये न्यायः–बाँह्योऽर्थो
146A विवक्षितविकँल्पविषयः, सँम्यक्प्रवृत्तिविषयत्वात्, यदेवं न भवति न तत् सम्यक्प्रवृत्ति- 15
विषयो यथा सम्प्रतिपन्नो वँस्त्वंश इति स्वभावः। सम्यक्प्रवृत्तिविषयत्वं निश्चितत्वेन व्याप्तम्, न ह्यनिश्चितः सम्यक्प्रवृत्तियोग्यः, न चाविषयो निश्चेतुं शक्योऽतिप्रसङ्गात्। निश्चयश्च विकल्प एवेति व्यापकाभावो बाधकम्।

स्यादेवम्–अस्तु नाम स्कन्धलक्षणोऽर्थः परमार्थः, स पुनः सामान्यविशेषात्मक इति तु न संसहामहे। स्वलक्षणानां सकलसजातीयविजातीयव्यावृत्तस्वरूपत्वेन 20
कलयापि सामान्यांशस्याभावात्। यत् प्रमाणवार्तिकम्–

१ न च क्षयोपशमाधीना छद्मस्थधीर्वस्तुभाविताऽपि यथावस्तु ॥ २ * अत्र हस्तलिखितादर्शे 'क्षयोपशमैपारवैश्यदावदैग्धा' इति विभक्तिसंकेतयुक्तः पाठो वर्तते, ततोऽत्र 'क्षयोपशमेन पारवश्यम्, तदेव दावः, तेन दग्धा' इति विग्रहो ज्ञेयः ॥ ३ '६' [=षष्ठ्यन्तं पदम्] ॥ ४ अनन्तात्मनः कियदग्रहोऽप्यदोषाय ॥ ५ तत् प्रमाणस्याबाधस्य सामान्यविशेषरूपः प्रतिभासो वस्त्वेव ॥ ६ '५' * अत्र '५' इत्यस्य 'तस्मात्' इत्यर्थः भाति ॥ ७ न केवलं परमाणवः ॥ ८ अनुमानम् ॥ ९ बाह्यग्रहणं सुखादिव्युदा-सार्थम्, तेन न भागासिद्धो हेतुः ॥ १० इन्द्रियजविकल्पविषयः ॥ ११ 'सम्यग्'ग्रहणं संशय-विपर्ययनिरा-सार्थम् ॥ १२ क्षणिकत्वांशो न प्रवृत्तिविषयोऽस्मदादीनाम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"सर्वे भावाः स्वेभावेन स्वस्वभावव्यवस्थितेः ।
स्वभाव-परभावाभ्यां यस्माद्व्यावृत्तिभागिनः ॥" [प्रमाणवा० ३ । ४०] इति ।

146B अत्राह–अन्यथेति । यदि व्यावृत्तस्वभाव एवैको वस्तुनः स्यान्न सामान्य-स्वभावोऽपि तदा घटोऽयं घटोऽयमिति सकलसदृशपरिणामघटकदम्बकानुयायिनी याऽनुगताकारा तथा सीमन्तिनीमस्तकस्थितः श्यामोऽयं घट इति व्यावृत्ताकारा च या बुद्धिस्तथैवंभूत एव च यः शब्दस्तावनुगतव्यावृत्तबुद्धि-शब्दौ न स्यातां, एक-रूपत्वात् सर्वभावानां व्यावृत्तैकरूपत्वात् व्यावृत्तावेव बुद्धि-शब्दौ स्यातामित्यर्थः ।

यद्यपि घटादयो भावाः परस्परमसंस्पृष्टस्वभावास्तथापि जलाद्याहरणाद्येकार्थक्रिया-
147A सामर्थ्यं तेषु पश्यतः पुरुषस्यानुगताकारबुद्धि-शब्दौ भविष्यतः । तदुक्तम्–

"एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने ।
"भेदेऽपि नियताः केचित् स्वभावेनेन्द्रियादिवत् ॥
ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा ।
दृष्टा यथा बौषधयो नानात्वेऽपि न चापराः ॥" [प्रमाणवा० १।७४–७५]

इति चेत् । न, एकार्थक्रियाकारित्वे सत्यप्यनुगतबुद्धि-शब्दानुत्पाददर्शनात् । तदेवाह–

एकार्थक्रियाकारित्वेऽपि च न चक्षुरादयः समानबुद्धि-शब्द-हेतवः ।

एकार्थेति । आदिशब्दादालोकादीनां गुडूच्यादीनां च ग्रहः । चक्षुरादिसामग्र्या गुडूच्यादिसामग्र्याश्चार्थज्ञानादिका ज्वरोपशमनादिका चैकाऽर्थक्रियास्ति, न पुनः
147B चक्षुरादयो रूपादौ 'चक्षुः' इत्याद्यनुगतबुद्धि-शब्दोत्पादनिबन्धनं भवन्ति । तदेकार्थक्रिया-कारित्वमनुगतबुद्धि-शब्दोत्पादे व्यभिचारि । ततोऽनुगतबुद्धि-शब्दनिबन्धने भावेषु सामान्यांशोऽभ्युपेयः ।

१ स्वरूपेण ॥ २ स्वभावः सजातीयः पदार्थः । परभावो विजातीयः ॥ ३ चसः [=चतुर्थसमासः, कर्म-धारयसमास इत्यर्थः । परो भाव इति विग्रहः] ॥ ४ '५' [=पञ्चम्यन्तं पदम्] ॥ ५ अन्यथाऽनुगत-व्यावृत्तिबुद्धिशब्दावपि न स्याताम् ॥ ६ अनुगतव्यावृत्ताकार इत्यर्थः ॥ ७ परः ॥ ८ अयं घटोऽयं घट इत्युल्लेखेन एकाकारज्ञानमेकप्रत्यवमर्शः ॥ ९ '६' [=षष्ठ्यन्तं विग्रहे ज्ञेयम्] ॥ १० निष्पादने ॥ ११ भिन्नत्वेऽपि नानात्वेऽपि ॥ १२ युगपत् ॥ १३ 'च' मूलादर्शे नास्ति, टिप्पणे एव विद्यते ॥ १४ एकार्थक्रियाकारित्वेऽपि च न चक्षुरादयः समानबुद्धि-शब्दहेतवः ॥ १५ '६' [=षष्ठ्यन्तं विग्रहे पदम्, अर्थस्य ज्ञानम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तत्कार्यावधिः समानपरिणामस्तत्राप्यस्ति ।

स्यान्मतम्—चक्षू रूपा-ऽऽलोक-मनस्कारेष्वपि 'चक्षुर्ज्ञानजनकम्, रूपं ज्ञानजनकम्' इत्येवमनुगतबुद्धि-शब्दावेकार्थक्रियानिबन्धनौ विद्येते एव, तत् कुतो व्यभिचार इति? तन्न, यस्मात् तत्कार्यावधिस्तदिन्द्रियज्ञानलक्षणं कार्यमवधिर्यस्य स समानपरिणामस्तत्रापि चक्षुरादिषु गुडूच्यादिषु चाऽस्ति । अयमर्थः—यावतोऽनुगतबुद्धि-शब्दयोश्चक्षुरादयो निमित्तं
148A भवन्ति तावतोर्विषये तेषां सामान्यांशोऽप्यस्ति, ततश्च 'अयमपि ज्ञानजनकोऽयमपि ज्ञानजनकः' इत्येवमप्यनुगतबुद्धि-शब्दौ नैकार्थक्रियानिबन्धनौ, अपि तर्हि? सामान्यांशनिबन्धनावेव । ततो यदि क्वचिदपि सामान्यांशाभावेऽप्यनुगतबुद्धि-शब्दावेकार्थक्रियानिबन्धनौ स्यातां तदा न स्यादेव व्यभिचारः । तत्तु नास्ति, ततो व्यभिचार एव ।

क्रिया अपि विलक्षणा नैकत्वहेतवः । तथा चैकः परामर्शोऽप्यसिद्धः ।

किञ्च, यन्निबन्धनावनुगतबुद्धि-शब्दौ भावेष्विष्येते ता अपि क्रिया यदि सर्वथा विलक्षणा एव तदाऽनुगतबुद्धि-शब्दौ तन्निबन्धनौ न प्राप्नुतः, विलक्षणस्य विलक्षण-
148B बुद्धि-शब्दयोरेव हेतुत्वात् । एतदेवाह—क्रिया अपि जलधारणादिका विलक्षणाः सर्वथा सदृशपरिणामशून्या नैकत्वहेतवो नैकत्वनिबन्धनबुद्धि-शब्दनिमित्तं प्राप्नुवन्ति । कार्ये कारणोपचारादेकत्वशब्देनैकत्वनिबन्धनावनुगतबुद्धि-शब्दावुच्येते । एकत्वं च सदृशपरिणाम एव, परस्परभेदस्यानभ्युपगमात् ।

स्यादेतत्—विलक्षणा अपि क्रिया एकपरामर्शजनकत्वेनोपचरितसादृश्याः सत्यो भावेष्वनुगतबुद्धि-शब्दनिबन्धनं भवन्त्येवेति । उच्यते—तथेति । यदा ताः क्रिया
149A विलक्षणाः सत्यो भावेष्वनुगतबुद्धि-शब्दनिबन्धनं न प्राप्नुवन्ति तथा च सति एकः परामर्शोऽपि तद्विषयोऽस्माकं न सिद्धः । यथा ताः क्रिया विलक्षणाः सत्यो नानुगतबुद्धि-शब्दनिबन्धनं भावेषु भवितुमर्हन्ति तथा परामर्शमप्येकविषयमुत्पादयितुं न शक्नु-

१ आलोको मनस्कारश्च ज्ञानजनक इति ॥ २ तत्कार्यावधिः समानपरिणामस्तत्राप्यस्ति ॥ ३ प्रसः [=प्रथमसमासो बहुव्रीहिरित्यर्थः] ॥ ४ एकार्थक्रिया निबन्धनं ययोः ॥ ५ सजातीयविजातीयव्यावृत्ता एव ॥ ६ क्रिया अपि विलक्षणा नैकत्वहेतवः ॥ ७ एकत्वं सदृशपरिणामः कारणरूपः, तस्य कार्यम् अनुगतबुद्धि-शब्दरूपम्, तत्र कार्ये एकत्वस्य सदृशपरिणामस्य कारणरूपस्योपचारः सूत्रे ॥ ८ * अत्र 'प्रसआ' इति लिखितं भाति तत्र 'प्रस' इति स्पष्टम्, तस्य च प्रथमसमासो बहुव्रीहिरित्यर्थः । किन्तु 'आ' इत्यस्य अर्थो न ज्ञायते । दृश्यतां पृ० १९ टि० १ ॥ ९ स च भेद एव संगच्छते ॥ १० एताः सर्वा जलधारणक्रिया इत्युल्लेखेन एकाकारज्ञानजनकत्वेन ॥ ११ तथा चैकः परामर्शोऽप्यसिद्धः ॥ १२ क्रिया ॥ १३ एतदेव स्पष्टं विवृणोति ॥ १४ एकरूपम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वन्त्येव । न खलु सर्वथा विसदृशपरिणामेषु स्तम्भ-कुम्भा-ऽम्भोरुहेष्वेवैकः परामर्शो भवति । तेनैतदपि प्रत्युक्तम्—

"ऐकप्रत्यवमर्शस्य हेतुत्वाद् धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥" [प्रमाणवा० १।११०] इति ।

149B सविकल्पिका-ऽविकल्पिकानां धियां सर्वथा विसदृशपरिणामाभ्युपगमे एकपरामर्श-स्यैव चिन्त्यत्वात् । तस्मात् सदृशपरिणामाभ्युपगम एव भावेष्वनुगतबुद्धि-शब्दौ घटेते, नान्यथा ।

ननु यदि सदृशपरिणामेष्वेवानुगतबुद्धि-शब्दौ तदा कथं निवृत्तपाककक्रिया-सदृशपरिणामेषु पाचकेषु तौ भवत इति । अत्राह—

निवृत्तपाकादौ पाचकादौ ज्ञान-शक्त्यपेक्षौ बुद्धि-शब्दौ ।

निवृत्तपाकादौ पाचकादाविति । आदिशब्दाद्याजकादिपरिग्रहः । पाचकादौ ह्यनुगतबुद्धि-शब्दयोर्ज्ञानं शक्तिः पाकादिक्रिया च निबन्धनम् । यः पाकादिक्रियां कर्तुं जानाति शक्नोति अनुतिष्ठति च स पाचको याजको वा व्यपदिश्यत इत्यर्थः । ततो यद्यपि निवृत्तपाकादौ पाचकादौ क्रिया नास्ति तथापि ज्ञान-शक्ती स्तः, ततस्तदपेक्षा-
150A वनुगतबुद्धि-शब्दौ भविष्यतः । अत एव समग्रसामग्रीकत्वाभावादीषत् स्खलत एव । न खलु यथा पाकादिक्रियां कुर्वाणे पाचकादावस्खलितौ पाचकादिबुद्धि-शब्दौ तथैवाऽकुर्वाणेऽपि । अत्र चानुभव एव प्रमाणम् । यस्य तु शास्त्रसंस्कारादिना ज्ञान-शक्ती एव स्तो न तु क्रियेा तत्र स्खलितावपि न भवतः, परिपूर्णनिमित्तायाः कदाचिद-
150B र्थ्यभावात् । अनुष्ठितपाकादिक्रियेऽपि च पुंसि शब्दप्रत्ययान्तरनिमित्तमनुतिष्ठति पाकादि-शब्द-प्रत्ययौ न भवतः, शब्द-प्रत्ययान्तराभ्यां बाधितत्वात् । तस्माद्यत्र परिपूर्णं निमित्तमस्ति तत्र पाचकादिबुद्धि-शब्दावस्खलितौ भवतः, यत्र तु निवृत्तक्रियत्वादपरिपूर्णं तत्रेषत्स्खलितौ, यत्र तु क्रिया न वर्तमाना नापि भूतपूर्वा तत्र भवत एव नेति भावः ।

151A स्यादेवम्—'प्रधानकार्योऽयं प्रधानकार्योऽयम्' यदि वा 'ईश्वरकार्योऽयमीश्वरकार्यो-ऽयम्' इत्येवं यावनुगतबुद्धि शब्दौ भावेषु केषांश्चित् प्रादुर्भवतस्तौ कथं त्वन्मते घटेते ? न खलु तेषु प्रधानादिकार्यत्वपरिणामः सम्भवति, भावानां प्रधानादिकार्यत्वस्य भवद्भिरनङ्गी-

१ प्रतिव्यक्तिभिन्नजलधारणक्रियागतबुद्धयो भिन्ना अपि 'एताः सर्वा जलधारणक्रियाः' इत्येकज्ञानस्य हेतुत्वाद-भिन्नाः, तस्याश्चाभिन्नाया व्यक्तयो हेतव इति ता अप्यभिन्ना भण्यन्ते इति कारिकार्थः ॥ २ सम्भ्यन्तम् ॥ **३ निवृत्तपाकादौ पाचकादौ ज्ञानशक्त्यपेक्षौ बुद्धिशब्दौ** ॥ ४ पुंसः ॥ ५ पच्यादिक्रिया ॥ ६ अनुगतबुद्धि-शब्दौ ॥ ७ परिपूर्णं हि निमित्तं त्रिकल्पमनुष्ठानादि ॥ ८ तस्य पुंसः ॥ ९ सति ॥ १० सांख्यादीनाम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

करणात् । तनो यथा प्रधानादिकार्यत्वलक्षणसदृशपरिणामाभावेऽपि भावेष्वनुगतबुद्धि-शब्दौ भवतस्तथा घटादिषु सदृशपरिणामाभावेऽपीति ।

अत्रोच्यते–

प्रधानादिकार्यरूपौ तु संकेत-व्यामोहनिमित्तौ, तदभावेऽभावात् । अध्यक्षतो वस्तुमात्रावगमात् ।

151B प्रधानादीति । आदिशब्दादीश्वरादिग्रहः । प्रधानादिकार्या ईश्वरकार्या वा भावा इत्येवंरूपौ यावनुगतबुद्धि शब्दौ भवतो भावेषु तौ सङ्केत-व्यामोहनिमित्तौ, सङ्केतात् तथा समयात् व्यामोहात् कुशास्त्रश्रवणसंस्काराद् भवतो न सदृशपरिणामात् । तदभावे तयोः सङ्केत-व्यामोहयोरभावे अभावात् प्रधानादिकार्यलक्षणयोर्बुद्धि-शब्दयोरनुत्पादात् । अध्यक्षतोऽध्यक्षेण वस्तुमात्रावगमात् वस्तुमात्रस्य प्रधानादिकार्यत्वरहितस्यावबोधात् । वृद्धैर्हि न यस्य प्रधानादिकार्यमिति सङ्केतः कृतो नापि व्यामोहोऽस्ति न तस्य पुरः पदार्थान् पश्यतः प्रधानादिकार्या एत इति बुद्धिरुदयते । अत एव तथा शब्दोऽपि
152A न भवति, बुद्धिनिबन्धनत्वात् तस्य ।

वृक्षादिष्वप्येवं किं नेष्यत इति चेदाह–

वृक्षादिषु स्वतः सर्वस्य समानपरिणामावगमः । शब्दः संकेतमप्यपेक्षते, क्षयोपशमान्यथानुपपादात् ।

'वृक्षादिषु आदिशब्दात् पटादिषु स्वतः सङ्केत-व्यामोहौ विना सर्वस्य नैकस्य कस्यचित् समानपरिणामावगमः सदृशपरिणामावबोधो भवति । यथा हि 'प्रधानादिकार्यम्' इति सङ्केत-व्यामोहौ विना न भावेषु प्रधानादिकार्यत्वलक्षणसदृशपरिणामः प्रत्यक्षतो
152B वीक्ष्यते, नैवं वृक्षत्वादिलक्षणः, तस्य सङ्केत-व्यामोहौ विनापि प्रतीयमानत्वात् । अकृतवृक्षशब्दवाच्यत्वसङ्केतोऽपि हि बालको वृक्षान् पुरः पश्यंस्तेषु सदृशपरिणामं प्रतिपद्यत एव । न च यो यदभावेऽपि भवति स तन्निबन्धन इति वदन् कृती भवति । तत् प्रधानादिकार्यलक्षणावनुगतबुद्धि-शब्दौ भावेषु सङ्केत-व्यामोहकृतौ, तद्भावे भावादभावेऽभावाँश्चेति ।

१ प्रधानादिकार्यरूपौ तु सङ्केतव्यामोहनिमित्तौ ॥ २ तदभावेऽभावात् ॥ ३ अध्यक्षतो वस्तुमात्रावगमात् ॥ ४ बुद्धेरनुदयादेव ॥ ५ तथा तेन प्रकारेण 'प्रधानेश्वरादिकार्याः' इत्युल्लेखेन शब्दोऽपि ॥ ६ वृक्षादिषु स्वतः सर्वस्य समानपरिणामावगमः ॥ ७ * अत्रेदं बोध्यम्–अत्र पूर्वं ग्रन्थकाराभ्यामीदृशः पाठः लिखित आसीत्–

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

153A शब्दः सङ्केतमप्यपेक्षते । सदृशपरिणामेषु भावेष्वेकः शब्दः प्रवृत्तिमात्रत्वानः सङ्केतमपि समयमप्यपेक्षते, न केवलं सदृशपरिणामदर्शनमिति अपिशब्दार्थः, क्षयोपशमस्याऽन्यथा सदृशपरिणामदर्शनं सङ्केतकरणं च विनाऽनुपपादादनुपपद्यमानत्वात् । विश्वरूपो
153B हि ज्ञानावरणीयादिकर्मणां क्षयोपशमः क्वचित् कदाचित् कथञ्चिद्भवति, क्षयोपशमाधीनाश्च छद्मस्थजनानां सर्वाः प्रवृत्तयः । अयमर्थः—अनुगतबुद्धेः सदृशपरिणाम एवैकं निमित्तमनुगतशब्दस्य तु सदृशपरिणामः सङ्केतश्चेत्युभयं निमित्तमिति । तदनुगतबुद्धि-शब्दान्यथानुपपत्त्या सामान्यांशोऽपि भावेष्वङ्गीकर्त्तव्य एवेति स्थितम् ।

नन्वयमनुगतप्रत्ययो भ्रान्त एवेति कथं तँदन्यथानुपपत्त्या वस्तुसन् सामान्यांशो भावेषु साध्यत इति । अत्राह—

न चायं भ्रान्तः, सर्वत्राऽस्खलितत्वात्, निबन्धनाभावाच्च । अतत्कार्यकारणव्यावृत्तिश्चक्षुरादावप्यस्ति । वासनाहेतुर्न सर्वत्र स्यात्, व्यामोहासम्भवात् । तदयं शाश्वतिको निर्भासो बाह्यसदृशपरिणतिनिबन्धनः प्रमाणम् ।

नँ चायमनुगताकारः प्रत्ययो भ्रान्तो निर्विषयः, सँर्वत्र सर्वदाऽस्खलितत्वात् । अस्खलितत्वं च प्रमाणाबाधितत्वं सर्वपुरुषभावित्वं चोच्यते । नायं प्रत्ययः प्रमाणेन बाध्यते नापि
154A कस्यचिन्न भवति, किन्तु प्रमाणाबाधितः सर्वपुरुषभावी चायं तस्मादभ्रान्त एव । न केवलमस्खलितत्वान्न भ्रान्तः, तथा निबन्धनाभावाच्च । यद्ययं प्रत्ययः सदृशपरिणामनिबन्धनो न भवति तर्हि निबन्धनान्तरं किञ्चिद्वाच्यम् । न खलु भ्रान्तिरपि निर्निबन्धना सम्भवति, अहेतोर्देश-कालनियमाभावात् । निबन्धनान्तरं च किञ्चिदपि नास्त्येव ।

"च । वृक्षादिलक्षणौ पुनः सदृशपरिणामकृतौ, संकेत-व्यामोहाभावेऽपि भावात् । ननु मा भूद् वृक्षोऽयमित्यनुगताकारः प्रत्ययः संकेतनिबन्धनस्तदभावेऽपि भावात्, शब्दः पुनस्तन्निबन्धन एवास्तु संकेताभावे नियतं *तस्याभावात् । न खलु सदृशपरिणामे वृक्षेषु पश्यन्नपि शिशुस्तेषामेकशब्दवाच्यत्वमवस्यतीति । अत्राह"

किन्तु पश्चाद् ग्रन्थकाराभ्यामेव °च । वृक्षा° इत्यस्य स्थाने 'क्वेति' इति कृतम्, ततः परं '[दिलक्षणौ .....अत्राह]' इति च सर्वोऽपि पाठः [ ] एतादृशे कोष्ठके निक्षिप्य ग्रन्थकाराभ्यामेव परित्यक्तः ।

* शब्दस्य ॥

१ क्षयोपशमान्यथानुपपादात् ॥ २ नानाल्पः ॥ ३ °कर्माणां इति हस्तिलिखितादर्शे पाठः ॥ ४ अनुगतप्रत्ययान्य° ॥ ५ न चायं भ्रान्तः ॥ ६ न चायं भ्रान्तः सर्वत्रास्खलितत्वात् ॥ ७ द्विचन्द्रादिज्ञानं प्रमाणबाधितम् ॥ ८ सर्वपुरुषाबाधितत्वं च ॥ * 'सर्वपुरुषाबाधितत्वं च' इति 'सर्वपुरुषभावित्वं च' इत्यस्य टिप्पणं भाति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यादेवम्—अतत्कार्येभ्योऽतत्कारणेभ्यश्च व्यावृत्तिरस्ति निबन्धनम्, तदुक्तम्—"इतरेतरभेदोऽस्य बीजं संज्ञा यदर्थिका।" [प्रमाणवा० १।७३] इति। तदयुक्तम्, अतत्कार्यकारणव्यावृत्तेश्चक्षुरादिभिर्व्यभिचारात्। तदाह—अतदिति। तद्
154B विवक्षितं कार्यं कारणं च येषां ते तथा, न तथा अतत्कार्यकारणास्तेभ्यो व्यावृत्तिर्या सा चक्षुरादावप्यस्ति, आदिशब्दाद् रूपा-ऽऽलोकादिग्रहः। चक्षू-रूपा-ऽऽलोक-मनस्काराणाम्- 5
ज्ञानजनकेभ्यः स्वकारणभिन्नकारणेभ्यश्च घटादिभ्यो व्यावृत्तिरस्ति, न चासावनुगत-प्रत्ययनिबन्धनम्। न खल्वतत्कार्यकारणव्यावृत्तावपि चक्षू-रूपा-ऽऽलोक-मनस्कारेषु घटेष्विवानुगताकारः प्रत्ययः प्रादुरस्ति। चक्षुरिति प्रत्ययस्य रूपा-ऽऽलोक-मनस्कारेष्व-भावात्। तस्मादतत्कार्यकारणव्यावृत्तिरेकाकारप्रत्ययस्य निबन्धनं नोपपद्यते।

155A अनुगताकारप्रत्ययस्यानादिभवाभ्यस्ता कुवासना निबन्धनं न सदृशपरिणाम इति 10
चेत्, उच्यते—वासनेति। वासनाऽविद्या हेतुर्यस्य स तथाभूतो यद्यनुगताकारः प्रत्ययः स्यात् तदा न सर्वत्र पुरुषे देशेऽवस्थायां वा स्यात्, किन्तु क्वचिदेव। कस्मात्? व्यामोहाऽसम्भवात्, स्वतः कुशास्त्रश्रवणाद्वा बुद्धिवैपरीत्यं व्यामोहः। सर्वत्रेति पदं योज्यते। व्यामोहनिमित्ता हि वासना, व्यामोहस्य च सर्वत्र पुरुषे देशेऽवस्थायां वा सद्भावो न सम्भवति। ततो यद्यनुगताकारः प्रत्ययो वासनानिबन्धनः स्यात्तदा 15
सार्वत्रिको न स्यात्। तदित्युपसंहरति। तत् तस्मादयं शाश्वतिकः सदाभावी निर्भासोऽ-
155B नुगताकारो ज्ञानप्रतिभासो बाह्यसदृशपरिणतिनिबन्धनः बाह्यानां घटादीनां यः सदृशपरिणाम-स्तत्कारणकस्तत्प्रभवो वस्तुविषयत्वेन प्रमाणम्, न पुनरन्यनिबन्धनत्वेनाप्रमाणमित्यर्थः। सन्ध्यादौ पाठेऽपि "ऋवर्णोवर्ण" [सि० ७।४।७१] इत्यादिसूत्रे वर्जनाच्छैश्चद्भवः

१ इतरस्मादितरस्मात्, कोऽर्थः? अतत्कार्यादततत्कारणाच्च यो भेदः॥ २ अनुगतप्रत्ययस्य॥ ३ शब्दः॥ 20
४ य इतरेतरभेदोऽर्थः प्रयोजनमस्याः॥ ५ अतत्कार्यकारणव्यावृत्तिश्चक्षुरादावप्यस्ति॥ ६ न ज्ञानं यानि जनयन्तीति॥ ७, ८ 'अतत्कार्येभ्यः, अतत्कारणेभ्यः' इति द्वयं विशेषणाभ्यामुक्तम्॥ * वासना-हेतुर्न सर्वत्र स्यात्॥ १० तदयं शाश्वतिको निर्भासो बाह्यसदृशपरिणतिनिबन्धनः प्रमाणम्॥ ११ यस्य॥ १२ * "भर्तुसन्ध्यादेरण्। ६।३।८९। भं नक्षत्रं तद्वाचिभ्यः, ऋतुवाचिभ्यः सन्ध्यादिभ्यश्च कालवाचिभ्यः शेषेऽर्थे अण् प्रत्ययो भवति। इकणोऽपवादः।.....सन्ध्या 25
सन्धिवेला अमावास्या त्रयोदशी चतुर्दशी पञ्चदशी पौर्णमासी प्रतिपत् शश्वत् इति सन्ध्यादिः। 'ऋवर्णोवर्णात्' [७।४।७१] इति सूत्रे अशश्वदिति प्रतिषेधात् 'शश्वत्'शब्दादिकणपि, शाश्वतम्, शाश्वतिकम्।" इति सिद्धहेमबृहद्वृत्तौ॥ १३ * "ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक्। ७।४।७१। ऋवर्णान्ताद् उवर्णान्ताद् दोस्शब्दादिसन्तात् उसन्तात् शश्वदकस्माद्विवर्जितात् तकारान्नाच्च परस्य इकप्रत्ययस्य सम्बन्धिन इत इकारस्य लुग् भवति, मातुरागतं मातृकम्, पैतृकम्, 'ऋत इकण्' [६।३।१५१]।..... 30
'शश्वदकस्मात्'प्रतिषेधः किम्? शश्वद् भवं शाश्वतिकम्, 'वर्षाकालेभ्यः' [६।३।७९] इतीकण्। आकस्मिकम्।" इति सिद्धहेमबृहद्वृत्तौ॥ १३ * °च्छ° इत्यक्षरादनन्तरं °श्वच्छब्दादिकणपि भवति श° इति पाठोऽत्र लिखित्वा ग्रन्थकाराभ्यामेव घृष्ट्वा अपाकृतः॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शाश्वतिको "वर्षाकालेभ्यः" [सि० ६।३।८०] इतीकणपि । तद्वस्तुनः सामान्य-विशेषरूपत्वानभ्युपगमेऽनुगतव्यावृत्तबुद्धि-शब्दौ न स्यातामिति स्थितम् । ननु यथा सादृश्य-वैसदृश्यनिबन्धने वस्तुन्यनुगत-व्यावृत्तिबुद्धिस्तथा सादृश्य-वैसदृश्ययोरपि प्राप्तुतः, तयोस्तत्रापि भावात् । तथा चानवस्थितिः । अथ तयोस्ते विनाऽपि अनुगत-व्यावृत्तबुद्धी इष्येते तदा वस्तुन्यपि तथाभावप्रसङ्ग इति । तन्न । यतो यथा घटादीनां प्रत्यक्षज्ञानयोगात् प्रत्यक्षत्वं प्रत्यक्षज्ञानस्य तु स्वत एव तथाऽऽपि भविष्यति । ये तु ज्ञानस्यापि परतः प्रत्यक्षत्वमभ्युपगच्छन्ति तेषां सामान्यैर्व्यभिचारः । 5

तुल्यज्ञानगोचरो वस्तुभावः समानपरिणामः स सामान्यम् । अन्यो विशेषः । तौ वस्तुनः स्यादभिन्नावन्योन्याविनाभूतौ सद्भूतौ । अत एवाविरोधः । 10

तत्र सामान्यांशस्वरूपं कथयति–तुल्यस्य सदृशस्य ज्ञानस्य प्रत्ययस्य गोचरो
156A विषयो वस्तुभावो वस्तुपर्यायः समानपरिणाम उच्यते । स इति समानपरिणामः सामान्यमित्युच्यते । न पुनर्यथा परे प्राहुः–नित्यमेकं निरंशं सर्वस्वव्यक्तयनुयायि च, तथाभूतस्य निषेत्स्यमानत्वात् ।

विशेषांशस्य स्वरूपमाह–अन्यो विशेषः उक्तलक्षणात् समानपरिणामादन्यो विपरीत-लक्षणो विशेषो विशेषांशः । योऽतुल्यज्ञानगोचरो वस्तुभावः स विशेषांश इत्यर्थः । 15

ताविति सामान्य-विशेषौ वस्तुनो धर्मिणः सकाशात् स्यात् कथञ्चिद् भिन्नौ व्यतिरिक्तावन्योन्याविनाभूतौ परस्परनान्तरीयकौ, सामान्यांशं विना विशेषांशो न भवति
156B विशेषांशं च विना सामान्यांशः । सदभूतौ प्रमाणाबाधितौ परमार्थसन्तावित्यर्थः । प्रमाणाबाधितत्वं च पूर्वोदितनीत्या द्रष्टव्यम् । एतेन ये सामान्यं परमार्थसदपि स्व-व्यक्तिभ्य एकान्तभिन्नमभिदधति ते निरस्ताः तथा विशेषांशमपि ये वस्तुस्वभावरूपमेव मन्यन्ते न पुनर्विशेषपरिणामरूपं वस्तुनो भिन्नाभिन्नं धर्मं तेऽपि च । 20

अत एवेति, यत एव सामान्यविशेषौ वस्तुधर्मौ सद्भूतौ अत एवाविरोधः ।

---

१ * "वर्षाकालेभ्यः । ६।३।८० । वर्षाशब्दात् कालविशेषवाचिभ्यश्च शेषेऽर्थे इकण् प्रत्ययो भवति ॥" इति **सिद्धहेमबृहद्वृत्तौ** ॥ २ अनुगत-व्यावृत्तिबुद्ध्योः सादृश्य-वैसदृश्यबुद्ध्योः ॥ ३ यथा सामान्येषु सामान्यान्तरं विनापि अनुगता बुद्धिस्तथा सादृश्य-वैसदृश्ययोरपि स्वत एव सादृश्य-वैसदृश्यबुद्धी स्यातामित्यर्थः ॥ ४ **तुल्यज्ञानगोचरो वस्तुभावः समानपरिणामः स सामान्यम्** ॥ ५ सर्वपुरुषविज्ञानानां विषयः ॥ ६ **तौ वस्तुनः स्यादभिन्नावन्योन्याविनाभूतौ सद्भूतौ** ॥ ७ केवलानेव विशेषान् बौद्धा मन्यन्ते, न पुनः सामान्यगर्भितं वस्तु ॥ ८ **अत एवाविरोधः** ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वस्तुनः सकाशादेकदा सामान्य-विशेषयोर्भेदा-ऽभेदसद्भावलक्षणो विरोधो न भवति । तथाहि—भेदा-ऽभेदयोर्विरोधः परस्परभावरूपत्वं वा स्यादेकान्तभेदाभेदवत्, धर्मिणि
157A परस्परभावापादकत्वं वा शीतोष्णवत्, परस्परभाववत्त्वं वा दण्डित्व-कुण्डलित्ववत् । तत्र नाद्यः, कथञ्चिद्भेदाभेदयोरभ्युपगमात् तयोश्च परस्परभावरूपत्वाभावात्, एकान्तभेदाभेदयोरेव तद्रूपत्वात् । अन्यथा कथञ्चित्त्वव्याघातः, द्वितीयरूपाभावेनैकान्तत्व- 5
प्रसङ्गात् । कथञ्चित्त्वव्याघातादेव द्वितीयोऽपि न । नापि तृतीयः, कृतकत्वा-ऽनित्यत्वादेरपि परस्परभाववत्तामात्रेण विरोधप्रसङ्गात् । चतुर्थस्तु प्रकारो न सम्भवति । तत् सामान्य-विशेषौ धर्मौ धर्मिणः कथञ्चिद् व्यतिरिक्ता-ऽव्यतिरिक्तौ प्रमाणोपनीतौ परमार्थसन्ताविति ।

स्यान्मतम्—येषामेकं सत् सामान्यं भूतेषु कण्ठगुण इव स्वव्यक्तिष्वनुगतं तेषां 10
157B तन्निबन्धनोऽनुगताकारः प्रत्ययो युज्यते ग्राह्यरूपाप्यनुगतत्वात् । भवतां तु सदृशपरिणामः सामान्याख्यः प्रतिव्यक्ति भिन्नः कथमनुगताकारप्रत्ययहेतुः स्याद्, ग्राह्यस्यानुगतत्वात्? अन्यथा विसदृशपरिणामस्यापि विशेषाख्यस्य तद्धेतुत्वप्रसङ्गः, प्रतिव्यक्तिभिन्नत्वस्याविशेषादिति ।

अत्राह— 15

प्रतिव्यक्ति भेदाविशेषेऽपि अनयोर्भिन्नधीहेतुत्वम्, सामर्थ्यवैचित्र्यात्, घटोदञ्चनादिवत् ।

प्रतिव्यक्तीति । व्यक्तिं व्यक्तिं प्रति प्रतिव्यक्ति भेदाविशेषेऽपि अनयोः सामान्यविशेषधर्मयोर्भिन्नधीहेतुत्वम् । सामान्यांशोऽनुगताकारप्रत्ययहेतुः, विशेषांशः पुनर्व्यावृत्ताकारप्रत्ययहेतुः, सामर्थ्यवैचित्र्यात् । विचित्रं हि पदार्थानां सामर्थ्यं कस्यचित् कदा- 20
चित् क्वचिद् भवति । ततः सदृशपरिणामः प्रतिव्यक्ति भिन्नोऽप्यनुगताकारप्रत्ययजनने
158A समर्थो विसदृशपरिणामस्तु तथाभूतोऽपि व्यावृत्ताकारप्रत्ययजनने । घटोदञ्चनादिवदिति साधर्म्यम्, आदिशब्दाच्छरावादिग्रहः । यथाहि मार्दवाविशेषेऽपि घटो 'घटोऽयम्' इति प्रत्ययजनने समर्थो न 'उदञ्चनमिदम्' इति । उदञ्चनमपि 'उदञ्चनमिदम्' इति

१ एकान्तभेदो हि एकान्ताभेदाभावरूपः, एकान्ताभेदो हि एकान्तभेदाभावरूपः ॥ २ परस्पराभावरूपत्वात् ॥ 25
३ एकस्य भेदस्याभेदस्य वा अंगीकारे द्वितीयस्य निराकरणे एकान्तत्वमेवायातीत्यर्थः ॥ ४ विकल्पो ॥ ५ नै० [=नैयायिकानाम्] ॥ ६ भूतानि ग्रह-नक्षत्राणि, तेषां कण्ठे दीर्घगुणोऽर्चनार्थं निबध्यते ॥ ७ सामा° ॥ ८ अनुगताकारप्रत्ययहेतुत्व ॥ ९ प्रतिव्यक्ति भेदाविशेषेऽप्यनयोर्भिन्नधीहेतुत्वम् ॥ १० प्रतिव्यक्ति भिन्नोऽपि ॥ ११ समर्थः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रत्ययजनने समर्थं न 'घटोऽयम्' इति । तथा सदृश-विसदृशपरिणामयोः प्रतिव्यक्ति-परिसमाप्तत्वाविशेषेऽप्यनुगत-व्यावृत्ताकारप्रत्यययोर्जनकत्वम्, सामर्थ्यवैचित्र्यात् ।

158B अपि च, भावान् पश्यतः पुरुषस्य नैकं भूतेषु कण्ठगुण इव बहुष्वनुगतं किञ्चिदाभासते । तथाहि—'गौरयं गौरयम्' इति प्रत्ययो य उत्पद्यते न तत्र व्यक्ति-भिन्नस्यानुगतस्य कस्यचिदप्यनुसन्धानमस्ति, न हि 'यच्छाबलेये रूपं तद् बाहुलेयेऽपि' इत्येवमाकारोऽयं प्रत्ययः संवेद्यते । नापि व्यक्त्यभिन्नस्यानुगतस्य कस्यैचित्, 'य एव
159A बाहुलेयः स एव शाबलेयः' इत्येवं प्रत्ययानुभवात् । ततो भेदा-ऽभेदाभ्यां सामान्या-संवेदनाच्च सामान्याभासं विज्ञानम् ।

ननु परस्परविलक्षणानां भेदानामेकोपाधिसम्बन्धमन्तरेण न 'गौर्गौः' इति प्रत्यया-भेद उपपद्यते । न हि स्वात्मन्येषां विजातीयाभिमतभेदवैलक्षण्यमस्ति । तच्छा- बलेयापेक्षया बाहुलेय-घटयोरविशेषेऽपि यच्छाबलेय-बाहुलेययोर्गौर्गौरिति प्रत्ययो न घटे तदेकगोत्वसम्बन्धादिति सिद्धः सामान्यप्रतिभास इति । तदपि न, गौर्गौरिति प्रत्ययेन
159B विशेषस्य 'इहेह इदानीम् अयम्' इत्येवं देश-काल-स्वरूपेवतो विषयीकरणात् नित्ये व्यापिन्येकस्मिंश्च देशादीनामभावादिति कथं सामान्यस्य प्रतिभासः स्यात् ? यत् पुनर्भेदाविशेषेऽपि बाहुलेय-शाबलेययोरेव 'गौर्गौः' इति प्रत्ययो न घटे तत्र सदृशपरिणामा- भावः कारणम् । बाहुलेय-शाबलेयौ हि परस्परं सदृशपरिणामवन्तौ, न तु घटः ।

स्यादेवम्—'गौर्गौः' इति प्रत्ययो देशादिनियतान् विशेषानेवानुसन्धत्त इति काममनुमन्यामहे, किन्त्वेकगोत्वोपाधीनिति ब्रूमः । न, गोत्वविशेषेणानां गवाम-प्रतिभासनात् । न हि यथा दण्डग्रहणपुरस्सरं दण्डिनि विज्ञानमेवं गोत्वग्रहणपूर्वकं
160A शाबलेयादिषु । एकमेव हि 'गौः' इति विज्ञाने किञ्चिदाभासते, द्वयोस्त्र तटस्थयोर्विशेषण-विशेष्यभूतयोर्वाऽनवगमादिति नायं गोत्वमुखेन विशेषावगमः । भेद-सामान्ययोः सम्बन्धसौक्ष्म्याद् दण्डवद्प्रतिभासः सामान्यस्येति चेत्, कुतस्तर्हि 'घटेषु रूपादयः, इह

१ कर्तृभूतयो. ॥ २ कर्मभूतयोः ॥ ३ पृथग् सिद्धस्य । एतावता संयोगं निषेधति ॥ ४ अयुतसिद्धस्य । अनेन समवायप्रतिषेधः ॥ ५ अनुसन्धानमस्ति ॥ ६ एकस्मात् सामान्यात् शाबलेयबाहुलेयव्यक्त्योरभेदे तयोरप्यभेदः प्राप्नोतीत्यभिप्रायः ॥ ७ शाबलेयबाहुलेयरूपविशेषाणाम् ॥ ८ विशेषाणां भेदानाम् ॥ ९ Sस्व ॥ १० '५' [=तस्मात्] ॥ ११ भेदावि ॥ १२ देशनियमः ॥ १३ कालनियमः ॥ १४ वस्तुस्वरूपनियमः ॥ १५ '६' [षष्ठयन्तम्] ॥ १६ सामान्ये ॥ १७ '७' [सप्तम्यन्तम्] ॥ १८ प्रस [=प्रथमसमासः, बहुव्रीहिरित्यर्थः] ॥ १९ प्रस [=प्रथमसमासः, बहुव्रीहिरित्यर्थः] ॥ २० पूर्वकम् ॥ २१ व्यक्तिसामान्ययोः स्वतन्त्रयोरित्यर्थः ॥ २२ व्यक्ति ॥ २३ समवायरूप ॥ २४ '६' [=षष्ठयन्तं विग्रहे पदम्] ॥ २५ वैयधिकरण्येन ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तन्तुषु पटः' इति गुणा-ऽवयविनां द्रव्या-ऽवयवेभ्यो भेदप्रतिभासः ? तत्रापि हि समवायसम्बन्धस्य सौक्ष्म्यमस्त्येव । अपि च, कोऽर्थः सामान्याद्भेदोऽवैसीदति येन व्यक्तिभ्यः पार्थक्येनाप्रतिभासमानमपि सम्बन्धसौक्ष्म्यावलम्बनेन तत् समर्थ्यते, सदृशप्रत्ययस्य प्रतिव्यक्तिपरिसमाप्तसदृशपरिणामेनाप्युपपद्यमानत्वात्, सामान्यनिबन्धनस्य च प्रयोजनान्तरस्याभावात् । तत्र 'गौर्गौः' इति प्रत्यये व्यक्तिभ्यो भिन्नस्याभिन्नस्य वा कस्यचिदप्यनुगतस्यानुसन्धानमस्ति उपपद्यते वा । तदयं प्रत्ययः 'समाना गावः' इत्येवमाकार एव । स चैवमाकारः प्रतिव्यक्तिपरिसमाप्तेनापि सदृशपरिणामेन शक्य आविर्भावयितुम् ।

160B अथ मिथ्याग्रहादनुगताकार इष्यते तदा प्रतिव्यक्तिभिन्नत्वाविशेषेऽपि सामर्थ्यवैचित्र्यात् सदृशपरिणाम एव जनयति न विसदृशपरिणाम इति परमार्थः ।

161A तदेवं स्वसिद्धान्तस्थितिं कथयित्वा परसिद्धान्तं दूषयति—

अनुगतैकसम्बन्धनिबन्धना तु धीस्तद्वन्त इति स्यात्, भूतवत् कण्ठे गुणेन । न हि सम्बन्धेनाऽपि अन्येन अन्ये समाना नाम । सङ्ख्यादिमन्तोऽपि स्युः । अभिन्नाभिधानप्रत्ययहेतुत्वमपि समवायनिमित्तम् ।

अनुगतेति । अनुगतं सकलस्वव्यक्तयनुयायि एकमखण्डं तेन सह यो व्यक्तीनां सम्बन्धः समवायः तन्निबन्धना तु धीर्भावेषु सामान्यबुद्धिर्यदि स्यात्तदा 'तद्वन्तः' इति स्यात्, 'अनुगतैकपदार्थवन्तोऽमी भावाः' इत्येवं प्रत्ययः स्यात्, न समाना इत्येवम् ।

यदपि चात्र केनाप्यभ्यधायि—"पिण्डे एव कुण्डे बदरवत् कृतो नोपलभ्यते इति चेत्, अनन्यदेशत्वात्"[10] [आत्मतत्त्व०] इति, तदपि न सोधीयः, यतो यद्यनन्यदेशत्वं पिण्ड-सामान्ययोरेकदेशत्वमुच्यते तदा समवायोऽपि नौनयोः स्यात् आधाराधेयभावे एव तत्सम्भवात्, भिन्नदेशयोरेव च कुण्ड-बदरयोराधाराधेयभावदर्शनात्, अन्यथाऽऽत्मा-ऽऽकाशयोरपि समवायप्रसङ्गः । अथापि पिण्डस्य स्वावयवा देशः सामान्यस्य तु पिण्ड

161B एवेत्यनन्यदेशत्वमुच्यते तथापि तद्वत्ताप्रत्ययप्रसवप्रसङ्गः प्रतिरोद्धुमशक्यः, एवं भावेऽपि गुणिनि घटादौ 'रूपवानयं स्पर्शवानयम्' इत्यादिप्रत्ययप्रादुर्भावोपलम्भात् । तस्मादनुगतैक-

१ घट-रूपयोः तन्तु-पटयोः ॥ २ काङ्क्षा ॥ ३ प्रत्ययः ॥ ४ पूर्वोक्तयुक्त्या तावदनुगताकारो निषिद्धः । अथासौ मिथ्याभिनिवेशादिष्यते तदेत्युत्तरम् ॥ ५ **अनुगतैकसम्बन्धनिबन्धना तु धीस्तद्वन्त इति स्यात्** ॥ ६ प्रथमं बौद्धमाशङ्क्य नै[यायिकमाशङ्कते] ॥ ७ '७' [=सप्तम्यन्तम्] ॥ ८ सामान्यम् ॥ ९ **उदयनः** ॥ १० * उदयनाचार्यविरचिते **आत्मतत्त्वविवेके** क्षणभङ्गवादे [पृ० ४०२] पाठोऽयं विद्यते ॥ ११ जैनः ॥ १२ पिण्डसामान्ययोः ॥ १३ '७' [=सप्तम्यन्तम्] ॥ १४ इत्येवं सत्यपि । पिण्डस्य स्वावयवा देशः, सामान्यस्य तु पिण्ड एव ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पदार्थवन्तोऽमी भावा इत्येवं प्रत्ययः स्यात्, न समाना इत्येवम्, यदि सत्यं सामान्यनिबन्धनः समानप्रत्ययः पदार्थेषु ।

भूतवत् कण्ठे गुणेनेति निदर्शनम्, भूतानि ग्रह-नक्षत्राणि, तेषां कण्ठे दीर्घो गुणोऽर्चनार्थं निबध्यते, तेनैकेन कण्ठे गुणेन यथा भूतानि तद्वन्तीति गृह्यन्ते न तु समानानीति तद्वद् भावा अपि सामान्यवन्त इति गृह्येरन् । 5

[1]हियस्मात् सम्बन्धेनाऽप्यन्येन एकेन पदार्थेनाऽन्येऽसमानाः सन्तो न समानाः क्रियन्ते । ततः सम्बद्धेनाऽपि सामान्येन स्वभावतोऽसमानाः सन्तो भावाः कथमिव समानाः क्रियेरन् । केवलं तद्वन्तोऽमी इति स्यात् । यदि पुनः स्वतोऽसमाना अप्यन्येन योगात् समाना भवेयुस्तदा सङ्ख्यादिमन्तोऽपि स्युरिति समाना इति सम्बन्धः ।

162A आदिशब्दात् संयोग-कार्यद्रव्यपरिग्रहः । द्वित्वादिसङ्ख्यावन्तः संयोगिनः कार्यद्रव्यावयवाश्च सङ्ख्यया संयोगेन कार्यद्रव्येण चैकेन स्वन्मते सम्बद्धास्ततस्तेष्वपि समाना इति प्रत्ययः प्रादुःष्यात्, यदि सत्यमखण्डेनैकेन सम्बन्धः समाना इति बुद्धेर्हेतुर्भवतो मतः । 10

अन्यस्य नित्यत्वेन विशेषणात् सङ्ख्यादिष्वप्रसङ्ग इति चेत् । न, अनित्यस्य सतो जनकस्यैव समवायित्वात् । तद्यदि सामान्यस्य गवादिव्यक्तयः समवायिन्यस्तदा तेनैव तत्कार्येण नियमतो भाव्यम्, तथा च नित्यत्वहानिरिति नित्यत्वविशेषणं कस्यचिदप्यनित्यपदार्थसमवेतस्यासिद्धम् । सामान्यस्य विचार्यत्वान्न तेन व्याप्तिव्यभिचारः । समवायं प्रति तु व्यक्तयः समवायिन्य एव न भवन्ति । समवायित्वे वा समवायस्यापि पक्षनिक्षेपः । 15

162B न चाभिन्नाभिधान-प्रत्ययहेतुर्यः स एव सामान्यमिति वक्तव्यम् । यतः समवायनिबन्धनं सामान्यस्याऽभिन्नाभिधान-प्रत्ययजनकत्वम् । समवायश्च सङ्ख्यादीनामप्यस्ति । समवायाविशेषेऽपि सामान्यस्यैवाभिन्नाभिधान-प्रत्ययजननप्रकृतिर्न सङ्ख्यादीनामिति चेत् । एवं तर्हि निःसामान्या अपि व्यक्तयः प्रकृत्यैवाभिन्नाभिधान-प्रत्ययं जनयिष्यन्ति, कृतमश्रद्धेयधर्मवत्तयाऽनेकपिशुनप्रवेशकारिणा सामान्येन । 20

अपि च, नित्यमेकमनंशममूर्त्तं सामान्यं भवद्भिरिष्यते । एवम्भूताभासश्चानुगतप्रत्ययो न संवेद्यते । तदाह— 25

न च यथारूपमन्यधीः, वर्णादिग्रहणपरिणामसंवेदनात् ।
व्यक्तेर्वर्णादिप्रतिभासे तुल्यतापि तस्या एवास्तु ।

१ न हि सम्बन्धेनाप्यन्येनाऽन्ये समाना नाम ॥ २ सह ॥ ३ कार्यद्रव्यस्यावयविनोऽवयवा हस्तपादादयः ॥ ४ सामान्ये[न] ॥ ५ सामान्यस्य ॥ ६ सामान्येन ॥ ७ गवादिकार्येण ॥ ८ सामान्यरूपस्य ॥ ९ अभिन्नाभिधानप्रत्ययहेतुत्वमपि समवायनिमित्तम् ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नं चेति, रूपस्य स्वभावस्यानतिक्रमेण यथारूपं यथासामान्यस्वभावमित्यर्थः,
163A अन्यस्य सामान्यस्य धीर्बुद्धिः। येयं सामान्यविषया बुद्धिस्त्वयेष्यते सा यथा सामान्यस्य स्वरूपं तथा नोपजायत इत्यर्थः। वर्णादिग्रहणपरिणामसंवेदनादिति। वर्णः सितपीतादिः। आदिग्रहणात् संस्थानादिग्रहः। 'गौरयं गौरयम्' इति प्रत्ययस्य वर्ण-संस्थानग्रहणपरिणामः संवेद्यते, सामान्यं चामूर्त्तत्वेन वर्ण-संस्थानरहितम् ततोऽसौ प्रत्ययः कथं सामान्यविषयो घटेत? न हि रक्तपटग्रहणपरिणामस्य ज्ञानस्य सितः पटो विषयीभवति।

नन्वयं वर्ण-संस्थानप्रतिभासः सामान्यज्ञाने व्यक्तिकृतो न सामान्यकृतः।
163B सामान्यज्ञाने हि विशेष्यत्वेन व्यक्तयो विशेषणत्वेन च सामान्यमवभासते। तत् कुतो न यथारूपं धीर्भवतीति? न, व्यक्तेरिति। यदि सामान्यज्ञानस्य वर्णादिप्रतिभासो व्यक्तेः सम्बन्ध्यभ्युपगम्यते तदा तुल्यतापि सामान्याकाराभासोऽपि तस्या एव व्यक्तेरेव सम्बन्धी अस्तु। यदि व्यक्तिकृतः सामान्यज्ञानस्य वर्ण-संस्थानादिप्रतिभास इष्यते तदा समानाकारप्रतिभासोऽपि तत्कृत एवेष्यताम्, पूर्यते सामान्येन।

कथं च स्वाश्रयमात्रव्यापिनः सामान्यस्यान्योत्पत्तौ सम्भवः, स्वव्यक्त्यभावेऽभावात् नित्यत्वात् व्यक्तिशून्यतापादात्।

अपि च, इदं सामान्यं यदि स्वाश्रयमात्रव्यापि तदा कथं च स्वाश्रयमात्रव्यापिनः स्वव्यक्तिष्वेवावस्थायिनः स्वव्यक्त्यन्तरालाऽव्यापिन इत्यर्थः सामान्यस्याऽन्योत्पत्तावन्यस्या
164A व्यक्तेरुत्पादे सति सम्भवः स्यात्, स्वव्यक्त्यभावे स्वाश्रयाभावेऽभावात् सामान्यस्यासत्त्वात्। नवोत्पन्नव्यक्तिदेशे हि पूर्वं सामान्यं नास्ति व्यक्त्यभावे तस्यासत्त्वात्, अतः कथं नवोत्पन्नव्यक्तेः पूर्वोत्पन्नव्यक्तिसादृश्यं सम्भवेत्?

नंनु न स्वरूपसत्ता-ऽसत्त्वयोः सामान्यं व्यक्तिमपेक्षते किन्तु सम्बद्धत्वे। ततो व्यक्त्यभावे सामान्यं नास्तीति कोऽर्थः? असतीभिर्व्यक्तिभिर्न सम्बध्यते। न तु स्वरूपत एव नास्ति। अथैवं वितर्कयेः—पूर्वमसम्बद्धं पश्चात् कथं सम्बध्यते नित्यैकरूपत्वादिति? व्यक्तिभावादिति ब्रूमः, असम्बन्धस्य व्यक्त्यभावप्रयुक्तत्वात्। तस्मादभिनवोत्पन्नव्यक्तीनां पूर्वोत्पन्नव्यक्तिभिः सादृश्यं सम्भवत्येव, सामान्यस्य पूर्वमपि सम्भवादिति।

---

१ न च यथारूपमन्यधीः॥ २ व्यक्तेर्वर्णादिप्रतिभासे तुल्यतापि तस्या एवास्तु॥ ३ कथं च स्वाश्रयमात्रव्यापिनः सामान्यस्यान्योत्पत्तौ सम्भवः॥ ४ * '°न्तराव्यापिनः' इति पूर्वं पाठो लिखित आसीत्, पश्चात् तं संशोध्य पाठोऽयं ग्रन्थकाराभ्यामेव लिखितः॥ ५ स्वव्यक्त्यभावेऽभावात्॥ ६ विषये॥ ७ नैया°॥ ८ '७' [=सप्तम्यन्तम्]॥ ९ सह॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उच्यते— इह तावदियं न्यायस्थितिः । यो यस्याऽनित्यः सन् समवायी स तस्य कारणत्वे सत्येव तथा भवति, यथा द्रव्य-गुण-कर्मणां समवायिनः । कारणम-
164B कारणमपि वा 'नित्यसंस्तर्था स्याद्, यथा परमाणवो रूपादीनाम् । ततो यदि पूर्वावस्थितस्य सामान्यस्याभिनवोत्पादभाजो व्यक्तयः समवायात् सम्बन्धिन्यस्तदा तासां सामान्यं प्रति कारणत्वं वा नित्यत्वं वा गलेपादिकयाऽपि परोऽभ्युपगमयितव्यः, समवायित्वस्य प्रकारान्तरेणादर्शनात् । तत् किमुच्यते सामान्यासम्बन्धस्य व्यक्तयभाव-प्रयुक्तत्वादिति ? सामान्यस्य हि व्यक्तिभिः सह सम्बन्धे न व्यक्तीनां सत्त्वमात्रं प्रयोजकम्, अपि तर्हि कारणत्वविशेषितं नित्यत्वविशेषितं वा । ततो यद्यपि पश्चादु-त्पन्नाया व्यक्तेः सत्ता समजनि तथापि नासौ पूर्वस्थितस्य सामान्यस्य सम्बन्धिनी भवितुमर्हति, सम्बन्धप्रयोजकस्य कारणत्वस्य नित्यत्वस्य चाऽभावात् । ततो यदि
नाम व्यक्तयभावेऽपि सामान्यावस्थानमाहतं तथाप्यभिनवोत्पन्नव्यक्तेः पूर्वोत्पन्नव्यक्तिभिः
165A सह सादृश्यं न घटामञ्चति । यत् पुनरावाभ्यां पूर्वं सामान्यावस्थानाभावोऽभिनवोत्पन्न-व्यक्तेः पूर्वोत्पन्नव्यक्तिभिः सादृश्याभावायोपन्यस्तः स केवलं सूक्ष्मेक्षिकामकक्षीकृत्य । परमार्थतस्तु सामान्यसम्भवेऽपि सादृश्यं न सम्भवेति ।

ननु व्यक्तयैव सह सामान्यमप्युत्पद्यते ततः स्यादेव सादृश्यसम्भवः । तदपि न, कुतः ? नित्यत्वात् । सामान्यं हि नित्यं कुतो व्यक्तिवदुत्पादभारमाविशेत् ?

यद्यपि पूर्वं नासीन्न च सहैवोत्पद्यते तथापि पूर्वोत्पन्नव्यक्तिस्थं सामान्यं नवां व्यक्तिमुत्पद्यमानामेव गत्वा सदृशप्रत्ययमुत्पादयतीति चेत् । न, व्यक्तीति । यदि हि
165B चिरसंस्तुतामपि पूर्वोत्पन्नां व्यक्तिमपहाय नवसङ्गमरसिकतयाऽभिनवोत्पादिनीं सामान्यं व्यक्तिमुपश्लिष्येत्तदा पूर्वा व्यक्तिः सामान्यप्रवासोद्वसीकृता सदुःखमहोरात्राणि यापयेत् ।

चिरंप्रीतामपि व्यक्तिं पूर्वां त्यक्त्वा व्रजेद्यदि ।
सामान्यमपरां व्यक्तिं नवसङ्गमनोत्सुकम् ॥
वराकी तदनेनेयमकस्मादुज्झिता सती ।
वियोगविधुरा दुःखमहोरात्राणि यापयेत् ॥

१ यो घटादिर्यस्य रूपादेः ॥ २ आधारः ॥ ३ समवायित्वेन ॥ ४ तत्(?) ॥ ५ परमाणवो हि रूपादीन् प्रति कारणानि, अणुत्वं प्रति अकारणानि अणुत्वस्य नित्यत्वात् ॥ ६ यो ॥ ७ नित्यः सन् यः समवायी आधारः स कारणमकारणमपि परमाण्वादिः ॥ ८ समवायी ॥ ९ यदि व्यक्तीनां कारणत्वं नाङ्गीकरोषि तदा नित्यत्व-मंगीकुरु ॥ १० सामान्यस्यावस्थानं न घटत इत्यर्थः ॥ ११ सम्बन्धनिबन्धनकारणत्व-नित्यत्वाभावात् ॥ १२ चिरं प्रीतं प्रेम यस्याम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्याप्यात्मानमेतस्मै चपलप्रीतये ततः ।
अर्पयन्ती परित्यागशङ्कया हृदि तर्कयेत् ॥ इति[1] ।

166B तस्माद्यदि सामान्यं स्वाश्रयमात्रव्यापि तदा हेतुशतैरप्युत्पद्यमानव्यक्तौ न सम्भवति । ततो यदुक्तं "विचित्रा हि पदार्थानां शक्तिः, तेन सामान्यस्यैवंरूपी शक्तिर्यया हेतुविशेषैरुत्पद्यमानेऽर्थे पूर्वस्थानादचलदेव वर्त्तते, चलने हि पूर्वस्थानं तैच्छन्यं स्यात्" [ ] इति, तद् दैष्टिकैर्भाषितमिव लक्ष्यते । यदि हि परोपन्यस्तदूषणोपद्रवोपद्रुतैः शक्तिवैचित्र्यमन्त्रानुस्मरणं शरणं क्रियेत तदा स्थिता वाद-प्रतिवादसङ्कथा, शक्तिवैचित्र्यमन्त्रानुस्मरणस्य हलधरजनेनापि शक्यक्रियत्वात् ।

ननु मूर्त्तस्यायं स्वभावो यदेकत्र सर्वात्मना स्थितं स्थानान्तरमाक्रामितुं न समर्थायते । अमूर्तं च सामान्यम् । तद्यदि पूर्वस्थानादचलदपि स्थानान्तरमाक्रामेदा-क्रामतु नाम को विरोध इति ? तदपि न । एवं ह्यात्मनां विभुतां प्रकल्या(ल्प्या ?)लम् ।
166A सा हि गुणत्वेनादृष्टानां स्वाश्रयसम्बन्धं विना साक्षाद् द्रव्यान्तरैरसम्बन्धादसम्बद्धस्य च हेतुत्वप्रकल्पावतिप्रसङ्गादग्न्याद्यूर्द्ध्वज्वलनादीनां च सर्वात्मसाधारणादृष्टकृतत्वात् पर्यकल्पि । एतच्च तां विनाऽपि घटामञ्चते, अदृष्टानां स्वन्मतेनामूर्त्तत्वेन दूरस्थितानामपि हेतुत्वघटनात् । मूर्त्तानामेवायं स्वभावो यद् दवीयोदेशस्थितानामहेतुत्वं नामूर्त्तानामिति वाचोयुक्तिग्रस्तापि सुखोद्धारणीयत्वात् । अतिप्रसङ्गोपद्रवोऽपि अमूर्त्तत्वमन्त्रानुस्मरणादेव प्रतिधानिष्यते ।

अथैवमाचक्षीथाः—यथा न किमप्यमूर्त्तं सद् व्यवधानेन कस्यचिद्धेतुरुपालभीति कथमदृष्टानां तथाभावो विभावयितुं शक्यते इति । एवं तर्ह्यमूर्त्तं सन्न किमपि पूर्वस्थानादचलदपि स्थानान्तरमाक्रामदुपालम्भीति सामान्यस्याऽपि कथं तथाभावो
166B विभावयितुं शक्यताम् । तस्मादमूर्त्तत्वमपि पूर्वस्थानादचलतः सामान्यस्य स्थानान्तराक्रमणे शरणं भवितुं नार्हति ।

अपि च, यदन्तरालेष्ववर्त्तमानमेककालमनेकेषु वर्त्तते तदनेकमेव, अन्तराला-व्यापिनो[14] युगपदनेकवर्त्तिनोऽनेकभाजननिषण्णनारङ्गफलानामिवानेकत्वनान्तरीयकत्वात् । यत् पुनरेकं सद् युगपदनेकेषु तदन्तरालानि व्याप्नोत्येव, एकस्य युगपदनेकवर्त्तिनो मन्दारदामदोरस्येवाऽन्तरालव्याप्तिनान्तरीयकत्वात् । ततो यदि सामान्यमन्तरालान्यनभ्यु- 52

१ सामान्याय ॥ २ * 166 संख्याके द्वे पत्रे, तत्र एकम् इतः परं 166 A पत्रं लिखित्वा पृष्ठं दुष्पठम् ॥ ३ सामान्यम् ॥ ४ दिष्टं दैवं प्रमाणमस्य ॥ ५ पर्यकल्पीति उत्तरेण सम्बन्धः ॥ ६ पुण्यपापानाम् ॥ ७ आत्मा ॥ ८ '३' [=तृतीयान्तम्, 'स्वाश्रयेण सम्बन्धं विना' इत्यर्थः] ॥ ९ तापा(?)दिभिः ॥ १० विभुताम् ॥ ११ यदि असम्बद्धोऽपि हेतुस्तदा विवक्षितादन्योऽपि कथं न हेतुरित्यतिप्रसङ्गः ॥ १२ व्यवधानेन कारणभावः ॥ १३ व्यक्तिगतसामान्यपक्षमाश्रित्य ॥ १४ '६' [=षष्ठयन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वानमात्माश्रयेणानुभूते तदाऽनेकमेव । एतच्च काममनुजानीमः, प्रतिव्यक्ति भिन्नस्य 'समाना इमा व्यक्तयः' इति प्रत्ययहेतोः समानपरिणामस्य परमार्थसतोऽभ्यनुज्ञानात् ।

सर्वगतत्वे चान्यत्रापि तत्प्रत्ययः स्यात्, समवायभावात् । स्वत्वमपि तन्निबन्धनम् । अस्ति चैकत्रापि अश्वत्व-पशुत्वधीः । विरोधित्वे चासर्वगतत्वम्, अविकलकारणस्य कार्यनिष्ठत्वात् । गोत्वं वा गजत्ववैकल्यायाऽस्तु । अन्योन्यमुभयं वा । ततः प्रत्ययानुत्पत्तिः । को वाऽविशेषे व्यक्तीनां पक्षपातः?

अथानेकत्वप्रसङ्गप्रतिभयादन्तरालव्याप्तिरिष्यते तदा सर्वगतत्वम्, सैर्वगतत्वे च
167A सामान्यस्याऽन्यत्रापि पराश्रयेऽन्तराले वा तत्प्रत्ययः स्यात्, समवायभावात् । गोत्वं हि स्वानुरूपं प्रत्ययं गोषु समवायादेव जनयति, स च समवायोऽन्यत्रापि गजादावस्ति सामान्यस्य समवायस्य च व्यापित्वाभ्युपगमात्, ततो गोष्विव गजादावपि गोप्रत्ययः स्यात् ।

ननु गोत्वस्य गाव एव स्वव्यक्तयो न गजादयस्ततः कथं तेषु गोबुद्धिं जनयेदित्याह स्वैत्वमपि आत्मीयत्वमपि तन्निबन्धनं स समवायो निबन्धनं यस्य स्वत्वस्य तत्तथा । गोत्वस्य हि गावस्तेषु समवायादेवात्मीयाः, समवायश्च गजादिष्वप्यस्ति,
167B ततस्तेऽप्यात्मीया एव स्युः । ततस्तेष्वपि गोबुद्धिः स्यात् । ततो यदाह—"अस्तु वा सर्वगतं सामान्यम्, तच्च नाकाशवत् सर्वसंयुक्तम्, नापि सत्तावद् गोत्वाद्यपि सर्वसमवेतम्, किं तर्हि? सन्निधिमात्रेण सर्वत्रास्ति यथाऽत्यन्ताभावः । तच्च सर्वत्रापि विद्यमानं यत्रैव समवेतं तत्रैवोपलब्धियोग्यम् । तेन तस्य समवाय्येवाधारो व्यञ्जकश्चोच्यते । तच्च जातिसङ्करोऽपि" [ ] इति, तदात्मसिद्धान्तश्रद्धालुभाषितमित्युपेक्षामर्हति । यतो गोत्वस्य समवायस्य च सन्निधानं गवां गजादीनां चाविशिष्टं ततः किमिति गोत्वं गोषु समवेतमुच्यते न गजादौ? कथं वा व्यत्ययो न भवति—गजादौ गोत्वं समवेतं न गोष्विति । नूनमत्र पादप्रसारिकातो नान्यदालम्बनं सम्भावयामः ।

नन्वदृष्टविशेषः समवायस्य व्यवस्थानिबन्धनमस्ति, अदृष्टविशेषसामग्र्या हि गोपिण्ड एव गोत्वसमवायार्हः सम्पादितो न गजादिस्ततो नातिप्रसङ्ग इति ।
168A एवं तर्हि सामान्यकल्पनापि क्लेशायैव, गोत्वाभावेऽप्यदृष्टविशेषवशाद् गोपिण्डानामेव गोबुद्धिजननं प्रति शक्तत्वान्न गजादिपिण्डानाम् । तत् सर्वगतत्वे सामान्यस्य समवायसद्भावादन्यत्रापि तत्प्रत्ययः स्यात् ।

१ व्यक्तीः ॥ २ सामान्यस्यानेकत्वम् ॥ ३ सर्वगतत्वे चान्यत्रापि तत्प्रत्ययः स्यात् ॥ ४ स्वत्वमपि तन्निबन्धनम् ॥ ५ गोषु ॥ ६ शशविषाणादीनाम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यद्यपि गोत्वस्याश्वादावपि समवायोऽस्ति तथापि तेषु गौरिति प्रत्ययो न भवति, एकत्र सामान्यद्वयबुद्धेरयोगादिति चेत् । न । अस्ति चैकत्रापि चतुष्पदि अश्वत्व-पशुत्वधीः । तद्यद्येकत्र सामान्यद्वयबुद्धेरयोगस्तदा अश्वत्वपशुत्वे द्वे सामान्ये कथमेकत्रैव धर्मिणि प्रत्ययद्वयं जनयतः । तदेकत्रापि सामान्यद्वयबुद्धेर्दर्शनाद् गोत्वं गजादौ समवेतं गोबुद्धिमपि जनयेत् । 5

स्यादेवम्—अश्वत्व-पशुत्वे परस्पराविरुद्धे तत एकस्मिन्नपि प्रत्ययद्वयं जनयतो न
168B गोत्व-गजत्वे तयोर्विरोधादिति । न । [1]विरोधित्वे च गोत्व-गजत्वयोः परस्परमभ्युपगम्यमानेऽसर्वगतत्वं स्यात् । न ह्येकत्र सकलाश्रयव्यापिनोर्विरुद्धयोर्युगपदवस्थानसम्भवः ।

अथवा यदि गजत्वेन सह विरोधाद् गोत्वं गजे गोप्रत्ययं न जनयति तदा तत्र तदस्तीत्येतदपि कथं श्रद्धेयम्, स्वकार्यमकुर्वतः सत्त्वसन्देहात् । कुतः ? अविकलकारणस्य 10
समर्थस्वभावस्य हेतोः कार्यनिष्ठत्वात्, कार्ये निष्ठा तात्पर्यं तदेकतानत्वं यस्य, तस्य भावस्तत्त्वम्, तस्मात् । गोत्वं हि स्वानुरूपप्रत्ययजननं प्रत्यविकलो हेतुः, ततो यदि गजादौ स्यात्तदाऽवश्यं गोप्रत्ययं जनयेत् । न च जनयति, तस्मात्तत्र नास्तीति निश्चीयते । ननु स्वव्यञ्जकव्यक्त्यपेक्षं गोत्वं कथं गजे गोबुद्धिजननं प्रत्यविकलं
169A स्यादिति । तन्न । समवायनिबन्धनस्य स्वत्वस्य गजेऽपि भावाद् गज एव व्यञ्जकोऽस्तीति 15
न विकलत्वम् ।

स्यान्मतम्—गोत्वं गजत्वं च द्वयमपि गजे समवेतमस्त्येव । तथापि गजत्वमेव स्वानुरूपं प्रत्ययं तत्र जनयति न गोत्वम्, गजत्वेनास्य प्रतिबद्धत्वादिति । तदयुक्तम्, नित्यैकरूपत्वेनाविचलितस्वभावस्य गोत्वस्य गगनस्येव प्रतिबद्धुमशक्यत्वात् । अपि च, यथा गजत्वेन गोत्वं स्वानुरूपप्रत्ययजननं प्रति विकलं क्रियते तथा किमिति गोत्वेन 20
गजत्वं न क्रियते । एतदेवाह—गोत्वं वा गजत्ववैकल्यायाऽस्त्विति, ततश्च गजे गोबुद्धिरेवैका स्यान्न गजबुद्धिः ।

169B अथवा गोत्व-गजत्वे द्वे अपि परस्परस्य वैकल्यं कुरुताम् । तदाह—[2]अन्योन्यमिति । उभयं गोत्व-गजत्वं वैकल्यायास्त्विति पूर्वेणैव सम्बन्धः । [3]तैत इति उभयोरपि गोत्व-गजत्वयोः स्वानुरूपप्रत्ययजननं प्रति वैकल्यात् प्रत्ययानुत्पत्तिः, गोप्रत्ययस्य गजप्रत्ययस्य 25
च कारणवैकल्येनाऽनुत्पत्तिः स्यात् ।

१ अस्ति चैकत्रापि अश्वत्व-पशुत्वधीः ॥ २ विरोधित्वे चासर्वगतत्वम् ॥ ३ अविकलकारणस्य कार्यनिष्ठत्वात् ॥ ४ चस [=चतुर्थः समासः, कर्मधारय इत्यर्थः] ॥ ५ अन्योन्यमुभयं वा ॥ ६ ततः प्रत्ययानुत्पत्तिः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यद्यपि गोत्व-गजत्वे एकत्रापि स्तस्तथाऽपि यदेव व्यक्त्या व्यज्यते तदेव प्रत्ययं जनयति, नान्यत् । व्यक्तिश्च प्रकृत्यैव गजत्वमेवाभिव्यनक्ति, न गोत्वम् । ततः सर्वव्यापित्वेऽपि गोत्वस्य न दोष इति चेत्, न, [1]को वेति, अविशेषे गोत्व-गजत्वे प्रति विशेषाभावे, पक्षपातो बहुमानः ? गोत्वमपि गजव्यक्तौ समवेतं गजत्वमपि च समवेतम्, किमित्यसौ गजत्वमभिव्यनक्ति न गोत्वम्? सर्वथा निष्कारणोऽयं 5
170A पक्षपातो व्यक्तीनां कर्तुं न युक्तः । तँद् यदि सामान्यं सर्वगतं स्यात् तदाऽन्यत्रापि तत्प्रत्ययः स्यादिति ।

ततो यँदनित्यं सद् यत् यत् प्रत्यकारणं न तत् तस्य समवायि, यथा घटः पटस्य । यत् पुनर्यस्य समवायि तदनित्यं सत् तत्कारणमेव, यथा द्रव्य-गुण-कर्मणां समवायिनः । अनित्याँः सामान्यं प्रत्यकारणं चे गवाद्या व्यक्तयः, ततो न 10
सामान्यसमवायिन्यः । समवायित्वे नियमेन व्यक्तिजन्यत्वप्रसङ्गः, अनैत्यसमवायिनो नियमेन जन्यत्वात् । सामान्यस्य साध्यत्वान्न व्याप्तिव्यभिचार इत्येवं व्यक्तिभ्यो भिन्नस्यैकस्य सामान्यस्याघटनात् सदृशप्रत्ययः प्रतिव्यक्तिपरिसमाप्तसदृशपरिणामनिबन्धन एवेति सिद्धम् ।

सम्प्रति प्रस्तुतमुपसंहरति— 15

तत् सद्भूतसामान्यविशेषग्राहिविकल्पाभासस्य वस्तुत्वम् ।

तँदिति सद्भूतः प्रमाणाबाधितः स चासौ सामान्यविशेषश्च तद्ग्राहिविकल्पाभासस्य वस्तुत्वं परमार्थसत्त्वम् । सामान्य-विशेषात्मकं वस्तु परमार्थसदेवेत्यर्थः ।

170B एतेन परसिद्धान्तदूषणदानव्यसनिभिर्यदुक्तम्—

[11]"[12]सँर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः" । 20
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ॥ १ ॥

१ को वाऽविशेषे व्यक्तीनां पक्षपातः ॥ २ '५' [=तस्मात्] ॥ ३ व्यक्तयः सामान्यस्य न समवायिन्यः अनित्याः सत्यः, सामान्यं प्रति अकारणत्वात् । यद्यदनित्यं सद् यत् प्रति अकारणं न तत् तत् प्रति समवायि, यथा घटः पटस्येत्यनुमानस्थितिः । यद्वा इदमनुमानम्—विवादाध्यासिता व्यक्तयो नैकान्तभिन्ननिरंशैकसामान्य-समवायिन्यः, नानादेशस्वभावत्वात्, सर्वपदार्थवत् ॥ ४ सत्यः ॥ ५ अत्र उपसंहारे चकारः, यथा कृतकश्च 25
शब्द इत्यत्र ॥ ६ अनित्यसमवेतस्य वस्तुन इत्यर्थः ॥ ७ '५' [=तस्मात्] । **तत् सद्भूतसामान्यविशेष-ग्राहिविकल्पाभासस्य वस्तुत्वम्** ॥ ८ जैनसिद्धान्त ॥ ९ ● एते त्रयः श्लोका आचार्यश्रीहरिभद्र-सूरिभिः **अनेकान्तजयपताकायां** प्रथमेऽधिकारे उद्धृताः ॥ १० वस्तुनः ॥ ११ सामान्यविशेषरूपत्वे ॥ १२ '५' [=पञ्चम्यन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथास्त्यतिशयः कश्चिद्येन भेदेन वर्त्तते ।
स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम् ॥ २ ॥
सर्वात्मत्वे च भावानां भिन्नौ स्यातां न धी-ध्वनी ।
भेदसंहारवादस्य तदभावादसम्भवः । ३ ॥ [प्रमाणवा० १।१८३-१८५]
प्रवृत्तिनियमो न स्याद्विषादिषु तदर्थिनः । 5
मोदकाद्यपृथग्भूतसामान्याऽभेदवृत्तिषु ॥ ४ ॥
भेदे चोभयरूपैकवस्तुवादो न युज्यते ।
भेदाभेदविकल्पस्तु विरोधेनैव बाधितः ॥ ५ ॥
विशेषरूपं यत्तेषु तत् प्रवृत्तेर्नियामकम् ।
171A साध्वेतत् किन्तु वस्तुत्वं तस्यैवेत्थं प्रसज्यते ॥ ६ ॥" [ ] इति, 10

तत् परसिद्धान्तरहस्यानवबोधबाधयैव प्रतिव्यूढम् । प्रतिव्यक्तिसमाप्तमदशपरिणामरूपस्यैव सामान्यस्य स्याद्वादकेतुभिरभिहितत्वात्, सत्तायाः सत्तान्तराभेदानभ्युपगमात् । तदुक्तम्– "न सत्ता सत्तान्तरमुपैति" [ ] इति ।

सिद्धसेनदिवाकरोऽप्याह–

"कुंभो न जीवदविअं जीवो वि न होइ कुंभदविअं तु । 15
तम्हा दो वि अ दविआ अन्नोन्नविसेसिओ होंति ॥" [सम्मति० ३ ३१] इति ।

तदेवं निश्चयात्मनो ज्ञानस्य सामान्यविशेषात्मकवस्तुविषयत्वं प्रसाध्य शब्दस्यापि साधयति–

स एव च शब्दविषयः, ततोऽपि तत्प्रत्ययात् । अस्पष्टता त्वक्षाव्यापारात् । 20

स एव चेति । यः सामान्यविशेषात्मकोऽर्थो विकल्पविषयः स एव च शब्दविषयः । शब्दोऽपि तमेवाभिधत्ते । ततोऽपीति न केवलमिन्द्रियजविकल्पाच्छब्दादपि तस्य सामान्य-विशेषात्मनो विकल्पविषयस्य प्रत्ययात् । प्रतीयते हि कर्णकोटराटव्यां पर्यटतो घट-
171B शब्दादम्भोधरणसमर्थो घटः ।

१ विशेषः ॥ २ उष्ट्रे ॥ ३ बुद्धि-शब्दौ ॥ ४ भेदः पृथग्भूतः, संहारः संघात एकत्वमित्यर्थः ॥ ५ मेलापक ॥ 25
६ * 'ओस्' इति अत्र लिखितमस्ति । 'ओस्' इत्यनेन षष्ठीद्विवचनमत्र विवक्षितं भाति ततो भेद-संहारयो-र्वादो भेदसंहारवाद इत्यर्थो भाति ॥ ७ भिन्नबुद्धि-शब्दाभावात् ॥ ८ एते त्रयः श्लोका आचार्यश्री-हरिभद्रसूरिभिः अनेकान्तजयपताकायां प्रथमेऽधिकारे उद्धृताः ॥ ९ विषाद्यर्थिनः ॥ १० असाधारणं विषत्वं नाम ॥ ११ विषादिषु ॥ १२ विशेषरूपस्यैव ॥ १३ विशिष्टाः पररूपासत्त्वादिना ॥ १४ स एव च शब्दविषयः ॥ १५ ततोऽपि तत्प्रत्ययात् ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु यदीन्द्रियजविकल्पविषय एव शब्देविषयस्तदा कथमिन्द्रियजविज्ञान इव शब्दश्रवणात्[1] स्पष्टो न प्रतिभासत इति ? उच्यते—अस्पष्टता त्वक्षाव्यापारादिति । यदयं सामान्यविशेषात्मक इन्द्रियजावज्ञानविषयः शब्दादस्पष्टः प्रतीयते तत्रेन्द्रियाव्यापारो निबन्धनम् । विभिन्नशक्तीनि हि करणानि नैकशक्तीनि । ततो यथा कुण्ठधारात् कुठारादवनीरुहशाखाभेदो भवन्नपि विषमश्चिरकालं सप्रयासं च भवति, निशितासि- 5
लतातः पुनः समः शीघ्रमप्रयासं च, तथा सामान्यविशेषात्मकमर्थमात्मा प्रतियन्निन्द्रियेण करणेन स्पष्टं प्रत्येति, शब्देन पुनरस्पष्टम् । प्रत्येतव्यः पुनरुभयत्राप्येक एव ।

दूरा-ऽऽसन्नतादिभिरैन्द्रियस्याभासभेदेऽपि न गोचरभेदः ।
अर्थक्रियाक्षमं तु शब्दादपि तदेव समानपरिणामात्मनां सत्त्वात् ।

ननु यः क्वचिद्वस्तुनि येनप्रतिभासाद् विभिन्नप्रतिभासो नासौ तेनैकविषयो यथा 10
172A घटप्रतिभासात् पटप्रतिभासः । तथा च गवि प्रत्यक्षप्रतिभासाद् विपरीतप्रतिभासैः शाब्दः प्रत्यय इति । तन्न । यस्माद् [2]दूरा-ऽऽसन्नतादिभिरिन्द्रियज्ञानस्याभासभेदेऽपि [3]प्रतिभासभेदेऽपि न गोचरभेदः । दूरे दूरतरे आसन्ने आसन्नतरे चैन्द्रियेऽस्पष्टमस्पष्टतरं स्पष्टं स्पष्टतरं च वृक्षादिरर्थः प्रतिभासतेऽथ च सर्वज्ञानानामेक एव ग्राह्यस्तवाभिमतस्तथा यद्यपि शब्देन्द्रियोत्थयोर्ज्ञानयोः स्पष्टत्वा-ऽस्पष्टत्वाभ्यामाभासो भिद्यते तथापि गोचरैकत्वमविरुद्धमेव । 15

स्यादेवम्—इन्द्रियज्ञानस्य दूरासन्नतादिभिः स्पष्टत्वा-ऽस्पष्टत्वाभ्यामेवाभासो भिद्यते
172B नार्थक्रियासमर्था ऽसमर्थरूपपरिच्छेदेन । दूरे आसन्ने वा स्थितो वृक्षादिरिन्द्रियज्ञाने निजार्थक्रियाक्षमेण रूपेण निर्विशेषमेवाभासते । अर्थक्रियाक्षमरूपपरिच्छेदभेदेन च विषयनानात्वं व्यवस्थाप्यत इत्याह—अर्थक्रिया जलाद्याहरणादिका, तस्यां क्षमं पुनर्वस्तुनो रूपं शब्दादपि तदेव यदेवेन्द्रियात् प्रतीयते । इन्द्रियादपि घटो जलधारणादि- 20
समर्थः प्रतीयते, घटशब्दादपि । ततः कुतस्तदुत्थयोर्ज्ञानयोर्विषयवैचित्र्यं भवेत् ?

ननु शब्दात् प्रतीयमानस्योपप्लवरूपस्य सामान्यस्य कुतोऽर्थक्रियाक्षमत्वमिति ।
173A न । समानपरिणामात्मनां पदार्थानां सत्त्वात्, सदृशपरिणामवन्तो हि पदार्थाः शब्दस्य विषयः, ते च परमार्थसन्तः, ततः कथं नार्थक्रिया भवेत् ।

---

१ 'ऽ' [=विग्रहे षष्ठयन्तम्] ॥ २ उत्पन्ने विज्ञान इति गम्यम् ॥ ३ द्रव्यरूपतया एक एव । स्पष्टत्वा- 25
स्पष्टत्वाभ्यां धर्माभ्यां द्वैविध्यम् ॥ ४ 'ऽ' [=विग्रहे षष्ठयन्तम्, यस्य प्रतिभासादिति भावः] ॥ ५ अस्पष्टरूपः ॥ ६ **दूरासन्नतादिभिरैन्द्रियस्याभासभेदेऽपि न गोचरभेदः** ॥ ७ ज्ञाने ॥ ८ मन्मते स्पष्टत्वास्पष्टत्वे अर्थधर्मौ, परमते ज्ञानधर्मौ इति प्रमेयारूढिः ॥ ९ **अर्थक्रियाक्षमं तु शब्दादपि तदेव** ॥ १० ज्ञानादि ॥ ११ इन्द्रिय-शब्दोत्थयोः ॥ १२ बौद्धः ॥ १३ असत्यस्य ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यदि शब्दाः परमार्थसद्वस्तुविषयास्तदा खस्य स्वभाव इत्यत्र व्यतिरेकषष्ठ्याः किं निबन्धनम्? न खलु व्योम्नो भिन्नः स्वभावः कश्चिदस्ति यो व्यतिरेकविभक्तेर्निमित्तं स्यात्। तदुक्तम्–

"खस्य स्वभावः खत्वं चेत्यत्र वा किं निबन्धनम्।" [प्रमाणवा० १।६८] इति।

अत आह– 5

यतो धर्मादिभ्यो व्यावर्तते व्योम स स्वभावः। स एव च प्रत्ययनिमित्तम्।

यत इति। येन केनापि रूपेण धर्माधर्मात्मपुद्गलेभ्यो व्यावर्त्तते व्योम पृथगेव
173B द्रव्यमिति व्यपदेशं लभत इत्यर्थः। स व्योम्नः स्वभावः। स एव चेति य एव विजातीयव्यक्तिव्यावर्त्तकः स्वभावः स एव प्रत्ययस्य षष्ठीलक्षणस्य त्वस्य वा 10
निमित्तं हेतुः। अयमर्थः–अवगाहदातृत्वं नाम व्योम्नोऽसाधारणो धर्मोऽस्ति। धर्माश्च धर्मिणः सकाशाद् भिन्ना-ऽभिन्नाः। ततो यदा भेदार्पणा क्रियते तदा षष्ठी स्वौ वा भवति–खस्य स्वभावः खत्वमिति वा। अभेदार्पणाकरणे तु खमिति।

सर्वलिङ्गसङ्ख्ये च दारादिवस्तुनि लिङ्ग-वचनभेदो नातिदुर्घटः, द्रव्यस्य स्यादभेदात् पर्यायेभ्यः। अत एव शब्दानामभिधेयभेदेऽपि सामानाधिकरण्यं विशेषणविशेष्यता च। 15

यदि परमार्थसद्वस्तुविषयाः शब्दास्तदा कथमेकस्मिन्नप्यर्थेऽभिधेये शब्दाद् बहुवचनं कथं वा शब्दस्य त्रिलिङ्गत्वमिति। अत्राह–सर्वेति। सर्वं लिङ्गं पुंस्त्रीनपुंसकलक्षणं
174A सर्वा सङ्ख्या एक-द्वि-त्रिलक्षणा यस्य तस्मिन् दारादिवस्तुनि, आदिग्रहणात् सिकता-तट-वाटादिग्रहः, लिङ्ग-वचनभेदो नातिदुर्घटः। सर्वाण्यपि हि वस्तूनि सर्वलिङ्गानि सर्वसङ्ख्यानि 20
चेति सर्वज्ञसिद्धान्तः, एकत्रापि अर्थ-वस्तु-मात्राशब्दप्रयोगात्–यथा घटार्थः, घटवस्तु घटमात्रेति। न चैवं सर्वशब्दानां सर्वलिङ्गता। न हि वस्तु सर्वस्य शब्दस्य सता सर्वेण रूपेण वाच्यम्, अपि तु कस्यचित् केनचिदेव रूपेण। यथेन्द्रियस्य कस्यचित् केनचिदेव रूपेण विषयः शब्दस्यापि तथाविध एव स्वभावो यो न सर्वं वस्तुरूपमुपगृह्णाति अन्यथा शब्दान्तराप्रयोगप्रसङ्गः। 25

१ सम्बन्धषष्ठ्याः ॥ २ खस्य भावः ॥ ३ यतो धर्मादिभ्यो व्यावर्तते व्योम स स्वभावः ॥ ४ स एव च प्रत्ययनिमित्तम् ॥ ५ त्वप्रत्ययो वा ॥ ६ सर्वलिङ्गसङ्ख्ये च दारादिवस्तुनि लिङ्ग-वचनभेदो नातिदुर्घटः ॥ ७ एकस्यापि बहुत्वम् ॥ ८ पदार्थे ॥ ९ कर्तुः ॥ १० शब्दस्य ॥ ११ वस्तु वाच्यमिति सम्बन्धः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवं च वस्तुमाहात्म्याच्छब्दशक्तिस्वाभाव्याच्च कश्चिच्छब्दः पुल्लिङ्गः, कश्चित् स्त्रीलिङ्गः, कश्चिन्नपुंसकलिङ्गः, कश्चित् पुंस्त्रीलिङ्गः, कश्चित् पुन्नपुंसकलिङ्गः, कश्चित् स्त्रीनपुंसकलिङ्गः, कश्चित् त्रिलिङ्गः, कश्चिद्वाच्यलिङ्गः, तथा कश्चिदेकवचनान्तः, कश्चिद् द्विवचनान्तः, कश्चिद् बहुवचनान्तश्च समयानुसारिभिर्व्यवह्रियते ।

वचनभेदघटने युक्तिमाह—द्रव्यस्येति । पर्यायेभ्यो धर्मेभ्यः स्यात् कथञ्चिदभेदाद् [1] द्रव्यस्य धर्मिणः । द्रव्यस्य हि स्वकीयमेकत्वमस्ति अनन्तपर्यायाभेदनिबन्धनमनेकत्वमपि । तत ऐकत्वार्पणायामेकवचनान्तेन ध्वनिनाऽभिधीयते, अनेकत्वार्पणायां तु बहुवचनान्तेन, यथा धर्मप्रजासम्पन्ने दारे नान्यं कुर्वीत, इमे दाराः, एको वल्वजो बन्धनेऽसमर्थः, इमे वल्वजाः, एका सिकता तैलदानेऽसमर्था, इमाः सिकताः । तस्यां सुमनसि, इमाः सुमनसः । समायां तु दिनैसमुदायव्यक्त्येकत्वानेकत्वे निबन्धनम्—तृतीयस्याः समायास्तु, इमाः समाः । वर्षाणां तु दिनबहुत्वमेव—इमाः वर्षाः । एकत्वानेकत्वार्पणायां तु वस्तुमाहात्म्यं शब्दशक्तिश्च प्रमाणम् ।

ननु स्वगतैकत्वार्पणायामेकवचनान्तस्य पर्यायाभेदलब्धानेकत्वार्पणायां तु बहुवचनान्तस्य शब्दस्य द्रव्ये प्रयोगोऽस्तु, द्विवचनान्तस्य कथं यथा गोदौ ग्राम इति । उच्यते—गोदयोर्हृदयोरदूरभवत्वाद् द्वित्वाविष्टो गोदध्वनिर्ग्रामे उपचर्यते । अथवा समु- 175A दाय-समुदायिनोर्भेदा-ऽभेदार्पणे द्वे अपि युगपदेवात्र कृते इत्यर्पणाद्वयगतं द्वित्वमालम्ब्य ग्रामे द्विवचनान्तस्य ध्वनेः प्रयोगः । तत्र केचिदाविष्टैकवचना यथा परस्परान्योन्येतरेतरशब्दाः । कश्चिदाविष्टद्विवचनो यथा गोदशब्दः । केचिदाविष्टबहुवचना यथा वर्षा-मघा-ऽऽ-कृत्तिकाशब्दाः । अन्येषां तु यथावृद्धाम्नायं वचनभेदः । लिङ्गं पुनर्यदाऽर्थधर्मो विवक्ष्यते तदा सर्वार्थानां सर्वं सदपि यथावृद्धाम्नायं केनापि शब्देन क्वचित् किञ्चिदुच्यते । यदा पुनः शब्दधर्मस्तदापि वृद्धाम्नायापेक्ष एव प्रयोगः । तस्मादेकस्मिन्नपि दारादिवस्तुनि द्रव्य-पर्यायाणां कथञ्चिदभेदनिबन्धनो वचनभेदो घटत एव ।

१ द्रव्यस्य स्यादभेदात् पर्यायेभ्यः ॥ २ एकत्वविवक्षायाम् ॥ ३ * दारयन्ति दीर्यन्ते वा एभिरिति दाराः पुंलिङ्गो बहुवचनान्तश्च । एकवचनान्तोऽपि दृश्यते, यल्लक्ष्यम्—"धर्मप्रजासम्पन्ने दारे नान्यं कुर्वीत" [ ] इति" इति अभिधानचिन्तामणिस्वोपज्ञवृत्तौ श्लो० ५१३ । "वल्वजाः पुंसि बहुवचनान्तः" इति अभिधानचिन्तामणिस्वोपज्ञवृत्तौ श्लो० ११९४ । "अहंपूर्विकादिर्वर्षा मघा अप्कृत्तिका बहौ । वा तु जलौकाप्सरसः सिकता सुमनः समाः ॥ ९ ॥" इति लिङ्गानुशासने स्त्रीलिङ्गाधिकारे ॥ ४ ननु सर्वद्रव्यपर्यायार्पणायामेकवचनद्विवचने स्याताम्, समा तु षष्टयधिकदिनशतत्रयं भण्यते, तत्र तु का द्रव्य-पर्यायार्पणा इत्याशङ्क्याह—समेति ॥ ५ दिनसमुदायैकत्वं दिनव्यक्त्यनेकत्वं च एकवचन-द्विवचनयोर्निबन्धनमित्यर्थः ॥ ६ गोदशब्दस्य द्विवचनान्तस्य ग्रामलक्षणे द्रव्ये कथं प्रयोगोऽस्तु ? ॥ ७ उपचारनिरपेक्षोऽयं पक्षः । यतः स्वतन्त्र एव संकेतवशाद् गोदशब्दो विशिष्टे ग्रामे वर्तते, द्वित्वसाधने तु युक्तिरुपन्यस्ता ॥ ८ * दृश्यतां टि० ३ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

175B धर्मधर्मिणोः कथञ्चिदप्यभेदो नास्ति, तयोरेकान्तेन भेदादिति चेत् । न । सम्बन्धाभावेन 'अस्यामी धर्मिणो धर्माः' इति व्यपदेशाभावप्रसङ्गात् । समवायनिमित्तत्वे च व्यपदेशस्यान्यत्रापि प्रसङ्गः, समवायस्यैकत्वेन सर्वत्रापि सम्भवात् । कार्यकारणभावस्तु सम्बन्धो घटत एव न, सहभावित्वात् । तस्माद् 'अस्यामी' इति व्यपदेशान्यथानुपपत्त्या धर्मधर्मिणोः कथञ्चिदभेद एव । अत एवैकान्ताभेदोऽपि नानयोरभ्युपेयः, शब्दप्रत्ययैयान्तराणां वैयर्थ्यप्रसङ्गाच्च । एकनैव हि शब्देन ज्ञानेन वा द्रव्याभेदिनां धर्माणामभिधाने परिच्छेदने वाऽपरं शब्दान्तरं ज्ञानान्तरं वा प्रवर्त्तमानं किमसाध्यं साधयेत्? तेन धर्मिणो धर्मा न भेदिनो नाप्यभेदिनः, किं तर्हि? स्याद्भेदिन इति परमार्थः ।

176A अत एवेति । यत एव द्रव्यस्य स्याद्भेदः पर्यायेभ्योऽत एव नीलोत्पलादिध्वनीनामभिधेयभेदेऽपि गुण-जातिभेदेन सामानाधिकरण्यं भवति । भिन्ननिमित्तप्रयुक्तस्य शब्दस्यैकस्मिन्नर्थे प्रवृत्तिः सामानाधिकरण्यमुच्यते । नीलशब्दो हि नीलंपर्यायमभिधत्ते

176B उत्पलशब्दस्तु सदृशपरिणामलक्षणामुत्पलत्वजातिम् । नीलपर्याय-सदृशपरिणामौ तु द्रव्यात् कथञ्चिदभेदिनौ, ततस्तदभिधायिनौ ध्वनी तयोः प्रवर्त्तमानौ कथञ्चित्तेंभिन्ने द्रव्येऽपि प्रवर्त्तेते इति भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकत्र प्रवृत्तिरस्तीति सामानाधिकरण्यं घटत एव । न केवलं सामानाधिकरण्यम्, "विशेषणविशेष्यता च धर्मधर्मिणोरत एव भवति । विशेषणविशेष्यभावे सत्येव सामानाधिकरण्यम्, विशेषणविशेष्यभावस्तु पटस्य रक्तत्व-

177A मित्यादौ सामानाधिकरण्यं विनाऽपीत्यसौ पृथगेवोपपाद्यते । यावतांशेन पटाद्धर्मिणो रक्तत्वं धर्मो भिद्यते तावता पृथक् शब्देनोच्यते । यावता चाभिन्नं तावता तादात्म्यसम्बन्धनिबन्धना षष्ठी विभक्तिर्भवति । तस्माद्धर्मधर्मिणोर्विशेषणविशेष्यभावोऽपि कथञ्चिदभेदनिबन्धन एव । तदेवं शब्दानां परमार्थसद्वस्तुविषयत्वेऽपि लिङ्ग वचनभेदादि सर्वमुपपद्यत एव ।

स्यान्मतिः-यः शब्दान् सामान्येन साभिधेयानभिमन्यते तं प्रति 'सामान्यविशेषात्मकं वस्तु शब्दस्य विषयः, द्रव्य-पर्यायाणां भेदा-भेदनिबन्धनो वचनभेदः' इत्यादि

177B गदितं वल्गुतां दधीत, यः पुनः शब्दानामभिधेयमेव किञ्चिन्नेच्छति तं प्रति जनुषाऽन्धं प्रति नर्त्तकीचतुराङ्गहारकरणप्रयास इव सर्वमपि गदितं फल्गुतामेवाञ्चतीति ।

अत्राह-

१ परः ॥ २ 'अस्यामी धर्मिणो धर्माः' इति व्यपदेशाभावप्रसङ्गादेव ॥ ३ धर्मधर्मिणोः ॥ ४ ज्ञान ॥ ५ '५' [=पञ्चम्यन्तम्] ॥ ६ अत एव शब्दानामभिधेयभेदेऽपि सामानाधिकरण्यम् ॥ ७ नीलगुणलक्षणं पर्यायम् ॥ ८ जातिरपि पर्यायो भण्यते जैनमते ॥ ९ नीलपर्यायसदृशपरिणामाभिधायिनौ ॥ १० नीलपर्याय-सदृशपरिणामाभिलेऽञ्जादौ द्रव्ये ॥ ११ ननु सामानाधिकरण्यविचारेणैव विशेषणविशेष्यभावविचारस्य गतत्वात् किमित्यसौ सूत्रेण पृथगुक्त इत्याशङ्क्याह ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न चैते निरभिधेया एव, अस्खलत्प्रत्ययजनकत्वात् । न खलु शब्दादर्थं प्रपद्य मरीचिकासु जलमिव मिथ्येति जुगुप्सते। क्वचिद् विसंवादोऽन्यत्रापि समः ।

नैं चैते विचारयितव्यतया प्रस्तुताः शब्दा निरभिधेया एव, अस्खलत्प्रत्ययजनकत्वात् । अस्खलतो बाह्यार्थाविनाभाविनः प्रत्ययस्योत्पादकत्वात् । यदि हि घटशब्दो घटाभिधेयो न भवति तदा किमिति घटशब्दश्रवणसमनन्तरं घटार्थाविनाभावी प्रत्ययः समुत्पद्यते । तद् घटविषयमस्खलितं प्रत्ययमुपजनयन् घटध्वनिर्घटाभिधेय एव ।

178A अस्खलितत्वमेव भावयति–नैं खल्विति । मरीचिकासु जलमिवेति वैधर्म्यनिदर्शनम् । यथा हि ग्रीष्मे वासरेषु तरुणदिवसकरकरनिकरव्यतिकरस्फुटदुत्तमाङ्गो बहुवाहिताध्वाऽध्वगो मरुमरीचिका जलत्वेनावबुध्य स्नानपानादिजलक्रिया अप्राप्नुवन् 'नैतज्जलं किन्तु मरीचिकाः, तन्नूनमेष जलप्रत्ययो मिथ्या, भ्रान्तोऽहमस्मि' इत्येवं निन्दति नैवं शब्दार्थं प्रतिपद्य प्रतिपन्ना 'नामुमर्थं शब्दादहमधिगतोऽस्मि, किं तर्हि ? हेत्वन्तरात्' इति शब्दसम्भवं बाह्यार्थप्रत्ययं जुगुप्सते । तद् बाह्यार्थाविनाभाविप्रत्ययोत्पादकत्वेन शब्दो बाह्यार्थाभिधेय एव ।

यदि शब्दा बाह्यार्थाविनाभाविनः कथं तर्ह्यर्थं विनाऽपि क्वचिच्छब्दोच्चारणं
178B दृश्यते, तस्मान्निरभिधेया एवैत इति । अत्राह–[3]क्वचिद् देशेऽवस्थायां वा विसंवादः शब्दस्याऽन्यत्रापि प्रत्यक्षादौ समः । यद्येकदेशव्यभिचारदर्शनेन सर्वत्रापि व्यभिचार एव स्यात्तदा मरीचिकायां जलज्ञानं व्यभिचारि दृष्टमिति सर्वत्रापि व्यभिचार्येव स्यात् । अथ विशुद्धहेतुजस्य प्रत्यक्षस्य क्वचिदपि व्यभिचारो नास्त्येवेत्युच्यते तदाऽऽप्तप्रणीतस्य शब्दस्यापि क्वचिदप्यर्थव्यभिचारो नास्तीति स कथमर्थाविनाभावी नेष्यते ? वयं ह्याप्तप्रणीतस्यैव शब्दस्यार्थाविनाभावमातिष्ठामहे न सर्वस्य । न चाप्तप्रणीतः शब्दः क्वचिदप्यर्थं व्यभिचरति[4] ।

ननु शब्दस्य किमेकार्थप्रत्यायनेऽनेकार्थप्रत्यायने वा शक्तिः । यद्येकार्थप्रत्यायने तदा सङ्केतशतैरपि ततोऽर्थान्तरे प्रतीतिर्न स्यात्, धूमादनग्निप्रतीतिवत् । अथानेकार्थप्रत्यायने तदा युगपत् ततोऽनेकार्थप्रतीतिप्रसङ्गात् प्रतिनियतेऽर्थे प्रवृत्तिर्न स्यादिति ।

१ न चैते निरभिधेया एव ॥ २ न खलु शब्दादर्थं प्रपद्य मरीचिकासु जलमिव मिथ्येति जुगुप्सते ॥ ३ क्वचिद् विसंवादोऽन्यत्रापि समः ॥ ४ * इत परं ग्रन्थकाराभ्यामेव पूर्वं लिखित्वा पश्चात् [ ] ईदृशे कोष्ठके निक्षिप्य ईदृशः पाठः परित्यक्तः–

[ततो यदि क्वचिद् व्यभिचारदर्शनेन [179 A] शब्दस्य सर्वत्राप्यर्थव्यभिचार एवेष्यते तदा प्रत्यक्षस्यापि तथाभावः प्राप्नोति । अथ व्यभिचारदर्शनेऽपि प्रत्यक्षविशेषस्य प्रामाण्यमिष्यते तदा शब्दस्यापि तथाभावोऽस्त्विति] ॥ ५ ग्रन्थान्तरे ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्राह—

कथञ्चित् सर्वार्थवाचकत्वेऽपि यथासङ्केतक्षयोपशमं सर्वत्र प्रवृत्तिः ।

कथञ्चित् सर्वार्थवाचकत्वेऽपि शब्दानां यथासङ्केतक्षयोपशमं सङ्केतेन क्षयोपशमः सङ्केत-क्षयोपशमस्तस्यानतिक्रमेण यथासङ्केतक्षयोपशमं प्रवृत्तिरर्थेषु । यद्यपि सर्वे शब्दाः सर्वार्थ- 5
179B वाचिन एव तथापि यावदर्थप्रत्यायने सङ्केतेन क्षयोपशमः प्रबोधितः शब्दात् तावत एवार्थस्य प्रतीतिर्भवति । ततो यस्यैकार्थप्रत्यायने सङ्केतेन क्षयोपशमो जनितः स एकमर्थं प्रत्याययति, यस्यानेकार्थप्रत्यायने स युगपदनेकमपि । अत एव हरिशब्दश्रवण-समनन्तरं बहवोऽर्था युगपदपि प्रतीयन्ते । न च वक्तव्यं यदि शब्दस्यार्थप्रत्यायने स्वाभाविकी शक्तिस्तदा किमिति सङ्केतकरणमपेक्षत इति । यतो धूमः स्वभावेन 10
वह्निप्रत्यायनसमर्थोऽपि स्वाविनाभावपरिज्ञानापेक्षो दृश्यते । तद् यथा धूमः स्वतो वह्निप्रत्यायनसमर्थोऽप्यविनाभावपरिज्ञानमपेक्षते तथा शब्दः स्वतोऽर्थप्रत्यायनसमर्थोऽपि
180A सङ्केतकरणमपेक्षते । सङ्केतश्चैकस्यापि शब्दस्य प्रतिनियतोऽनुभूयते, यथा मालवादौ कर्कटिकाशब्दस्य फलविशेषे,अन्यत्र तु योन्याम् । अत एव च सर्वार्थवाचकत्वेऽपि प्रतिनियत-सङ्केतवशात् प्रतिनियतस्यैवार्थस्य शब्दादवगमः । अथ सर्वे शब्दाः सर्वार्थवाचिन 15
इति कथं प्रत्येयम् ? अनवगतसम्बन्धे शब्दे प्रयुक्ते कमर्थं प्रतिपादयितुमनेन शब्दः प्रयुक्त इति श्रोतुरनेकार्थविषयसन्देहदर्शनात् ।

तुल्यपरिणामेषु तुल्यपरिणामानां सङ्केतः—एतज्जातीया एतज्जातीयशब्दवाच्या इति । तुल्यपरिणामिता च देशान्तरवर्तिनामप्यस्ति । 20

सम्प्रति यथाभूतेष्वर्थेषु यथाभूतानां शब्दानां सङ्केतः क्रियते तदाह—तुल्यपरिणामेषु
180B वाच्येषु तुल्यपरिणामानां वाचकानां सङ्केतः समयो वृद्धैः क्रियते सजातीयेष्वर्थेषु सजातीयानां शब्दानां सङ्केतः क्रियत इत्यर्थः । सङ्केतकरणोच्छ्वं दर्शयति—एतदिति । एष प्रकारो येषां ते एतज्जातीयाः । "प्रकारे जातीयर्" [सि० ७-२-७५] इति जातीयः । एतज्जातीया एवंविधा येऽर्थास्ते एतज्जातीयशब्दवाच्या एवंविधशब्दविषया भवन्तीत्येवं 25
सङ्केतः शब्दस्यार्थे क्रियते । अयमर्थः— एकमर्थं शब्दं च प्रत्यक्षवर्त्तिनमेतेदा उपदर्श्य

१ कथञ्चित् सर्वार्थवाचकत्वेऽपि यथासङ्केतक्षयोपशमं सर्वत्र प्रवृत्तिः ॥ २ '७' [=सप्तम्यन्तम्] ॥
३ तुल्यपरिणामेषु तुल्यपरिणामानां संकेतः ॥ ४ एतज्जातीया एतज्जातीयशब्दवाच्या इति ॥
५ एतच्छब्देन ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

181A 'जातीय'प्रत्ययेन चाप्रत्यक्षवर्त्तिनोऽप्यर्थान् शब्दांश्च समीपीकृत्य बालानां वृद्धैः सङ्केतः क्रियते–एतज्जातीया अर्था एतज्जातीयशब्दवाच्या इति । ततो यद्यपि प्रत्यक्षवर्त्ती शब्दोऽर्थश्च देशान्तरे नास्ति तथापि तत्सदृशपरिणामेन तत्सदृशपरिणामस्याऽन्येनापि शब्देनाऽन्यस्याप्यर्थस्य प्रतीतिर्भवति, 'जातीय'प्रत्ययेन तयोरपि सङ्केतकाले उपस्थापनात्, प्रत्यक्षवर्त्तिशब्दार्थसदृशपरिणामस्य देशान्तरवर्त्तिनामपि शब्दार्थानां 5
भावात् । तदाह–तुल्यपरिणामिता च प्रत्यक्षवर्त्तिशब्दार्थसदृशपरिणामत्वं च देशान्तरवर्त्तिनामपि शब्दार्थानामस्ति । तत् सदृशपरिणामेष्वर्थेषु सदृशपरिणामानां शब्दानां सङ्केतः क्रियत इति स्थितम् । एतेन यदुक्तम्–

"शब्दाः सङ्केतितं प्राहुर्व्यवहाराय स स्मृतः ।
181B तदा स्वलक्षणं नास्ति सङ्केतस्तेन तत्र न ॥" [प्रमाणवा० १।६३] इति । 10

तत् प्रत्युक्तम्, अर्थस्य द्रव्यतया नित्यत्वेन व्यवहारकालेऽपि सम्भवात् सङ्केतकालभाविशब्दसदृशपरिणामस्याऽन्यस्यापि शब्दस्य वाचकत्वाभिधानात् ।

तदेवं स्वपक्षं व्यवस्थाप्य परपक्षं दूषयति–

**जातिमात्रे त्वनर्थक्रियाकारिणि न सङ्केतः । न खलु वै व्यसनमेवैतच्छब्दसङ्केतनं लोकस्य । किमु सर्व एवास्यारम्भः फलार्थः, 15
निष्फलारम्भस्योपेक्षणीयत्वात् । न च जातिमात्रं दाह-वाहादावुपयुज्यते । विशेषापेक्षायां तु वरं तत्रैव सङ्केतः ।**

जातीति । अर्थक्रियासमर्थे सामान्यविशेषात्मनि वस्तुनि शब्दानां सङ्केतः, जातिमात्रे तु विशेषनिरपेक्षे केवले सामान्ये वाह-दोहाद्यर्थक्रियां कर्तुमसमर्थे पुनर्न सङ्केतः । अत्रैवोपपत्तिमभिधातुं प्रस्तावनां रचयति–नन्वित्यादि । खलुशब्दोऽवधारणार्थः । वै- 20
शब्दः पराक्षेपे । निःप्रयोजनं क्वचित्तात्पर्यं व्यसनम् । नैव व्यसनमेवैतच्छब्दसङ्केतनं लोकस्य, न हि लोकः फलनिरपेक्ष एवार्थेषु शब्दान् सङ्केतयति । किमु किन्तु सर्व एव
183A नैकः कश्चिदस्य लोकस्यारम्भो हेयोपादेयवस्तुषु निवृत्ति-प्रवृत्ती फलार्थः, निःप्रयोजनारम्भस्योपेक्षणीयत्वात् । तदयमपि शब्दसङ्केतक्रियारम्भो लोकस्य सप्रयोजन एव । न

१ शब्दार्थयोः ॥ २ तुल्यपरिणामिता च देशान्तरवर्तिनामप्यस्ति ॥ ३ संकेतकाले ॥ ४ कुतः ? क्षणिकत्वात् स्वलक्षणस्य ॥ ५ कारणेन ॥ ६ तत्र स्वलक्षणे ॥ ७ जातिमात्रे त्वनर्थक्रियाकारिणि न संकेतः ॥ ८ न खलु वै व्यसनमेवैतच्छब्दसंकेतनं लोकस्य । किमु सर्व एवास्यारम्भः फलार्थः, निष्फलारम्भस्योपेक्षणीयत्वात् ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

च जातिमात्रे शब्दसङ्केतकरणे काचित् फलसिद्धिरस्ति । यतो नै च जातिमात्रं विशेष-
निरपेक्षं सामान्यमेव केवलं दाह-वाहादावुपयुज्यते । न हि वह्नित्वं गोत्वं वा व्यक्ति-
निरपेक्षमेव दाहं वाहं वा कर्तुं समर्थायते । कथं नामास्माच्छब्दादसमर्थं प्रतीत्यायं
182B शिशुर्व्यवहारकाले एतामर्थक्रियां साधयेदित्यभिसन्धिना वृद्धाः शब्दान् सङ्केतयन्ति ।
न च जातिमात्रे शब्दसङ्केतेऽर्थक्रिया सम्भवति । ततो न तत्र शब्दसङ्केतः क्रियते । 5

स्यादेवम्—न सामान्य एव केवले शब्दसङ्केतो येन तद्वैयर्थ्यं स्यात्, किं तर्हि?
विशेषेऽपि । अयं तु विशेषः—सामान्यं प्रधानं विशेषो गुणः । विशेषश्चार्थक्रियाक्षम
इति तूभयसिद्धमेवेति । अत्राह—[1]विशेषेति । यदि सामान्ये शब्दसङ्केतकाले विशेषस्या-
प्यपेक्षा क्रियते तदा वरं तत्रैव विशेष एव शब्दसङ्केतः क्रियताम्, किं सामान्या-
183A पेक्षया । अयमाशयः— विशेषापेक्षे सामान्ये शब्दसङ्केतनमस्माभिरपीष्यते । अयं तु 10
विशेषः—सामान्यवद् विशेषांशोऽपि प्रधानमेव, सामान्यं च सदृशपरिणाम इति ।

**नाप्यन्यापोहे वस्तुनि, भेदे वस्तुनि प्रवृत्तेरघटनात्, दण्ड-
च्छेदोपदेशे दण्डिनीव । अभेदे मुधा बाह्यो बहिष्कृतः । अवस्तुत्वे
न किञ्चिदभिहितम् । प्रत्यक्षसिद्धं च प्रवृत्त्यादि ।**

अन्यस्त्वाह—न सामान्यविशेषात्मनि वस्तुनि नापि सामान्य एव केवले शब्द- 15
सङ्केतः, किं तर्हि? विजातीयव्यावृत्तिरूपेऽपोह इति । अत्रोच्यते । सोऽपोहो वस्तु
वा स्यादवस्तु वा, वस्त्वपि स्वलक्षणाद् भिन्नोऽभिन्नो वा? तत्र भिन्नवस्तुपक्षमधिकृत्याह—
नापीति । न केवलं सामान्यमात्रे, वस्तुरूपेऽन्यापोहेऽपि न शब्दसङ्केतः । भेदे वस्तुनि
प्रवृत्तेरघटनात्, वस्तुरूपस्यापोहस्य वस्तुनः सकाशाद् भेदे सति वस्तुनि प्रवृत्तेरसम्भवात् ।
दण्डच्छेदोपदेशे दण्डिनीव । यथा हि दण्डं छिन्धीत्युक्ते न दण्डिनं छेदकश्छिनत्ति तथाऽपोहा- 20
183B भिधायिशब्दश्रुतौ न स्वलक्षणे पुरुषः प्रवर्त्तेत, अपोहस्य स्वलक्षणादन्यत्वात् । अन्यस्य
शब्दात् प्रेत्ययेऽन्येन प्रवृत्तावतिप्रसङ्गाच्च । तस्मात् स्वलक्षणाद् भिन्ने वस्तुरूपेऽपोहे शब्दसङ्केतः ।

अथ स्वलक्षणादभिन्न क्रियते तेन स्वलक्षणे प्रवृत्तिर्भवतीति । तदप्ययुक्तम् ।
यस्मादेवमेदे स्वलक्षणादपोहस्याव्यतिरेकेऽङ्गीक्रियमाणे मुधा बाह्यो बहिष्कृतैः । यदि
स्वलक्षणादभिन्नेऽपोहे सङ्केतः क्रियते तदा स्वलक्षण एव किं न क्रियते । केयं 25
पत्रान्तरिता सुरापानक्रिया? तत् स्वलक्षणादभिन्नेऽप्यपोहे न शब्दसङ्केतनम् ।

१ न च जातिमात्रे दाह-वाहादावुपयुज्यते ॥ २ अप्रधानम् ॥ ३ विशेषापेक्षायां तु वरं तत्रैव संकेतः ॥ ४ बौद्धः ॥ ५ नाप्यन्यापोहे वस्तुनि ॥ ६ अन्यस्माद् विजातीयादपोहो व्यावृत्तिरूपः, तस्मिन् ॥ ७ अर्थे ॥ ८ अपोहरूपस्य ॥ ९ शाने ॥ १० स्वलक्षणे ॥ ११ अभेदे मुधा बाह्यो बहिष्कृतः ॥ १२ बाह्यो घटपटादिरूपोऽर्थो बहिष्कृतः शब्दसंकेतविषयः कृतः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

184A नन्वपोहो वस्त्वेव न भवति ततः का तत्र भेदाभेदचिन्तेति । अवस्त्विति । यद्यपोहेऽवस्तुरूपे शब्दसङ्केतस्तदा व्यवहारकाले शब्देन न किञ्चिदभिहितं स्यात् । ततस्तच्छब्दश्रवणानन्तरं वस्तुनि प्रवृत्ति-निवृत्ती न स्याताम् । मा भूतां नाम को दोष इति चेत् । उच्यते–प्रत्यक्षेति । आदिशब्दान्निवृत्तिग्रहः । शब्दश्रवणानन्तरमर्थेषु प्रवृत्ति-निवृत्ती प्रत्यक्षप्रसिद्धे तावदवश्याभ्युपेये नापह्नवमर्हतः । ततो यदि शब्दो वस्तुविषयो न स्यात्तदा तच्छ्रवणादर्थेषु प्रत्यक्षसिद्धे प्रवृत्ति-निवृत्ती न स्याताम् । न ह्यवस्तुविषयात् षष्ठेन्द्रियविकल्पाद् वस्तुनि प्रवृत्त्यादि भवति । 5

स्यान्मतम्–विकल्पदर्शित एवार्थे शब्दसङ्केतः, स एव तच्छ्रवणात् प्रतीयते,
184B तथापि बाह्ये प्रवृत्ति-निवृत्ती भवतो दृश्य विकल्प्ययोरभेदावसायात् । तदुक्तम्–"ते तु स्वालम्बनमेवार्थक्रियायोग्यं मन्यमाना दृश्य-विकल्प्यावर्थावेकीकृत्य प्रवर्त्तन्ते"[ ]इति। 10

अत्राप्याह–

दृश्य-विकल्प्ययोरभेदाध्यवसायेनापि न बाह्ये प्रवृत्तिः, अतुल्यत्वात् ।

दृश्येति । दृश्योऽर्थः स्वलक्षणम्, विकल्प्योऽर्थः सामान्यरूपो विकल्पाभासः, तयोरभेदावसायेनाऽपि न बाह्येऽर्थक्रियासमर्थे स्वलक्षणे प्रवृत्तिः स्यात् । तयोर्दृश्य-विकल्प्ययो- 15
रत्यन्तभेदेनाऽतुल्यत्वाद् विसदृशत्वात् । एकान्तभिन्नयोर्ह्यभेदाध्यवसायः कुतश्चित् साद-
185A श्यात् । न ह्यतिमुग्धधियोऽपि सीमन्तिनी-हस्तिन्योरभेदावसायो भवति । न च दृश्य-विकल्प्ययोः सादृश्यलेशोऽप्यस्ति, दृश्यस्यार्थक्रियाकारित्वेन परमार्थसत्त्वात्, विकल्पारोपितस्य चार्थक्रियासामर्थ्यराहित्येनाऽवस्तुत्वात् । ततः कुतो दृश्य-विकल्प्ययो- 20
रभेदाध्यवसायः स्याद् येन शब्दादारोपितप्रतीतावपि बाह्ये प्रवृत्तिः स्यात् ? तद् यद्य-
पोहे वस्तुन्यवस्तुनि वा शब्दसङ्केतः क्रियेत तदा शब्दश्रवणात् स्वलक्षणे प्रवृत्ति-निवृत्ती न स्याताम् ।

अपि च, शब्दविषयस्यालीकत्वं न शब्दोत्थे प्रत्ययेऽनुभूयते । न ह्ययमलीक-प्रतिभासः संवेद्यते । तथात्वे वा बाह्ये वस्तुनि प्रवृत्तिर्न स्यात् । न वै अलीकमेत-

१ अवस्तुत्वे न किञ्चिदभिहितम् ॥ २ स चासौ शब्दश्च अवस्तुरूपापोहसंकेतितशब्द इत्यर्थः ॥ ३ 25
'ढ' [=षष्ठ्यन्तं विग्रहे] ॥ ४ प्रत्यक्षसिद्धे च प्रवृत्त्यादि ॥ ५ विकल्पदर्शितार्थप्रतीतावपि ॥ ६ अर्थे ॥ ७ प्रवर्त्ता(र्तिता)रः ॥ ८ स्वकीयविकल्पेनालम्बितमेव गृहीतमेवार्थमित्यर्थः ॥ ९ दृश्य-विकल्प(ल्प्य)-योरभेदाध्यवसायेनापि न बाह्ये प्रवृत्तिः ॥ १० शब्दात् प्रतीयमानस्यार्थस्येत्यर्थः ॥ ११ ज्ञाने ॥ १२ शब्दोत्थः प्रत्ययः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

185A दित्यनुभूयाप्यर्थक्रियार्थी प्रवर्त्तते । अन्यनिवृत्तेः स्फुरणात् प्रवृत्तिरिति चेत् । न । विधिरूपस्यैव स्फुरणात् । न हीह महीधरोद्देशेऽग्निरस्तीति शब्दश्रवणादनग्निर्न भवतीति विज्ञानमुदयते । किं नाम ? 'अग्निरस्ति' इति ।

यद्यपि शाब्दे प्रत्यये निवृत्तिर्न प्रतिभासते तथापि निवृत्तः पदार्थोऽवभासते । निवृत्तपदार्थोल्लेख एव च निवृत्युल्लेखः । न ह्यनन्तर्भावितविशेषणा विशिष्टप्रतीतिरिति चेत्, एवं तर्हि शब्दविषयालीकत्वाय दत्तो जलाञ्जलिः, निवृत्तस्यार्थक्रियाकारित्वेन 186A परमार्थसत्त्वात् । यापि च व्यावृत्तनान्तरीयिका व्यावृत्तिः सापि नावस्तु, अभावांशस्य भावांशाभेदेन वस्तुत्वात् । अपि च, अस्त्वन्यनिवृत्तिप्रतीतिस्तथाऽपि बाह्ये प्रवृत्तिर्न प्राप्नोति । न ह्यपटो नास्तीत्येव पटार्थी प्रवर्त्तते, अपि तु पटोऽस्तीति । अपटस्यैव निवृत्तिरिति नियमवत्यां प्रतीतौ पटसत्तासम्भावनया नैष दोष इति चेत् । न, पटनिवृत्त्यप्रतिक्षेपे नियमस्यैवाघटनात् । तत्प्रतिक्षेपे वा कस्ततोऽन्यः पटविधिः ? तस्माद् बाह्यप्रवृत्त्यन्यथानुपपत्त्या शाब्दः प्रत्ययो नालीकविषयः ।

तदवायविषये सामान्यविशेषात्मनि शब्दसङ्केतः । सङ्केतितश्चाभिधेयः ।

सम्प्रति प्रस्तुतमुपसंहरति—तत् तस्मादवायविषये ऐन्द्रियकनिश्चयज्ञानगोचरे सामान्य- 186B विशेषात्मनि शब्दसङ्केतः क्रियते । सङ्केतितश्चाभिधेयः शब्दानां वाच्यो भवति । न हि शब्दा निरभिधेयाः, तच्छ्रवणानन्तरं बाह्यार्थप्रतीतिप्रवृत्त्यादिदर्शनात् । अभिधेयं च निश्चयज्ञानगोचरः सामान्यविशेषात्मकं वस्तु, तत्रैव सङ्केतकरणात् सङ्केतितस्य चाभिधेयत्वात्, सामान्यमात्रा-ऽपोहयोः सङ्केतकरणेऽपि वैफल्यात् ।

एतेन व्यापकानुपलब्धिरपि प्रत्युक्ता, परोक्षस्यैव शब्दविषयत्वात् । यथा अनुमात्वाभेदेऽपि स्व-परार्थभेदः तथाऽत्रापि ।

'एतेनेति शब्दस्य सामान्यविशेषवस्तुवाचकत्वेन व्यापकानुपलब्धिरपि प्रत्युक्ता या 187A परैः शाब्दप्रत्ययस्य प्रामाण्यमपाकर्तुं प्रयुक्ता, यथा—

"प्रमेयरूपं हि परिच्छिन्नं वस्तु प्रापयत् प्रमाणमुक्तम्, प्रमेयं च विषयः प्रमाणस्येति विषयवत्तया प्रामाण्यं व्याप्तम् । ततो यद्विषयवन्न भवति न तत् प्रमाणं

१ विजातीयव्यावृत्तेः ॥ २ विजातीयव्यावृत्तो घटः ॥ ३ न अगृहीतविशेषणा विशेष्ये बुद्धिः ॥ ४ पटाभावानिराकरणे । किमुक्तं भवति ? पटसद्भावनिश्चये सति अपटस्यैव निवृत्तिरेवंरूपस्य नियमस्य घटनम्, नान्यथा ॥ ५ **तदवायविषये सामान्यविशेषात्मनि शब्दसंकेतः** ॥ ६ **एतेन व्यापकानुपलब्धिरपि प्रत्युक्ता** ॥ ७ प्रतिषेध्यं शाब्दप्रत्ययस्य प्रामाण्यम् ॥ ८ परिच्छेद्यरूपम् ॥ ९ शातम् ॥ १० सत् ॥ ११ '२' [=द्वितीयान्तम्] ॥ १२ '१' [=प्रथमान्तम्] ॥ १३ ज्ञानम् ॥ १४ ज्ञानम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यथा व्योमोत्पलम्, प्रत्यक्षा-ऽनुमानाभ्यामन्यच्च विज्ञानं न विषयवदिति व्यापकाभावः" [प्रमाणविनिश्चयटीका पृ० १३ B] इति ।

सेयं परोक्ता व्यापकानुपलब्धिः प्रत्याख्याता, परोक्षस्यैव शाब्दविषयत्वात् इन्द्रियाविषयस्याप्रत्यक्षस्यार्थस्य शब्दोत्थप्रत्ययग्राह्यत्वात् । शब्दो हि सामान्यविशेषात्मकवस्तुवाची, ततः तदुत्थप्रत्ययस्य सामान्यविशेषात्मकं वस्तु विषयोऽस्ति । अयं तु विशेषः— प्रत्यक्षं सामान्यविशेषात्मकं वस्तु स्पष्टरूपेण गृह्णाति, शाब्दं तु ध्यामलरूपेणेति । तत्कथं विषयवत्त्वस्य व्यापकस्याभावेनै शाब्दप्रत्ययस्याप्रामाण्यं स्यात् । 187B

यँदस्पष्टरूपेण वस्तु गृह्णाति तत् सर्वं प्रमाणमनुमानम् । ततो यदि शाब्दोऽपि प्रत्ययोऽस्पष्टरूपेण वस्तु गृह्णीयात् तदाऽनुमानमेवासौ स्यात्, तथा च प्रत्यक्षमनुमानं शाब्दं चेति त्रयी न सिध्येदिति चेत्, न, यँथेति । यथा हि स्वार्थानुमान-परार्थानुमानयोः परोक्षार्थविषयत्वेनानुमानत्वाभेदेऽपि वचना-ऽवचनात्मकत्वलक्षणेनाऽवान्तरभेदेन स्व-परार्थभेदो भवति 'अवचनात्मकं स्वार्थानुमानम्, त्रिरूँपलिङ्गाख्यानलक्षणवचनात्मकं तु परार्थानुमानम्' । यद् विनिश्चयः—

"अनुमानं द्विधा, स्वार्थं त्रिरूपाल्लिङ्गतोऽर्थदृक् । [प्रमाणविनिश्चयः पृ० २६५ A]
अँतस्तिमर्स्तदूग्रहाद् भ्रान्तिरपि सम्बन्धतः प्रेमा । [प्रमाणविनिश्चयः पृ० २६५ B] 188A
परार्थमनुमानं तु "स्वदृष्टार्थप्रकाशनम् ॥" [प्रमाणविनिश्चयः पृ० २८५ A] इति ।

तथाऽत्रापीति अनुमान-शाब्दयोरपि यद्यपि अस्पष्टवस्तुविषयत्वेन परोक्षविषयत्वाभेदस्तथाऽप्यर्थ-शब्दप्रभवत्वलक्षणावान्तरभेदेनानुमान-शाब्दभेदो भवति । धूमादिलक्षणादर्थात् पौरम्पर्येणोत्पन्नमग्न्यादिविषयं ज्ञानमनुमानम्, शब्दात् पुनरुत्पन्नं बाह्यार्थविषयं शाब्दम् ।

एतेन यदुक्तम्—

"तथा विषयभेदाद् भिद्यते प्रमाणम्। यतो निमित्तवान् प्रमाणभेदः, निर्निमित्तत्वेऽतिप्रसङ्गात् । न चान्यन्निमित्तमुपपद्यते । विषयभेदश्चाश्रितः परेणापि प्रमाणानाम् । विषयापेक्षं च प्रमाणमप्रमाणं चेति विषयापेक्षेणैव तेंऽभेदेन भवितव्यम् । तस्माद् 188B

१ व्योमोत्पलज्ञानमित्यर्थः ॥ २ शब्द ॥ ३ कृत्वा ॥ ४ ज्ञानम् ॥ ५ यथाऽनुमानत्वाभेदेऽपि स्व-परार्थभेदः ॥ ६ त्रिरूपं लिङ्गमाख्यायते येन वचनेन सामान्यविशेषभावेन तद् वचनं लक्षणं रूपं यस्य वचनस्य ॥ ७ अस्वलक्षणे सामान्ये ॥ ८ स्वलक्षणग्रहात् ॥ ९ पारम्पर्येण अर्थसम्बन्धात् प्रमा प्रमाणम् ॥ १० स्वेनात्मना दृष्टो योऽर्थस्तस्य परस्मै प्रकाशनं वचनेन ॥ ११ धूमदर्शनं धूमज्ञानं व्याप्तिस्मरणं चेति पारम्पर्यम् ॥ १२ ग्राह्य ॥ १३ ग्राह्याद् विषयात् ॥ १४ वादिना ॥ १५ प्रमाण ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विषयभेदमात्रनिमित्तः[1] प्रमाणभेदस्तेदभेदेन व्याप्तः। तेन यत् प्रत्यक्षानुमानार्थव्यतिरिक्तविषयं न भवति न तत्ताभ्यां भिन्नं प्रमाणम्, यथा ते एव प्रत्यक्षानुमाने प्रत्यक्षानुमानान्तराभ्यां यथा वा भ्रान्तिज्ञानम्, न भवति च प्रमाणं नाम प्रत्यक्षानुमानव्यतिरिक्तप्रमेयमिति व्यापकाभाव एव" [प्रमाणविनिश्चयटीका पृ० १३ B–१४ A] इति,

तदपि निरस्तम्। यतो नास्माभिर्विषयभेदेन भेदः[2] उच्यते, किं तर्हि? स्वार्थ-परार्थानुमानवत् साधनभेदेन। यथा हि स्वार्थ-परार्थे धूमानुमाने अग्निविषयत्वेनाभिन्नविषये
139A अपि साधनभेदाद् भिद्येते तथा शाब्दा-ऽनुमाने अपि। विषयस्तु स्वार्थ-परार्थयोरिवैक एव। अत एव परोक्षत्वेनानयोरेकत्वमपीष्यते। अयमर्थः—यद्यनयोः साधनाभेदेनैकत्वमिष्यते तदाऽसौ न सिद्धः। अथ विषयाभेदेन तदा तस्मिन् सत्यपि साधनभेदेन स्वार्थ-परार्थवदनयोर्भेदो भविष्यति। अन्यथाऽसौ स्वार्थ परार्थयोरपि न स्यादिति।

स्यान्मतम्—प्रवृत्तिविषयार्थोपदर्शकं ज्ञानं प्रमाणम्। प्रवृत्तिविषयश्चार्थो नियतदेश एव सम्भवति, अनियतदेशस्याप्रवृत्तिविषयत्वात्। न च शाब्दप्रत्यये नियतदेशोऽर्थः प्रतिभाति, शब्दादर्थमात्रस्यैव प्रत्ययात्। तत् कथमसौ प्रमाणं भवेदिति। यदाह—

139B "प्रवृत्तिविषयस्य व्यवस्थापकं प्रमाणमिष्यते। तत्र सत्यपि बाह्येनार्थेन सम्बन्धे वाच्यभूतेन पदेभ्यो यः पदार्थप्रत्यय उत्पद्यते न तेन कश्चित् प्रवृत्तिविषय उपस्थापितो येन घटार्थी कृतश्चिन्निवृत्य क्वचित् प्रवर्तेत। तथाहि—देशविशेषसम्बद्धे वस्तुनि प्रवृत्तिविषये पुरुषः प्रवर्त्तितुमुत्सहते। न च केनचिद्देशेन विशिष्टो घटो घटशब्देनोपदर्शित इति कथं तस्मात् प्रवृत्तिः" [ ] इति।

अत्र निरूप्यते—इह तावच्छब्दाद् द्वौ प्रतिपाद्यौ—पूर्वं दृष्टार्थदेशोऽदृष्टार्थदेशश्च। तत्र यः पूर्वमदृष्टार्थदेशः शब्दानुक्तं चार्थं स्वयमवगन्तुमनलं तं प्रति प्रतिनियतदेश
190A एवार्थो वाक्येन बोध्यते, यथा 'भो भृतक! भवनान्तर्भागादग्मस्कुम्भमानय', स एष भृतकोऽस्माद्वाक्यात् प्रतिनियतदेशमेव कुम्भमवैति आनयति च, वाक्यात् प्रतिनियतदेशार्थविषयस्यैव प्रत्ययस्योत्पादात्। तदमुना प्रत्ययेन प्रतिनियतदेश एवार्थो दर्शितः, स च प्रवृत्तिविषय एव। यः पुनः पूर्वं दृष्टार्थदेशः प्रतिपाद्यो भवति तं प्रत्यधिकरणपदविशेषणनिरपेक्षमपि वाक्यमुच्चार्यते यथा 'अग्मस्कुम्भमानय' इति। स

१ विषयभेदेन ॥ २ ज्ञानम् ॥ ३ प्रत्यक्षानुमानाभ्यां परिच्छेद्योऽर्थः प्रत्यक्षादिः ॥ ४ न भिन्ने प्रमाणे इति सम्बन्धः ॥ ५ प्रमाणभेदः ॥ ६ क्रियाभेदेन व्यापारभेदेन ॥ ७ शब्दानुमानयोः व्यापाराभेदेन ॥ ८ अर्थस्य ॥ ९ शब्दस्य ॥ १० पुमांसौ ॥ ११ अधिकरणस्य प्रतिपादकं पदमधिकरणपदम्, तदेव विशेषणम्, तस्य निरपेक्षम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ऐतावतापि वाक्येन भवनान्तर्भागवर्त्तिनं कुम्भमभवेति तमेवानयति च। तदत्र शाब्द-प्रत्यये यद्यप्यधिकरणस्य प्रतीतिस्तदभिधायकैकृता नास्ति तथापि प्रकारान्तरैकृताऽस्ति। न च वक्तव्यं 'देशावगमः प्रकारान्तरकृतोऽयं न शब्दकृतः, शब्देन स्वनियतदेश एवा-र्थोऽभिहितः' इति, कुम्भमानयेति वाक्यादेव देशस्य स्मरणात्। अयं तु विशेषः— वाक्येनाधुना कुम्भोऽभिहितो देशस्तु स्मारित इति। न च यदर्थपरिज्ञानं प्रकारा- 5
190B न्तरेणापि भवति तदभिधायी ध्वनिरुच्चारयितुमुचितः, उक्तार्थानामप्रयोगात्। भवद्भिरपि च यो दृष्टान्तोपदर्शकवचनमन्तरेणापि स्वत एव साध्येनान्वयव्यतिरेकौ हेतोरवगच्छति तं विद्वांसं पुमांसं प्रति हेतुवचनमेव केवलमुच्यते, न दृष्टान्तवचनमपि, तदर्थस्य हेतु-वचनेनैव गतत्वात्। यत् प्रमाणवार्त्तिकम्—

"तैज्ञावहेतुभावौ हि दृष्टान्ते तैदवेदिनः। 10

ख्याप्येते, विदुषां वाच्यो हेतुरेव हि केवलः॥" [प्रमाणवार्तिके १।२८] इति।

ततो यत्र वाक्ये देशपदप्रयोगो नास्ति तत्रापि प्रतिनियतदेश एवार्थः शाब्द-
191A प्रत्ययेन दर्श्यते, स च तादृशः प्रवृत्तिविषय एव। ततः शाब्दमपि ज्ञानं प्रतिनियत-देशार्थोपदर्शकमेव, तथा च प्रमाणान्तरवत् प्रमाणमेव।

एवं तर्हि यः पूर्वं दृष्टार्थदेशो न भवति, दृष्टार्थदेशं पुमांसं प्रत्युच्यमानं च 15
'अम्मस्कुम्भमानय' इति वाक्यं तटस्थ एव शृणोति, तस्याप्यम्भःकुम्भप्रत्ययो भवति। न चासौ प्रतिनियतार्थोपदर्शकः, देशाभिधायिनो ध्वनेरश्रवणात्, अतः कथं प्रमाणं स्यादिति। अत्रापि निरूप्यते—यः पुमान् प्रवर्त्तितुकामो भवति तं प्रत्येव शाब्दप्रत्ययो नियतदेशमर्थमप्रदर्शयन्न प्रमाणं स्यात्। तटस्थस्तु पुमान् प्रवर्तितुकाम एव न भवति।
191B ततस्तं प्रत्यसावर्थमात्रोपदर्शकत्वेनापि प्रमाणम्। 20

अपि च, भवद्भिरप्यभिप्रायैकार्थत्वेन शब्दस्य तद्विषये शाब्दप्रत्ययस्य प्रामाण्य-मिष्यते, न चासावभिप्रायः प्रवृत्तिविषयः, ततः सोऽपि प्रमाणं न स्यात्। तस्मा-च्छाब्दप्रत्ययः प्रवर्त्तितुकामस्य पुंसो नियतदेशमेवार्थं प्रवृत्तियोग्यं दर्शयन् प्रमाणम्। प्रवर्त्तितुमनिच्छोरुदासीनस्य पुनरर्थमात्रोपदर्शकत्वेनापि प्रमाणम्।

ननु न शब्देभ्यः स्वरूपेणार्थः प्रत्यक्षवत् प्रतिभासते यस्य प्रवृत्तिविषयत्वं स्यात्, 25
शब्दोत्थापितस्य विकल्पितस्य हानोपादानायोगात्। प्रवर्त्तमानस्य तु पृथिव्याममज्जना-

१ शब्द॥ २ प्रत्यक्षादिना॥ ३ तादात्म्य-कार्यकारणभावौ॥ ४ तद्भाव-हेतुभावा[वि]जानतः॥ ५ तद्भाव-हेतुभावविदुषां जानतां पुनः॥ ६ विवक्षा॥ ७ विवक्षया कार्यः शब्दः (कार्याः शब्दाः?) विवक्षां सूचयेयुः॥ ८ अभिप्रायविषये॥ ९ सामान्यरूपस्यावस्तुन इत्यर्थः॥ १० शब्दात् प्रवर्तमानस्य पुंसः॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

192A दवश्यं प्राप्तिनिमित्तं ज्ञानान्तरमुत्पद्यते यतः किञ्चिदवाप्यत इति । न, एवं ह्यनुमानस्याप्यप्रामाण्यं स्यात्, प्रत्यक्षवत् स्वरूपेणाप्रतिभासनात् । वस्तुप्रवृत्ति-प्रापणाभ्यां प्रामाण्यमिति चेत्, स एषः न्यायः शब्देऽपि प्रगुणः । ततोऽपि वस्तुनि प्रवृत्तेः प्राप्तेश्च । न च प्रवृत्तिविषयोपदर्शकत्वादन्यं प्रामाण्यहेतुमभ्युपगतोऽसि । प्रवृत्तावपि बाधकोत्थानाद् मरीचिकासु जलज्ञानस्येवाऽप्रामाण्यं स्यात् । तंत्तु नास्ति । न ह्याप्त- 5
वचनादर्थं प्रतिपद्य प्रवर्त्तमानो विप्रलभते । ज्ञानान्तरादवाप्तिः पुनः प्रत्यक्षा-ऽनुमानयोरपि प्रामाण्यमुपहन्ति, तस्य तत्रापि सम्भवात् ।

192B प्रवृत्तिविषयोपदर्शकं प्रमाणम्, प्रदर्शिते ह्यर्थे प्रवर्त्तितः पुरुषः प्रापितश्चार्थम्, एतच्च ज्ञानान्तरादवाप्तावपि प्रत्यक्षा ऽनुमानयोरस्तीति चेत्, एवं तर्हि प्रत्यक्षमप्रमाणमस्तु । प्रवृत्तिविषयो ह्यर्थो निश्चितोऽनुसंहितार्थक्रियासामर्थ्यश्च । बालोऽपि हि यावत् 10
स एवायमिति न प्रत्यवमृशति तावन्नोपरतरुदितो मुखमर्पयति स्तने । न चेदेमियंतो व्यापारानविकल्पकं कर्त्तुमीष्टे । निश्चयानुसन्धाने हि विकल्पयेत्तम्, तदेवस्यैव प्रामाण्यं स्यात्, सम्यग् निर्णयत्वात् ।

अथ स्वयं वा निश्चया-ऽनुसन्धानाभ्यां ज्ञानमर्थे प्रवृत्ति-निवृत्ती कुर्यात् परेण
193A वा, नास्ति विशेषः, निश्चया-ऽनुसन्धानयोरुभयत्रापि प्रयोजकत्वात् । अस्ति वैयर्थ्यं 15
नाम महान् विशेषः । निश्चयेन हि निश्चितेऽनुसंहिते चार्थे निष्पादितक्रिये कर्मणि प्रवर्त्तयितुरविकल्पकस्य व्यर्थः प्रामाण्यसमर्थनाक्लेशः । नागृहीतस्य निश्चया-ऽनुसन्धाने इति तन्निमित्तत्वेन प्रामाण्यमित्यपि न नैपुणम् । एकत्राप्यर्थेऽनन्तपूर्वज्ञानराशेः प्रामाण्याभ्युपगमप्रसङ्गात्, निर्विकल्पकादिसन्तानस्य तदविनाभावित्वात् । आलोक-चक्षुषोरपि च प्रामाण्यं स्यात् । निश्चया-ऽनुसन्धानयोस्तदपेक्षणात् । तन्निश्चयोऽनुसन्दधानः 20
प्रवृत्त्यङ्गम्, ततोऽसौ प्रमाणम् । चक्षुरालोक-निर्विकल्पकानि पुनः प्रमाणोपयिकानि ।

१ प्रत्यक्षलक्षणम् ॥ २ अर्थस्य स्वरूपेणानुमानेऽप्रतिभानादित्यर्थः । प्रत्यक्षवदिति व्यधिकरणो दृष्टान्तः ॥ ३ बाधकोत्थानम् ॥ ४ ज्ञानान्तरस्य ॥ ५ '६' [=विग्रहे षष्ठयन्तम्] ॥ ६ प्रवृत्तिविषयोपदर्शकत्वम् ॥ ७ अर्थस्य ॥ ८ यस्मात् ॥ ९ प्रत्यक्षम् ॥ १० '२' [=द्वितीयान्तम्] ॥ ११ निर्विकल्पकम् ॥ १२ '६' [=विग्रहे षष्ठयन्तम्] ॥ १३ व्यापारः ॥ १४ '५' [=तस्मात्] ॥ १५ आचार्य एव ॥ १६ परवेद्यं 25
वा ॥ १७ पूर्वदृष्टार्थक्रियाजननसमर्थोऽयमित्यनुसन्धानम् ॥ १८ स्वयं परेण निर्विकल्पक-विकल्पयोरपि ॥ १९ प्रवर्तकत्वात् ॥ २० परः ॥ २१ यत एव निश्चयेन निश्चितोऽनुसंहितश्चार्थोऽत एव निष्पादि[त]क्रियः तेनैव प्रवृत्तियोग्यः कृतः । अत एवानुवादद्वारेणाऽविकल्पस्य व्यर्थता कथ्यते ॥ २२ भावयति ॥ २३ परः ॥ २४ निर्विकल्पेन अगृहीतस्य अपरिच्छिन्नस्यार्थस्य ॥ २५ निर्विकल्पकस्य ॥ २६ आचा[र्यः] ॥ २७ पूर्वोपादानज्ञानसन्तानाविना° ॥ २८ * 'क्षणात्' इति अशुद्धः पाठो हस्तलिखितादर्शे ॥ २९ '५' [=तस्मात्] ॥ 30
३० निर्विकल्पं विकल्पं प्रत्युपादानकारणम् । जैनमते हि सविकल्पस्य अवायरूपस्य प्रामाण्यम्, न तु अवग्रहस्य, एकसामयिकत्वात् ॥ ३१ '६' [=विग्रहे षष्ठयन्तम्] ॥ ३२ कारणानि सहभावेन उपादानभावेन च ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

193B न चोपाया उपेयकक्षामवगाहन्ते। तदर्थक्रियासमर्थोपदर्शकत्वेन शाब्दः प्रत्ययः प्रमाणमेव ।

एतेन यदप्युक्तम्–

" स्वयं हि वस्तु [1]कचिद् दृश्यमानं नान्तरीयकं [2]वस्तु [3]तत्रैव सन्निहितमुपदर्शयत् [4]प्रवृत्त्यङ्गं कुर्यात् । शब्दस्तु यत्र पुरुषे दृश्यते न तत्र साध्यार्थोपसंहारः शक्यः कर्तुम् । यत्र च प्रदेशादौ घटो व्यवस्थितस्तत्र शब्दो न दृश्यते । तेन स्वदेशे शब्दः 5
प्रतिपाद्यमर्थमनुपसंहरन्न प्रवृत्तिनिमित्तीकुर्यात् । तथा न कञ्चित् प्रदेशं प्रतिपाद्येनार्थेन विविक्तं दर्शयेत् यः परिहारात्मकप्रवृत्तिविषयः स्यात् " [ ] इति,

तदपि निरस्तम्, [5]अनुमानप्रतीतिरपि हि तावद् भिन्नदेशैर्नदीपूरादिभिरुपरि वृष्ट्यादिपरिज्ञाने दृश्यते । शाब्दी प्रतीतिः पुनरनुमानमेव न भवति, [6]तदस्या "व्यधिकरणात् [7]कारणात् समुद्भवे को दोषः ? शब्दो हि करणम् । न च करणेनाधृश्यं कर्म 10
[8]परिदृश्यैव क्रिया कर्तव्या । अन्यथा न शरीरस्थं चक्षुर्बाह्यमर्थमुपदर्शयेत् । अपि च, न
194A स्वदेश एवोपसंहारकरणं हेतोर्वस्तूनां प्रवृत्त्यङ्गीकरणे प्रयोजकम्, अपि तर्हि वाञ्छितार्थ-क्रियासमर्थार्थोपदर्शकत्वम् । तच्च शब्दस्याप्यस्ति, [9]तदुपनीतार्थस्य हानोपादानयोग्यत्वात् ।

तावत् सिद्धा प्रतीतिः । सा चेद् व्यधिकरणादपि भवति, को विरोधः ? यथोपेयदर्शनं [10]औपयिककल्पितिः । न तु व्यत्ययः । 15
अत एवानुमानोऽपि भिद्यते इति ।

अत्रैवार्थे [11]वार्त्तिकमप्याह–[12]तावदिति । तावच्छब्देन शब्दादर्थप्रतीतौ सकललोक-प्रसिद्धया निर्विवादत्वमाह । अविसंवादिपुरुषप्रणीतशब्देनार्थः प्रतीयत इत्ययमर्थः सिद्ध एवेत्यर्थः । "सेति प्रतीतिः, चेद् व्यधिकरणादपि भवति, यद्यर्थदेशाद् भिन्नदेशस्थादपि शब्दाद् भवति, को विरोधः ! न कोऽपि । "हिर्यस्मात्, उपेयदर्शनस्यानतिक्रमेण 20
यथोपेयदर्शनम्, यथोपेयं दृष्टं तथैवेत्यर्थः, औपयिककल्पितिरुपायकल्पनम् । न तु व्यत्ययः,
194B न पुनर्यथौपयिकदर्शनमुपेयकल्पनिर्भवतीति विपर्ययः । अग्नेश्च प्रतीतिः [13]समानाधिकरणादेव

१ कार्यरूपं धूमादि ॥ २ पर्वतादौ ॥ ३ साध्यमन्यादि ॥ ४ देशे ॥ ५ अदर्शयन्नित्यर्थः ॥ ६ पूर्वं प्रवृत्तिं प्रति उक्तम् इदानीं निवृत्तिं प्रति वक्ति ॥ ७ निवृत्तिविषयः स्यादित्यर्थः ॥ ८ अनुमानरूपा प्रतीतिर्ज्ञानं भिन्नाधिकरणालिङ्गाद् दृश्यते इति सम्बन्धः ॥ ९ सति ॥ १०' ५' [= तस्मात्] ॥ ११ भिन्नाधिकरणात् ॥ १२ साधकतमरूपात् शब्दात् ॥ १३ आलिङ्ग्य ॥ १४ शब्द ॥ १५ तावत् सिद्धा प्रतीतिः ॥ १६ सा चेद् व्यधिकरणादपि भवति को विरोधः ॥ १७ यथोपेयदर्शनं औपयिककल्पितिः ॥ १८ समानमधिकरणं पर्वतादिः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

धूमाद् दृष्टा ततः सा तथैवाभ्युपगम्यते । शब्दादर्थप्रतीतिस्तु व्यधिकरणादपि दृष्टा, ततः साऽपि तथैवाङ्गीक्रियते । साध्यानुसारेणैव हि साधनेषु विचारप्रवृत्तयो न पुनः साधनानुसारेण साध्येषु ।

अत एवेति यत एव व्यधिकरणादपि शब्दादर्थप्रतीतिर्भवति तत एवाऽनुमातोऽपि भिद्यते, अपेः क्रियान्ते योगः, भिद्यतेऽपीत्यर्थः । यावता शाब्दमनुमानं च परोक्षार्थविषयं तावता न भेदः । यावता च व्यधिकरणात् समानाधिकरणाच्च साधनात् प्रादुर्भवस्तावता भेदः । तच्छाब्दं पृथगेव प्रमाणम् । अयं च न्यायः– आप्तशब्दो बाह्यार्थविषयः, तत्प्रतीतौ व्यापार्यमाणत्वात्, चक्षुर्वत् । तत्प्रतीतौ व्यापार्यमाणत्वं तत्र
195A प्रवर्त्तकत्वेन व्याप्तम् । साध्याभावे च तदभावः स्यात् । न हि यो यद्विषयो न भवति स तत्र प्रवर्त्तकः । व्यापकाभावे च व्याप्यस्य हेतोरप्यभाव इति व्यापकानुपलब्धिर्विपक्षे बाधकम् । धूमवद् बाह्यप्रतिबद्धत्वं वा साध्यम् । अत्र च बाह्यार्थान्वयव्यतिरेकानुविधायित्वेन हेतुर्व्याप्तः । साध्याभावे च तदभावः स्यात् । न हि यो यत्रासम्बद्धः स तदन्वयव्यतिरेकानुविधायी । व्यापकाभावे च व्याप्यस्य हेतोरप्यभावः । न वै यो यदन्वय-व्यतिरेकौ नानुविधत्ते स तत्प्रत्ययार्थं व्यापार्यते । इतिकरणः शब्दविचारावसानं पिशुनयति ।

सम्प्रति ज्ञानवादादारभ्य सङ्क्षेपेण प्रमेयं श्लोकैः सङ्गृह्णाति–

यद्ग्रहणपरिणत्या जाता धीस्तस्य वेदिनी ।
निराकाराऽपि तेनार्थः प्रत्यक्षेणैव सिध्यति ॥ १ ॥

अशुद्धजन्यं स्वापादौ नार्थं तूज्झति शुद्धजम् ।
एकोपलम्भनियमः स्वाभासज्ञानजन्मतः ॥ २ ॥

सदृशा-ऽसदृशग्राह्यग्राह्यवायः प्रपद्यते ।
इन्द्रियैर्जनितत्वेनाऽऽलोचनेव प्रमाणताम् ॥ ३ ॥

१ अत एवानुमातोऽपि भिद्यत इति ॥ २ अनुमानरूपज्ञानतोऽपि ॥ ३ '६' [= षष्ठयन्तम्] ॥ ४ '६' [= विग्रहे षष्ठयन्तम्] ॥ ५ बाह्यार्थ ॥ ६ साध्यस्य बाह्यार्थविषयत्वस्य प्रवर्तकत्वं प्रति व्यापकस्याभावे ॥ ७ शब्दस्य बाह्यार्थप्रवर्तकत्वाभावः ॥ ८ प्रवर्तकत्वाभावे च ॥ ९ बाह्यार्थप्रतीतौ व्यापार्यमाणत्वरूपस्य हेतोः ॥ १० आप्तशब्दो बाह्यार्थप्रतिबद्धः, तत्प्रतीतौ व्यापार्यमाणत्वाद्, धूमवदिति वाऽनुमानम् ॥ ११ अनुमाने ॥ १२ बाह्यार्थप्रतिबद्धत्वाभावे च ॥ १३ शब्दः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नासत्यः प्रत्ययः शाब्दोऽस्खलनाद् वञ्चनं समम् ।
सर्वार्थवाचकत्वेऽपि बुद्धिः कारणमीक्षते ॥ ४ ॥
इति सङ्ग्रहश्लोकाः ॥

इति द्रव्यालङ्कारे पुद्गलप्रकाशो द्वितीयः प्रकाशः ॥

येदित्यादि । यस्यार्थस्य ग्रहणपरिणत्या परिच्छेदपरिणामेन जाता धीस्तस्य वेदिनी तस्य ग्राहिका निराकारापि बाह्यार्थसारूप्यरहिताऽपि, यतो निराकारेणापि ज्ञानेन बाह्यार्थ-परिच्छेद उपपद्यते तेन कारणेनाऽर्थो घटादिः प्रत्यक्षेणैव सिध्यति । अर्थास्तित्वं प्रत्यक्षेणैव सिध्यतीत्यर्थः ।

195B नन्वर्थाभावेऽपि ज्ञानमुत्पद्यते ततः कुतस्तस्मादर्थसत्तानिश्चय इत्याह–अशुद्धे-त्यादि । यज्ज्ञानं सुप्त-मदमूर्च्छिताद्यवस्थासु बाह्यार्थाभावेऽपि समुत्पद्यमानं दृष्टं तदशुद्धजन्यं दुष्टकारणारब्धत्वेन भ्रान्तमित्यर्थः, ततस्तेन न व्यभिचारः । यत् पुनः शुद्धकारणजन्यत्वेनाऽभ्रान्तं तदवश्यमर्थं न व्यभिचरत्येव । तदाह–नार्थं तुज्ज्ञाति शुद्धजं शुद्धहेतुजन्यम् । ननु यदि ज्ञानार्थौ भिन्नौ व्यक्ती तदा कथमेकोपलम्भनियमो भवेदि-त्याह–एकोपलम्भनियम उपलम्भैकत्वनियमः स्वाभासज्ञानजन्मतः स्वसंविदितज्ञानोत्पादाद्
196A भैवति । ज्ञानं स्वसंविदितमेवोदयते । स्वसंवेदनं च ज्ञानोपलम्भो नान्यत् । अर्थोपलम्भोऽप्यर्थग्रहणपरिणामस्य ज्ञानस्य तादूप्येण संवेदनमेव । तथा च सत्येक एव सर्वदाप्युपलम्भः । अर्थग्रहणपरिणामरूपज्ञानवेदनस्यार्थोपलम्भरूपत्वात् तस्यैव च ज्ञानोपलम्भत्वात् ।

तदेवं ज्ञानाद्वैतदूषणं सङ्गृह्य विकल्पप्रामाण्यवादमुपसङ्गृह्णाति–सदृशेत्यादि । सदृशं सामान्यरूपम्, असदृशं व्यावृत्तरूपम्, सामान्यविशेषरूपमित्यर्थः । सदृशासदृशं च तद् ग्राह्यं विषयश्चेति विशेषणसमासः । तद्ग्रहणशीलो अवायो निश्चयज्ञानं प्रपद्यते
196B 'प्रमाणताम्' इति सम्बन्धः । इन्द्रियजनितत्वेन इन्द्रियेभ्य उत्पादात्, आलोचना निर्वि-कल्पकं प्रमाणम्, सा इवेति यथा ह्यालोचनेन्द्रियान्वयव्यतिरेकानुविधानात् प्रमाणम् तथाऽवायज्ञानमपि ।

सम्प्रति शब्दानां वस्तुविषयत्ववादमुपसङ्गृह्णाति–नेति । शाब्दः प्रत्ययो नासत्यः

१ यद्ग्रहणपरिणत्या ज्ञाता धीस्तस्य वेदिनी । निराकारापि तेनार्थः प्रत्यक्षेणैव सिध्यति ॥
२ अशुद्धजन्यं स्वाभासौ नार्थं तुज्ज्ञाति शुद्धजम् । एकोपलम्भनियमः स्वाभासज्ञानजन्मतः ॥
३ एतदेव भावयति ॥ ४ '६' [= विग्रहे षष्ठ्यन्तम्] ॥ ५ सदृशासदृशग्राह्यग्राह्यवायः प्रपद्यते । इन्द्रियैर्जनितत्वेनालोचनेव प्रमाणताम् ॥ ६ ज्ञानम् ॥ ७ नासत्यः प्रत्ययः शाब्दोऽस्खलनाद् वञ्चनं समम् । सर्वार्थवाचकत्वेऽपि बुद्धिः कारणमीक्षते ॥ इति सङ्ग्रहश्लोकाः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

किन्तु सत्य एव, प्रत्ययानां च सत्यत्वमर्थाविनाभावित्वम्, ततोऽर्थाविनाभाव्येवेत्यर्थः । अस्खलनादबाधितत्वाद्व्यभिचरितत्वाद्वा । ननु क्वचिद् व्यभिचारोऽपि दृश्यत एवेत्याह—वञ्चनं व्यभिचारः समं प्रत्यक्षादिभिस्तुल्यम् । यथा क्वचिच्छाब्दप्रत्ययोऽर्थं व्यभिचरति तथा प्रत्यक्षमपि । न च तत् सर्वत्र निर्विषयमेव तथा शाब्दमपीति । ननु सर्वे शब्दा
197A भवन्मतेन सर्वार्थवाचकास्तत्कथमेकस्मादेव शब्दात् सर्वार्थप्रतिपत्तिर्न भवतीति, अत्रोच्यते—सर्वार्थवाचकत्वेऽपि बुद्धिः सर्वार्थानां प्रतीतिः कारणं सहकारिप्रत्ययमीक्षते अवलोकयति । कारणं च क्षयोपशमः पूर्वोदितमेव । यद्यप्येकोऽपि शब्दः सर्वार्थवाची तथापि यत्रैवार्थे सङ्केतेन क्षयोपशमो जनितस्तस्यैव प्रतीतिं करोति नान्यस्य । अत एव यस्य शब्दस्य बहुष्वर्थेषु सङ्केतेन क्षयोपशमोऽजनि स बहूनामपि प्रतीतिं जनयति
197B यथा हरिशब्द इति । पूर्वोदितार्थसङ्ग्रहाय श्लोकाः सङ्ग्रहश्लोका इति ।

रूपं च सत्त्वमथ वादिविटैर्विलुप्त—
मित्थं[1] यदा स्थितिमनीयत पुद्गलानाम् ।
तन्मा कदाचिदपि पुद्गलतामगमी[2] नौ ।
सन्दीदृशन् यदि भवन्तितमां कृतज्ञाः ॥

इति रामचन्द्र-गुणचन्द्रविरचितायां
स्वोपज्ञद्रव्यालङ्कारटीकायां
द्वितीयः पुद्गलप्रकाशः समाप्तः ॥
॥ छ ॥

१ पूर्वोक्तयुक्तिभिः ॥ २ '६' [= षष्ठयन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथ तृतीयोऽकम्पप्रकाशः ।

॥ अर्हं ॥

अथाकम्पानि ।

1 B प्रथमप्रकाशे तावदशेषद्रव्याणां प्रधानमात्मा स्वरूपभेदैः प्रमाणप्रतिष्ठितः कृतः, तदनु द्वितीयप्रकाशे तेदत्यन्तोपकारकाः पुद्गलाः । सम्प्रति पुनर्गतिस्थित्यवगाहदानेनोभयोपकारकाणां धर्मादीनामवसरः, ततस्तेऽपि स्वरूपतः प्रमाणप्रतिष्ठिताः क्रियन्ते । तत्र प्रत्येकपरिसमाप्तं लक्षणमनुदाहृत्यैव सर्वेषामेकप्रकाशप्रपञ्चनानिबन्धनं सामान्यधर्माभिधायि प्रथममधिकारसूत्रमाह—अथाकम्पानीति । 'अथ' ध्वनिरधिकारार्थो मङ्गलार्थो वा, अस्मिन् प्रकाशेऽकम्पानि त्रीणि द्रव्याण्यधिक्रियन्ते । कम्पनं कम्पो देशाद् देशान्तरप्राप्तिहेतुः पर्यायविशेषः, स येषां नास्ति तान्यकम्पानि, गमना-ऽऽगमनक्रियारहितानीत्यर्थः । कम्पनं च द्रव्यपर्यायो न पुनः पदार्थान्तरम्, तथाऽप्रतीयमानत्वात्, गुण-सामान्य-विशेष-समवायवत् ।

2 A ननु च क्रिया द्रव्यात् पदार्थान्तरम्, तद्भिन्नलक्षणत्वाद्, गुणादिवत्, कम्पनं च क्रियेति । नं, कथञ्चिद्भिन्नलक्षणत्वस्य द्रव्यव्यक्तिनेभिरकान्तात् । तथापि पदार्थान्तरत्वे द्रव्यादिव्यक्तीनां पदार्थान्तरत्वप्रसङ्गेन षट्पदार्थनियमः कुतः स्यात् ? द्रव्यत्वप्रतीतिमात्रं द्रव्यलक्षणं सकलद्रव्यव्यक्तीनाममिन्नम्, तस्य कर्मणि मनागप्यभावात् । सर्वथा तद्भिन्नलक्षणत्वं हेतुरिति चेत् । न । एवमपि द्रव्यात् कथञ्चिदभेदिभिः पर्यायैरनैकान्तिकत्वात्, सर्वथा भिन्नलक्षणत्वस्य पर्यायरूपतायामपि घटनात्, गुण-कर्म-सामान्य-विशेष-समवायानां पर्यायलक्षणत्वेन द्रव्यलक्षणायोगात् । सामान्य-समवायौ

---

१ तस्यात्मनः ॥ २ जीव-पुद्गल ॥ ३ मङ्गलार्थप्रतिपादकशब्दश्रवणादेव मङ्गलं लब्धम्, अतो न युक्तिरुपन्यस्यते । ननु आदौ अन्ते च मङ्गलं युक्तं भवति । न । मङ्गलमध्यान्यपि शास्त्राणि भवन्तीति ॥ ४ व्युत्पत्तिवाक्यम् ॥ ५ पदार्थान्तरत्वेन ॥ ६ विशेषो वैसदृश्यम् ॥ ७ द्रव्याद् भिन्नलक्षणत्वात् ॥ ८ द्रव्यात् क्रियायाः कथञ्चिद् भिन्नलक्षणत्वमाहोस्वित् सर्वथा वा इति विकल्पद्वयम् । तत्राद्ये पक्षे उच्यते । पुद्गलेभ्यस्तावदाकाशं कथञ्चिद् भिन्नलक्षणमस्ति न च तद् भिन्नं द्रव्यं भवति, किन्तु एकद्रव्यलक्षणमध्ये पतति ॥ ९ नवभिर्द्रव्यैरनेकान्तात् । कोऽर्थः ! नवानामपि द्रव्याणां कथञ्चिद् भिन्नलक्षणत्वमस्ति, ततो भिन्नलक्षणत्वे पदार्थान्तराणि स्युः ॥ १० अनेकान्तत्वे सत्यपि ॥ ११ क्रियायाः ॥ १२ द्वितीयविकल्पे उच्यते ॥ १३ तस्य द्रव्यलक्षणस्य ॥ १४ क्रियायाम् ॥ १५ द्रव्यात् ॥ १६ द्रव्यात् सर्वथा भिन्नलक्षणत्वेऽपि ॥ १७ कथञ्चिदभेदिनामपि पर्यायाणां ज्ञेयत्वादीनां भिन्नलक्षणत्वेऽपि न पदार्थान्तरत्वमिति व्यभिचारी हेतुर्भिन्नलक्षणत्वम् ॥ १८ उभयवादिसिद्धैः सर्वथा द्रव्याद् भिन्नलक्षणैः अस्तित्वज्ञेयत्वप्रमेयत्वादिभिः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

2 B कथं पर्यायौ नित्यत्वादिति चेत् । न । अनयोरपि गुण-कर्म-विशेषवदनित्यत्वोपगमात् । सदृशपरिणामो हि सामान्यं स्याद्वादिनाम् । अविश्वग्भावश्च वस्तूनां समवायः । स चोत्पाद-विनाशवानेव, सदृशव्यक्त्युत्पाद-विनाशयोः सादृश्यस्याप्युत्पाद-विनाशानुभवात् । सादृश्यस्य व्यक्त्यन्तरेषु दर्शनान्नित्यत्वमिति चेत् । न । वैसदृश्यस्य गुणस्य कर्मणश्चैवं नित्यत्वप्रसङ्गात् । नष्टोत्पन्नव्यक्तिषु न तदेव वैसदृश्यादि दृश्यते ततोऽन्यस्यैव दर्शनादिति चेत् । सादृश्येऽप्येवं किं न भवेत् तथाप्रतीतेरविशेषात् । ततो 3 A द्रव्यपर्याय एव क्रिया । गुणादीनां क्रियात्वप्रसङ्ग इति चेत् । न । ततो विशेषलक्षणस्यापि सद्भावात् । द्रव्यस्य हि देशान्तरप्राप्तिहेतुः पर्यायः क्रिया न सर्वः । सर्वत्र सर्वदा कस्मान्न भवतीति चेत् । न । विशिष्टद्रव्याद्यपेक्षत्वात् तद्भाव एव भावात् पर्यायान्तरवत् । क्रिया-क्रियावतोर्विभिन्नैप्रत्ययग्राह्यत्वात् सह्य-विन्ध्यवद् भेद एवेति चेत् । न । प्रत्यक्षतः कथञ्चिदभिन्नयोरेव ग्रहणात् । न खलु पुरः प्रधावन्तं पुमांसमालोकयन्तो, लोकाः क्रिया-क्रियावतोर्भेदैकान्तावभासि प्रत्यक्षमनुभवन्ति । क्रियैव क्रियावतोऽनन्या, अभिन्नदेशत्वादिति चेत् । न । वाता-ऽऽतपाभ्यामभिन्नदेशाभ्यां व्यभिचारात् ।

अन्ये त्वाहुः—सर्वभावानां क्षणिकत्वाद् देशादेशान्तरप्राप्तिरेव नास्तीति कुतः क्रियायाः सम्भवः ? तदुक्तम्—

"क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया ।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ॥" [ ] इति

3 B न प्रत्यक्षेण क्षणिकत्वस्याग्रहणात् कथञ्चिन्नित्यत्वस्यैव ततः प्रतीयमानत्वात् । सत्त्वादिति हेतुरपि कथञ्चित् क्षणिकत्वमेव साधयति, एकान्तक्षणिकस्यार्थक्रियासद्भावाभावात् ।

अपरे ब्रुवते:— सर्वभावानां नित्यत्वादविचलितरूपत्वेन देशादेशान्तरप्राप्तिरेव

१ वैसदृश्यं विशेषः, न तु नित्यद्रव्यवृत्तम इति, तेषामसिद्धत्वान्मे ॥ २ अपार्थक्यम् ॥ ३ '६' [= विग्रहे षष्ठ्यन्तम्] ॥ ४ सतोः ॥ ५ दर्शनात् ॥ ६ व्यक्त्यन्तरे दर्शनादेव ॥ ७ यदेव वैसदृश्यमवस्थितासु व्यक्तिषु दृश्यते न तदेव नष्टादिव्यक्तिषु दृश्यत इति भावः ॥ ८ अन्यत्वप्रतीतेः ॥ ९ ननु यदि क्रिया द्रव्यपर्यायस्तदा गुणादयोऽपि द्रव्यपर्यायत्वात् क्रियाः स्युः ॥ १० गुणादिभ्यः ॥ ११ क्रियायाः ॥ १२ न सर्वः पर्यायः क्रिया ॥ १३ क्षेत्रकालभावाः ॥ १४ ज्ञान ॥ १५ भिन्ना ॥ १६ क्रियावन्तं विना न पृथगुपलभ्यते क्रियेति अनन्यत्वम् ॥ १७ वाततापाभिन्नदेशावपि न अनन्यौ इति अभिन्नदेशत्वादित्ययं हेतुरनैकान्तिकः ॥ १८ भावाः ॥ १९ अस्थिराणां सतां भावानाम् ॥ २० उत्पत्तिः ॥ २१ या एषाम् ॥ २२ देशाद् देशान्तरप्राप्तिः ॥ २३ प्रत्यक्षात् ॥ २४ अर्थक्रियाकारित्वरूपः ॥ २५ कुतः ॥ २६ नित्यादद्वैतवादिनः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

4 A नास्तीति कुतः क्रियायाः सम्भव इति । एतदप्येकान्तक्षणिकपक्षवद् दूष्यम् । तस्मात् क्रिया भिन्नाभिन्नरूपो द्रव्याणामेव पर्यायो न पुनः पदार्थान्तरम् । उक्तं च—

"[1]परिस्पन्दात्मको द्रव्यपर्यायः सम्प्रतीयते ।
क्रिया देशान्तरप्राप्तिहेतुर्गत्यादिभेदभृत् ॥ १ ॥
प्रयोग-विस्रसोत्पाद्या द्वेधा सङ्क्षेपतस्तु सा ।
प्रयोगजा पुनर्नोदोत्क्षेपणादिप्रभेदतः ॥ २ ॥
विस्रसोत्पत्तिका तेजोवाताम्भःप्रभृतिष्वियम् ।
सर्वथाऽदृष्टवैचित्र्यात् प्राणिनां फलभागिनाम् ॥ ३ ॥" [ ] इति ।

[2]कम्पोऽपि च क्रिया, ततः सोऽपि द्रव्यपर्यायरूप एव । स च येषां नास्ति तान्यकम्पानि धर्मा-ऽधर्मा-ऽऽकाशद्रव्याण्यत्र प्रकाशेऽधिकृतानीति ।

4 B अथ कथं पुनर्धर्मास्तिकायादयः कम्परूपपर्यायपराङ्मुखा इति प्रत्येयम् ? उच्यते—आकाशास्तिकायस्य तावत् सर्वगादिसिद्धमकम्पत्वमतो नेदानीं साध्यते । धर्मा-ऽधर्मास्तिकाययोः पुनरकम्पत्वं सकलजगद्व्यापित्वादाकाशवदेव सिद्धम् । सकलजगद्व्यापित्वं च पुरः प्रपञ्चतः प्रसाधयिष्यत इति नासिद्धो हेतुः । प्रकृतेषु पञ्चसु द्रव्येष्वाकाशान्तानां त्रयाणामेवाकम्पत्ववचनं सामर्थ्याज्जीव-पुद्गलानां सकम्पत्वमावेदयति । नन्वात्मनां सकम्पत्वे मुक्तात्मनामपि प्राप्नोतीति । इष्टमेव, ऊर्ध्वगमनस्यानुमतत्वात् । न चैवमधस्तिर्यगपि वा गमनप्रसङ्गः, गतेरनेकप्रकारत्वात् । अन्यैव हि मुक्तात्मनां गतिरन्या च संसारिणाम् ।

5 A तदेवं त्रयाणामपि धर्मादीनामेकप्रकाशप्रपञ्चनानिबन्धनमकम्पत्वं सामान्यं धर्ममेकेनैव योगेनाभिधाय प्रत्येकपरिसमाप्तं लक्षणमाह—

गति-स्थित्युपग्राहकौ धर्मा-ऽधर्मौ । देशान्तरप्राप्तिहेतुः परिणामो गतिः । विरुद्धः स्थितिः । तत्पोषक उपग्राहकः ।

गतीति । जीवपुद्गलानां गतिस्थित्योर्वक्ष्यमाणरूपयोर्यावुपग्राहकौ स्वतः परिणामिकारणादेवोत्पन्नयोः परिपोषकावस्तिकायौ तौ यथासङ्ख्यं धर्मा-ऽधर्मौ धर्मास्तिकाया-ऽधर्मास्तिकायावुच्येते । गत्युपग्राहको धर्मास्तिकायः, स्थित्युपग्राहकोऽधर्मास्तिकायः।

5 B अथ कथमधर्मास्तिकायो धर्मास्तिकायप्रक्रमादाकाशवत् पृथक् प्रक्रमेणैव नाभ्यधीयतेति ?

१ चलनात्मकः ॥ २ क्रिया ॥ ३ ननु क्रियायाः स्वरूपं स्पष्टमत्र निर्णीतम् । प्रस्तुतकम्पे किमायातमित्याह-कम्पेति ॥ ४ प्रभृतिषु पदार्थेषु, प्रभृतिशब्दात् छाया-तप-आतपादिग्रहः ॥ ५ यथा पुद्गलानां गतिस्तथा मुक्तात्मनामपि ॥ ६ गतिस्थित्युपग्राहकौ धर्माधर्मौ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उच्यते—धर्मास्तिकायेन सह तुल्यमान-देशत्वोपदर्शनार्थं तथा यत्रैव धर्मास्तिकायनिमित्ता गतिस्तत्रैवाऽधर्मास्तिकायनिमित्ता स्थितिर्नान्यत्रेति ख्यापनार्थं च । तेन धर्मादीनां या स्थितिः सा नाऽधर्मास्तिकायान्तरनिमित्ता किन्तु स्वत एव । तथा उपग्राहकाविति कार्यविशेषकथनाद् धर्मा-ऽधर्मयोर्न किञ्चित् कार्यमस्तीति ब्रुवाणः प्रत्याख्यातः ।

6 A अथ केयं गतिरिति उच्यते — देशान्तरेति—एकस्माद्देशादन्यो देशो देशान्तरं तस्य प्राप्तिहेतुः परिणामो जीवपुद्गलानां कथञ्चिदभिन्नः पर्यायो गतिरित्युच्यते । स्थिति-स्वरूपं निर्दिशति—पूर्वोदितस्वरूपस्य गतिपरिणामस्य विरुद्धो विरोधी जीव-पुद्गलानां परिणामः स्थितिरित्युच्यते । विरुद्धत्वं च तस्यां सत्यां गतेर्व्युपरमभावात् ।

6 B गति-स्थिती व्याख्यायोपग्राहकपदं व्याचष्टे—तयोर्गति-स्थित्योः पोषकः स्वत एवोत्पद्य-मानयोरुपष्टम्भकारी यः स उपग्राहकः । अयमर्थः—जीवपुद्गलानां गति-स्थिती न धर्मा-ऽधर्माभ्यां निर्वर्त्येते, किं तर्हि ? स्वत एव तेषां ते भवन्त्यौ ताभ्यां परिपुष्टिं प्राप्येते। ततो जीव-पुद्गला गति-स्थितीनां परिणामिकारणं धर्मा-ऽधर्मौ पुनरपेक्षाकारणमिति ।

एतयोः परिणामिनो भावेऽपि ज्ञानादेरिव चक्षुरादौ धर्मा--ऽधर्मयोरपेक्षा । न क्षित्यादौ, खगादेर्वियत्यपि भावात्, अणूनां च । न वायौ, तत्रापि भावात् । न गतिपूर्वा स्थितिर-धर्मे । क्वचिदभावेऽपि भावाच्च ।

स्यादेवम्—यदि जीव-पुद्गलेभ्य एव गति-स्थिती प्रादुर्भवतस्तदा पूर्यते धर्मा--ऽधर्माभ्याम्, तत्कार्यस्य प्रकारान्तरेणैव सिद्धत्वादिति । एतयोरिति गति-स्थिति-परिणामयोः परिणामिनो भावेऽपि परिणामिकारणेभ्यो जीव-पुद्गलेभ्यः समुत्पादेऽपि धर्मा--ऽधर्मयोरपेक्षेति सम्बन्धः । ज्ञानादेरिव चक्षुरादाविति साधर्म्यनिदर्शनम् । आदिशब्दाभ्याम-

7 A ङ्कुरादीनां क्षित्यादीनां च परिग्रहः । यथा ज्ञानादयः स्वस्वपरिणामिकारणेभ्य आत्मा-दिभ्यः प्रादुर्भावमनुभवन्तोऽपि चक्षुरादीनपेक्षाप्रत्ययानपेक्षन्ते तथा यद्यपि जीव-पुद्गललक्षण-परिणामिकारणेभ्यो गति-स्थिती प्रादुर्भवतस्तथापि धर्मा-ऽधर्मावपेक्ष्येते । अन्यथा ज्ञानादीनामपि चक्षुरादावपेक्षा न भवेत् ।

१ अवयवत्व ॥ २ जीवादौ ॥ ३ प्रयोजन ॥ ४ देशान्तरप्राप्तिहेतुः परिणामो गतिः ॥ ५ विरुद्धः स्थितिः ॥ ६ स्थित्याम् ॥ ७ तत्पोषक उपग्राहकः ॥ ८ एतयोः परिणामिनो भावेऽपि ज्ञानादेरिव चक्षुरादौ धर्माधर्मयोरपेक्षा ॥ ९ '५' [= पञ्चम्यन्तम्] ॥ १० बीजादुत्पद्यमानानाम् ॥ ११ अपेक्षा ॥ १२ निमित्तकारणानि ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु गतिशून्यत्वादाकाशवद् धर्मा-ऽधर्मौ नान्यस्य गति-स्थितिनिबन्धनम्, अन्यथा हस्तादीनामिव गतिमत्त्वप्रसङ्ग इति । तदसङ्गतम्, गतिशून्यस्याऽन्यगति-स्थितिकरण-
7B शक्तौ बाधकप्रमाणाभावात् । न खलु यो येन धर्मेण विप्रयुक्तः स तं धर्ममन्यस्य कर्तुं न शक्नोतीति नियमोऽस्ति, अज्ञानस्वभावस्यापीन्द्रियस्यात्मनि घटादि-विषयज्ञानोत्पादहेतुत्वदर्शनात् । 5

ननु यदि गतिमत्त्वरहितोऽप्यन्यस्य गतिं करोतीत्यभ्युपगमस्तदा कथं प्रथमप्रकाशे प्रत्यपादि, यथा—"यद्यात्मा गतिमान्नेष्यते तदा स्थूलस्कन्धस्य देशान्तरप्राप्तिर्न स्याद्" [ ] इति । तन्न, तत्र हि स्थूलस्कन्धस्याविद्यमानाया गतेर्निर्वर्त्तकत्वमात्मन
8A उक्तम्, तच्च स्वयमगतिमत्त्वे न सिध्यत्येव । अत्र तु जीव-पुद्गलानां स्वत एव विद्यमानाया गतेर्बलाधानमात्रहेतुत्वं धर्मास्तिकायस्योच्यते, तन्न स्वयमगतिमत्त्वेऽपि न 10 विरुध्यत इति न दोषः ।

तदुक्तम्—

"आत्मा हि प्रेरको हेतुरिष्टः कायादिकर्म्मणि ।
तृणादिकर्मणीवाम्भः-पवनादिश्च सक्रियः ॥ १ ॥
तथैव द्रव्यसामर्थ्यान्निष्क्रियाणामपि स्वयम् । 15
धर्मादीनां परेत्राऽस्तु क्रियाकारणमात्रतो ॥ २ ॥" [ ] इति ।

तेन गति-स्थित्योः परिणामिकारणादुत्पादेऽपि धर्मा-ऽधर्मयोरपेक्षा न दुष्यति ।

स्यादेवम्—अस्तु परिणामिकारणादन्यत्र गति-स्थित्योरपेक्षा, परिणामिकारणादेवैक-
8B स्मात् कार्यानुत्पादात् । 'सा पुनरपेक्षा धर्मा-ऽधर्मयोर्विषये, न पुनरन्यत्र क्षित्युदकतेजःसु' इत्यत्र न नियामकमुपलभामह इति । अत्राह—न क्षित्यादाविति । आदिशब्दादुदक- 20 तेजसोर्ग्रहः । अपेक्षेत्यनुवर्त्तते । धर्मा-ऽधर्मयोर्विषयेऽपेक्षा, न पुनः क्षित्युदकतेजःसु, खेगादेर्विषयत्वेऽपि गति-स्थित्योर्भावात् । एतयोरित्यनुवर्त्तते । खगाः पक्षिणः । आदि-शब्दात् प्रभञ्जनोद्भूततृण-तूलादीनां देवादीनां च ग्रहः । यदि हि गति-स्थित्योः क्षित्युदकतेजांस्यपेक्षाकारणानि भवेयुस्तदा ते गगनचारिणां न भवेतामेव । न हि
9A गगने क्षित्यादयः सम्भवन्तीति धर्मा-ऽधर्मावेवापेक्षाकरणे, न क्षित्यादयः । 25

१ अनुमानमिदम् ॥ २ यो गतिमान् दृष्टः स गतेः स्थितेश्च हेतुर्दृष्टः । न चैतौ गतिमन्तौ इति पृच्छ्यते ॥ ३ कारणम् ॥ ४ गतिस्थितिनिबन्धनत्वे ॥ ५ धर्माधर्मयोः ॥६ जीवे ॥ ७ देहस्य ॥ ८ स्थूलस्कन्धं प्रति ॥ ९ आत्मा कायादिक्रियायां प्रेरको हेतुः सन् सक्रिय इष्ट इति सम्बन्धः ॥ १० गतिलक्षणे ॥ ११ वस्तुनि ॥ १२ न तु निर्वर्तकत्वम् ॥ १३ '५' [=तस्मात्] ॥ १४ सति ॥ १५ जीव-पुद्गललक्षणात् ॥ १६ अन्य-पदार्थविषये ॥ १७ कर्म्णोः ॥ १८ खगादेर्विषयत्वेऽपि भावात् ॥ १९ पूर्वसूत्रादेतयोरिति पदमनुवर्तते, 30 तेन गतिस्थित्योरिति व्याख्यातम् ॥ २० गति-स्थिती ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यादेवम्—[1]सूक्ष्माः क्षित्यादयोऽन्तरिक्षेऽपि सम्भवन्त्येव, ततस्तन्निबन्धने गति-स्थिती तत्र भविष्यत इति । अत्राह—अणूनां चेति । [2]एतयोर्भावादिति चात्रापि स्मर्यते । [3]अणुस्कन्धानां परमाणूनां वा गति-स्थित्योर्विषयत्वापि भावात् । न केवलं खगादेरणूनां चेति चार्थः । क्षित्युदकतेजसामणवोऽपि व्योम्नि भ्राम्यन्ति तिष्ठन्ति च, यदि च गति-स्थिती क्षित्याद्यपेक्षे स्यातां तदा [4]तेषां कथं स्यातां ? न हि तत्रापरे परिणामिकारणं क्षित्यादयः सन्ति येऽपेक्षाकारणं स्युः । 5

स्यान्मतम्—अणवः परस्परामन्तरिक्षेऽपेक्षाकारणं भविष्यन्तीति । तन्न । यतः
9 B किं गच्छतां सर्वेषां सर्वे तिष्ठन्तो हेतवस्तिष्ठतां च सर्वेषां सर्वे गच्छन्तः परमाणवः, आहो तिष्ठतां तिष्ठन्तः सर्वे गच्छतां गच्छन्त[5] इति ? तत्राद्यपक्षकक्षीकरणे इतरेतराश्रयदोषः । गमनक्रियाप्रादुर्भावे हि स्थानक्रियेा, स्थानक्रियाप्रादुर्भावे च गमनक्रियेति । 10 द्वितीयपक्षेऽप्ययमेव दोषः, [6]एकस्थानस्यैकगमनस्य चापरस्थान-गमननान्तरीयकत्वात् ।

मा भूत्तर्हि क्षित्यादावपेक्षा, वायौ भविष्यतीति । अत्राप्याह— न वायाविति । अपेक्षेति योगः । [7]तत्रापि वायावपि भावात् एतयोर्गति-स्थित्योः । यदि जीव-पुद्गलानां गति-स्थित्योर्वायुरपेक्षाकारणमुच्यते तदा वायुरपि भ्रमति तिष्ठति[8] च, ततस्तस्य[9] गति-स्थित्योरपेक्षाकारणं वक्तव्यं स्यात्, सर्वत्र गति-स्थित्योः परिणामिकारणादन्यस्या- 15
10A पेक्षाकारणस्यापेक्षणीयत्वात् । तस्माद्यौ गत्वा न तिष्ठतः स्थित्वा च न गच्छतस्तन्निबन्धने एव जीव-पुद्गलानां गति-स्थिती वाच्ये, तादृशौ च धर्मा-ऽधर्मास्तिकायावेव, नान्यौ ।

ननु यथा वायोर्गति-स्थित्योरपरमपेक्षाकारणं मृग्यते तथाऽधर्मास्तिकायस्यापि[10] स्थितेरपरमपेक्षाकारणं मृग्यम्, तथा चानवस्था । अथाधर्मास्तिकायस्थितिः परिणामिकारणमात्रादेव भवति नापेक्षाकारणमवलम्बते तथा वायोरपि गति-स्थिती परि- 20
10 B णामिकारणमात्रनिबन्धने भविष्यतः, वायुः पुनरपरगति-स्थित्योरपेक्षाकारणं भविष्यतीति । उच्यते—[11]नेति । येयमधर्मास्तिकाये स्थितिर्नासौ गतिपूर्वा, गत्युत्तरकालभाविनी न भवति । अधर्मास्तिकायो न गत्वा स्थितः, किन्तु सर्वदापि स्थित इत्यर्थः । यैव हि गतिविरामे सति पदार्थानां स्थितिः कादाचित्की साऽस्माभिरपेक्षाकारणा-

१ "सुहुमा य सव्वलोए" [ ] इति भवत्सिद्धान्तः ॥ २ आकाशे ॥ ३ गतिस्थित्योः ॥ ४ अल्प ॥ 25
५ क्षित्युदकतेजोऽणूनाम् ॥ ६ गतिस्थिती ॥ ७ सर्वे हेतवः ॥ ८ इति विकल्पद्वयम् ॥ ९ सेत्स्यति ॥ १० एकस्य स्थानं तस्य ॥ ११ तत्रापि भावात् ॥ १२ उदरमध्यादौ ॥ १३ वायोः ॥ १४ धर्मास्तिकायस्य स्थितिरधर्मास्तिकायादपि स्यादित्यपि संभाव्येतेति स नोपात्तः । परिशेष्यादधर्मास्तिकाय एवोपात्तः ॥ १५ न गतिपूर्वा स्थितिरधर्मे ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पेक्षिणीति गीयते, या पुनः सर्वकालभाविनी गतिनिरपेक्षा स्थितिः साऽप्येकारणनिरपेक्षा-
11A ऽपि परिणामकारणमात्रादेव भवति, सर्वकालभाविनी गतिनिरपेक्षा चाधर्मास्तिकाय-
स्थितिः, ततः सा परिणामिकारणमात्रभाविन्यपि न विरुध्यते । वायोः पुनर्गति-स्थिती
परस्परापेक्षिण्यौ कादाचित्क्यौ, ततः परिणामकारणादन्ये अप्यपेक्षाकारणे अपेक्ष्येते ।

ननु यथा ज्ञानं युगपदात्मनः परस्य च वेदकं तथा वायुरात्म-परगति- 5
स्थित्योरपेक्षाकारणमस्तु, किं धर्मा-ऽधर्माभ्यामिति ? तन्न, वायुर्हि तावदात्मगति-स्थित्योः
परिणामिकारणम्, स तदानीमेव कथमपेक्षाकारणं स्यात्, [1]एकगोचरयोरेकदा तयो-
र्विरोधात्[2] । न केवलं तत्रापि भावाद् वायौ नापेक्षा, तथा क्वचिदभावेऽपि भावाच्च, क्वचिद-
तिगुपिले प्रदेशे वायोरभावेऽपि पदार्थानां गतिस्थिती दृश्येते । न च यो यदभावेऽपि
भवति स तत्कार्यमिति व्यवहर्तुं शक्यः । ततो वायोः स्वयमपि गति-स्थितिमत्त्वात् 10
तदभावेऽपि च क्वचिदन्येषां गति-स्थितिदर्शनान्नासौ गति-स्थित्योरपेक्षाकारणं भवति ।

मा भूत् क्षित्यादौ वायौ वाऽपेक्षा गति-स्थितिमत्त्वात्, आकाशे पुनरस्तु,
11B तस्यान्योन्यापेक्षगति-स्थितिरहितत्वादिति । अत्राह—

**नाप्याकाशे, लोकालोकविभागस्याभावप्रसङ्गात्, तस्य तन्नि-
बन्धनत्वात् । जीव-पुद्गलसद्भावे कालस्यापि सद्भावः स्यात्, तत्का- 15
र्याणां तत्रापेक्षणात् । न च तदभावः, सावधित्वाल्लोकस्य ।
अन्यथा संस्थानाभावः ॥**

नाप्याकाशे [इ]ति । अपेक्षेति पदं स्मर्यते । जीव-पुद्गलानां गति-स्थित्योर्नाकाशेऽपेक्षा,
नाकाशोऽपेक्षाकारणम्, लोकालोकविभागस्याभावप्रसङ्गात् । यद्याकाशो जीव-पुद्गलगति-
स्थितीनामपेक्षाकारणं स्यात्तदा योऽयं लोके 'एतावाँल्लोकस्ततः परमलोकः' इत्येवं विभागो 20
विवेकः प्रसिद्धोऽस्ति तस्याभावः स्यात् । यस्मात् [3]तस्येति लोकालोकविभागस्य
तन्निबन्धनत्वात्, ते जीव-पुद्गलगति-स्थिती निबन्धनं निमित्तं यस्य तस्य भावस्तत्त्वं
तस्मात् । यावत्याकाशदेशे जीव-पुद्गला गन्तुं स्थातुं च शक्नुवन्ति स लोकोऽन्यः

१ वायुगतगतिस्थित्योः ॥ २ एको गतिस्थितिलक्षणो विषयो ययोः परिणामकारणापेक्षाकारणत्वयोः ॥ ३
एकदा एककालं भिन्नविषये परिणामकारणापेक्षाकारणे न विरुध्येते इति एकगोचरयोरिति विशेषणम् ॥ ४ परिणाम- 25
कारणापेक्षाकारणत्वयोः ॥ ५ एककार्यं प्रति एकदा एकस्यैव कथम् ? ॥ ६ तत्रापि वायौ गतिस्थित्योर्भावात् ॥
७ वायुः ॥ ८ स्वयं क्षित्यादीनां गतिस्थितिमत्त्वात् ॥ ९ * 'आकाशे' इत्यतः परं कानिचिदक्षराणि
लिखित्वा घृष्टानि, ततश्च परं **ति**' इति अक्षरं वर्तते, अतोऽस्माभिः [इ] इति पूरितम् ॥ १० * 'आल्लोक'
इति हस्तलिखितादर्शे पाठः । एवमग्रे पृ. १४० पं० ४ मध्येऽपि ॥ ११ **तस्य तन्निबन्धनत्वात्** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पुनरलोक इत्येवं लोकालोकविभागस्तावदवतस्थे । यदा त्वपेक्षाकारणं गति-स्थित्योराकाशस्तदा तस्य लोकावधेः परतोऽपि भावात्तत्रापि जीव-पुद्गलानां गति-स्थिती भवेताम्, तथा च परभागोऽपि लोकः स्यादित्यलोकं किंवदन्ती समुच्छेदमश्नुवीत । अस्माकं तु यावत्याकाशे [1]निमित्तसद्भावाज्जीव-पुद्गलानां गति-स्थिती तावाँल्लोकस्ततः परमलोक इति न लोकालोकविभागाभावप्रसङ्गः । 12A 5

स्यादेवम्—न जीव-पुद्गलगति-स्थितिकृतो लोकालोकविभागः, किं तर्हि ? कालकृतः, न चासावलोकेऽस्ति, ततो नालोकस्य लोकत्वप्रसङ्गेन लोकालोकाभावप्रसङ्गो भवतीति । उच्यते—[2]जीवेति, जीव-पुद्गलानां गति-स्थितिनिमित्ताकाशैसन्निधानेनाऽलोकेऽपि सद्भावे सद्भावाभ्युपगमे कालस्यापि सद्भावः सत्ता स्यात् । तैत्कार्याणां तेषां जीव-पुद्गलानां यानि कार्याणि [7]तेषां तत्र तस्मिन् भवदभ्युपेते कालद्रव्येऽपेक्षणाद्धेतोः । गति-स्थितिनिमित्ताकाशदेशसन्निधानेनालोकेऽपि भवदभिप्रायेण जीव-पुद्गलाः सन्ति, तेषां च कार्याणि भवत्सिद्धान्ते स्वतन्त्रकालद्रव्यापेक्षाण्येव, न चातिव्यवहितं वस्तु कारणं भवितुमर्हति । ततो जीव-पुद्गलकार्यभावान्यथाऽनुपपत्त्याऽलोकेऽपि कालद्रव्येण भाव्यम् । यत्र च कालद्रव्यं स लोक एव । ततः कालनिमित्तेऽपि लोकः- 12B 10

लोकविभागे जीव-पुद्गलगति-स्थित्योराकाशेऽपेक्षायां सत्यां लोकालोकविभागाभावप्रसङ्गोऽसङ्ग एवेति । 13A 15

मा भूद्विभागः, किं नाऽनिच्छत इति चेत् । न । न च तदभावः । न च तस्य लोकालोकविभागस्याऽभावः, सावधित्वाल्लोकस्य समर्यादत्वाल्लोकस्य, लोको हि [9]समर्यादः, ततोऽवश्येन लोकमर्यादापरेणाऽलोकेन भाव्यम् । तथा च लोकालोकविभागः सिद्धः । [10]अन्यथेति यदि लोकः सावधिर्नेष्यते तदा संस्थानाभावः, लोकस्य यत् संस्थानं गदितं तस्याभावः स्यात् । यो हि संस्थानवान् स सावधिर्दृष्टो यथा महीधरः, यः पुनर्निरवधिः स संस्थानशून्यो यथा व्योम । ततो यदि लोकोऽपि निरवधिरेव स्यात्तदा व्योमवदपेतसंस्थान एव स्यात् । तस्मात् संस्थानान्यथानुपपत्त्या लोकः सावधिरेव । तथा च लोकालोकविभागोऽस्त्येव । सन्नपि चासौ यदि जीव-पुद्गलगति-स्थित्योराकाशेऽपेक्षोच्यते तदा न प्राप्नोतीति स्थितम् । 13B 20 25

१ धर्माधर्मनिमित्त ॥ २ कालः ॥ ३ विभागाभाव इत्यर्थः ॥ ४ जीवपुद्गलसद्भावे कालस्यापि सद्भावः स्यात् ॥ ५ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ६ तत्कार्याणां तत्रापेक्षणात् ॥ ७ तेषां जीवपुद्गलानाम् ॥ ८ कालद्रव्यविषये ॥ ९ ननु लोकाकाशस्थित एव कालोऽलोकाकाशगतानां जीवपुद्गलानां कार्यस्य निमित्तं स्यादित्याह ॥ १० '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ११ भवन ॥ १२ विषये ॥ १३ अस्खलितः ॥ १४ सर्वदर्शिनिभिरङ्गीक्रियते समर्यादत्वेन ॥ १५ अन्यथा संस्थानाभावः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तत एव न शुभाशुभयोः, अव्यापकयोस्तन्निबन्धनत्वे सर्वत्र तत्प्रसङ्गात्, मुक्तेष्वपि भावाच्च, न हि तद्गति-स्थिती पुरुषानुपकुरुतः ।

तत एवेति लोकालोकविभागाभावप्रसङ्गादेव न शुभा-ऽशुभयोः पुण्या-ऽपुण्ययोरपेक्षेति सम्बन्धः । जीव-पुद्गलगति-स्थित्योः शुभा-ऽशुभे आप नापेक्षाकारणम् । अव्यापकयोर्नियतदेशस्थयोः शुभा-ऽशुभयोः तन्निबन्धनत्वे तयोर्गति-स्थित्योर्निमित्तत्वे सति सर्वत्र लोकेऽलोके च तत्प्रसङ्गात् तयोर्गति-स्थित्योः प्रसङ्गात् । यथा हि शुभा-ऽशुभे नियतदेशस्थे स्वजीवानां स्वजीवोपकारिणां पुद्गलानां च सर्वत्र लोके गति-स्थिती कुरुतस्तथा लोकमर्यादापरेऽलोकेऽपि कुरुतां नियतदेशस्थत्वस्योभयत्रापि
14A तुल्यत्वात् । यत्र च जीव-पुद्गलानां गति-स्थिती स लोकः । ततोऽलोकस्यापि लोकत्वप्रसङ्गेन लोकालोकविभागाभावः प्राप्नोति । अस्ति च लोकालोकविभागः । ततो न जीव-पुद्गलगति-स्थित्योः शुभा-ऽशुभयोरपेक्षा, किं तर्हि? धर्मा-ऽधर्मास्तिकाययोः ।

न केवलं लोकालोकविभागाभावप्रसङ्गाज्जीव-पुद्गलगति-स्थित्योर्न शुभा-ऽशुभयोरपेक्षा, तथा मुक्तेष्वपि भावाच्च न तयोरपेक्षेति, मुक्तात्मानोऽप्यायुष्क्षये सत्यमुमसारं संसारं
14B विहायैकान्तिकात्यन्तिकसुखसुधानिधानास्पदं परमं पदं प्रयान्ति, प्रयाताश्च प्रयातावधि कालमवस्थानमावध्नन्ति । ततो यदि गति-स्थिती शुभा-ऽशुभापेक्षे स्यातां तदा मुक्तात्मसु न स्याताम् । यस्मान्न तद्गति-स्थिती तेषां मुक्तात्मनां गति-स्थिती पुरुषान् संसार्यात्मन उपकुरुतः । मुक्तात्मनां तावदात्मीये शुभा-ऽशुभे मुक्तत्वादेव न स्तस्ततः पुद्गलानामिव गति-स्थिती संसार्यात्मसम्बन्धिशुभा-ऽशुभनिबन्धने वाच्ये । तत्र पुद्गलानां संसार्यात्मसम्बन्धिशुभा-ऽशुभनिबन्धने गति-स्थिती युक्ते, संसार्यात्म-
15A प्रयोजनेषु पुद्गलानामुपकारित्वात् । मुक्तात्मनां पुनर्न युक्ते । न हि तेषामूर्द्ध गति-स्थिती संसार्यात्मनां कञ्चित् पुरुषार्थमावहतः । तद्यदि गति-स्थिती शुभा-ऽशुभापेक्षे कक्षीक्रियेते तदा मुक्तात्मनां ते न प्राप्नुतः, स्वकीययोः शुभा-ऽशुभयोरभावात् संसार्यात्मसम्बन्धिनोस्त्वनुपकारकत्वेनाऽतद्धेतुत्वात् । ततो लोकालोकविभागाभावप्रसङ्गाद् मुक्तात्मनां गति-स्थित्योरघटनाच्च न जीव-पुद्गलगति-स्थित्योः शुभा-ऽशुभयोरपेक्षा ।

---

१ तत एव न शुभाशुभयोः, अव्यापकयोस्तन्निबन्धनत्वे सर्वत्र तत्प्रसङ्गात् ॥ २ लोकेऽलोके च ॥ ३ शुभाशुभयोः ॥ ४ न हि मुक्तात्मनां शुभाशुभे स्त इति भावः ॥ ५ न हि तद्गति-स्थिती पुरुषानुपकुरुतः ॥ ६ गतिस्थित्यहेतुत्वादित्यर्थः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नाप्यालोक-तमसोः, प्रत्येकमुभयाभावेऽपि भावात् । विशेषाव्यभिचारेऽपि सामान्यं व्यभिचारि । तदेव च पक्षः । गति-स्थितिमत्त्वाच्च ।

एवं तर्ह्यालोक-तमसोरपेक्षा भविष्यतीति । न । नाप्यालोक-तमसोः, प्रत्येकमुभया-
15B भावेऽपि भावात् । अपेक्षेति सम्बध्यते । प्रत्येकमुभयोरालोक-तमसोरभावेऽपि भावात् जीव- 5
पुद्गलगति-स्थित्योः, दिवा तमोऽभावेऽपि गति-स्थिती भवतो रात्रौ पुनरालोकाभावेऽपि च । न च यद् यदभावेऽपि भवति तत् तस्य कार्यमिति व्यवहर्तुं शक्यम् ।

स्यादेवम्—ये दिवा गति-स्थिती ते आलोकनिबन्धने, ये पुना-रात्रौ ते तमोनिबन्धने, तत् कुतो व्यभिचार इति ? अत्रोच्यते—[1]विशेषाव्यभिचारेऽपि दिवारात्रिविशेषण-विशिष्टयोर्गति-स्थित्योः स्वकारणालोक-तमोऽव्यभिचारेऽपि सामान्यं व्यभिचारि, दिवा- 10
रात्रिविशेषणनिरपेक्षं गति-स्थितिसामान्यमालोक-तमसी व्यभिचरति । निर्विशेषणं गति-स्थितिसामान्यं प्रत्येकमालोक-तमसोरभावेऽपि भवतीत्यर्थः ।

ननु व्यभिचरतु सामान्यम्, विशेषः पुनरव्यभिचार्येवेति । न । तदेव च
16A पक्षः । निर्विशेषणं गति-स्थितिसामान्यं पक्षः साध्यधर्मी, सामान्ययोर्जीव-पुद्गलानां गति-स्थित्योः कारणान्तरापेक्षत्वमस्माभिः साध्यते, न पुनर्दिवा-रात्रिविशेषणविशिष्टयोः । 15
तयोश्च व्यभिचारोऽस्त्येव ।

न केवलं प्रत्येकमुभयाभावे भावान्नालोक-तमसोरपेक्षा, तथा गति-स्थितिमत्त्वाच्च । तथाहि—आलोक-तमसोः पुद्गलत्वेन परस्परापेक्षे गति-स्थिती विद्येते, ततो यदि गति-स्थित्योरपेक्षाकारणमालोक-तमसी स्यातां तदा ये आलोक-तमसोरेव गति-स्थिती
16B तयोरपरे आलोक-तमसी कारणान्तरं मृग्ये, तथा चानवस्था । तस्मात् सर्वस्यापि 20
वस्तुजातस्य जीव-पुद्गलगति-स्थिती प्रत्यपेक्षाकारणत्वाघटनाद् धर्मा-ऽधर्मास्तिकायावेव सदा सन्निहितौ व्यापिनौ सर्वसाधारणावपेक्षाकारणमिति स्थितम् ।

ये त्वाहुरीश्वर एव जीव-पुद्गलगति-स्थितीनामपेक्षाकारणमिति ते ईश्वर-सद्भावनिराकारेणैव निराचक्रिरे इति न तदर्थं सूत्रसमारम्भसंरम्भो व्यधायि ।

ननु यदि धर्माधर्मास्तिकायौ व्यापिनौ सदा सन्निहितौ गति-स्थित्योरपेक्षा- 25
कारणं तदा किमिति ते सदा न प्रादुस्तः, न खल्वविकलकारणस्य कार्यस्य काल-
17A क्षेपो युक्त इति । अत्राह—

१ विशेषाव्यभिचारेऽपि सामान्यं व्यभिचारि ॥ २ गतिपूर्विका स्थितिः, स्थितिपूर्विका गतिरित्यर्थः ॥ ३ निषेधेनैव ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सदा सन्निधानेऽपि एतयोः स्वतो गति-स्थितिपरिणामिनामेवोपग्राहकत्वान्न सदा भावः ।

सदा सन्निधानेऽप्येतयोर्धर्मा-ऽधर्मास्तिकाययोः, आवृत्यै(ध्यै)तयोर्गतिस्थित्योर्न सदा भावो न सर्वदा भाव इति सम्बन्धः । स्वतः स्वभावतो गति-स्थितिपरिणामिनामेव जीव-पुद्गलानामुपग्राहकत्वादुपष्टम्भकत्वात् । एतयोरित्यत्रापि स्मर्यते । एतयोर्धर्मा- 5
ऽधर्मास्तिकाययोर्गति-स्थित्योश्च । यद्यपि गति-स्थित्योरपेक्षाकारणं धर्मा-ऽधर्मास्ति-
A/B कायावतिप्रियमित्रमिवाहर्निशं जीव-पुद्गलानामुपशल्यवर्त्तिनौ तथापि न ते तेषां सदा भवतः, स्वतः परिणामिकारणाद् भवन्त्योरेव गति-स्थित्योर्धर्मा-ऽधर्मास्तिकाययोरुपष्टम्भमात्रकारित्वात् । धर्मा-ऽधर्मास्तिकायौ हि गतिस्थिती स्वतो भवन्त्यावुपष्टम्भयतः, न पुनरुत्पादपराङ्मुखे हठादुत्पादयतः । 10

स्यान्मतम्—गति-स्थित्योर्द्वयोरप्यपेक्षाकारणमेक एव धर्मास्तिकायोऽधर्मास्तिकायो वा भवतु, पूर्यते द्रव्यद्वयकल्पनयेति । अत्राह—

न चैक एवोभयकार्यः, धर्मा-ऽधर्मविभागाभावप्रसङ्गात् । एक एव ह्यन्यतरस्तत्तत्प्रत्ययसन्निधानतः सुख-दुःखहेतुः स्यात् ।

न चैक एव धर्मास्तिकायोऽधर्मास्तिकायो वोभयं गति-स्थितिलक्षणं कार्यं 15
यस्य स उभयकार्यः, धर्मा-ऽधर्मविभागाभावप्रसङ्गात्, धर्माधर्मयोः पुण्य-पापयोर्विभागो विवेको
A/A यस्तस्याऽभावप्रसङ्गात् । यस्मादेक एवाऽन्यतरो धर्मा-ऽधर्मयोर्मध्यात् तत्तत्प्रत्ययसन्नि-धानतस्तस्य तस्य सुखहेतोर्दुःखहेतोर्वा सहकारिणः सामीप्येन सुख-दुःखहेतुः स्यात् । यदि धर्मास्तिकाया-ऽधर्मास्तिकाययोर्मध्यादेक एव गतिं स्थितिं च कुर्यादिति द्वय-कल्पनावैयर्थ्यं तदा पुण्य-पापयोरपि मध्यादेकं पुण्यं पापं वा किञ्चित् तत्तत्सहकारि- 20
सन्निधानवशेनाऽऽत्मनां सुखं दुःखं च कुर्यादिति तयोरपि द्वित्वकल्पनावैयर्थ्यं प्राप्नोति । तद् यथा परस्परमिश्रकार्यकर्तृत्वेन पुण्या-ऽपुण्ययोः पार्थक्येन कल्पनं तथा धर्मा-ऽधर्मा-स्तिकाययोरपि ।

तत् सकृत सर्वार्थगति-स्थित्यनुग्राहकौ लोका-ऽलोकव्यवस्थाहेतू धर्मा-ऽधर्मास्तिकायौ सिद्धौ । आगमाच्च । अमूर्तत्वादयस्तद्धर्मा इति। 25

१ सदा सन्निधानेऽप्येतयोः स्वतो गति-स्थितिपरिणामिनामेवोपग्राहकत्वान्न सदा भावः ॥
२ गतिस्थिती ॥ ३ न चैक एवोभयकार्यः ॥ ४ एक एव ह्यन्यतरस्तत्तत्प्रत्ययसन्निधानतः सुख-दुःखहेतुः स्यात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सम्प्रति तेदित्यादिना धर्मा-ऽधर्मास्तिकायसत्तासाधकमनुमानं पिशुनयन्नुपसंहार-
18B माह—तत् तस्मात् सकृदेककालं सर्वार्थानामशेषाणामपि जीव-पुद्गलानां ये गति-स्थिती तयोरनुग्राहकावुपष्टम्भकौ लोकालोकयोर्या व्यवस्था विभागस्तस्या हेतू कारणे धर्माधर्मास्तिकायौ सिद्धौ प्रमाणेन प्रतिष्ठितौ, तथाहि—विवादापन्नाः सकलजीव-पुद्गलाश्रयाः सकृद् गतयः साधारणबाह्यनिमित्तापेक्षाः, युगपद्भाविगतित्वात्, एकसरःसलिलाश्रया- 5
नेकमत्स्यादिगतिवत् । तथा सकलजीव-पुद्गलस्थितयः साधारणबाह्यनिमित्तापेक्षाः; युगपद्भाविस्थितित्वात्, एककुण्डाश्रयानेककवचादिस्थितिवत् । यच्च गति-स्थित्योः साधारणं निमित्तं स धर्मोऽधर्मश्च, अन्यस्य पदार्थराशेः पूर्वमेव प्रत्याख्यातत्वात् ।

19A न केवलं पूर्वोदितयुक्तिकलापाद्धर्मा-ऽधर्मास्तिकायौ सिद्धौ, आगमाच्च सिद्धौ, आगमादाप्तपुरुषप्रणीतवचनात् । अतीन्द्रियाणां हि पदार्थानां सत्ताश्रद्धाने नाप्तपुरुष- 10
प्रणीतवचनात् परमार्थतोऽन्यत् प्रमाणं शरणमवाग्दृशामस्ति । यदेताः पुनः पूर्वोदिता युक्तयस्ताः केवलमागमगजेन्द्रस्य प्रतिवादिद्विरदान् दलयतस्तलवर्गप्रतिनिधय एव । आगमश्चायम्—

"धम्मत्थिकाए णं भंते ! जीवाणं किं पवत्तइ ? गोयमा ! धम्मत्थिकाए णं जीवाणं आगमण-गमण-भास-उम्मेस मणजोगे वयजोगे कायजोगे, जे आवन्ने तप्पगारा चला 15
भावा सव्वे ते धम्मत्थिकाए पवत्तंति । गइलक्खणे णं धम्मत्थिकाए । अहम्मत्थिकाए णं जीवाणं किं पवत्तइ ? गोयमा ! अहमत्थिकाए णं जीवाणं ठाण-निसीयण-तुयट्टण मणस्स य एगत्तीभावकरणया, जे आवन्ने तप्पगारा थिरा भावा सव्वे ते अहम्मत्थिकाए पवत्तंति । ठाणलक्खणे णं अहम्मत्थिकाए" [भगवतीसूत्रे १३।४।२४—२५] इति । 20

तस्य च प्रामाण्यं प्रथमप्रकाशप्रसाधितप्रामाण्यप्रहीणाशेषकलुषपुरुषप्रणीतत्वादवगन्तव्यम् ।

१ तत् सकृत् सर्वार्थगति-स्थित्यनुग्राहकौ लोकालोकव्यवस्थाहेतू धर्माधर्मास्तिकायौ सिद्धौ ॥ २ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ३ * "प्रवर्तनद्वारे आगमण-गमणेत्यादि । आगमन-गमने प्रतीते, भाषा व्यक्तवचनम्, 'भाष व्यक्तायां वाचि' [पा० धा० ३९६] इति वचनात् । उन्मेषोऽक्षि-व्यापारविशेषः । मनोयोग-वाग्योग-काययोगाः प्रतीता एव । तेषां च द्वन्द्वः, ततस्ते । इह च मनोयोगादयः 25
सामान्यरूपाः, आगमनादयस्तु तद्विशेषा इति भेदेनोपात्ताः, भवति च सामान्यग्रहणेऽपि विशेषग्रहणं तत्स्वरूपोपदर्शनार्थमिति । जे यावन्ने तहप्पगार त्ति ये चान्यन्ये आगमनादिभ्योऽपरे तथाप्रकारा आगमनादिसदृशाः भ्रमण-चलनादयः चला भाव त्ति चलस्वभावाः पर्यायाः सर्वे ते धर्मास्तिकाये सति प्रवर्तन्ते ।-कुत इत्याह—गइलक्खणे णं धम्मत्थिकाए त्ति । ठाण-निसीयण-तुयट्टण त्ति कायोत्सर्गासनशयनानि; प्रथमाबहुवचनलोपदर्शनात् । तथा मनसश्च अनेकत्वस्य एकत्वस्य भवनमेकत्वीभावः, तस्य यत् करणं तत्तथा" 30
इति भगवतीसूत्रस्य अभयदेवसूरिविरचितायां वृत्तौ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तदेवं धर्माधर्मास्तिकाययोः सत्तां प्रसाध्य द्रव्यत्वप्रसाधनाय तद्धर्मानुपदर्शयति—
अमूर्त्तत्वादयस्तद्धर्मा इति । तयोर्धर्मा-ऽधर्मास्तिकाययोरमूर्त्तत्वादयो गुण-पर्याया भवन्ति ।
19 B गुण-पर्यायवच्च द्रव्यम् । आदिशब्दादगुरुलघुत्वा-ऽसङ्ख्येयप्रदेशत्व-लोकाकाशव्यापित्व-लोकालोकविभागहेतुत्व-गतिस्थित्यपेक्षाकारणत्वादिपरिग्रहः । एत एवासाधारणधर्मवर्जा धर्मा आकाशस्यापि वाच्याः । अमूर्त्तत्वे च सिद्धे परोक्षत्वमपि समसिध्यत्, अचेतनामूर्त्तद्रव्यस्य परोक्षत्वात् । कथं तर्हि 'इह व्योमभागे शकुन्तः, इह न' इति प्रत्ययः ? आलोकमण्डलमाश्रित्येति ब्रूमः । 'इहालोकः, इह न' इति पुनरालोकावयवानाश्रित्येति । इतिकरणो धर्मा-ऽधर्मास्तिकायप्रक्रमप्रवासं पिशुनयति ।

तदेवं धर्मा-ऽधर्मास्तिकाययोस्तृतीय-तुरीयद्रव्ययोर्लक्षणमभिधाय पञ्चमद्रव्यस्याकाशस्याभिदधाति—

अवगाहस्य दातृ आकाशम् । नियतस्य तदबहिर्भावो-ऽवगाहः ।

अवगाहस्य दात्राकाशम् । जीवादिद्रव्याणामवगाहस्य वक्ष्यमाणस्य दातृ दानार्हं यत्तदाकाशम् । दात्रित्यत्र "अर्हे तृच्" [सि० ५।४।३७] इति तृच् । अवगाहस्येति कर्मणि षष्ठी । "कर्मजा तृचा च" [सि० ३।१।८३] इति षष्ठीसमासप्रतिषेधाद्
20A व्यस्तनिर्देशः । ततो यदाकाशमवगाहं ददाति यच्च न ददाति तदुभयमप्यवगाहदानार्हत्वेन सङ्गृह्यते । तेन यद्यप्यलोकाकाशे जीवादिद्रव्याणि नावगाहन्ते तथापि तदाकाशमुच्यते । तद्धि जीवादिद्रव्यावगाहदानोन्मुखमेव सर्वदाऽप्यवतिष्ठते, केवलं गति-स्थितिनिमित्तधर्मा-ऽधर्मास्तिकायाभावाज्जीवादिद्रव्याण्येव तत्र नावगाहन्ते ।

अयं च योगो लक्षणकथनद्वारेणाकाशस्य साधकानुमानसंसूचकः । यत् सकृदशेषजीवादिद्रव्याणामवगाहक्रियायाः साधारणमपेक्षाकारणं स आकाशः । बाह्यार्थानां क्षणिकपरमाणुस्वभावत्वादवगाह्यावगाहकभावाभाव इति चेत् । न । स्थूलस्थिरार्थ-

१ 'इह व्योमभागे' इति कोऽर्थः ? इह आलोकमण्डले ॥ २ इह प्रदेशे आलोक इति प्रत्ययः किंनिबन्धन इत्याशङ्कायामाह ॥ ३ ननु 'इहालोकः' इत्यत्र 'इहालोकावयवेषु आलोकोऽवयवी अस्ति' इति कल्पितम् । 'इह नालोकः' इत्यत्र 'इह'शब्देन किमुच्यते ? अत्राप्यालोकावयवा एव । कथम् ? यत आलोकावयवा एव तमोरूपतया परिणमन्ते ततः कोऽर्थः ? इह तमोरूपतया परिणतेषु आलोकावयवेषु आलोको नास्ति । यद्वा सूक्ष्मा आलोकपरमाणवः सर्वत्र सन्ति तानाश्रित्य ॥ ४ विवादपदमाकाशं समस्ति सकृदशेषजीवादिद्रव्याणामवगाहक्रियायाः साधारणकारणत्वात् कालादिवत् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

20B सम्प्रत्ययात् । न चायं भ्रान्तः, बाधकाभावात् । [1]एकस्यानेकदेश-कालव्यापिनोऽभावे सर्वशून्यताप्रसङ्गात् । भावे पुनरवगाह्यावगाहकभावाविरोध एव । [2]शीत-वाता-ऽऽतपादीनामभिन्नदेशतयावगम्याच्चावगाह्या-ऽवगाहकभावसिद्धिः, परस्परमवगाहानुपपत्तौ भिन्नदेशत्वप्रसङ्गात् लोष्टद्वयवत् । ततो यथा प्रतिनियतानामवगाहकानां प्रतिनियतमवगाह्यं सिद्धं तथा [3]सकृत् [4]सर्वावगाहिनामवगाह्यमाकाशं सिद्धम् । 5

अथ कोऽयमवगाहो नामेति ? उच्यते—[5]नियतस्य नियताकारस्यावगाहकस्य जीवद्रव्यादेस्तस्मादवगाह्यादबहिर्भावस्तन्मध्यसत्त्वमवगाहः । एवंरूपश्चावगाहो धर्मा-ऽधर्मास्तिकाययोरपि नियताकारत्वादस्तीति न ताववगाह्यौ कल्पनीयौ । नियताकारत्वं च लोकस्य संस्थानवत्त्वेन [6]तयोस्तदाकारत्वात् । आकाशस्य त्वनन्तत्वान्न नियताकारत्वम् । 10

ननु सकृत् सर्वजीवादिद्रव्याणामवगाहक्रियाया अपेक्षाकारणं किमप्यस्ति, स
21A पुनराकाश एव नान्ये क्षित्यादय इत्यत्र किं निबन्धनम् ? उच्यते—

न दातृत्वं क्षित्यादौ, तदभावेऽपि भावात् । न पवने, गरीयसा प्रतिस्खलनात् । सर्वेषामव्याप्यवगाहकत्वाच्च ।

न दातृत्वं क्षित्यादौ तदभावेऽपि भावात् । आदिशब्देनोदक-तेजसोर्ग्रहः । जीवादि- 15
द्रव्याणामवगाहक्रियायाः क्षित्युदकतेजांसि न दातृणि भवन्ति, तदभावेऽपि क्षित्याद्यभावेऽपि जीवादिद्रव्यावगाहक्रियाया भावात् । यत्र क्षित्युदकतेजांसि न सम्भवन्ति तत्रापि देव-सिद्धाद्यात्मनामवगाहक्रिया दृश्यन्ते । यदि च क्षित्यादयोऽवगाहक्रियाणां
21B कारणं भवेयुस्तदा तास्तत्र कथं नाम स्युः ? तस्मान्नावगाहक्रियादातृत्वं क्षित्यादौ ।

यद्येवं तर्हि वायौ भविष्यतीति अत्राह—न पवन इति । दातृत्वमिति योगः । 20
जीवादिद्रव्यावगाहस्य दातृत्वं न पवने सम्भवति । [7]गरीयसाऽतिमहता, पवनेनेति विशेष्यं विभक्तिव्यत्ययेनाभिसम्बध्यते, प्रतिस्खलनात् जीवादिद्रव्यावगाहस्य प्रतिरोधात् ।
22A महता हि मरुता गजेन्द्रोऽपि गच्छन् प्रतिरुध्यते किमङ्ग पुनस्तृण-तूलादि पेलवं द्रव्यम् । तथा दृतिमध्यभागवर्त्तिना वायुना पिण्डीभूतेनाधः प्रपतन्त्यम्भांस्यवष्टभ्यन्ते,

१ स्थूलस्थिरार्थसंप्रत्ययः ॥ २ एकस्य स्थूलस्थिरस्य पदार्थस्य अवयविन इत्यर्थः ॥ ३ यत् प्रत्यक्षं स्थिरं स्थूलं च वस्तु तन्नाभ्युपेयते यत् क्षणिकं परमाणुस्वभावं तत् प्रत्यक्षं न हीति सर्वशून्यत्वं प्राप्नोतीति भावः ॥ ४ अविरोधमेव भावयति ॥ ५ मत्स्यादीनाम् ॥ ६ जलादि ॥ ७ युगपत् ॥ ८ सर्वावगाहकानाम् ॥ ९ नियतस्य तदबहिर्भावोऽवगाहः ॥ १० धर्माधर्मयोः ॥ ११ लोकसंस्थानाकारत्वात् ॥ १२ गरीयसा प्रतिस्खलनात् ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तद्यदि वायुरवगाहक्रियाया अपेक्षाकारणमभविष्यत्तदा कथमसावस्याः प्रतिबन्धमकरिष्यत्। न हि हेतुरेव विबन्धको युज्यते। तस्मात् पवनेऽपि नावगाहस्य दातृत्वम्।

सम्प्रति क्षित्यादीनामन्येषां चावगाहदानाभावे पृष्टं हेतुमाह—सर्वेषामव्याप्यवगाहकत्वाच्च। सर्वेषामुक्तानां क्षित्यादीनामनुक्तानां चालोकतमोधर्माधर्मादीनाम् अव्यापिनामविभूनां सतामवगाहकत्वादवगाहक्रियायाः परिणामिकारणत्वात्। क्षित्युदकतेजो- 5
22B
23B
24B
वाय्वालोकतमोधर्माधर्माः प्रतिनियतदेशावस्थायिनस्ततः कथं सकृत् सर्वात्मनामवगाहक्रियायाः साधारणं कारणं भवेयुः। तथा स्वयमपि चैतेऽवगाहकास्ततोऽमीषामप्यवगाहमानानामपेक्षाकारणेनान्येन भाव्यम्, तथा चानवस्था स्यात्।

ननु धर्माधर्मास्तिकायौ व्यापिनौ स्तः, ततस्ताववगाहस्यापेक्षाकारणं भविष्यत इति। उच्यते—यद्यप्येतौ व्यापिनौ तथापि सकृत् सर्वजीवादिद्रव्याणामवगाहस्य 10
कारणं न भवतः, स्वयमेवावगाहकत्वात्तदवगाहस्यापि कारणान्तरापेक्षयाऽनवस्था प्रसङ्गात्।

स्यादेवम्—न क्षित्यादयो जीवादिद्रव्याणामवगाहस्य कारणम्, किं तर्हि? मूर्त्तद्रव्याभावः, यत्र हि मूर्त्तं द्रव्यं पुरतो न भवति तत्र जीवादीनामवगाहो भवति नान्यत्रेति। अत्राप्याह— 15

न मूर्त्ताभावे, निरुपाख्यस्य दातृत्वाभावात्।

25B नेति। अवगाहस्य दातृत्वमिति स्मर्यते। जीवादिद्रव्याणामवगाहस्य दातृत्वं न मूर्त्तानां द्रव्याणामभावेऽवतिष्ठते, निरुपाख्यस्य दातृत्वाभावात्। निरुपाख्यस्य सर्वोपाख्यारहितस्य सर्वशक्तिशून्यस्य दातृत्वाभावादवगाहदानक्रियाऽनर्हत्वात्। यदि मूर्त्तद्रव्याभावोऽर्थक्रियासमर्थं भावान्तरमेवोच्येत तदा तदाकाशमेवेति नास्ति विप्रति- 20
पत्तिः। अथ सर्वशक्तिशून्यमवस्तूच्यते तदा कथं तदवगाहदानक्रियां कुर्यात्, वस्तुत्वप्रसङ्गात्। तदवगाहदायकत्वं मूर्त्ताभावेऽपि नावतिष्ठते, ततः पारिशेष्यादाकाश एवावतिष्ठत इति स्थितम्।

26A नन्वेवमाकाशस्याप्यवगाहकत्वादन्यदवगाह्यं कल्प्यताम्, तस्याप्यवगाहकत्वे परमवगाह्यमित्यनवस्था स्यादिति। अत्राह— 25

१ अवगाहक्रियायाः ॥ २ पुण्यपाप ॥ ३ पुण्य ॥ ४ पाप ॥ * अत्र एकस्मिन्नेव पत्रे २२-२३-२४ अङ्काः ॥ ५ आदिशब्दात् पुद्गल-धर्मास्तिकाया-ऽधर्मास्तिकाया गृह्यन्ते ॥ ६ धर्माधर्मास्तिकाययोः ॥ ७ परिणामिकारणम् ॥ ८ गमनागमनादिरूपः ॥ ९ न मूर्त्ताभावे ॥ * 25 A पत्रं लिखित्वा [] इति चिह्नेन निराकृतम् ॥ १० अभावस्य तुच्छरूपस्य ॥ ११ त्वया ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आकाशस्तु व्यापितमत्वादवगाह्य एव ।

आकाशस्तु व्यापितमत्वात् सर्वद्रव्यापेक्षया महापरिमाणप्रकर्षवत्त्वादवगाह्य एव द्रव्यान्तरैरयमवगाह्यते एव, न पुनरसौ द्रव्यान्तरं किञ्चिदवगाहते । यानि द्रव्याण्याकाशादल्पप्रमाणानि तेषामाकाशोऽवगाह्य उच्यते, तस्य तदपेक्षया महापरिमाणत्वात् । आकाशस्य पुनरन्यद् द्रव्यान्तरं समप्रमाणमधिकप्रमाणं च किञ्चिदपि नास्ति, 5
26B ततोऽसौ कावगाहताम् । अवधारणेन च भिन्नावगाह्यापेक्षया यदवगाहकत्वं तदेवाकाशस्याऽपाक्रियते, स्वात्मापेक्षं तु न निवार्यत एव । तत् आकाशादल्पप्रमाणानि द्रव्याण्याकाशावगाहकानि, आकाशस्तु स्वतोऽतिमहतो द्रव्यस्याभावात् स्वावगाहक एवेति स्थितम् । न चैवं सर्वद्रव्याणां स्वावगाहकत्वप्रसङ्गः, असर्वगतत्वात् । न हि किञ्चिदसर्वगतं स्वावगाहि दृष्टम्, अश्वादेर्जलाद्यवगाहकत्वदर्शनात् भिन्नदेशत्वाच्च । 10
अन्यथा दूरासन्नाद्यस्खलितप्रतीतिविरोधः ।

सम्प्रत्याकाशस्य साधकमनुमानं सूचयन्नागमं च प्रतिपादयन्नुपसंहरति—

तत् सकृत् सर्वार्थावगाहदातृत्वादागमाच्चाकाशसिद्धिः ।

तदित्यादि । तत् तस्मात् सकृदेककालं सर्वार्थावगाहस्य दातृत्वाद्दानार्हत्वात्,
27A एतावताऽनुमानमाह, आगमाच्चाप्तपुरुषप्रणीतवचनाच्चाकाशसिद्धिराकाशस्य प्रमाण- 15
प्रतिष्ठितिः । युगपन्निखिलावगाहः साधारणकारणापेक्षः, युगपन्निखिलावगाहत्वात्, एकसरःसलिलान्तःपातिमत्स्याद्यवगाहवदिति । आगमस्त्वयम्—

"आगासत्थिकाए णं भन्ते जीवाणं किं पवत्तइ ? गोयमा ! आगासत्थिकाए जीवदव्वाण अजीवदव्वाण य भोयणभूए [भगवतीसूत्रे १३।४।२६] इत्यादीति ।

सम्प्रति मूलसूत्रोपात्तं कायपदमव्याख्यायैव परोपगतं दिग्द्रव्यमाकाशद्रव्येऽ- 20
न्तर्भावयितुमाह—

तत्प्रदेशश्रेणयो दिशः, आदित्योदयापेक्षया पूर्वापरादिप्रत्यय-

१ आकाशस्तु व्यापितमत्वादवगाह्य एव ॥ २ आकाशस्य ॥ ३ आकाशस्य स्वावगाहकत्वेऽङ्गीक्रियमाणे सर्वाण्यपि वस्तूनि आत्मानमात्मनैवावगाह्य स्थास्यन्ति, किमाकाशाङ्गीकरणेनेति प्रसङ्गः ॥ ४ पृथग्भूतावगाह्यपदार्थाभावे 'भिन्नदेशान्यमूनि' इति प्रत्ययो न स्यात्, किन्तु 'भिन्नान्येव' इति स्यात् ॥ ५ 25
भिन्ने भिन्ने देशेऽश्व-जले ॥ ६ भिन्नदेशत्वानङ्गीकरणे वस्तूनाम् ॥ ७ * अत्र 'ननु स्वं प्रति' इति अस्पष्टानि घृष्टप्रायाणि टिप्पणाक्षराणि कथञ्चिद् भासन्ते । ८ तत् सकृत् सर्वार्थावगाहदातृत्वादागमाच्चाकाशसिद्धिः ॥ ९ सर्ववस्तूनाम् ॥ १० आधारभूतः ॥ ११ * 'दयापेक्षपूर्वापरादि' इति मूलादर्शे पाठः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

हेतुत्वात् । आत्मनि तु स्वरूपनिबन्धन एव । पूर्वस्यां दिशि द्रव्यमिति व्यपदेशाच्छ्रेणिकल्पनाऽवश्यंभाविनी । परमार्थैकदिग्निमित्तत्वे तु अस्खलितः पूर्वादिप्रत्ययभेदो न स्यात् । तदाकाशप्रदेशश्रेणय एव दिग्व्यवहारनिबन्धनम् ।

तेदिति तस्याकाशस्य प्रदेशा निर्विभागा अंशास्तेषां श्रेणयः पद्धतयो दिशः पूर्वाद्या उच्यन्ते । बहुवचनं दिश एकत्वनिषेधपरम् । पृथक् पृथगनुपचरितप्रत्ययजनकत्वेन हि दश दिशो भवन्ति । कुतः पुनराकाशप्रदेशश्रेणिषु दिशां व्यवहार इति । उच्यते—आदित्योदयास्तापेक्षया पूर्वापरादिप्रत्ययहेतुत्वात् । आदिशब्दादक्षिणादेः
27B परिग्रहः । यस्यामाकाशप्रदेशश्रेण्यामुदयमेत्यादित्यस्तस्यां दक्षिणार्द्धभरतादिस्थितानां पुंसां पूर्वेति व्यवहारः, तेषामेव पूर्वाभिमुखानां प्रदक्षिणभागाश्रितायामाकाशदेशश्रेण्यां दक्षिणेति, आदित्यास्ताक्रान्तायामपरेति, दक्षिणव्यवहारहेतुश्रेणिसंम्मुखायां चोत्तरेति, यदिवा यस्यामुत्तरत्यतिशयेनोच्चैर्वर्त्तते आदित्यस्तस्यामुत्तरेति । तदभिमुखायां तु दक्षिणेति । चतसृणां च दिशामन्तरालश्रेणिषु विदिशां व्यवहारः । तत्र पूर्वस्याश्च दक्षिणस्याश्चान्तराले पूर्वदक्षिणेति व्यवहियते । दक्षिणस्याश्चापरस्याश्चान्तराले दक्षिणापरेति । अपरस्याश्चोत्तरस्याश्चान्तरालेऽपरोत्तरेति । उत्तरस्याश्च पूर्वस्याश्चान्तराले उत्तरपूर्वेति । तेषामेवोत्तमाङ्गोपरिभागवर्त्याकाशदेशश्रेणावूर्द्धवेति व्यवहारः । पादतलाधोभागवर्त्याकाशदेशश्रेणावध इति । पूर्वादीनां चोत्तरान्तानां प्रथमं मध्ये प्रतीपमुत्तरमञ्चत्यादित्य आस्विति व्युत्पत्त्या प्राची अवाची प्रतीची उदीचीत्यपि संज्ञा भवन्ति । विदिशोऽपि च प्रागवाच्यादिशब्दैरुच्यन्ते । ऐन्द्र्याद्यास्तु संज्ञा इन्द्रादिलोकपालाधि-
28A ष्ठाननिमित्ताः । तदेवमादित्योदयाद्यपेक्षाकाशश्रेणय एव पूर्वाद्या दिश इति । पूर्वादिदिक्सम्बन्धाच्च मूर्त्तद्रव्येषु पूर्वापरादिप्रत्ययविशेषोत्पत्तिर्न तु परस्परापेक्षया, एकतरस्य पूर्वत्वासिद्धावन्यतरस्यापरत्वासिद्धेस्तदसिद्धौ चैकतरस्य पूर्वत्वायोगादितरेतराश्रयत्वादुभयासत्त्वप्रसङ्गात् ।

ननु मूर्त्तद्रव्येषु पूर्वादिप्रत्ययस्याकाशदेशश्रेणयस्तावन्निबन्धनम्, आकाशश्रेणिषु

१ तत्प्रदेशश्रेणयो दिशः ॥ २ नैयायिक-वैशेषिका एकामेव दिशं मन्यन्ते ॥ ३ '७' [=विग्रहे सप्तम्यन्तम्] ॥ ४ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ५ पुंसाम् ॥ ६ यथासङ्ख्येन ॥ ७ प्राची च साऽवाची च ॥ ८ कुतः ॥ ९ एकस्य वस्तुनः पूर्वत्वसिद्धौ द्वितीयस्यापरत्वसिद्धिः । द्वितीयस्यापरत्वसिद्धौ प्रथमस्य पूर्वत्वसिद्धिरितीतरेतराश्रयत्वम् ॥ १० आकाशश्रेणिषु यः पूर्वमादित्योदयनिमित्तः पूर्वादिव्यवहारो निर्णीतोऽस्ति स किं दिगन्तरापेक्ष आहो एवमेवेत्यभिप्रायेण पूर्वपक्षः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पुनः किं निबन्धनमिति । अत्राह—आत्मनि तु आकाशदेशश्रेणीनां पुनः पूर्वादि-प्रत्ययः [1]स्वरूपनिबन्धन एव, आकाशदेशश्रेणीनां यत् स्वं रूपं तन्निमित्त एव । आकाशश्रेणयो हि स्वस्मिन् परस्मिंश्च द्रव्ये पूर्वादिप्रत्ययमुत्पादयितुमलम्, तथा-
288 भूतस्वभावत्वात्, स्व-परप्रकाशकविज्ञानवत्, स्व-परानुगतप्रत्ययहेतुसामान्यवद्वा । ततो मूर्त्तद्रव्येष्वाकाशदेशश्रेणिनिबन्धनाः पूर्वादिप्रत्ययाः, आकाशश्रेणिषु पुनः स्वरूप- 5
निबन्धनाः ।

ननु यद्याकाशदेशश्रेणिषु स्वरूपनिबन्धन एव प्रत्ययः स्यात्तदा प्रत्ययपरावृत्तिर्न स्यात् । अस्ति चेयम् । तदुक्तम्—

"प्राग्भागो यः सुराष्ट्राणां मालवानां स दक्षिणः ।" [ ] इति ।

ततस्तास्वपि मूर्त्तद्रव्येष्विव कारणान्तरनिबन्धनः पूर्वादिप्रत्ययस्तथा चानवस्थेति । 10
तन्न, यस्माद्यदेशावस्थितस्य पुरुषस्य यदाकाशदेशश्रेण्यां यः पूर्वादिप्रत्ययः प्रादु-
र्भवति न तद्देशावस्थितस्यैव तस्यामेवाकाशश्रेण्यां तस्य प्रत्ययस्य व्यत्ययोऽस्ति ।
29A तत् कुतः प्रत्ययपरावृत्तिर्यतः कारणान्तरकल्पनेनानवस्था भवेत् । अन्यदेशस्थस्य तु पुंसः प्रत्ययपरावृत्तिरस्ति । न चासौ दोषाय, पूर्वप्रवृत्तप्रत्ययहेतुभूतायाः श्रेणेः सह-
कार्यन्तरापेक्षयाऽन्यदेशस्थं पुरुषं प्रत्यन्यप्रत्ययहेतुत्वात् । 15

ननु यथाऽऽकाशदेशश्रेणिषु स्वरूपनिबन्धनः पूर्वादिप्रत्ययो न कारणान्तरापेक्ष-स्तथा मूर्त्तद्रव्येष्वपि किं नेष्यते ? किमित्याकाशदेशश्रेणयो दिक्त्वेन कल्प्यन्त इति । अत्राह—[2]पूर्वस्यामिति । पूर्वस्यां दिशि पृथिव्यादिद्रव्यं वर्त्तते इत्यमुना प्रकारेण व्यप-
29B देशाद् व्यवहारदर्शनात् श्रेणिकल्पनाऽवश्यंभाविनी । अवश्यमाकाशदेशश्रेणयो दिक्त्वेन कल्पनीयाः । अयमर्थः—पूर्वस्यां दिशि द्रव्यमिति व्यपदेशस्यान्यथानुपपत्त्या कश्चित् 20
पदार्थोऽवश्यमाधारविभक्तेः प्रकृतिर्दिक्त्वेनोपकल्पयितव्यः । स चाकाशदेशश्रेणय एवास्माकं मतेन । एवं च यदि तन्निबन्धनो मूर्त्तद्रव्येषु पूर्वादिप्रत्ययो भवेत्तदा को दोषः स्यात् । ऐकंत्र हि पदार्थपरिकल्पनं चेदस्रसा सोपयोगं तदान्यत्र गौतार्थत्वेऽपि न किञ्चिदपि क्षूयते । तस्मादाकाशप्रदेशश्रेणयः स्वपरत्र पूर्वादिप्रत्ययनिबन्धनं दिशः ।

30A अपरः पुनः प्राह—एकमेव दिग्द्रव्यं व्यापि निरवयवं च, तच्च तत्तत्सहकारि- 25

१ आत्मनि तु स्वरूपनिबन्धन एव ॥ २ आदित्योदयापेक्ष यदाकाशदेशश्रेणिस्वरूपं तदेव निमित्तं नान्यद् दिगन्तरादि । कोऽर्थः ? आकाशदेशश्रेणिरेवादित्योदयादिविशिष्टा सती पूर्वादिप्रत्ययहेतुरिति ॥ ३ पूर्वादिदिक्ष्वपि ॥ ४ '७' [=सप्तम्यन्त विग्रहे] । यस्याम् ॥ ५ पूर्वादि ॥ ६ **पूर्वस्यां दिशि द्रव्य-मिति व्यपदेशाच्छ्रेणिकल्पनाऽवश्यंभाविनी** ॥ ७ '६' [=षष्ठ्यन्तम्] ॥ ८ कारणम् ॥ ९ दिग्मिं ॥ १० 'पूर्वस्यां दिशि द्रव्यम्' इति व्यवहारे ॥ ११ दिशां स्वरूपनिबन्धने(नत्वे ?)ऽपि ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सन्निधानादशानामपि पूर्वादिप्रत्ययानां प्रेत्ययीभवतीति । अत्रोच्यते—परमार्थैकदिग्नि-
मित्तत्वे तु परमार्थनाकृत्रिमेण रूपेण यैका दिक् तन्निमित्तत्वे पुनः पूर्वादिबुद्धीना-
मस्खलितः सर्वदेशैपुरुषैभावी प्रमाणाबाधितो वा प्रेत्ययभेदः पूर्वादिबुद्धीनां नानात्वं
न स्यात् । पूर्वादयो हि दश प्रत्ययाः पृथक् पृथक् स्वभावभाजः स्वसंवेदनप्रत्यक्ष-
सिद्धाः प्रतिपुरुषमुदयन्ते । यदि च ते एकनिमित्तोपनीताः स्युस्तदैकस्वरूपा एव 5
संवेद्येरन् । एकस्यापि पुनरनेकसहकारिसन्निधानतोऽनेकप्रत्ययजनकत्वे सामान्यो-
30B नेकैत्वमपि परिकल्पनीयं न स्यात् । शक्यं हि तत्र वक्तुम्—एकमेव सर्वत्र सामान्यं तत्त-
त्सहकारिसन्निधानवशतो नानारूपानश्वादिप्रत्ययानुपजनयतीति । तस्मादध्यक्षसंविदिता-
नेकत्वानां पूर्वादिप्रत्ययानां निमित्तेनाप्यनेकेन भाव्यम् ।

सम्प्रत्युपसंहरति—तैत् तस्मादाकाशप्रदेशश्रेणयः एव दिग्व्यवहारनिबन्धनं पूर्वादि- 10
दिग्व्यवहारस्य निमित्तं भवन्ति । अवधारणेनाधिकस्य दिग्द्रव्यस्य निरासः । आकाश-
देशश्रेणिग्रहणेन पूर्वादिप्रत्ययानां "ये निर्निमित्तत्वमाहुस्तेषां प्रतिक्षेपः । ननु दिगेव
निमित्तं "परैरनिष्टं सङ्केतः पुनरिष्ट एव । तत् कथं निर्निमित्तत्वं पूर्वादिप्रत्ययानामिति ।
31A तन्न । "पूर्वस्यां दिशि पृथिव्यादय इति प्रत्ययस्याभावप्रसङ्गात् । न ह्यत्रै सङ्केतै
आधारतया प्रतिभाति, बहिर्भूतस्यैव कस्यचित्तथा प्रतिभासनात् । 15

तदेवमाकाशस्य लक्षणं प्रतिपाद्य दिशां च तत्रैवान्तर्भावमभिधाय तद्भेदावाह—
स च लोकालोकभेदाद् द्वेधा । यद्यपि पूर्वयोगे श्रेणीनां प्राधान्यं तथापि पुंस्त्वान्यथा-
नुपपत्त्याकाशस्य परामर्शः । स पुनराकाशो द्विप्रकारः—लोकाकाशोऽलोकाकाशश्च ।
तत्र गति-स्थितिमॉल्लोकः । परैस्परनान्तरीयका गति-स्थितयो जीव-पुद्गलानामेव । ता
यत्राकाशे सन्ति स लोकः । मतुरत्र भूम्नि, तेन जीवपुद्गलानां सर्वा-गति-स्थितयो 20
31B गृह्यन्ते । ततो यावत्याकाशदेशे जीव-पुद्गलानां सर्वा गति-स्थितयो भवन्ति स
लोकाकाशः ।

१ कारणीभवति ॥ २ परमार्थैकदिग्निमित्तत्वे त्वस्खलितः पूर्वादिप्रत्ययभेदो न स्यात् ॥
३, ४ '७' [=सप्तम्यन्तं विग्रहे] ॥ ५ पूर्वादिं ॥ ६ अस् [=प्रथमाबहुवचनम्] ॥ ७ एकदिग्द्रव्य ॥
८ दिग्द्रव्यस्य ॥ ९ इष्यमाणे ॥ १० अपरसामान्यस्येत्यर्थः ॥ ११ '६' [=विग्रहे षष्ठ्यन्तम्] १२ 25
गोत्वाश्वत्वादीनाम् ॥ १३ तदाकाशदेशश्रेणय एव दिग्व्यवहारनिबन्धनम् ॥ १४ बौ[द्धाः] ॥
१५ बौ[द्धैः] ॥ १६ पूर्वादिप्रत्ययाः सङ्केतनिमित्ता इत्यपि न वाच्यम्, कुतः ? पूर्वेति ॥ १७ पूर्वस्यां दिशि
पृथिव्यादय इत्येवंरूपे प्रत्यये ॥ १८ न हि संकेते पृथिव्यादय इति प्रतीतिरस्ति ॥ १९ * 'भाल्लोक'
इति हस्तलिखिते पाठः ॥ २० गतिपूर्वा स्थितिः स्थितिपूर्वा च गतिरिति परस्परनान्तरीयकत्वम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स च लोकालोकभेदाद् द्वेधा । गति-स्थितिमाँल्लोकः । तस्य असंख्येयभागादिषु परिणामभेदाज्जीवानामवगाहः । एकप्रदेशादिषु पुद्गलानाम् । धर्माधर्मयोः कृत्स्ने ।

तस्येति लोकाकाशस्याऽसङ्ख्येयभागादिषु परिणामभेदात् परिणतिविशेषाज्जीवानामवगाहो भवति, असङ्ख्येयश्चासौ भागश्चासङ्ख्येयभागः, स आदिर्येषां द्व्यादीनां ते तथा, तत्रैकस्मिन्नसङ्ख्येयभागे लोकाकाशखण्डे जघन्यत एकजीवस्यावगाहः, कार्मणशरीरानुविधायित्वात् । कश्चित् पुनस्तादृशं खण्डद्वयमाक्रम्य वर्त्तते । कश्चित् त्रीणि तादृशि । अपरश्चत्वारीत्यादि यावत् सकललोकाकाशमन्यो व्याप्यावतिष्ठते समुद्घातकाले केवल्येव । यत् पुनरुच्यते 'सर्वदा सकललोकाकाशावगाहिनो जीवाः, तत्समानपरिमाणप्रदेशत्वात्, धर्माधर्मवत्' इति तत् परिणामविशेषेणैव प्रदीपस्येव प्रदेशसंहार-विसर्गकारिणा
32A प्रत्याख्यायि । न चैकस्यासङ्ख्येयभागस्य द्व्याद्यसङ्ख्येयभागानां वाऽसङ्ख्येयप्रदेशत्वाविशेषात् सर्वजीवानां समानोऽवगाहः शङ्कनीयः, असङ्ख्येयस्यासङ्ख्येयविकल्पत्वात् । अन्यद्धि लोकाकाशैकासङ्ख्येयभागस्याऽसङ्ख्येयप्रदेशपरिमाणमन्यच्च द्व्याद्यसङ्ख्येयभागानामिति ।

यः पुनराह—'अनाश्रिता जीवा अमूर्त्तद्रव्यत्वादाकाशवत्' इति स 'व्योमनि शकुनिः' इत्यबाधितप्रत्ययेनैव प्रतिहतः । शकुनिशरीरमेवात्राधेयं न पुनस्तदात्मेत्यपि मृषोद्यम्, शरीरव्यापित्वादात्मनोऽपि तदाधेयत्वघटनात् । अमूर्त्तस्यापतनादात्मनो नाधेयत्वमित्यप्यालप्यालम्, अमूर्त्तस्यापि ज्ञानादेरात्माधारत्वात् । अत एव चाऽमूर्त्तत्वादाकाशं न कस्यचिदधिकरणमितीयमपि रिक्ता वाचो युक्तिः, न चाधाराधेयतान्यथानुपपत्त्या सर्वाधेयानामाकाशादनन्तरं भावः, समसमयवर्तिभिरपि सलिलादिपरमाणुरूपादिभिर्व्यभिचारात् । तत्रापि पूर्वापरीभावाभ्युपगमे नित्यत्वहानिरिति यत् किञ्चिदेतदिति ।

१ तस्य असंख्येयभागादिषु परिणामभेदाज्जीवानामवगाहः ॥ २ कार्मणशरीरं हि जघन्यतोऽपि लोकाकाशैकाऽसंख्येयभागप्रमाणमेव भवति । न तु हीनम् । जीवश्च तद् व्याप्यैव तिष्ठति । इति जघन्यतोऽपि असंख्येयभागावगाह उक्तः ॥ ३ लोकाकाशसमानं परिमाणं येषाम् एवंभूताः प्रदेशाः येषां जीवानाम् ॥ ४ कोऽर्थः ? लोकोऽपि असंख्यातप्रदेशो जीवा अपि असंख्यातप्रदेशा इति कृत्वा समानपरिमाणत्वम् ॥ ५ उच्यते ॥ ६ स्वतन्त्रा एव निरालम्बना एव सन्तीत्यर्थः ॥ ७ व्योम ॥ ८ आधेयत्वम् ॥ ९ अमूर्तस्यात्मन आधारत्वादेव ॥ १० अमूर्तस्यात्मनो ज्ञानं प्रति अधिकरणत्वादेव ॥ ११ जीवादीनाम् ॥ १२ आधारभूतात् ॥ १३ तदनन्तरं सर्वाधेयानां भावः सत्तेत्यर्थः ॥ १४ आदिशब्दात् पृथ्वीपरमाणुगतं परमाणुत्वं गृह्यते ॥ १५ पश्चाद्भावः, कोऽर्थः ? पूर्वमाधारेण भवितव्यं पश्चादाधेयेनेति भावः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]एकप्रदेशादिषु पुद्गलानामिति, तस्येति परिणामभेदादित्यवगाह इति चानुवर्त्तते । लोकाकाशस्यैकप्रदेशादिषु पुद्गलानाम् अणु-स्कन्धभेदानां परिणामभेदादवगाहो भवति । एकश्चासौ प्रदेशश्च स आदिर्येषां द्व्यादिप्रदेशानाम् । तत्र लोकाकाशस्यैकस्मिन्
32B प्रदेशे सङ्ख्येयेषु प्रदेशेष्वसङ्ख्येयेषु च पुद्गलानामवगाहः । यथा हि लोकाकाशस्यैकप्रदेशे एकस्य परमाणोरवगाहो निर्बाधस्तथा द्व्यादिसङ्ख्येयासङ्ख्येयानन्ताणुस्कन्धानामपि परमसौक्ष्म्यात् । [2]द्व्यादिप्रदेशेषु च यथैकत्वपरिणामनिरुत्सुकानां द्व्यादिपरमाणूनामवगाहस्तथा त्र्यादिसङ्ख्येया-ऽसङ्ख्येया-ऽनन्तपरमाणुमयस्कन्धानामपि तादृशसूक्ष्मपरिणामात् । एवं त्र्यादिष्वपि वाच्यम् । न च पुद्गलस्कन्धानां तादृशः सूक्ष्मः परिणामो न सिद्धः,
33A स्थूलानामपि शिथिलावयवकर्पासपिण्डादीनां निबिडावयवदेशायां सौक्ष्म्यदर्शनेन कूष्माण्ड-मातुलुङ्ग-बिल्वा-ऽऽमलक-बदर-मुद्ग-सर्षप-केशाग्रेषु सौक्ष्म्यतारतम्यदर्शनेन च [3]क्वचित् कार्मणस्कन्धादिषु परमसौक्ष्म्यानुमानात्, परममहत्त्वतारतम्यदर्शनात् क्वचित् परममहत्त्वानुमानवत् । ततो यदप्युच्यते "यद् बहुप्रदेशं तन्नाल्पक्षेत्रे तिष्ठति, यथा समुद्रोदकं कुम्भक्षेत्रे, बहुप्रदेशाश्चासङ्ख्याताद्यिप्रदेशाः स्कन्धाः" [ ] इति तदपि न किञ्चित् । अनेकप्रदीपप्रकाशैर्बहुप्रदेशैरल्पप्रदेशापवरकादिक्षेत्रावस्थायिभिर्व्यभिचारादिति ।

[4]धर्मेति । कृत्स्न इति सप्तम्यन्तपदसामानाधिकरण्यात् [5]तस्येति पदं षष्ठ्यन्तमपि सप्तम्यन्तं सदत्रानुवर्त्यते । [6]तस्मिल्लोकाकाशे कृत्स्ने निःशेषे धर्माधर्मास्तिकाययोरव-
33B गाहो भवति । कृत्स्न इति वचनाल्लोकाकाशैकदेश एव धर्माधर्मयोरवगाहो निरस्तः । न हि लोकत्रयवर्त्तिनां पदार्थानां सर्वेषां गतिपरिणामिनां स्थितिपरिणामिनां च युगपद् गति-स्थित्युपग्रहो धर्माधर्मयोरेकदेशवर्त्तिनोः सम्भवति, अलोकाकाशेऽपि [7]तद्गति-स्थितिप्रसङ्गात् । ततो लोकाकाश एव सर्वेषां गच्छतां तिष्ठतां च पदार्थानां गति-स्थिती [8]इच्छता धर्मा-ऽधर्मयोः[9] कृत्स्ने लोकाकाशेऽवगाहोऽभ्युपगन्तव्यः ।

१ जीवानामवगाहः कथितः । सम्प्रति पुद्गलानां कथ्यते ॥ २ एकस्य परमाणोरेकस्मिन्नेव प्रदेशेऽवगाहो न तु द्व्यादिके प्रदेशे इति तात्पर्यम् ॥ ३ द्व्यादयश्च ते प्रदेशाश्च ॥ ४ रहितानाम् ॥ ५ द्वयोः प्रदेशयोर्द्व्यादिपरमाण्ववगाहभणनेनैव द्व्यणुकस्कन्धस्य चरितार्थत्वात् त्र्यादीत्युक्तम् ॥ ६ त्र्यादिष्वपि प्रदेशेषु चतुरादिपरमाणुमयस्कन्धानामवगाह इति वाच्यम्, न तु त्र्यादिपरमाणुमयस्कन्धानाम्, पूर्वोक्तयुक्त्या गतार्थत्वात् ॥ ७ अवस्थायाम् ॥ ८ कृत्वा ॥ ९ सूक्ष्मपरिणामतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणवत् ॥ १०, ११ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ १२ धर्माधर्मयोः कृत्स्ने ॥ १३ '३' [=विग्रहे तृतीयान्तम्] ॥ १४ लोकस्य ॥ १५ * तस्मिल्लोका° इति हस्तलिखिते पाठः ॥ १६ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ १७ जीवादिपदार्थानाम् ॥ १८ '७' [=सप्तम्यन्तम्] ॥ १९ भवता ॥ २० '६' [=षष्ठ्यन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अलोकोऽन्यः । न सतामात्मादीनामभावोऽनात्मा । गुणादयश्च द्रव्यवृत्तयः । परिशेषाद् द्रव्यमनन्तं नभः ।

अलोकोऽन्य इति । तस्माल्लोकाकाशादन्य आकाशोऽलोकः । यत्राकाशे जीव-पुद्गलानां गति-स्थितयो न भवन्त्यसावलोकः । ननु लोकादन्यस्य कस्यचिदप्यभावात्
34A कथमलोको वस्तूच्यत इति । तदत्रालोकस्य वस्तुत्वसाधनाय प्रस्तावनामाह—[1]नेति, न तावत् सतां वस्तुभूतानामात्मादीनामात्मप्रभृतीनां पञ्चानामपि द्रव्याणामभावोऽनात्मा निःस्वभावो युक्तः । आत्मादीनां पञ्चानामपि द्रव्याणामभावस्तावदङ्गीकर्त्तव्यः । वस्तूनां चाभावो वैस्त्वेव भवति, नीरूपस्याभावस्यासम्भवात् । अन्यथा वस्तुनोऽसत्त्वप्रसङ्गः ।

ननु भवत्वात्मादीनां सतामभावो वस्तु, स पुनराकाश एवेति कथम्, गुणादीनामपि सम्भवादिति । उच्यते—गुणादयश्च द्रव्यवृत्तयः । आदिशब्दात् कर्म-सामान्य परिग्रहः । आत्मादिद्रव्याणामभावो गुण-कर्म-सामान्यादिरूपः कल्पयितुं न शक्यो गुणादीनां द्रव्यवृत्तित्वात्, द्रव्याभावस्य च विवक्षितत्वात्, आधाराभावे ऑधेयानाम-
34B सम्भवात् । यतश्च गुणादयो न सम्भवन्ति जीवादिद्रव्याणां लोकाकाशस्य चाभावो विचारयितव्यतया प्रस्तुतोऽतः परिशेषादुद्धरितन्यायेनात्मादीनामभावो द्रव्यं द्रव्यरूपः सत्त्वादिगुणपर्यायवत्त्वात्, तत् पुनरनन्तमन्तरहितं नभ आकाशम् । एवं चालोकः परिशेषानुमानादाकाशद्रव्यरूपः सिद्धः ।

ननु यदागमानुमानाभ्यां परिच्छेद्यं सर्वज्ञधीगम्यं च वस्तु तत् सान्तमेव दृष्टं यथा घटादयस्तथाभूतं चालोकाकाशमतः कथमनन्तं स्यादिति । तदयुक्तम्, वेदेश्वरपुराणामपि सान्तत्वप्रसङ्गात् । तेऽपि हि त्वन्मतेनागमादिगम्या भवन्ति न पुनः सान्ताः, कालापेक्षयाऽनन्तत्वात् । प्रमाणस्य हि यथावस्तुपरिच्छेदनस्वभावत्वादनन्तस्यानन्तत्वेनैव परिच्छेदनं यद्यसङ्ख्यातादेस्तथात्वपरिच्छेदवत् स्यात् को विरोधः
35A स्यात् ।

१ न सतामात्मादीनामभावोऽनात्मा ॥ २ परमार्थवृत्त्या । शाब्दिकानां तु शाब्दवृत्त्या प्रसज्येऽर्थे(?) अभावोऽवस्तु । यौगिका अभावा नाभिप्रेता अस्माकं विशेषतो यतोऽत्यन्ताभावोऽपि वस्त्वेव शशशृङ्गादीनां समवायादिनिषेधात् ॥ ३ अभावस्य नीरूपत्वे सति ॥ ४ गुणादीनाम् ॥ ५ परिशेषाद् द्रव्यमनन्तं नभः ॥ ६ द्रव्यस्योऽभाव इत्यर्थः ॥ ७ सपर्यन्तम् ॥ ८ यथा आकाशं व्यापकत्वेनानन्तं तथा वेदादयो न हि, किन्तु सर्वस्मिन्नपि कालेऽविनश्वरत्वेनानन्ताः ॥ ९ असंख्यातादित्वेन ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तदेवं धर्मा-ऽधर्मा-ऽऽकाशानां लक्षणमभिधाय त्रयाणामप्येकं धर्ममभिदधाति—

धर्मादीनि एकद्रव्याणि, अक्रियाणां सर्वत्र एककार्योपलम्भात्, अचेतनानाममूर्तद्रव्यत्वेन वा । अमूर्तत्वं त्वपुद्गलरूपत्वादिति ।

धर्मादीन्येकद्रव्याणि । मूलसूत्रोपात्तद्रव्यपञ्चकमध्याद्धर्मादीनि धर्मास्तिकाया- 5
ऽधर्मास्तिकाया-ऽऽकाशास्तिकायद्रव्याण्येकव्यक्तिकानि । धर्मादयः प्रत्येकमेक-
व्यक्तिका न पुनर्जीव-पुद्गलद्रव्यवदनेकव्यक्तिका इत्यर्थः । एकशब्दः सङ्ख्यावचनः,
तत्सम्बन्धाद् द्रव्यस्यैकवचनप्रसङ्ग इति चेत्, न, धर्माद्यपेक्षया बहुत्वघटनात् । एकं
35B च तद् द्रव्यं चैकद्रव्यम्, एकद्रव्यं चैकद्रव्यं चैकद्रव्यं चैकद्रव्याणीति धर्माद्यपेक्षया
बहुत्वं न विरुध्यते । प्रस्तावाद् द्रव्यावगमाल्लाघवाच्च 'ऐकैकम्' इत्येवास्विति चेत्, 10
न, द्रव्यशब्दस्य द्रव्यापेक्षयैकत्वख्यापनार्थत्वात् पर्यायापेक्षया ह्यनेकत्वाभ्यनुज्ञानात् ।
धर्मादीनीत्यभिधानाज्जीव-पुद्गलानामनेकद्रव्यत्वमेव, अन्यथा जीवादीनीत्यभिदधीत ।

कथं पुनरेकद्रव्यत्वममीषामिति । उच्यते—अक्रियाणां गमनक्रियारहितानां
सर्वत्र देशे काले चैककार्योपलम्भादेकस्य तुल्यस्य कार्यस्य गतेः स्थितेरवगाहस्य च
36A दर्शनात् । धर्मा-ऽधर्मा-ऽऽकाशानां हि सर्वत्रैकमेव कार्यं गति-स्थित्यवगाहदातृत्वलक्षणं 15
दृश्यते । अथ चैतानि गमनक्रियाशून्यानि देशाद् देशान्तरं गन्तुं न शक्नुवन्ति,
तस्मादेकद्रव्याण्येव । अयमर्थः—यदेकम्यं सर्वत्र तुल्यकार्यं तदेकव्यक्त्येव, यथाकाशम् ।
समानजातीयाः पुद्गलव्यक्तय ऐककार्या भवन्ति न पुनरेकद्रव्याणि इत्यक्रियाणा-
मित्युक्तम् । ता हि गमनक्रियावत्यः । तथा मुक्तिक्षेत्रमधिष्ठिता अप्यात्मानो गति-
शून्या भवन्ति, न पुनरेकद्रव्याणि, इत्येककार्योपलम्भादित्युक्तम् । न हि तेषां 20
सर्वत्रैकं कार्यं किञ्चिदप्युपलभ्यते ।

स्यादेवम्—नानाप्रदेशत्वाद्धर्मादिद्रव्याणां धर्मादिवन्नानाद्रव्यत्वम् । तथा च

१ कथम् 'एकद्रव्याणि' इत्युक्तम् ॥ २ 'धर्मादीनि एकैकम्' इत्येव सूत्रमस्तु ॥ ३ 'धर्मादीनि' इति पदप्रतिपादनात् ॥ ४ अक्रियाणां सर्वत्र एककार्योपलम्भात् ॥ ५ अक्रियं सत् ॥ ६ देशे काले वा ॥ ७ विवादपदानि धर्मादीनि एकव्यक्तिकानि अकम्पानां सतां तुल्यकार्यत्वात् ॥ ८ काश्चित् पुद्गलव्यक्तयो हि 25
एकसंचित्तमहास्कन्धलक्षणं सर्वदेशभावि कार्यमारभन्ते, न च ता एकद्रव्याणि ॥ ९ एकं कार्यं स्कन्धलक्ष-
णम् ॥ १० देशे काले वा ॥ ११ धर्मादीनि नानाद्रव्याणि नानाप्रदेशत्वाद् यथा घटादयः ॥ १२ कृष्ण-
पाण्डुरादिभेदेन ज्याया नानाद्रव्यत्वम् ॥ १३ अनेक ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रतिज्ञायां अनुमानबाधेति । तन्न । एकद्रव्येणाकाशेन व्यभिचारात् । अस्य च
36B नानाप्रदेशत्वं पुरतः प्रसाधयिष्याम इति नानुमानबाधिता प्रतिज्ञा । अमुना च योगेन नाकाशस्यैकद्रव्यत्वं साध्यते विप्रतिपत्त्यभावात्, किं तर्हि? धर्माधर्मयोरेव । यत् पुनस्तस्यापि प्रतिज्ञासूत्रे उपादानं तत् स्वरूपमात्रकथनपरमेव । एवमुत्तरयोगेऽपि ।

एकद्रव्यत्वसिद्धयै हेत्वन्तरमप्याह—अचेतनानां सदापि चेतनासम्बन्धरहितानां 5
सतां धर्मादीनाममूर्त्तद्रव्यत्वेन वाऽमूर्त्तद्रव्यत्वाद्वा हेतोरेकद्रव्यत्वम् । यत् सर्वदापि चेतनासम्बन्धशून्यत्वे सत्यमूर्त्तं द्रव्यं तदेकद्रव्यमेव यथाकाशम्, धर्माधर्मास्तिकायौ च सर्वदाऽप्येवंभूतावेव । अमूर्त्तद्रव्यत्वमात्मनामप्यस्तीत्यचेतनानामिति कृतम् । ननु मुक्तात्मनामपि चेतनाराहित्यं परेषां मतेनाऽस्ति तत् कथं न व्यभिचार इति ।
37A तन्न । कालत्रयेऽपि चेतनाशून्यत्वस्य विवक्षितत्वात्, मुक्तात्मनां च संसार्यवस्थायां 10
लब्धचेतनासम्बन्धत्वात् । अचेतनत्वादित्येतावत्युच्यमाने पुद्गलैर्व्यभिचारः स्यादित्य-मूर्त्तद्रव्यत्वादित्युक्तम् ।

अमूर्त्तत्वं त्वपुद्गलरूपत्वादिति । अमूर्त्तत्वं तु धर्मादीनाममूर्त्तत्वं पुनरपुद्गलरूप-त्वात् पुद्गलस्वभावत्वाभावात् । यत् पुद्गलस्वभावं न भवति तदमूर्त्तमेव यथात्मा । अपुद्गलत्वं च धर्मादीनां स्पर्श-रस-गन्ध-वर्णानां पुद्गललक्षणानामभावात् । न 15
चाश्रयसिद्धो हेतुः, धर्मादीनां पूर्वमेव साधितत्वादाकाशे विप्रतिपत्त्यभावाच्च । एकद्रव्यत्वेऽमूर्त्तत्वे च धर्मादीनां सिद्धे वैभवमपि समसैत्सीत्, अचेतनामूर्त्तैकद्रव्यस्य
37B वैभवनान्तरीयकत्वात् 'इति'करणो जीवादिद्रव्याणां परस्परासाधारणस्वरूपवक्तव्यता-परिसमाप्त्यवद्योतकः ।

सम्प्रति पूर्वोदितमर्थं सङ्क्षेपेण सङ्गृह्णाति— 20

येयं• गतिः स्थितिर्वा द्रव्याणामन्यकारणायोगात् ।
धर्माधर्मकृते ते अवगाहो व्योमहेतुस्तु ॥

इति सङ्ग्रहश्लोकः ।

१ 'यदकस्मं सर्वच तुल्यकार्यं तदेकव्यक्ति एव' इत्येवंरूपायाः ॥ २ एकद्रव्यत्वरूपायाः ॥ ३ व्याप्तिर्हि उभय-सिद्धा भवति, अस्मदीये हि मते आकाशं नानाप्रदेशं च एकद्रव्यं चेति हेतोर्व्यभिचारः ॥ ४ धर्मादीना- 25
मेकद्रव्यत्वलक्षणा ॥ ५ सूत्रेण ॥ ६ आकाशस्य ॥ ७ अचेतनानाममूर्त्तद्रव्यत्वेन वा ॥ ८ विवादा-ध्यासितानि धर्मादीनि एकद्रव्याणि, सर्वदापि अचेतनत्वे सति अमूर्त्तद्रव्यत्वात् ॥ ९ नैयायिकादीनाम् ॥ १० हेतोः ॥ ११ अत एव सर्वदेति कृतमनुमाने ॥ १२ सदापि अचेतनत्वे सति अमूर्त्तद्रव्यत्वात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]येयमित्यादि । येयमिति प्रत्यक्षनिर्देशः । जीवपुद्गलद्रव्याणां या इयं गतिः स्थितिर्वा प्रत्यक्षतो दृश्यते धर्माधर्मकृते ते इत्युत्तरेण योगः । अन्यकारणायोगादन्यस्य क्षित्यादेः कारणस्य पूर्वप्रपञ्चितन्यायेनाघटनात् । अवगाहो व्योमहेतुस्त्विति । तुशब्दस्य व्यवहितः सम्बन्धः । द्रव्याणामवगाहः पुनर्व्योमहेतुरकाशकारणकोऽन्यकारणायोगादेव ।

कायः प्रदेशबाहुल्यम् । एकजीव-धर्मा-ऽधर्माणां सकृत्सर्वमूर्ताभिसम्बन्धार्हत्वात् सदेशत्वम् । अन्यथाऽणोरिव तन्न स्यात् । सदेशत्वेन कथञ्चिदनित्यत्वमप्यभिमतम् । देशाश्चासंख्येयाः, लोकाकाशव्याप्तियोग्यत्वादिति ।

38A तदेवं मूलसूत्रोपात्तं द्रव्यपञ्चकं स्वरूपभेदैर्व्याख्याय कायपदं व्याचष्टे—कायः प्रदेशबाहुल्यम् । कायशब्देन प्रदेशानामवयवानां बाहुल्यं बहुत्वमुच्यते, प्रत्येकं बहुप्रदेशानि जीवादिद्रव्याणि । चीयत इति कायः सङ्घातः । जीवादयः काया इव कायाः । यथा घटादयोऽवयवबाहुल्यात् कायाः इत्युच्यन्ते तथा जीवादयोऽपि, अवयवबाहुल्यस्याविशेषात् ।

कथं पुनर्ज्ञायते जीवादिद्रव्याणि सदेशानीति तत्र तावज्जीव-धर्मा-ऽधर्माणां सदेशत्वं साधयति—[2]एकेति । एकजीवस्य धर्मस्याधर्मस्य च सकृदेककालं सर्वैर्मूर्तैर्द्रव्यैर्योऽभिसम्बन्धस्तत्राऽर्हत्वाद्योग्यत्वात् सदेशत्वं सावयवत्वम् । निष्प्रदेशत्वेऽपि नानाजीवैः
38B सकृत्सर्वमूर्ताभिसम्बन्धो भवेदित्येकविशेषणम् । एकस्य जीवस्य सकृत्सर्वमूर्ताभिसम्बन्धार्हत्वादित्यर्थः । जीवानां समुद्घातकाल एव सकृत्सर्वमूर्ताभिसम्बन्धो न सर्वदेत्यर्हग्रहणम्, कायमात्रप्रमाणावस्थायामपि लोकपूरणयोग्यतया विद्यमानत्वात् । तथाहि—एको जीवो धर्मास्तिकायोऽधर्मास्तिकायश्च युगपदखिलैर्मूर्तद्रव्यैरभिसम्बध्यते । यदि च निरंशः स्यात् तदा कथमेतत् सङ्गच्छेत, [3]एकदेशस्थेनाभिसम्बद्धानामत्यन्तसान्निध्यप्रसङ्गात् । तस्मात् सकृत्सर्वमूर्तद्रव्याभिसम्बन्धार्हत्वान्यथानुपपत्त्या जीवादीनां सदेशत्वमेव ।

१ येयं गतिः स्थितिर्वा द्रव्याणामन्यकारणायोगात् । धर्माधर्मकृते ते अवगाहो व्योमहेतुस्तु ॥ इति सङ्ग्रहश्लोकः ॥ २ संघाताः ॥ ३ संघातरूपत्वात् ॥ ४ एकजीवधर्माधर्माणां सकृत् सर्वमूर्ताभिसम्बन्धार्हत्वात् सदेशत्वम् ॥ ५ निष्प्रदेशत्वेऽपि जीवस्याङ्गीक्रियमाणे इत्यर्थः ॥ ६ देहमात्र ॥ ७ जीवादिना[ऽऽ?]व्यापकेन ॥ ८ वस्तूनाम् ॥ ९ एकत्वप्रसङ्गात् ॥ १० कुतः ? अंशाभावेन दूरादिव्यपदेशाघटनात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]अन्यथेति । यदि जीवादीनां सदेशत्वं नेष्यते तदाऽणोरिव परमाणोरिव तत् सकृत्सर्वमूर्त्ताभिसम्बन्धार्हत्वं न स्यात् । यद् द्रव्यांशैर्निरंशं न तत् सकृत्सर्वमूर्त्ता-
39A भिसम्बन्धार्हं यथा परमाणुः, जीवादयश्च सकृत्सर्वमूर्त्ताभिस[म्ब]न्धार्हास्तस्मात् सदेशा एव ।

मुख्यप्रदेशाभावादुपचरिता एव जीवादीनां प्रदेशा इति चेत् । नन्वयमुपचारो विचारक्षणानां विपश्चितां निर्निबन्धनो वक्तुं न युक्तः । काण्डपटादौ सप्रदेशत्वं एवं सकृत्सर्वमूर्त्ताभिसम्बन्धार्हत्वं दृष्टं सन्निबन्धनमिति चेत् । ननु यदि काण्ड-पटदृष्टान्तेनैव सकृत्सर्वमूर्त्ताभिसम्बन्धार्हत्वं जीवादीनां निरुपचरितानामेव प्रदेशानां निबन्धनं भवेत्तदा किं भवतां करतलाद् यायात्? यदि जीवादीनामुपचरिताः प्रदेशाः
39B स्युस्तदा कथमिव मुख्यप्रदेशसाध्यां सकृत्सर्वमूर्त्ताभिसम्बन्धार्हत्वक्रियां कुर्युः? न हि प्रकाशकत्वेनोपचरिततपनत्वः सुधादीधितिस्तपति । अथोपचरिता अपि मुख्य-क्रियानिबन्धनं भवन्ति तदा काण्डपटेऽपि प्रदेशा उपचरिता एव स्युः । अथ क्वचिद् मुख्यत्वे सत्युपचारोऽन्यत्र प्रवर्त्तत इति मतम्, तदा जीवादिषु मुख्याः प्रदेशाः काण्डपटादौ पुनरुपचरिता इत्यपि प्राप्नोति, सकृदनेकमूर्त्ताभिसम्बन्धार्हत्व-स्योभयत्राप्यविशेषात् । तस्मात् सकृदनेकमूर्त्ताभिसम्बन्धार्हत्वाज्जीवादीनां काण्डपटा-
40A दीनामिव मुख्यप्रदेशवत्त्वम् ।

ननु यत् सावयवं तत् पटादिवदनित्यम्, सावयवाश्च जीवादयः, तथा च तेऽप्यनित्या एव स्युरिति । अत्राह—[2]सदेशत्वेन सावयवत्वेन कथञ्चिन्न सर्वथाऽनित्य-त्वमपि जीवादीनामस्माकं सम्मतम् । वयं हि मन्यामहे सर्वद्रव्याणां कथञ्चिदनित्यत्वम् । ततः सप्रदेशत्वेन जीवादीनामनित्यत्वप्रसङ्गो न नः सिद्धान्तक्षतिकरः ।

तदेवं जीवादीनां सदेशत्वं प्रसाध्य देशसङ्ख्यामाह—देशाश्चासङ्ख्येयाः । एकजीव-धर्मा-ऽधर्माः सदेशाः, देशाः पुनस्तेषां प्रत्येकमसङ्ख्येया भवन्ति । लोकाकाशव्याप्ति-योग्यत्वात् । जीवादयो हि परिपूर्णमपि लोकाकाशं युगपदात्मना व्याप्तुमीशते, लोकाकाशं च पुरः प्रतिपादयिष्यमाणन्यायादसङ्ख्येयप्रदेशम्, अतस्तेऽपि तथैव,
40B असङ्ख्येयप्रदेशस्य सङ्ख्येयप्रदेशैर्व्याप्तुमशक्यत्वात्, न हि परमाणुर्विशालां शिलां स्थगयितुमलम् ।

१ अन्यथाऽणोरिव तन्न स्यात् ॥ २ भावांशव्यवच्छित्तये ॥ ३ परो जीवादिषु उपचारस्य निबन्धनं दर्शयितुमाह—काण्डपटादौ प्रतिसीरादौ ॥ ४ '७' [=सप्तम्यन्तम्] ॥ ५ सति ॥ ६ जीवादिष्वपि सकृत्सर्व-मूर्त्ताभिसम्बन्धार्हत्वमेव सप्रदेशत्वोपचारस्य निबन्धनमस्त्वित्यर्थः ॥ ७ काण्डपटादिं प्रति सम्भवद्द्रव्यापेक्षया सर्वशब्दो व्याख्येयः ॥ ८ उपचारस्य ॥ ९ जीवादीनां ये निरुपचरिताः प्रदेशास्तेषां निबन्धने यदि भवेदिति ॥ १० अधिकम् ॥ ११ सदेशत्वेन कथञ्चिदनित्यत्वमप्यभिमतम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आकाशोऽपि सदेशः, सकृत्सर्वमूर्ताभिसम्बन्धार्हत्वात् । अन्यथा सर्वावगाहिनामेकदेशत्वम्, एकदेशावगाढानेकपुद्गलवत्। एकत्रैव चाधेयस्वरूपभावा-ऽभावौ स्याताम्, विभागादयश्च कस्यचिन्न स्युः ।

नन्वाकाशस्य प्रदेशवत्त्वमेवाऽसिद्धमतः कथं तदेकदेशस्य लोकाकाशस्यासङ्ख्येयप्रदेशवत्त्वेन जीवादीनां तथाभावो भवेदिति। अत्राह—आकाशोऽपीति आकाशध्वनिः पुन्नपुंसकः । आकाशमपि सप्रदेशमेव, सकृदेककालं सर्वमूर्त्ताभिसम्बन्धार्हत्वात् अलोकाकाशः सम्बन्धार्ह एव न पुनः सम्बद्ध इत्यर्हग्रहणम् । यद्येवं लोकाकाशस्य सङ्ग्रहो न प्राप्नोति, तस्य साक्षात् सम्बद्धत्वेनार्हत्वाभावात् । न । तस्यानर्हत्वशङ्काया एवाभावात्। न हि यो यत्रार्हो न भवति स तत् कार्यमुत्पादयितुं पटुः । 41A आकाशं हि युगपदखिलैर्मूर्त्तैर्द्रव्यैः सहाभिसम्बध्यते । ततस्तदपि सप्रदेशमेव ।

अन्यथेति । यदि सकृत्सर्वमूर्त्ताभिसम्बन्धयोग्यत्वेऽपि व्योम्नः सप्रदेशत्वं न स्यात्तदा सर्वावगाहिनां सर्वेषामप्यवगाहवतामेकदेशत्वं स्यात् । एकदेशावगाढानेकपुद्गलवदिति साधर्म्यनिदर्शनम् । यथा हि परिणामविशेषादेकदेशे निरंशे बहवोऽपि पुद्गला अवगाहमाना एकदेशावगाहिनोऽमी इति व्यपदेशमश्नुवते तथा यदि सर्वाणि मूर्त्तद्रव्याण्याकाशे निरंशेऽवगाहेरंस्तदैकदेशान्यमूनीति व्यपदेशमश्नुवीरन् । न चैवमस्ति । तस्मात् सांशमेवाकाशम् ।

किञ्च, यद्याकाशं निरंशं स्यात्तदा एकत्रैव चाधेयस्वरूपभावाभावौ स्याताम् । एकत्रैव च देशे काले चाऽऽधेयस्वरूपभावाभावौ स्याताम् । निरंशाकाशवादाग्रहग्रहगृहीतानां हि मतेन यदेवाकाशमुज्जयन्यामयोध्यायामपि तदेव, ततश्चोज्जयनीपरिच्छिन्ने- 41B व्योमनि यो घटादिरवजगाहे तस्य यद्यप्ययोध्यापरिच्छिन्ने व्योमन्यभावस्तथापि भावाभावौ युगपदेकभाविनावेव, उज्जयनीसम्बद्धस्यैवाकाशस्याऽयोध्ययाप्यभिसम्बन्धात् । न केवलमेकत्रैवाधेयस्वरूपभावाभावौ स्याताम् ।

तथा विभागादयश्च कस्यचिन्न स्युः । आदिशब्दात् संयोग-कर्म-परत्वा-ऽपरत्व-पृथक्त्वादिग्रहः । श्येनेन हि स्थाणोः संयोगो विभागश्चान्यतरकर्मजः, तत्रोत्पन्नं कर्म स्वाश्रयं 42A श्येनं तदाकाशदेशाद् वियोज्य स्थाण्वाकाशदेशेन संयोजयति ततो वा विभज्याकाश-

१ आकाशोऽपि सदेशः ॥ २ सकृत् सर्वमूर्ताभिसम्बन्धार्हत्वात् ॥ ३ सम्बद्धत्वादेव ॥ ४ अन्यथा सर्वावगाहिनामेकदेशत्वम् ॥ ५ श्येने ॥ ६ गत्यादिकम् ॥ ७ पूर्वसम्बद्धाकाश ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

देशान्तरेण संयोजयतीति प्रतीयते। न चाकाशस्य देशाभावे एतदुपपद्यते, स्थाणु-श्येनयोः सर्वदाऽप्यभिन्नदेशत्वात्। एतेन मेषयोरुभयकर्मजः संयोगो विभागश्चाकाशस्य निरंशत्वे न घटत इति निवेदितं भवति। तथा व्योम्नो निरंशत्वे कर्माऽपि न घटामटाट्यते, तस्य देशादेशान्तरप्राप्तिहेतुपर्यायरूपत्वेन व्यवस्थापितत्वात् देशान्तरस्य च कस्यचिदभावात्। अत एव पदार्थानां परत्वा-ऽपरत्व-पृथक्त्वाद्यनुपपत्तिरवधार्या। तद् विभागादीनभ्युपगच्छता भवताऽऽकाशमंशवदभ्युपेयम्। 5

अत्र कश्चिदाह—"निरंशमाकाशं, सर्वजगद्व्यापित्वात्, यत् पुनर्न निरंशं न तत्तथा दृष्टं यथा घटादि, सर्वजगद्व्यापि चाकाशम्, तस्मान्निरंशम्" [ ] इति।
42B तन्न, हेतोर्विरुद्धत्वात्। न हि येनैव भागेन विन्ध्यसम्बद्धमाकाशं तेनैव हिमवताऽपि तयोरेकदेशत्वप्रसङ्गात्, अतः सर्वजगद्व्यापित्वादिति हेतुः सांशत्वमेव साधयति। 10 अनुमाना-ऽऽगमबाधितत्वेन हेतोः कालात्ययापदिष्टत्वाच्च। सांशमाकाशम्, द्रव्यत्वे सति सकृदशेषभिन्नदेशद्रव्यसम्बद्धत्वात्।

यदप्युच्यते—"निरंशमाकाशं सदाऽवयवानारभ्यत्वात् परमाणुवत्" [ ] इति, तदप्यनेनैव प्रत्याख्यायत, हेतोः कालात्ययापदिष्टत्वस्य तुल्यत्वात्। अपि च, यदि सर्वथा सदाऽवयवानारभ्यत्वं हेतुस्तदाऽस्माकं न सिद्धः, पर्यायार्थादेशात् पूर्वपूर्वा- 15
43A काशदेशेभ्य उत्तरोत्तराकाशदेशानामुत्पादात्। अथ कथञ्चित् सदाऽवयवानारभ्यत्वं हेतुस्तदा विरुद्धः, कथञ्चिन्निरंशत्वस्य सर्वथा निरंशत्वविरुद्धस्य साधनात्। कथ-ञ्चिन्निरंशत्वसाधने च सिद्धसाधनम्, पुद्गलस्कन्धवत् सर्वदावयवविभागाभावेन सावयवत्वाभावोपगमात्। किञ्च, आकाशं सांशमेव, एकदेशेन परमाणुभिः सह संयुज्यमानत्वात्, स्कन्धवत्। तस्य "तैः सर्वात्मना संयुज्यमानत्वे परमाणुमात्रत्वप्रसङ्गः। 20 तथा चानेकाकाशापत्तिः।

स्यान्मतम्—नैकदेशेन सर्वात्मना वा परमाणुराकाशेन युज्यते, किं तर्हि? युज्यत एव, यथाऽवयवी स्वावयवैः सामान्यं वा स्वाश्रयैरिति। तन्न। अवयव्यादे-रपि सर्वथा निरंशत्वे स्वावयवादिभिरेकान्ततो भिन्नैः सम्बन्धे यथोक्तदोषप्रसङ्गात्।

१ कर्मणः ॥ २ देशान्तराभावादेव ॥ ३ '५' [=तस्मात्] ॥ ४ विन्ध्यहिमवतोः ॥ ५ आकाशस्य 25 महत्त्वं सत्त्वं च युगपदशेषभिन्नद्रव्यसम्बद्ध[त्वि?]मपि ॥ ६ युगपत् ॥ ७ निष्पन्ने घटे पश्चादवयवानारभ्य-त्वमस्ति इति तद्भवच्छेदार्थं 'सदा'ग्रहणम् ॥ ८ पुद्गलस्कन्धो हि वैधर्म्यदृष्टान्तः, तस्य सर्वदाऽवयव-विभागेन सावयवत्वाभावोपगमात् ॥ ९ पुद्गलोऽपि कथञ्चिन्निरंशः ॥ १० आकाशस्य ॥ ११ परमाणुभिः ॥ १२ अवयवमात्रत्वादिलक्षणदोषप्रसङ्गात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

43B कात्स्न्र्यैकदेशव्यतिरिक्तस्य प्रकारान्तरस्य तत्सम्बन्धनिबन्धनस्यासिद्धत्वात् । कथञ्चित्तादात्म्येन तत्सम्बद्धत्वे स्याद्वादिमतसिद्धिः, अवयवावयविनोः सादृश्याख्यसामान्यतद्वतोश्च कथञ्चित्तादात्म्यस्योपगमात् । न चैवमाकाशस्य परमाणुभिः कथञ्चित्तादात्म्यमित्येकदेशेन संयोगोऽभ्युपेयः, तथा च सांशत्वसिद्धिः ।

तदेवमाकाशस्य सामान्येन सदेशत्वमुपपाद्य लोकाकाशप्रदेशेयत्तामाह—

लोकाकाशमसङ्ख्येयप्रदेशम्, शश्वदसंहरणधर्मकस्य सावधित्वात् ।

लोकाकाशमसङ्ख्येयप्रदेशम् । यावति जीव-पुद्गलानां गति-स्थिती भवतस्तावल्लोकाकाशम् । तदसङ्ख्येयप्रदेशं भवति, शश्वत् सर्वकालमसंहरणधर्मकस्य सावयवत्वे सत्यसङ्कोचस्वभावस्य सतः सावधित्वात् । 'शश्वदसंहरणधर्मकत्वात्' इत्युच्यमानेऽलोकाकाशेन
44A व्यभिचार इति सावधित्ववचनम्, सावधित्वादित्युच्यमानेऽपि पुद्गलस्कन्धेनानन्तपरमाणुकेनानेकान्तो मा भूदिति शश्वदसंहरणधर्मकत्वे सतीति विशेषणम् । एतच्चानुमानसिद्धम्—शश्वदसंहरणधर्मकं लोकाकाशम्, अजीवत्वे सत्यमूर्त्तद्रव्यत्वात्, अलोकाकाशवत् । न ह्यलोकाकाशं कदाचिदपि संहरणधर्मकम्, सर्वदा परममहत्त्वाभावप्रसङ्गात् । इदमुक्तं भवति—न तावल्लोकाकाशमनन्तप्रदेशं भवितुमर्हति, शश्वदसंहरणधर्मकस्यानन्तप्रदेशस्य वस्तुनः सावधित्वाभावादलोकाकाशवत् । नापि सङ्ख्यातप्रदेशम्, तस्यावश्यं शश्वदसंहरणधर्मकत्वाभावात् । तथा च पारिशेष्यादसङ्ख्येयप्रदेशं सिद्धम् ।

सर्वमनन्तप्रदेशम्, अलोकाकाशस्यानन्तत्वादिति ।

सर्वमिति लोकाकाशमलोकाकाशं च अनन्तप्रदेशम् । अन्तः पर्यवसानम् ।
44B स येषां नास्ति ते तथाभूताः प्रदेशा यस्य तत्तथा । अलोकाकाशस्यानन्तत्वादवधिशून्यत्वात् ।

तदेवमेकजीव-धर्मा-ऽधर्मा-ऽऽकाशानां सप्रदेशत्वं प्रदेशेयत्तां च प्रसाध्य पुद्गलानामपि प्रसाध्यते—

१ कात्स्न्र्यैकदेशाभ्यां प्रकाराभ्यां व्यतिरिक्तस्य ॥ २ ओस् ॥ * षष्ठीद्विवचनान्तं विग्रहे, तथा च तयोरवयवावयविनोः सम्बन्धस्य यद् निबन्धनं तस्यासिद्धत्वादित्यर्थः ॥ ३ अवयवादिभिः सह योऽवयवादीनां सम्बन्धः ॥ ४ '६' [=विग्रहे षष्ठयन्तम्] ॥ ५ सामान्यवतः ॥ ६ **शश्वदसंहरणधर्मकस्य सावधित्वात्** ॥ ७ सावयवत्वविशेषणात् परमाणुव्युदासः ॥ ८ 'शश्वद्'ग्रहणाद् घटादिभिर्व्यभिचारनिरासः ॥ ९ घटादिरूपेण ॥ १० आत्मन्यवच्छित्त्यै ॥ ११ पद्या(द्य?)दौ ॥ १२ **सर्वमनन्तप्रदेशम्** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अनेकप्रदेशः स्कन्धः । भावांशैरणुः कायः ।

अनेकप्रदेशः स्कन्धः । न विद्यते एकः प्रदेशो यस्य स तथा । एकप्रदेश-प्रतिषेधाद् द्व्याद्यनन्तानन्तपर्यन्तप्रदेशानामभ्यनुज्ञा । द्वावादिमनन्तानन्तसङ्ख्यां च पर्यन्ते कृत्वा पुद्गलस्कन्धानां प्रदेशा भवन्ति । स्कन्ध इत्येकवचननिर्देशो जात्यपेक्षः ।

स्यान्मतम्—यदि प्रदेशबाहुल्यं कायस्तदा परमाणुः कायो न प्राप्नोति, तस्य 5
45A निःप्रदेशत्वादिति । अत्राह—भावांशैरणुः कायः । भावांशाः स्पर्श-रस-गन्ध-वर्णादेयः, तैः परमाणुः कायव्यपदेशं लभते । यद्यपि परमाणौ स्कन्धवद् द्रव्यांशा न सन्ति तथापि भावांशाः सन्ति, ततस्तैः सोऽपि काय इत्युच्यते भावैर्द्रव्यैश्च प्रदेशबाहुल्यस्य कायरूपत्वात् ।

तदेवं कायशब्दस्य प्रदेशबाहुल्यमर्थमभिधायाऽर्थान्तरमप्यभिदधाति— 10

उत्पाद-व्यय-ध्रौव्याणि वा कायः, प्रतिक्षणमविकारिणोऽर्थ-क्रियाऽभावात्, समर्थस्य सदा जनना-ऽजननप्रसङ्गात् । अपेक्ष्यस्या-नुवर्तिनः पूर्वरूपस्य निवृत्तिः, तस्य कार्यविरोधात् । कार्योत्पत्तौ वा निवृत्तिः । उत्तरमपि वा जनयेत् । एवमयमशीर्णाशेषरूपो यदि प्रसह्य कृतमपि करोति । 15

उत्पाद-व्यय-ध्रौव्याणि वा कायः । भावान्तरापत्तिरुत्पादः । उत्तरभावाभावांशरूपः पूर्वभावविगमो व्ययः । ध्रुं स्थैर्ये [धा० पा० १६] इत्यस्मादचि ध्रुवः, अनुगतो भावांशः, स एव ध्रौव्यम् । एतानि वा 'काय'शब्देनोच्यन्ते । 'काय'शब्देन हि प्रचय उच्यते । प्रचयश्चात्रोत्पाद-व्यय-ध्रौव्याणामेव । ततो जीवादयः काया इति कोऽर्थः ? जीवादय उत्पाद-व्यय-ध्रौव्यसमुदयरूपा इत्यर्थः । 20

45B कथं पुनः सर्वदोत्पाद-व्यय-ध्रौव्यसमुदायरूपा एव जीवादय इति ? उच्यते—तावद् भावा नैकान्तनित्याः । यतः प्रतिक्षणं प्रतिसमयमविकारिणो निर्विकारस्यैकस्वभाव-स्येत्यर्थः, अर्थस्य कार्यस्य क्रिया निष्पत्तिस्तस्या अभावादभावप्रसङ्गात् । समर्थस्य

१ सत्त्व-प्रमेयत्व-ज्ञेयत्वादयः ॥ २ • 'अपेक्षस्या''इति मूलादर्शे पाठः ॥ ३ पूर्वभावस्य घटलक्षणभावस्य विगमो व्ययः । कः ? उत्तरभावाभावांशरूपः । उत्तरभावस्य कपाललक्षणस्य सम्बन्धी योऽभावरूपोऽशः । 25 कोऽर्थः ? पदार्थस्य हि द्वावंशौ सद्रूपोऽसद्रूपश्च । ततः कपाललक्षणस्य भावस्य घटाभावात्मकोऽभावांशः स एव पूर्वभावविगमः ॥ ४ अनुगतं द्रव्यं मृदादिलक्षणम् ॥ ५ **प्रतिक्षणमविकारिणोऽर्थक्रियाऽ-भावात्** ॥ ६ **समर्थस्य सदा जनना-ऽजननप्रसङ्गात्** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कार्योत्पादं प्रत्यविकलस्य सदा सर्वकालं जननाजननप्रसङ्गात् । यदि हि नित्यैकरूपो भावः समर्थतया कार्याण्याविर्भावयति तदा सर्वदाऽप्याविर्भावयेत्, कार्याविर्भावसम्भावनीयत्वात् कारणसामर्थ्यस्य । तथा च कुशूलमूलावस्थितादपि बीजाद्[1]ङ्कुरो-
46A त्पत्तिप्रसङ्गः, क्षित्युदकसन्निधानकाल इव पूर्वमपि बीजस्य समर्थत्वात् । अथ समर्थोऽपि कदाचिन्नाविर्भावयति तदा सर्वदाऽप्यनाविर्भावप्रसङ्गः, समर्थस्यापि कार्यानाविर्भावात् । तथा च कुशूलस्थितादिव क्षित्युदकसन्निहितादपि बीजाद्[2]ङ्कुरानुत्पत्तिप्रसङ्गः, समर्थादपि [3]पूर्वमनुत्पाददर्शनात् । कादाचित्कं तु जननमजननं च न सङ्गच्छत एव ।

स्यादेवम्—द्विधा भावस्य रूपं विलम्बकारित्वमक्षेपकारित्वं च । तत्र विलम्बकारित्वं नाम यावन्न सहकारिसमवधानं तावदकरणम् । अक्षेपकारित्वं नाम बीज-
46B जातीयस्य सहकारिसमवधानानन्तरमेव करणम्, करणमेव च । एवं चायमर्थो जातः— कुशूलमूलावस्थितं बीजं सहकारिवैकल्यप्रयुक्ताङ्कुरादिकार्याभाववत्, न पुनः स्वशक्तिवैकल्यप्रयुक्ताङ्कुरादिकार्याभाववदिति । एवं च कुशूलमूलावस्थितं बीजं स्वसामर्थ्ये सत्यपि न जनयति, सहकारिसान्निध्यरूपव्यतिरिक्तसामर्थ्याभावात् । यदा तु तत् स्यात् तदा जनयत्येव । न चैवं सामर्थ्यासामर्थ्याभ्यां भेदः, स्वरूपासामर्थ्यस्य
47A कदाचिदप्यभावात्, सहकारिसन्निधानलक्षणस्य च सामर्थ्यस्य भावाभावाभ्यां स्वरूपहानेरयोगात्, तस्य ततो व्यतिरिक्तत्वात् । व्यतिरिक्तस्य च भावाभावाभ्यां स्वरूपहानावतिप्रसङ्ग इति ।

अत्र निरूप्यते—कुशूलमूलावस्थितस्य बीजस्य तेजो-ऽवनि-पवन-पाथः[4]पार्श्ववर्त्तिनोऽवयवशैथिल्यापरनामधेयायामुच्छ्वनावस्थायां प्रत्यक्षलक्ष्यत्वात् पामरजनस्यापि सुप्रसिद्धायां सत्यां यदेतत् तार्किका अवस्थाद्वयेऽपि बीजस्यैकरूपताप्रसाधनाय प्रमाणशतोपन्यासैरात्मानमायासयन्ति तत्र केवलं तेषां कुशाग्रीयप्रज्ञतैवापराध्यति, न ते । प्रज्ञापाटवान्धा हि प्रत्यक्षप्रसिद्धमपि विपर्यासयितुं प्रयतन्ते । ततो भावानां [5]सूपलक्ष-
47B विकाराणां कैवल्याकैवल्ययो रूपाभेदसाधना युक्तयः प्रत्यक्षत एव प्रतिक्षिप्यन्ते ।

ये पुनर्न [6]सूपलक्ष्य(क्ष)विकारास्तेषु युक्त्यन्तरमपि प्रथयामः—[7]अपेक्ष्यस्येति । भवतु स्वरूपशक्त्या केवलोऽपि समर्थो भावः, सहकारिसमवधानलक्षणस्य व्यतिरिक्त-

---

१ क्षित्युदकादेः ॥ २ कार्यस्य ॥ ३ मम ॥ ४ सहकारिसामर्थ्याभावे स्वरूपसामर्थ्यं न हीयते, सहकारिसामर्थ्यस्य ततो भिन्नत्वात् । यद् यतो भिन्नं तत् तदभावे न हीयते यथा घटात् पटादि ॥ ५ स्वरूपात् ॥ ६ सत्याम् ॥ ७ सामग्रीमध्यवर्तिनः ॥ ८ * पूर्वं 'लक्ष्य' इति लिखितम्, किन्तु पश्चाद् घृष्ट्वा 'लक्ष' इति ग्रन्थकारेणैव विहितम् ॥ ९ सहकारिसन्निधानाभावः । तद्विपर्ययोऽकैवल्यम् ॥ १० * अत्रापि 'लक्ष' इति पाठेन भाव्यम्, दृश्यतां पृ० १६३ टि० ८ ॥ ११ अपेक्ष्यस्यानुवर्तिनः पूर्वरूपस्य निवृत्तिः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सामर्थ्यस्य भावाभावाभ्यां च कादाचित्के कार्यजननाजनने स्ताम्, तथाप्यपेक्ष्यस्यानुवर्त्तिनः सहकारिसमीपवर्त्तिनः सहकारिसान्निध्यादेव प्राग् भावस्य यद् रूपं तस्य पूर्वरूपस्य निवृत्तिः प्रच्युतिः स्यात्। तथाहि—स्वरूपशक्त्या सर्वदापि सामर्थ्यम्, व्यतिरिक्त-
48A सहकारिसान्निध्यलक्षणसामर्थ्यभावाभावाभ्यां च कादाचित्के कार्यजननाजनने, एतद् द्वयमपि भावस्य नित्यैकरूपत्वेऽपि कादाचित्ककार्यसमर्थनाय परैः पर्यकल्पि। तत्तु नास्ति। कुतः? तैम्येति पूर्वरूपस्य कार्येण सह विरोधात्। अयं हि पूर्वं भावस्य स्वभावः सहकारिसन्निधाने कार्यं करिष्यामीति, स च सहकारिणां सन्निधानाकाल इव तत्सन्निधानेऽपि कार्यप्रसवप्रतिरोधी, करोमीति स्वभावादेव भावात् कार्यप्रसवात्।
48B ततः कार्यप्ररोहमिच्छता सहकारिसन्निधिवर्त्तिनो भावस्य पूर्वस्वभावपरित्यागोऽनुमन्तव्य एव। न च सहकारिसन्निधाने करोमीत्येवं प्रथममेव भावस्य स्वभावो वक्तुमपि शक्यः, असम्भवात्। कारणस्य हि करोमीति वार्त्तमानिकः स्वभावः कार्यभावसहभावी, क्रियाविष्टस्यैव कर्तुर्भवन्त्याऽभिसम्बन्धात्। क्रिया च द्वेधा—कर्तृनिष्ठा भवन-स्थानादिका, कर्मनिष्ठा च पचन-दहनादिका, करणं च कर्मनिष्ठा क्रिया, तदनया कर्म्मणि समवेतव्यम्। तच्च सहकारिसन्निधानात् पूर्वं नास्ति। तस्मात् कर्तुः
49A करोमीति वार्त्तमानिकः स्वभावः कार्यभावाविनाभाव्येव। कार्यभावश्च सहकारिसन्निधानसहभावी, समर्थादपि केवलात् कार्योत्पादानभ्युपगमात्। न च प्रथमं सहकारिसमवधानमस्ति। ततः करिष्यामीत्येव प्रथमं भावस्य स्वभावः। तस्य च सहकारिसन्निधाने विनाशो नियमेनाभ्युपेयः, कार्योत्पादपरिपन्थित्वात्।

ननु यो भावो यावन्तं कालमवतिष्ठते स तावन्तं वर्त्तमानकाल एव, सतो भूत-भविष्यत्त्वायोगात्। ततः कुतो भविष्यत्स्वभावनिवृत्त्या स्वरूपहानिरिति। तदेतत्
49B कामं प्रतिशृणुमः। किं नाम? अयं विशेषः—यः स्वरूपमात्राधीनो भावस्वभावः स एव वार्त्तमानिकः यथा सत्त्वादिः परापेक्षस्तु भूतो भविष्यन् वापि स्यात्। कुक्षलमूलोपशल्यलुलितस्य च बीजस्याङ्कुरप्ररोहं प्रति भविष्यत्सहकार्यपेक्षया न स्वरूपमात्राधीन एव स्वभावः, ततोऽसौ भविष्यन्नपि न दोषावहः। तस्मात्—

सँक्रियस्य हि यद् रूपमक्रियस्य विरोधि तत्।
ततः कार्यक्रियाकाले पूर्वरूपव्ययो ध्रुवः॥ [ ] इति।

१ पूर्वपदार्थस्य॥ २ तस्य कार्यविरोधात्॥ ३ पदार्थात्॥ ४ वर्त्तमानया॥ ५ विद्यमानस्य॥
६ मूलमेव समीपम्॥ ७ अङ्कुरं जनयतः सतः॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सम्प्रति वार्त्तमानिकमपि भावस्वभावमादत्य पूर्वरूपनिवृत्तिं प्रसञ्जयति—कार्योत्पत्ताविति पूर्वरूपस्येति योगः । अस्तु नाम सहकारिसन्निधाने कार्यं करोमीत्येवं
50A प्रथमं भावस्य स्वभावः । कार्यक्रियायां चासौ मा निवर्त्तिष्ट, अपरिपन्थित्वात् । तथापि कार्यनिष्पत्तौ निवर्त्स्यत्येव, अवधेः पूर्णत्वात् । अधिकप्रवृद्धापि क्षुदन्या प्रपीतशीताम्भसः पुंसः प्रशाम्यति । सहकारिसन्निधाने करोमीति च स्वभावस्य कार्यमवधिः । तच्च निरपद्यत । ततो निवर्त्ततां कार्यनिष्पत्तौ पूर्वं रूपम् । अथ न निवर्त्तते तदोत्तरमपि कार्यनिष्पत्तिकालोत्तरमपि जनयेत् । भावस्य हि स्वरूपसामर्थ्यं सहकारिसन्निधानं च कार्यप्ररोहं प्रति प्रयोजकम्, तच्च द्वयमपि कार्यनिष्पत्तावप्यस्ति, ततः पुनरपि तज्जननप्रसङ्गः । तस्मात् प्रथमं भावस्य सहकारिसन्निधाने कार्यं करिष्यामीति वा करोमीति वा स्वभावोऽस्तु तथापि कार्यस्याऽसतः
50B क्रियां सतश्चाक्रियामभिलषता पूर्वस्वभावपरित्यागोऽनभीष्टोऽपि रोगोपशमककटुकौषधपानमिव लोचने निमील्याऽनुमन्तव्यः ।

स्यादेवम्—समर्थोऽपि भावो निष्पन्नत्वात् कार्यं पुनर्निष्पादयितुं न प्रभवति । न खलु कृतस्य करणमस्तीति । अत्राह—एवमयं नित्यैकरूपो भावः शाश्वतसकलस्वभावो भवेद् यदि प्रसह्य कृकाटिकां भक्त्वा निष्पन्नमपि कार्यं कुर्यात् । अयमर्थः—समर्थस्योत्पादयतोऽपि भावस्योत्पन्नत्वात् किं कार्यं पुनर्नोत्पद्यते उत भावो निष्पन्नं कार्यमुत्पादयितुं न समर्थायते ? तत्रोत्पादानभिमुखेऽपि कार्ये भावस्योत्पादनशक्ति-
51A रस्तीति वदतो वादिनो वदनपिधानादन्यः को दण्डः । न खलु 'पश्यत्येव जात्यन्धो रूपम्, किन्तु रूपमेव कुतोऽपि कारणादन्धस्य नात्मानं दर्शयति' इत्येवमुद्भूतसन्निपातादन्यो वदति । ततः समवहितसकलप्रत्ययान्तरस्य कारणस्य सामर्थ्यं कार्योत्पादेन व्याप्तम् । स निवर्त्तमानः स्वं व्याप्यमादाय विनिवर्त्तत इति निष्पन्नत्वादपि कार्यमकुर्वन् भावः कार्यनिष्पत्तौ निवृत्तपूर्वस्वभाव एव । न च कार्यनिष्पत्तौ झटित्येव सहकारिणः पलायन्ते येन तदभावो भावस्य पुनः कार्यानुत्पादनेऽवलम्बनं स्यात् । प्रागभावस्य सहकारिणोऽभावः इति चेत्; तर्हि प्रागभावाभावे कार्यसत्ता कार्योत्पत्तिविरुद्धा स्यात् । ततश्च विरुद्धसहकारिसन्निपाते कारणस्य तेदवासामर्थ्यमायातमिति ।

१ कार्योत्पत्तौ वा निवृत्तिः ॥ २ करिष्यामीत्येवं स्वभावः । * पूर्वं लिखित्वा पश्चाद् ग्रन्थकारेण घृष्टमिवेदं दृश्यम् इति भाति ॥ ३ उत्तरमपि वा जनयेत् ॥ ४ कार्यं ॥ ५ एवमयमक्षीणोऽशेषरूपो यदि प्रसह्य कृतमपि करोति ॥ ६ अत्र विकल्पद्वयम् ॥ ७ यत्र यत्र कारणसामर्थ्यं तत्र तत्र कार्योत्पादः ॥ ८ कार्यसम्बन्धिनः ॥ ९ कार्यस्य ॥ १० सति ॥ ११ पूर्वस्वभावविगमो नाम ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नन्वस्तु पूर्वं भावस्य सामर्थ्यं कार्यनिष्पत्तौ चासामर्थ्यमप्यस्तु तथापि न
51B विरुद्धधर्माध्यासेन [1]भेदः, विरोधाभावात्[6]। यदा यत् कार्यं प्रति सामर्थ्यं तदैव हि तत् कार्यं प्रत्यसामर्थ्यं परस्पराभावरूपत्वाद् विरुद्धम् । न पुनरन्यदा । [2]समवहितसहकारिणश्च भावस्य प्रथममसति कार्ये सामर्थ्यं सति च पश्चादसामर्थ्यम् । न चानयोर्विरोधः, कालभेदात् । अथवा यथा बीजेन स्वभावदेश एव स्वाभावः प्रतिक्षिप्यते न देशान्तरेऽपि तथैवासामर्थ्यमपि सामर्थ्यकाल एव प्रतिक्षिप्यते न कालान्तरेऽपि । ततो यदि नाम कुसूलस्थं बीजमसमर्थं क्षेत्रस्थं च समर्थं तथापि नानयोर्भेदः, भिन्नदेशयोर्भावाभावयोरिव भिन्नकालयोः सामर्थ्यासामर्थ्ययोरविरोधात् । अविरुद्धधर्माध्यासेनापि भेदेऽतिप्रसङ्ग इति ।

तत् किनयमास्माकीनः कूटस्थनित्यताभङ्गोपन्यासप्रयासः परस्परविरुद्धधर्माध्यासेन भावानामेकान्तक्षणिकताप्रसाधनपर्यवसानस्त्वया व्यबोधि येन विरोधपरिहारोपायं कालभेदम् उपकल्पितवानसि । वयं हि द्रव्यतया नित्यस्यैव भावस्य समर्थत्वपर्यायापगमेन नाशित्वमाचक्ष्महे । ततो नाम भिन्नकालयोः सामर्थ्यासामर्थ्ययो
52A विरोधो मा भूत्, तदभावाद्धर्मिभेदोऽपि मा प्रसाङ्क्षीत् । समर्थत्वपर्यायापगमश्चेदङ्गीकृतस्तावतापि कूटस्थनित्यताभङ्गप्रवणोऽस्मदुपन्यासप्रयासः साफल्यमगात्, पर्ययरूपतयैव द्रव्यस्योत्पाद-विनाशाभ्युपगमात् ।

अथवा विरुद्धधर्माध्यासोऽपि समर्थ्यते । भिन्नविषयाणां सामर्थ्यासामर्थ्यकरणाकरणादीनां विरोधोक्तावुभयसम्प्रतिपन्नो व्यभिचारो दृष्टः । एकस्यैव बीजस्याङ्कुरं प्रति सामर्थ्यं करणं च तदैव शिलाशकलं प्रत्यसामर्थ्यमकरणं च, [3]ततोऽमीषां विरोधकारणमेकविषयत्वमुच्यते । सत्यपि चैकविषयत्वे भिन्नरूपाणामुभयसम्प्रतिपन्नो विरोधो व्यभिचारो दृष्टः । बीजस्याङ्कुरं प्रति सामर्थ्यं करणं च तदैव शिलाया असामर्थ्यमकरणं च । ततः सामर्थ्यादीनां विरोधकारणमुभयमेकविषयत्वमेकरूपत्वं चोच्यते । [4]एतयोः पुनः सतोः कालभेदेऽपि न क्वचिदुभयसम्प्रतिपन्नो व्यभिचारो-
52B ऽस्ति [5]येन कालभेदोऽपि सामर्थ्यादीनां विरोधकारणमाद्रियते, तथा च [7]तन्निवृत्तौ विरोधोऽपि निवर्त्तेत ।

१ सामर्थ्यासामर्थ्यरूपेण ॥ २ पदार्थस्य ॥ ३ सन्निहित ॥ ४ सामर्थ्यासामर्थ्ययोः ॥ ५ आ[चार्यः] ॥ ६ विरोधाभावात् ॥ ७ कालभेदेऽपि सामर्थ्यासामर्थ्ययोः सतोः पदार्थस्य भेदः समर्थ(र्थ्य)त इत्यर्थः ॥ ८ भिन्नो विषयो गोचरो येषां सामर्थ्यादीनाम् ॥ ९ अवद्यमानतोक्तौ ॥ १० सामर्थ्यासामर्थ्यकरणाकरणानाम् ॥ ११ अङ्कुरलक्षणे कार्ये ॥ १२ कारणानां जनकानामित्यर्थः ॥ १३ विरोधाभावः ॥ १४ एकविषयत्वैकरूपत्वयोः ॥ १५ सामर्थ्यादीनां विरोधोऽस्त्येवेत्यर्थः ॥ १६ व्यभिचारादर्शनेन विरोधदर्शनेनेत्यर्थः ॥ १७ कालभेदनिवृत्तौ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अपि च, यः कालभेदः सन्नपि [1]रूप-विषययोर्भेदे व्यभिचारात् सामर्थ्यादीनां विरोधं नाविर्भावयति स कथमात्मनिवृत्त्या तेषां विरोधमभावयेत् ।

ननु [2]रूप-गोचरभेदापेक्षः कालभेदो विरोधमभावयत्येव । न खलु रूप-काल-गोचर(रा?)भेदे क्वचिदपि व्यभिचारोऽस्ति । न चेन्धनरहितो वह्निर्न धूमे कारणमिति सेन्धनोऽपि न कारणम् । एवं तर्हि रूप-गोचरभेदावेवास्ताम्, कृतमन्तर्गडुना काला-भेदेन, तयोः सर्वत्राव्यभिचारात् । अस्त्येव कालभेदे बीज एव व्यभिचार इति चेत्, अहह विवादाध्यासितेनैव व्यभिचारमुद्भावयतस्तत्रभवतो भवतो न्यायनैपुणम्, कालभेदे[3] हि बीजे विरोधो विचारयितुमारब्धोऽस्ति, ततः कथं तत्रैव व्यभिचार-
53A मुद्भावयसि । यदि पुनर्यथाऽस्माभी रूप-गोचरभेदे कालभेदस्य "व्यभिचारो विवादपदा-दन्यत्र दर्शितस्तथा रूप-गोचराभेदयोरपि दर्शयसि तदा त्वमेवासि नैयायिकप्रकाण्डम् ।

तदयं वस्तुसङ्क्षेपः । भावस्य सामर्थ्या-ऽसामर्थ्यादिर्युगपदेकविषयत्वमेकरूपत्वं च विरोधे प्रयोजकम् । स्वरूपभावाभावयोः पुनरेकदेशत्वमेव[4] । अत एवो(वे?)हस्थं बीजं देशान्तरस्थं स्वाभावं न प्रतिक्षिपति । कालभेदस्तूभयत्रापि व्यभिचारित्वाद् दुर्मित्रमिव सम्भाषणमात्रमपि नार्हति ।

नन्वेकरूपत्वादावपि सामर्थ्यादीनि सन्ति, अङ्कुरं प्रत्यसमर्थ एव हि बीजद्रव्ये बीजभावव्यत्येव च भूतले कालान्तरेण सामर्थ्यस्य बीजाभावस्य च जैनैरेवोपगमात् । न सन्ति । बीज-भूतलद्रव्ययोरेकान्तेनैक्याभावात्, पर्यायनाशे द्रव्यस्यापि कथञ्चि-न्नाशात् । एकान्तेनैकरूपत्वादेश्च सामर्थ्यादीनां विरोधकत्वात् । एतावत्तु परस्य वक्तु-मवशिष्यते—रूप-गोचरभेदवत् कालभेदोऽपि किन्नाविरोधक इति । तत्र प्रमाणा-भावादिति ब्रूमः । रूप-गोचरभेदे तु प्रत्यक्षमेव प्रमाणम् । तस्मात् सामर्थ्यादीनां विरोधोऽस्ति । तथा च समर्थासमर्थयोर्भेद एवेति ।

१ स्वरूप ॥ २ विरोधस्य ॥ ३ विरोधस्याभावं कुर्यात् । ४ कारणस्य ॥ ५ * 'कालाभेदो' इति पूर्वं लिखितमासीत्, पश्चात्तु ग्रन्थकारेणैव दृष्ट्वा 'कालभेदो' इति पाठोऽत्र विहितः ॥ ६ * 'कालगोचराभेदे इति पूर्वं लिखितमासीत्, किन्तु ग्रन्थकारेणैव पश्चात् सम्यग् दृष्ट्वा "कालगोचरभेदे' इति पाठोऽत्र विहितः । इदं तु ध्येयम्-पूर्वं लिखितः 'कालगोचराभेदे' इति पाठः समीचीन एव भाति, तथापि ग्रन्थकृता दृष्ट्वा किमर्थं "कालगोचरभेदे' इति पाठो विहितस्तद् वयं न जानीमः ॥ ७ आचा[र्यैः] ॥ ८ '१' [=प्रथमान्तम्] ॥ ९ रूपगोचराभेदयोः ॥ १० सति ॥ ११ विरोधस्य ॥ १२ करण, अकरण ॥ १३ विरोधे प्रयोजकम् ॥ १४ * 'उहस्थम्' इत्यस्य अर्थो न ज्ञायते । 'इहस्थम्' इति पाठः करुणनीयो भाति ॥ १५ '७' [=सप्तम्यन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कुर्वतोऽपि यतो हेतोर्यत् कार्यं नैव जायते ।
शक्तः स तस्मिन्नित्येतत् सन्निपातान्वितं वचः ॥
द्रव्यतो [1]नित्यरूपाणां पर्यायविगमोदयैः ।
नाशोत्पादान् प्रपद्यन्ते भावानां सर्वदर्शिनः ॥
अविरोधे कालभेदात् सामर्थ्यादेः प्रकल्पिते । 5
धर्मिनाशो निरुद्धः स्यान्न पुनः पर्ययव्ययः ॥
रूप-गोचरयोरैक्ये सामर्थ्यादेर्विरोधके ।
सिद्धे कालैकता पुष्यात् कैमर्थ्य व्यभिचारिणी ॥ इति ।

53B यदपि चात्रान्तरे कुसूलमूलावस्थितस्य बीजस्याङ्कुरं प्रत्यसामर्थ्यवादिनं बौद्धमाश्रित्याभ्यधायि, यथा—"यदङ्कुरं प्रत्यप्रयोजकं न तद्बीजजातीयं यथा शिला- 10
शकलम्, अङ्कुरं प्रत्यप्रयोजकं च कुसूलनिहितं बीजमभ्युपगतं [9]परैरिति व्यापकानुपलब्धिः प्रसङ्गहेतुः । बीजत्वं तस्य प्रत्यक्षसिद्धमशक्यापह्नवमिति [10]चेत्, अस्तु तर्हि विपर्ययः—यद्बीजं तदङ्कुरं प्रति प्रयोजकम्, यथान्त्यसामग्रीमध्यमध्यासीनम् । बीजं चेदं विवादपदमिति स्वभावहेतुः" [ ] इति ।

तदपि नातिचतुरम् । तथाहि—किमिदं बीजजातीयत्वम्? यद्युभयसम्मत- 15
सामर्थ्येन प्राप्तोच्छूनावस्थेन बीजेन सादृश्यमुच्यते, तन्निषेधोऽभीष्ट एव, उच्छूनत्वाभावस्य कुसूलस्थिते बीजे प्रत्यक्षसिद्धत्वात् । अथ बीजमेतदिति प्रत्ययजनकत्वं बीजजातीयत्वमातिष्ठसे तर्हि तन्निषेधो न शक्यक्रियः, प्रत्यक्षबाधितत्वात् । न
54A चैतावता विपर्ययः सिध्यति । न वै गौर्गोप्रत्ययं प्रति समर्थो दोहं प्रत्यपि समर्थायते, वन्ध्यगवीभिर्व्यभिचारात् । ततो यथा गोप्रत्ययं प्रति समर्था अपि न सर्वा एव गावो दोहमर्हन्ति । किं नाम? अवान्तरविशेषविशिष्टा एव काश्चन । तथा बीजमपि 20
न यावत् सर्वं बीजप्रत्ययमुपजनयितुमलं तावदङ्कुरमपि, किं नाम? उच्छूनत्वविशेषसमलङ्कृतं किञ्चिदेव ।

ननु वन्ध्यगवीषु गोप्रत्ययसामर्थ्यं न कदाचिदपि दोहसामर्थ्यनान्तरीयकं
54B साक्षादक्रियत । ततस्तासु व्यभिचारोऽस्तु । बीजे पुनः क्षित्यादिसन्निधौ बीजप्रत्ययोपजनकत्वमङ्कुरोपजनकत्वाविनाभावि व्यभाव्यत । ततः सर्वावस्थास्वपि 25
तथैव निश्चीयत इति ।

१ स्थितिमताम् ॥ २ '६' षष्ठयन्तम् ॥ ३ कार्ये ॥ ४ सती ॥ ५ बौद्धम् ॥ ६ नैयायिकैः ॥ ७ बौद्धैः ॥ ८ कुसूलस्थस्य बीजस्य ॥ ९ बौद्धवचनम् ॥ १० नैयायिक आह—सर्वोऽपि प्रसङ्गो विपर्ययनिष्ठो यतः ॥ ११ कुसूलस्थमित्यर्थः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवं तर्हि बालगव्यामपि दोहसामर्थ्यमस्तु, गोप्रत्ययोत्पादकत्वादन्ते दोहदर्शनाच्च । तथा च भवादृशा रन्ध्रान्वेषिणस्तद्दुग्धपानादोजस्विनो भवन्तु येन सूचिप्रवेशेऽपि मुसलं प्रवेशयितुमीशते । ननु बालगव्येव विजातत्वविशेषवती दोहं ददाति, ततः को व्यभिचारः । एवं तर्हि कुशूलावस्थमेव बीजमुच्छूनावस्थामवाप्याङ्कुरमुत्पाद-
55A यतीत्यत्र किमवद्यम् । न हि वयं बौद्धा इवैकान्तक्षणिकं वस्तु प्रतिपन्नीपद्यामहे स्म, 5
कथञ्चिदन्वयस्याप्यनुज्ञानात् । अत्रैव तु विप्रतिपत्तिः—त्वं व्यतिरिक्तसहकारिसन्निधानलक्षणं विशेषं प्रत्यशृणोः, वयं तु बीजस्वरूपनिवेशिनमभ्युपागमाम । तत्र वयं विजयिनः, अधिज्यधन्वनः प्रत्यक्षस्यास्मत्पाक्षिकत्वात् व्यतिरिक्तसहकारिसन्निधानातिरिक्तस्यावयवशैथिल्यापरनाम्नो बीजस्वरूपाभिन्नस्योच्छूनत्वविशेषस्य पामरैरपि प्रत्यक्षलक्ष्यत्वात् । तथा प्रसङ्गविपर्यये यद्यङ्कुरप्रयोजकत्वं क्षित्यादिसन्निधाविव साक्षात् 10
साध्यते तदा प्रत्यक्षबाधा, अथ परम्परया तदा सिद्धसाध्यता । न चैवं भवतामन्वयसिद्धिर्भिन्नस्यापि परम्पराकारणत्वात्, तस्मात् प्रसङ्गोऽपि प्रसङ्गविपर्ययोऽपि न नित्यैकान्ततां साधयति कथञ्चिन्नाशवादिन इति ।

क्षित्यादिसन्निधौ याति बीजं शैथिल्यविक्रियाम् ।
55B प्रमाणं जगदित्यत्र न वयं पक्षपातिनः ॥ १ ॥ 25
तथापि तार्किकम्मन्याः केचिदाहुरिदं बुधाः ।
सेाहित्यमेव साहाय्यं सहायानां न विक्रिया ॥ २ ॥
क्षणिकैकान्तसिद्धान्ते बीजमङ्कुरकारणम् ।
स्थाने साधयितुं नाऽस्मास्वन्वयस्यानुमन्तृसु ॥ ३ ॥ इति

यत् पुनर्व्याहृयत—"विवादाध्यासितं बीजं सहकारिवैकल्यप्रयुक्ताङ्कुरादि- 20
कार्यवैकल्यम्, तदुत्पत्तिनिश्चयविषयीभूतबीजजातीयत्वात्, यत् पुनः सहकारिवैकल्यप्रयुक्ताङ्कुरादिकार्यवैकल्यं न भवति न तदेवम्भूतबीजजातीयं यथा शिलाशकलम्" [ ] इति, तदाकर्णनमपि नार्हति, अनैकान्तिकत्वात् । समवहितक्षित्यादिकं हि बीजमङ्कुरोत्पादात् सहकारिवैकल्यप्रयुक्ताङ्कुरादिकार्यवैकल्यं न भवति, अथ चैवम्भूतबीजजातीयमिति । 25

तथा यदपि चावादि—"किं तस्य सहकारिणा क्रियते? न किञ्चित् । किं तर्हि? तत्सद्भावे कार्यमेव, अन्यथा हि सहकारित्वायोगात् । यदिवा तस्य

१ सहितानां मिलितानां भावः ॥ २ कुशूलस्थम् ॥ ३ युक्तम् ॥ ४ कुशूलस्थम् ॥ ५ तस्य अङ्कुरस्योत्पत्तिः, तस्या निश्चयः ॥ ६ अपि तु स्वरूपेण यद् यज्जननविकलं न तत् तज्जातीयं यथा शिलेति ॥ ७ अङ्कुरोत्पत्तिनिश्चयविषयीभूतबीजजातीयम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सामर्थ्यं कारकसाकल्यमेव क्रियते, तत्सद्भावे कार्यदर्शनात् । असामर्थ्यं तु वैकल्यं
56A निवर्त्तते साकल्य-वैकल्ययोः परस्परं सहस्थितिविरोधात् । न च तयोराविर्भाव-तिरोभावाभ्यां भावस्य तथाभावप्रसङ्गः" [ ] इति, तदपि निरस्तम् । तथाहि—सहकारिणा यत् कार्यं क्रियते तत्राऽकारकत्वप्रसङ्गाद् भावस्यापि व्यापारः परासाधारणः कश्चिदभ्युपेयः, स च पूर्वं नासीत् । अन्यथा तदन्यथानुपपत्त्या सहकारिणामपि सन्निधानप्रसङ्गात् तत्सद्भावेन पूर्वमपि कार्योत्पत्तिः स्यात् । स च व्यापारः सहकारिकृतस्तदन्वय-व्यतिरेकानुविधानात् । भेदे च सम्बन्धाभावादकारकत्वस्य तादवस्थ्यप्रसङ्गेनाभिन्न एवासौ क्रियते । तथा चानित्यत्वमेव भावस्य, व्यापारवद् व्यापारिणोऽप्यभेदेन करणप्रसङ्गात् । कारकसाकल्यपक्षेऽप्ययमेव दोषः ।

अपि च, अनुपकारिणमपि सहकारिणमपेक्ष्य चेतनो भावः स्वेच्छावृत्तितया समयवशात् क्रियासु प्रवर्त्तेतापि, अचेतनः पुनरनुपकारिसहकारिसन्निधाना-ऽसन्निधानयोरविशिष्टः । तदयमन्धपदविन्यासवदसन्निधानेऽपि सन्निधानमिति कार्ये प्रवर्त्तेत,
56B सन्निधानेऽप्यसन्निधानमित्युदासीत, उपकाराधानप्रतोदाभावस्योभयत्रापि तुल्यत्वादिति ।

57A अन्यस्त्वाह—"सहकारिभिर्न [10]हेतोर्विशेष आधीयते, न चानुपकारिणामनपेक्षा, कार्यस्योभयभावाधीनस्वभावत्वात् । एकैकस्माद् व्यभिचारादुभयाधीनजन्मत्वादुभयो[11]र्हेतुता कल्प(ल्प्य ?)ते" [ ] इति । एतदपि न पेशलम्, कार्यस्य ह्युभयाधीनत्वकल्पने कैवल्यावस्थायां हेतोरसामर्थ्यं स्वतएवाभ्युपगतम्, कथमन्यथा कार्यमुभयमपेक्षत इति ।

तदेवं व्ययमुपपाद्य स्थितिमुपपादयति—

तत् प्रतिक्षणं कथञ्चिद् विकारिण एवार्थक्रिया । एकान्तक्षणिकेऽपि तदयोगात्, निरन्वयनाशिनैः कार्योत्पत्त्यभावात् । न हि निरुपाख्यस्य जन्माभिसम्बन्धः, सर्वतः सर्वस्यानुत्पादात् ।

[12]तत् तस्मात् कथञ्चिन्न सर्वथा विकारिणो विनश्वरस्य । [13]एकान्तेन क्षणिकेऽपि न केवलं नित्ये, तदयोगात् तस्या अर्थक्रियाया अघटनात्, निरन्वयनाशिनः सर्वथाऽपि

१ साकल्यवैकल्ययोः ॥ २ कृत्वा ॥ ३ आविर्भावतिरोभाव ॥ ४ व्यापार ॥ ५ सहकारिणामभावे व्यापारस्याप्यभावः । कुशूलस्थस्यापि बीजस्य व्यापारश्चेदङ्गीकृतः सहकारिणामपि प्रसङ्गः ॥ ६ सहकारिसन्निधानसद्भावेन ॥ ७ '३' [=विग्रहे तृतीयान्तम्] ॥ ८ यद् यदन्वयव्यतिरेकानुविधायि तत् तत्कार्यम्, यथा मृदन्वयव्यतिरेकानुविधायि घटादि मृत्कार्यम् ॥ ९ व्यापारः ॥ १० कारणस्य ॥ ११ हेतुसहकारिद्वय ॥ १२ '५' [=पञ्चम्यन्तम्] ॥ १३ तत् प्रतिक्षणं कथञ्चिद्विकारिण एवार्थक्रिया ॥ १४ एकान्तक्षणिकेऽपि तदयोगात् ॥ १५ निरन्वयनाशिनः कार्योत्पत्त्यभावात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ध्रौव्यपरिहारेण विनश्वरात् कार्यस्योत्पादाघटनात् । [1]हिर्यस्मान्न निरुपारव्यस्य सर्वो-
57B पारव्यांशून्यस्य जन्माभिसम्बन्ध उत्पादक्रियासमावेशो घटते । यदा हि पर्यायरूपतया कारणं विनश्यति द्रव्यरूपतया चावतिष्ठते तदावस्थितं रूपमुत्पादेनाभिसम्बध्यते, तस्यैवोत्तरपर्यायरूपेण भावात् । यदा पुनर्द्रव्यात्मतयाऽपि कारणं विनश्यति तदा न कस्यचिदप्युत्पादः स्यात्, सर्वथाऽप्यसतो जन्माभिसम्बन्धाभावात् । सर्वतः सर्वस्मात् कारणात् सर्वस्य कार्यवर्गशः शालिबीजात् कोद्रवाङ्कुरादेरनुत्पादात् । यदि हि सर्वप्रकारमसदपि जन्माभिगच्छति तदा किमित्येकस्माच्छालिबीजात् स्वाङ्कुरवदशेषाङ्कुरप्रसवो न भवति, सर्वत्रासत्त्वाविशेषात् । तस्मान्नियतान्नियतस्यैवोत्पाददर्शनात् कथञ्चित् सत एव जन्माभिसम्बन्ध इति विमृश्यते । कारणस्य च द्रव्यरूपतयावस्थितिरेव कार्यस्य कथञ्चित् सत्त्वम्, परिणामिकारणस्यैव कार्यभावाभ्यनुज्ञानात् ।

कारणशक्तिनियमोऽपि असत्त्वाविशेषादसन् । कारणान्यपि कार्यजननसामर्थ्यमात्रमनवधिकं जनयेयुः, अवधेरभावात् ।

58A स्यादेतत्—असत्त्वाविशेषेऽपि यदेव कारणेनोत्पाद्यते तदेवोत्पाद्यते, नापरम् । कारणानां च सहकारिणामिव प्रतिनियतमेवोत्पादयितुं शक्तिः, ततोऽसदुत्पादेऽपि न सर्वोत्पादप्रसङ्ग इति । तन्न । यस्मात् [2]कारणशक्तिप्रतिनियमोऽप्यसत्त्वाविशेषात् सर्वकार्याणामेकान्तासत्त्वस्य तुल्यत्वादसन् अघटमानकः । यथैव कोद्रवाङ्कुरोऽसन् शाल्यङ्कुरोऽपि तथैवासंस्ततः किमित्यसत्त्वाविशेषेऽपि शालिबीजस्य स्वाङ्कुरप्रसवे शक्तिर्न कोद्रवाङ्कुरप्रसवे? [3]नन्वु तत्रापि शक्तिः प्राप्नोति यदि सत्यं न पक्षपातोऽस्ये ।

ननु शालिबीजस्य शाल्यङ्कुर एवात्मीयो न कोद्रवाङ्कुरस्ततस्तत्रैव शक्तिर्नान्यत्रेति । तदेतदात्मीयत्वं शाल्यङ्कुरस्य शालिबीजादुत्पादनिबन्धनम् । स चोत्पादोऽस्म-
58B दुक्तनीत्या कोद्रवाङ्कुरस्याप्युपस्थितः, ततः सोऽप्यात्मीय एवेति तस्यापि जननप्रसङ्गः । यत् पुनः सहकारिणो[4] भेदाविशेषेऽपि नियतमेवोत्पद्यते तत् सङ्गतमेव । [5]ते ह्युपादान-

१ न हि निरुपारव्यस्य जन्माभिसम्बन्धः ॥ २ व्यक्ति ॥ ३ कारणशक्तिनियमोऽपि असत्त्वाविशेषादसन् ॥ ४ * अत्र 'अथो' इति 'अत्रो' इति वा सूक्ष्माक्षरैर्लिखितं टिप्पणं वर्तते, यदि 'अत्रो' इति लिखितं तदा 'अत्रोत्तरम्' इति सम्पूर्णपाठस्य सङ्केतः प्रतिभाति ॥ ५ शालिबीजस्य ॥ ६ प्रसः [=प्रथमसमासो बहुव्रीहिरित्यर्थः, उत्पादो निबन्धनं यस्य तत् तथा इति भावः] ॥ ७ '५' [=पञ्चम्यन्तम्] ॥ ८ शाल्यङ्कुर-यवाङ्कुरौ सहकारिणः सकाशादेकान्तभिन्नावपि परं तमालम्ब्य एक एवो[त्प]द्यमानो दृश्यते ॥ ९ सहकारिणः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

परतन्त्राः । अत एव सहकारिणः । ततश्चोपादानस्य प्रतिनियतकर्तृतायां तेषामपि तथाभावः, राज्ञो धनार्जने पदातिधनार्जनवत् ।

ननु सर्वकार्याणामसत्त्वाविशेषेऽपि स्वकारणैः कारणानां प्रतिनियतकार्यजनने एव शक्तयो वितेनिरे, ततः कारणान्येवात्रापराध्यन्ति यान्यसत्त्वाविशेषेऽपि प्रतिनियतकार्यजननशक्तीनेवोत्तरक्षणानुत्पादयन्ति, न वयम्, केवलं वयं दूरस्थिता एव द्रष्टार इति । तन्न । यतः कारणान्यपि[1] उपसर्पणहेतवोऽपि कार्यजननसामर्थ्यमात्रमनन्तरकारणानामनवधिकमस्मिन् कार्ये जननसामर्थ्यं नास्मिन्नित्येवमवधिरहितं जनयेयुः । 59A अवधेः[2] कस्यचिदपि अभावात्, कारणसत्ताकाले सर्वस्यापि भाविनः कार्यराशेः सर्वथाप्यसत्त्वात् । यदि हि शालिबीजहेतुसत्तायां लेशतोऽपि शाल्यङ्कुरः सन् स्यात् कोद्रवाङ्कुरश्च सर्वथाप्यसंस्तदाऽसौ शाल्यङ्कुरावधिकं शालिबीजस्य कार्योत्पादसामर्थ्यमर्पयेद् न कोद्रवाङ्कुरावधिकम् । यदा तु द्वावपि शालिकोद्रवाङ्कुरौ सर्वथाऽप्यसन्तौ तदा शालिबीजहेतुरुभयविषयं वा जननसामर्थ्यमुपजनयेदवध्यनपेक्षं सामर्थ्यमात्रं वा । प्रतिनियतविषयं तु न घटत एव ।

ततो यदवादीद्—"यत्पुनरसता कार्येण कारणस्य न स्वभावाव्यच्छेद इति तन्मौर्ख्यस्याप्यधिष्ठातृदेवताप्रतिममुपहासास्पदम्, यतोऽव्यच्छेद इति न[7] विशिष्टतापादनम् । तदपि चाल्पमुच्यते—असता न सम्भवतीति, सताऽपि नोपपद्यते । न हि सदपि सन्तमर्थं विशेषीकरोति । ततो न कार्येण तथाविधोऽव्यच्छेदोऽपि तु स्वकारणेनैव, तत एव तस्य तत्कार्यजनकस्योत्पत्तेः" [ ] इति तदेवानाप्रियप्रलपितमित्यवगण्यते, यतोऽवधेरभावादित्यनेन नोच्यते 'असता कार्येण कारणस्य प्रतिनियता शक्तिर्न शक्यते कर्तुम्' । किं नाम ? इदमुच्यते—असत्यवधावुपसर्पणहेतवोऽन्त्यक्षणानां प्रतिनियतजननशक्तिमाधातुं न शक्नुवन्तीति । उपसर्पणहेतवश्च सन्तः । अन्त्यक्षणाश्चासन्तः । सतां चासत्सु सामर्थ्यासामर्थ्यचिन्तायां किमसत्कार्यवादिनो बौद्धस्योपहासास्पदम् ?

१ '७' [=सप्तम्यन्तम्] ॥ २ कारणान्यपि कार्यजननसामर्थ्यमात्रमनवधिकं जनयेयुः ॥ ३ कारणकारणानीत्यर्थः ॥ ४ अवधेरभावात् ॥ ५ बौद्धं(द्धः ?) जैनं प्रति ॥ ६ नियतकार्यं प्रति जनकोऽसौ इति स्वरूपाव्यच्छेदः ॥ ७ विशिष्टं कार्यं स्वया जनयितव्यमित्युल्लेखेन ॥ ८ कार्येण ॥ ९ कार्येण ॥ १० विशिष्टतापादनम् ॥ ११ कार्यम् ॥ १२ सर्वस्यापि पदार्थस्य क्षणिकत्वात् ॥ १३ कारणस्य ॥ १४ जैनेन ॥ १५ पूर्वकारणानि ॥ १६ अनन्तरकारणानाम् ॥ १७ विशिष्टकार्यजननलक्षण ॥ १८ कार्यस्याः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एवं चैतदपि[1] प्रत्याख्यायि–"अतेदात्मत्वेऽपि क्षीरस्य स तस्यै स्वभावो यो दधिजननो न शशविषाणजननः । स तस्य कुत इति चेत्, स्वहेतुसमुत्थ इत्यनादिर्हेतुपरम्परा" [ ] इति ।

नियतदर्शनं नियतोत्पादाविवादे नियतशक्तिमवगमयेत् ।

[2] स्यादेवम्–असत्त्वाविशेषेऽपि तावत् प्रतिनियतस्यैवोत्पादो दृश्यते, अतोऽवश्य- 5
भावेऽपि कारणानां प्रतिनियतकार्योत्पाद एव शक्तिरनुमीयते । कार्यैकसमधिगम्या अतीन्द्रियाः कारणशक्तयो न विचारकविचारवशतो लक्षयितुं शक्यन्त इति । न । नियतेति । नियतं कार्यमुत्पद्यमानमुपलभ्य कारणस्य प्रतिनियतकार्यजननशक्तिरव-
[3A] गम्येतापि यदि नियतोत्पादो निर्विवादो भवेत् । किन्तु नियतोत्पाद एवासत्कार्य- 10
वादे चिन्तनीयोऽस्ति, असत्त्वाविशेषात् सर्वस्योत्पादप्रसङ्गात् । ततः कथं नियतो-
त्पादः सविवादः कारणस्य नियतशक्तिमवगमयेत्, मशकवर्त्तिरूपेण सन्दिह्यमानाद् धूमादपि धूमध्वजानुमानप्रसङ्गात् । किञ्च, यदि सर्वथाप्यसत्कार्यं तदा कारणस्य कारणत्वमपि न प्राप्नोति कार्यापेक्षित्वात्तस्य, कारणस्य सर्वथाप्यसत्त्वे भावकार्यत्व-
[4] वैत्, तदपेक्षित्वात्तस्य । कार्यजन्मनि तु कारणत्वाभ्युपगमेऽकारणादुत्पत्तिः स्यादिति । 15

सम्प्रति परोपहासकरणाय प्राह–

**उत्पत्तिर्भावसत्तैव । नास्याः प्रतिपत्ताऽस्ति । किन्तु कुतोऽप्यतर्कितेयमुपलभ्यत इति । क एवं वादी सम्भवति? मुहुर्मुहुः प्रपीयमानातिस्निग्धदुग्धरसोपचयोपचिताजीर्णदोषेणाऽपि नाम भिक्षुः सम्भवति । केनचिदात्मना हि सन् शक्येतात्मनि कमपि विशेषमाधातुम् । सर्वथा निरुपाख्यस्तु कं रूपहेतुनियम- 20
मुपादित्सेत? पर्यायोत्पत्तेः द्रव्यं सदवधेः ।**

उत्पत्तिरिति । यैव भावानां सत्ता सैवोत्पत्तिः,न पुनः सत्तातोऽधिकोत्पत्तिक्रिया काचिदस्ति । अस्या भावसत्तारूपाया उत्पत्तेः प्रतिपत्ता य एनामुत्पत्तिमुपश्लिष्यति स नास्ति, किन्तु कुतोऽपि कारणविशेषादतर्किताऽज्ञाता इयमुत्पत्तिरुपलभ्यते । कं एव-

---

१ चोद्योक्तम् ॥ २ अदध्यात्मत्वेऽपि ॥ ३ क्षीरस्य ॥ ४ नियतदर्शनं नियतोत्पादाविवादे नियत- 25
शक्तिमवगमयेत् ॥ ५ पदार्थस्य ॥ ६ 'ए' [=षष्ठ्यन्तं विग्रहे] ॥ ७ भावस्य कार्यत्वं न प्राप्नोति यथा ॥ ८ कारण ॥ ९ उत्पत्तिर्भावसत्तैव, नास्याः प्रतिपत्तास्ति, किन्तु कुतोऽपि अतर्कितेयमुपलभ्यत इति ॥ १० क एवं वादी सम्भवति? ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ममुना प्रकारेण वादी सम्भवति । इदं हि दैष्टिकवचस्तार्किका नाभिदधत इति वाद्यवगमे वार्त्तिककृत् सचिन्तः समभूत् । ततः क्षणमेकं विमृश्य स्वयमेवैवंवादिनं सम्भावयति—मुहुरिति । अपि नामेति सम्भावनायाम्, सम्भाव्यते ह्येवंवादित्वं
60B निरन्तरं स्निग्धदुग्धोपजीविनो भिक्षोः । अजीर्णशीर्णचैतन्या हि पुमांसोऽश्लीलमप्यभिधातुं सम्भाव्यन्ते । 5

अजीर्णदोषभाषित्वमेव समर्थयते—हिर्यस्मात् केनचिदात्मना येन केनापि स्वभावेन सन् विद्यमानो भावः शक्येतात्मन्युत्पत्तिलक्षणं विशेषमाधातुम्, अवस्थितस्य हि दुःश्रद्धानमपि किञ्चिदक्षिणी निमील्य सम्भाव्यते । सर्वथा निरुपाख्यस्तु यः पुनः केनापि प्रकारेण न सन् स तथा भूतोऽजीर्णदोषोपहतचैतन्यैवचोवाच्यः कं 'घटः पृथुबुध्नोदराद्याकारः' इति रूपनियमं 'चक्र-चीवरादिसामग्र्या उत्पद्यते' इति हेतुनियमं- 10
मुपादित्सेत स्वीकर्तुमिच्छेत्, न कमपीत्यर्थः । केनापि रूपेणावस्थितो ह्यहमेतद्रूपमा-
61A त्मनः प्रपद्येऽस्माच्च कारणादुत्पद्ये इति विचिन्तयितुं सम्भाव्यते । यः पुनः सर्वथाप्यसन् स सर्वरूपः सर्वहेतुभ्यो वा भवतु मा वा सर्वथापि, रूप-हेतुप्रतिनियमस्तु सर्वथाप्यसतो न घटते ।

तथाहि—यद् यस्याऽसहकारिकारणं तत् कथञ्चित् तदात्मकम् । यत् पुनः 15
कथञ्चिद् यदात्मकं न भवति तत् तस्यासहकारिकारणमपि न भवति । सहकारिकारणमेव भवतीत्यर्थः, यथा दण्डो घटस्य । असहकारिकारणत्वं प्रतिनियतरूपकार्यजनकत्वेन व्याप्तम् । कथञ्चित् कार्यात्मकत्वाभावे च कार्यस्य सर्वथाप्यसत्त्वात् प्रतिनियतरूपकार्यजनकत्वाभावः स्यात् । ततः प्रतिनियतरूपकार्यजनकत्वं कथञ्चित् कार्यात्मकत्वोभावाच्चिवर्त्तमानं स्वव्याप्यमसहकारिकारणत्वं निवर्त्तयत् कथञ्चित् 20
कार्यात्मकत्वे व्यवस्थापयतीति स्वभावः । स्वकारणकृतं च प्रतिनियतरूपकार्यजन-
61B कत्वं प्रागेव प्रपञ्चतः प्रतिक्षिप्तमिति परेण न तदुपन्यसनीयम् । इदं च प्रमाणं सर्वथाऽप्यसत उत्पत्तिमेकान्तक्षणिकता-नित्यते च वस्तुनो निराकरोति ।

१ मुहुर्मुहुः प्रणायमानातिस्निग्धदुग्धरसोपचयोपचिताजीर्णदोषेणापि नाम भिक्षुः सम्भवति ॥ २ '३' [=विग्रहे तृतीयान्तम्] ॥ ३ केनचिदात्मना हि सन् शक्येतात्मनि 25
कमपि विशेषमाधातुम् ॥ ४ सर्वथा निरुपाख्यस्तु कं रूपहेतुनियममुपादित्सेत ॥ ५ प्रतः [=प्रथमसमासः, बहुव्रीहिरित्यर्थः] ॥ ६ बौद्ध ॥ ७ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ८ '३' [=विग्रहे तृतीयान्तम्] ॥ ९ * अजीर्णदोषोपहतचैतन्यस्य बौद्धस्य वचसा वाच्य इति भावः ॥ अनन्तरोक्तानां चतुर्णां विष्णोनामिदं तात्पर्यम् ॥ १० [हेतुनियमं] च ॥ ११ उत्तरपर्यायः ॥ १२ ओस् '६' [=षष्ठी-द्विवचने विग्रहे, रूप-हेत्योः प्रतिनियम इत्यर्थः] ॥ १३ कार्यस्य ॥ १४ परिणामिकारणम् ॥ १५ कार्य ॥ 30
१६ कार्य ॥ १७ कार्यस्य ॥ १८, १९ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ २० कारणकारणैः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यतश्च कथञ्चिदेव सत्त्वं साध्यते न सर्वथा तेन यदुक्तं परेण—"यो हि यद्रूपो नोपलभ्यते न स तद्रूपो यथा सुखं दुःखरूपेणानुपलभ्यमानं न तद्रूपम्, तथा च दधिरूपेण नोपलभ्यते क्षीरमिति न तद्रूपम् । सत्त्वं हि तादृशस्य दृश्यस्योपलभ्यतया व्याप्तं तन्मात्रनिमित्तत्वादुपलम्भस्य, उपलम्भाभावाच्च व्याप्यस्यापि सत्त्वस्य निवृत्तिः । इतररूपोपलम्भैश्च तद्रूपानुपलम्भैः" [ ] इति, तदपि प्रत्युक्तं गोरसत्वरूपेणैव 5
परिणामिनि दध्नः सत्त्वाभ्युपगमात्, न दधिरूपेण । तदनुपलम्भस्य चासिद्धत्वात् । ततो यदि क्षीरस्य दध्नो यद्विशेषरूपं दधित्वं तन्निषिध्यते तदा सिद्धसाधनम् । अथ सामान्यरूपं तदा हेत्वसिद्धिः ।

42A तथेदमपि प्रत्युक्तम्—"अथ केयं शक्तिः किं स एव भाव उतान्यदेव किञ्चित् । स एव चेत् तथैवोपलभ्येत, विशेषाभावात् । अन्यश्चेत्, कथमन्यभावे 10
तदस्ति । उपचारमात्रं तु स्यात् । एतेन परत्र भावः प्रत्युक्तः" [ ] इति ।

तस्मान्न निरन्वयस्य जन्माभिसम्बन्धो घटत इति स्थितम् ।

ननु पर्याया असन्तोऽपि प्रतिनियतरूपा एव प्रतिनियतादेव हेतोरुत्पद्यन्ते । कारणान्यप्यवध्यभावेऽपि प्रतिनियतोत्पादशक्तीन्येव दृश्यन्ते । तत् कथमसत्कार्यवादे
42B रूप-हेतुनियमः कारणशक्तिनियमश्च नोपपद्यत इति । उच्यते—पर्याया इति । नासन्तः 15
पर्याया उत्पद्यन्ते, द्रव्यस्यावधेः सत्त्वात् । द्रव्यपर्यायाणां हि परस्परं भेदाभेदौ । ततो द्रव्याभेदार्पणायां पर्याया अपि स्युरसन्तः, द्रव्यस्य सत्त्वात् । पर्यायाभेदार्पणायां च द्रव्यमपि स्यादसत्, पर्यायाणामसत्त्वात् । एवं च न पर्याया असन्त एव, नापि द्रव्यं सदेव, किं तूभयं स्यात् सदसत् । ततो यदि द्रव्यरूपतया सन्तः पर्याया रूप-हेतुनियममुपयच्छन्ते तदा को विरोधः, सर्वथाप्यसत एव रूप-हेतु- 20
नियमाघटनात् ।

तन्न निरन्वयनाशिनः कार्योत्पत्तिः । कार्यकारणभावावगमोऽप्येवं न स्यात्, अन्वयिनो ग्राहकस्याभावात् प्रत्येकं स्व-

१ कार्यस्य शक्तिरूपतया कारणे सत्त्वं साध्यते, न व्यक्तिरूपतया ॥ २ दुःख ॥ ३ आलोकादिसामग्रीयुक्तस्य ॥
४ पिशाचादिव्य[वच्छेदः] ॥ ५ कारणोपलम्भः ॥ ६ मृद्रूपोपलम्भश्चाभूत्, घटोपलम्भश्च नाभूदिति स नास्तीति ॥ 25
७ दृश्ये क्षीरे ॥ ८ गोरसत्व' ॥ ९ गोरसत्वम् ॥ १० अनुपलम्भादिति लक्षणो हेतुः ॥ ११ परिणामिनि दुग्धादौ दध्यादि शक्तिरूपतयास्तीति आशङ्क्योच्यते ॥ १२ दध्यादि ॥ १३ दध्यादिरूपतया ॥ १४ '६' [=षष्ठयन्तं विग्रहे] ॥ १५ दध्यादि ॥ १६ शक्त्या दध्यादेर्जननाद् दध्यादिकं शक्तिशब्देन व्यपदिश्यते ॥ १७ यथा कारणे कार्यसद्भावः तथा कार्ये कारणसद्भाव इत्यर्थः ॥ १८ पर्यायोत्पत्तेर्द्रव्यं सदवधेः ॥
१९ द्रव्येण सहाभेदविवक्षायाम् ॥ २० कथञ्चित् ॥ २१ पर्यायेण सहाभेदविवक्षायाम् ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गोचरमात्रसंवेदनात् । न ह्यगृहीतावधिनाऽवधिमत्त्वग्रहः । विशिष्टोऽपि हि स्वभावो नानवधिः । मा भूदविशिष्ट इति । अनुभवाविदितं च विकल्पयन् विकल्पः कथमुपादेयः स्यात् । तन्न कार्यकारणभावावगमः ।

63A तदित्युपसंहरति, तत् तस्मान्न निरन्वयनाशिनो द्रव्यरूपतयाऽपि विनश्वरात् कारणात् कार्योत्पत्तिर्घटते । [1]कार्येति, एवं निरन्वयनाशाभ्युपगमे हेतु-फलभावावगमोऽपि न स्यात्, [2]अन्वयिनः कार्यकारणकालानुगमवतो ग्राहकस्याभावात् । विज्ञानं हि पदार्थानां हेतु-फलभावावगमोपायः । तच्च क्षणिकत्वात् कार्यकारणकालयोर्भिन्नमेवेत्येकस्य ग्राहकस्याभावः ।

[3]अन्वयिनोऽभावेऽपि कथं कार्यकारणभावावगमो न भवतीति चेत्, उच्यते— प्रत्येकं स्वगोचरमात्रसंवेदनात् । अग्निविज्ञानं ह्यग्निमात्रमेव परिच्छिनत्ति न धूमम्, [4]तदानीं तस्यासत्त्वात् । धूमविज्ञानमप्येवम्, धूमकाले [5]तस्याभावात् । न चायमस्य [6]हेतुरिति कार्यकारणयोरप्रतिसन्धाने हेतुफलभावावगमो युक्तः । प्रतिसन्धानं
63B चैकमुभयग्राहकमृते न घटत एव ।

स्यान्मतम्—अग्निविज्ञानमग्निं परिच्छिन्दद् धूमकारणत्वमपि परिच्छिनत्ति । धूमविज्ञानमपि धूमं परिच्छन्ददग्निकार्यत्वमपीत्येकस्य ग्राहकस्याभावेऽपि कार्यकारणभावावगमो घटत एवेति । तन्न, [7]हि यस्मान्नागृहीतावधिनाऽपरिच्छिन्नकार्यकारणेन ज्ञानेनाऽवधिमत्त्वस्य कारणत्वस्य कार्यत्वस्य च ग्रहो भवति । अग्नेः कारणत्वं हि धूमावधिकं न पुनर्निरवधिकम्, धूमस्यापि कार्यत्वमन्यवधिकमेव । यच्च विज्ञानमवधिं न गृह्णाति तत् कथं [8]तद्ग्रहणनान्तरीयकमवधिमत् कारणत्वं कार्यत्वं वा गृह्णीयात्? तस्मादन्वयिनो ग्राहकस्याभावे कार्यकारणत्वावगमो नोपपद्यत एव ।

स्यान्मतिः—अग्नेर्धूमहेतुत्वं नाम विशिष्टः स्वभावः स्वपरिनिष्ठो न परापेक्षः, धूम-
64A स्याप्यग्निकार्यत्वमेवमेव । ततश्च वस्तुसामर्थ्यभाव्यग्निनिर्विकल्पकं धूमनिर्विकल्पकं च स्वं स्वं विषयं विशिष्टस्वभावमेव परिच्छिनत्ति, केवलं [9]निश्चयेनाभिव्यज्यत इति स्वगोचरमात्रसंवेदनेऽप्यवधेरग्रहेऽपि च कार्यकारणभावावगमो घटत एवेति । तन्न ।

१ तन्न निरन्वयनाशिनः कार्योत्पत्तिः॥ २ कार्यकारणभावावगमोऽप्येवं न स्यात् ॥ ३ अन्वयिनो ग्राहकस्याभावात् ॥ ४ बौद्ध आह ॥ ५ अग्निमात्रकाले ॥ ६ धूमस्य ॥ ७ धूममात्रमेव परिच्छिनत्ति, न वह्निम् ॥ ८ वह्नेः ॥ ९ क्षणिकत्वादेव ॥ १० अग्निः ॥ ११ धूमस्य ॥ १२ उभयस्य कार्यकारणस्य ग्राहकं ॥ १३ न ह्यगृहीतावधिनाऽवधिमत्त्वग्रहः ॥ १४ अवधि ॥ १५ विकल्पेन ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]हिर्यस्माद् विशिष्टोऽपि स्वभावोऽग्नेर्धूमस्य च स्वपरिनिष्ठो धूममाग्न चावधिमनपेक्ष्य न युक्तः । मा भूदविशिष्ट इति हेतोः । अग्नेर्धूमस्य च कारणत्वमात्रं कार्यत्वमात्रं च विशिष्टः स्वभावो न वक्तव्यः, किं त्वग्नि-धूमावधिरेव सन्, निर्विशेषणस्य विशिष्टत्वाभावात्, कारण-कार्यत्वमात्रग्रहणेऽपि फलाभावाच्च । यदि ह्यग्नेर्धूमकारण-
64B त्वं धूमस्य चाग्निकार्यत्वं गृहीतं स्यात् तदाग्निधूमयोः कार्यकारणभावः सिध्येद्धूम- 5
दर्शनाच्चाग्निरनुमीयेत, न चैतत् कारण-कार्यत्वमात्रावगमे सिध्यतीति फलाभावः । ततोऽग्नि-धूमावधिक एव स्वभावो विशिष्टो वक्तव्यः । स च स्वपरिनिष्ठो न भवति, अवध्यपेक्षत्वात् । अतश्च वस्तुसामर्थ्यभाव्यपि निर्विकल्पकमग्नेर्धूमस्य च कारणत्वमात्रं कार्यत्वमात्रं च गृह्णीयात्, धूमकारणत्वमग्निकार्यत्वं च ग्रहीतुमशक्तमेव [6]विनाशा-ऽनुत्पादाभ्यामग्नि-धूमयोरसन्निहितत्वात् । 10

ननु पितरं पुमांसमालोक्यैल्लोकः पुत्राग्रहणेऽपि निर्विकल्पकधिया पितृत्वं गृह्णात्येव । तन्न । अगृहीतपुत्रस्य पितर्यपि पुंसि पुंस्त्वमात्रग्राहिकाया एव धियः संवेदनात् ।

नन्वेवं यदि सदपि धूमकारणत्वमग्निकार्यत्वं चाग्निधूमयोरवध्यग्रहणे निर्वि-
65A कल्पकं न गृह्णीयात्तदाऽस्य वस्तुसामर्थ्यभावित्वेन यत् सर्वात्मग्राहित्वं तद्धीयेतेति । तन्न । यतः को वै मन्यते यत् सकलपुरुषविज्ञानानि सर्वात्मना स्वविषयानवगच्छन्तीति? सर्वज्ञज्ञानस्यैव तत्र सामर्थ्यात् । ततो यद्यग्नि-धूमयोः सदपि सावधि कारणत्वं कार्यत्वं च निर्विकल्पकं न परिच्छिनत्ति तथापि न दोषः । एवं तर्हि गृहीताग्रहीतांशयोर्भेदेन वस्तुनोऽनेकत्वप्रसङ्गः स्यात् । अस्तु नाम, कथञ्चिदनेकत्वस्यापीष्टत्वात्, धर्म-धर्मिणोः कथञ्चिद् भेदात् । तस्मादन्वयिन [8]एकस्याभावे प्रत्येकं स्वगोचरमात्रसंवेदनाद् युक्तिसहस्रैरपि कार्यकारणभावावगमो न सङ्गच्छते । 20

स्यादेवम्—अग्नेर्धूमस्य च ग्राहकेण स्वस्मिन् स्वस्मिन् विषये परिच्छिन्ने सति
65B यो विकल्पो जायते स कार्यकारणभावं व्यवस्थापयति, पूर्वज्ञानद्वयाहितसंस्कारवशोत्पादेन [10]तस्य युगपदग्नि-धूमद्वयविकल्पनसामर्थ्यादिति । तदसङ्गतम्, यतोऽनुभवेन [11]निर्विकल्पकेनाऽविदितं च विकल्पयन् विकल्पः कथमुपादेयः प्रेक्षावतां प्रमाणं

१ विशिष्टोऽपि हि स्वभावो नानवधिः ॥ २ एतदेव वैशिष्ट्यं यदग्निर्धूमावधिः, धूमो वह्न्यवधिः ॥ ३ अग्नेः ॥ ४ धूमस्य ॥ ५ धूमकाले वह्नेर्विना ॥ ६ वह्निकाले धूमस्यानुत्पादात् ॥ ७ * 'ल्लोकः' इति हस्तलिखितादर्शे पाठः ॥ ८ स्वस्य ॥ ९ '६' [=विग्रहे षष्ठयन्तम्] ॥ १० सर्वात्मना विषयग्रहणे ॥ ११ ग्राहकस्य ॥ १२ धूमज्ञान-वह्निज्ञान ॥ १३ विकल्पस्य ॥ १४ अनुभवाविदितं च विकल्पयन् विकल्पः कथमुपादेयः स्यात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यात्, चः पराशङ्कां ध्वनति । वह्निज्ञानेन वह्निमात्रं धूमज्ञानेनापि धूममात्रं परिच्छिन्नं न पुनरनयोः सावधिकं कारणत्वं कार्यत्वं च । एवं च सति ज्ञानद्वयाहितसंस्कारवशोत्पन्नो विकल्पो वह्निधूमयोर्वह्नित्वं धूमत्वं च विकल्पयेदनुभवेन तयोरनुभवात् । कार्यकारणभावं तु कथम्, तस्यानुभवेनाननुभवात् । यच्चानुभवाविदितं
66A स्वमनीषिकया विकल्पयति तदप्रमाणमेव । अन्यथा सामान्य-त्रिकालावस्थायित्वादेरपि 5
प्रमाणोपपन्नत्वप्रसङ्गो भवतः स्यात् । तद्यावदनुभवेन विदितं विकल्पो विकल्पयति तावत् प्रमाणम्, यावत् पुनरविदितं तावत् सामान्यादिवदप्रमाणम् । कार्यकारणभावं चानुभवाविदितं विकल्पयति ततः सोऽप्यप्रमाणमेव । ततश्चाग्नि-धूमदर्शनेऽपि कार्यकारणभावानवगमात् कस्यचिदपि धूमादग्निपरिज्ञानं न स्यात्, कार्यकारणभावावगमस्यैव गमकतोपायत्वात् । न खलु बीजैवद्योग्यतया गमकं लिङ्गम्, किन्तु 10
स्वसाध्येनाविनाभावित्वेन निश्चितम् । अविनाभावित्वनिश्चयश्च स्वभावत्वावगमः कार्यत्वावगमो वा नान्यः । तँदिति तस्मान्निरन्वयनाशाभ्युपगमे कार्यकारणभावावगमो न स्यादेव ।

66B अपि च, यथैकान्तनित्यत्वे क्रम-यौगपद्याभ्यामर्थक्रिया न घटते तथैकान्तक्षणिकत्वेऽपि, तत्र यौगपद्याभावमाह— 15

युगपत् कर्तृत्वमपि न स्यात्, एकरूपोद्भवस्यैकरूपत्वात् । हेतु-प्रत्ययत्वे अपि वस्तुसतो न निरंशस्य । अवस्तुत्वे तदवस्थः प्रसङ्गः ।

युँगपदिति । प्रतिक्षणनिरन्वयनाशाभ्युपगमे न केवलं कार्योत्पत्तिः कार्यकारणभावावगमश्च न स्यात्, तथा कारणानां युगपदनेककार्यकर्तृत्वमपि, ँएकरूपोद्भवस्य 20
एकस्वभावकारणप्रभवस्यानेकस्यापि कार्यराशेरेकरूपत्वादेकस्वभावत्वप्रसङ्गात् । कारणवैसदृश्यप्रभवो हि कार्याणां वैसदृश्योदयः ?

स्यादेवम्—एकमपि कारणं क्वचिदुपादानभावेन क्वचिच्च सहकारिभावेन व्याप्रियते, तत एकरूपत्वमसिद्धमेवेति । तन्न । यस्माद्धेतु-प्रत्ययत्वे अपि उपादान-सहकारित्वे अपि वस्तुसती न निरंशस्य स्याताम् । निरन्वयनाशवादिनां हि मते 25

१ धूमादग्नेः ॥ २ यथाऽज्ञातमपि योग्यं बीजमङ्कुरं जनयति ॥ ३ तत्र कार्यकारणभावावगमः ॥ ४ युगपत् कर्तृत्वमपि न स्यात् ॥ ५ एकरूपोद्भवस्यैकरूपत्वात् ॥ ६ हेतु-प्रत्ययत्वे अपि न वस्तुसती निरंशस्य ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वस्तु निरंशम्, हेतु-प्रत्ययत्वे च वस्तुसती धर्मौ, ते चांशरूपे सकलांशवियुक्तस्यैकस्य
67A कथं स्याताम्, धर्मिणोऽनेकत्वस्य सांशत्वस्य च प्रसङ्गात् ।

नोपादान-सहकारिते धर्मरूपे, किं तर्हि? शक्तिरूपे । न च शक्तयो भावानां निवार्यन्ते, वस्तुनोऽनेकशक्तिरूपत्वादिति चेत् । एवं तर्हि भावस्वरूपानेकत्वमस्तु, अनेकशक्तिभ्योऽभेदात्, अनेकशक्तिस्वरूपवत् । अथैवं नेष्यते तर्हि शक्तीनामेकत्वमस्तु, 5
एकस्माद् भावस्वरूपादभेदात्, भावस्वरूपवत् । एवं चैकरूपोद्भवस्यानेकस्याप्येकरूपत्व-प्रसङ्गः ।

एतावत्तु वक्तुमवशिष्यते परस्य—विजातीयानेककार्यजनन एक एव हेतूनां स्व-
67B भावः, तथा चानेकांशाभावान्न निरंशत्वव्याहतिरिति । अत्रापि विमृश्यते—तर्हि रूप-रस-गन्ध-स्पर्शपरमाणुजातीनां भेदमुररीकृत्यालम्, शक्यं हि वक्तुमेवम्—एकैव 10
रूपादिष्वन्यतमा परमाणुजाती रूपाद्याभासविजातीयानेकज्ञानजननस्वभावेति । बाह्यार्थापलापिनो रूपादिपरमाणुजातिभेदाभावप्रसङ्गो न दोषावह इति चेत्, तर्हि विवक्षितैककार्यकारिण्याः सामग्र्या अन्तर्वर्त्तिनां समग्राणां परस्परमुत्तरक्षणजनने
68A उपादान-सहकारिभावाभ्यामवान्तरसामग्रीभेदो न स्यात्, सर्वेषां सामग्र्यन्तर्वर्तिहेतू-नामनेकजनकैकस्वभावेन सर्वकार्येषु प्रवृत्तेः । तथा च सामग्रीभेदाभावात् कार्यक्षण- 15
भेदो न प्राप्नोति, तस्यैव तद्भेदनिमित्तत्वात् । तस्मादुपादान-सहकारिते वस्तुसती धर्मौ । एवं च हेतूनां युगपदर्थक्रियाकारित्वं वस्तुसदुपादान-सहकारित्वधर्मद्वया-धिष्ठानेन व्याप्तम् । तच्च निरंशाद्व्यावर्त्तमानं स्वं व्याप्यं युगपदर्थक्रियाकारित्वमपि निवर्तयतीति स्थितम् ।

ननु कार्यदर्शनकल्पिते हेतु-प्रत्ययत्वे न परमार्थसती, ततः सांशत्वप्रसङ्गोऽपि 20
न स्यादेवेति । तदयुक्तम् । यस्मादवस्तुत्वे[10] हेतु-प्रत्ययत्वयोरङ्गीकृते तदवस्थः प्रसङ्गः एकरूपोद्भवस्यैकरूपत्वादिति य उक्तः । तस्मान्निरन्वयनाशवादेऽपि निरंशत्वेन वस्तूनां युगपत् कर्तृत्वं नोपपद्यते ।

[11][12]सम्प्रति क्रमकर्तृत्वाभावमाह—

**एकस्य भिन्नकालाद्यपेक्षया कर्तृत्वं क्रमः । सोऽपि वर्त- 25
मानकालावस्थायित्वात् तत्त्वतः सन्तानस्याभावाच्च न स्यात् ।**

१ परमार्थसती ॥ २ तव ॥ ३ बौ[द्धः] ॥ ४ निषेधः ॥ ५ प्रतिभास ॥ ६ शून्यवा[दिनः] ॥ ७ ज्ञानानाम् ॥ ८ योगिज्ञानानि हि ज्ञानान्तराणि जानन्ति, परं तानि स्वसन्तानं प्रति उपादानभावेन, पर-सन्तानं प्रति सहकारिभावेन व्याप्नियन्ते ॥ ९ अवस्तुत्वे तदवस्थः प्रसङ्गः ॥ १० '७' [सप्तम्यन्तम्] ॥ ११ न केवलं नित्यवादे ॥ १२ निरन्वयवादे ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

68B [1]एकस्येति धर्मिरूपेणावस्थितस्य । आदिशब्दादवस्थादिग्रहः । [2]सोऽपीति क्रमो न स्यादिति सम्बन्धः । वर्त्तमानकाले उत्पत्तिकाल एवावस्थानशीलत्वाद्वस्तुनः परमार्थतः सन्तानस्याभावाच्च, अवस्थितस्यैव हि क्रमभाविसहकार्याहितरूपविशेषस्य यः परिपाट्या क्रियासु व्यापारस्तत् क्रमकर्तृत्वम्, तदुत्पत्तिक्षणमात्रं एवावस्थानशीलस्यात एव परमार्थसत्सन्तानाननुयायिनो न कथञ्चिदपि घटते । तस्मान्निरन्वयनाशे क्रम- 5
कर्तृत्वमपि नोपपद्यते । तत् क्रम-यौगपद्याभ्यामर्थक्रियामिच्छता कथञ्चिदन्वयोऽप्याश्रयणीयः ।

स्यान्मतम्—उत्पत्तिक्षणे घटद्रव्यस्य यः संवत्सरस्थितिस्वभावः स एव द्वितीयादि-
69A क्षणेष्वपि, उत्पत्तिक्षणावस्थायिन एव घटद्रव्यस्योत्तरक्षणेष्वपि कथञ्चिदन्वयात् । एवं च सति विनाशहेतुसन्निधानक्षणेऽपि संवत्सरस्थितिधर्मा घटस्ततः प्रथमक्षण इव 10
कथं स तदानीमपि विनाशमाविशेदिति । अत्राह—

संवत्सरस्थितिस्वभावस्य समयाद्यतिक्रमात् स्यान्निवृत्तिः, संवत्सरस्यासमयादिरूपत्वात् । शेषस्यान्वयः ।

प्रथमक्षणे संवत्सरं स्थितिस्वभावो यस्तस्य समया[द्य]तिक्रमात् स्यात् कथञ्चिन्निवृत्तिः आदिशब्दादावल्यादिग्रहः । प्रथमक्षणे यः संवत्सरस्थितिस्वभावः स द्वितीये क्षणे 15
कथञ्चिन्निवर्त्तते, समयोनसंवत्सरस्थितिस्वभावस्य भावात् ।

स्यादेतत्—यदि स्तोकेनापि संवत्सरस्वभावप्रच्युतिरभूत्तदा कथञ्चिदपि संवत्सरा-
69B वस्थानं न प्राप्नोत्येव, संवत्सरस्थितिस्वभावस्य प्रथमक्षण एव निवृत्तत्वादिति । तन्न, संवत्सरस्यो ऽसमयादिरूपत्वात्, न हि संवत्सरः समया-ऽऽवलिका-मुहूर्त्तरूपो येन तदपगमेनाप्यपगच्छेत् । ततः संवत्सरस्थितिधर्मणो द्वितीयक्षणे समयातिक्रमेऽपि 20
संवत्सरावस्थितिर्न हीयते । अथवा भावः संवत्सरस्थितिधर्मा स्वहेतुभिर्जनित इत्ययं तावदस्मत्पक्षः । उच्छ्वसितमात्रेऽपि भावास्तपस्विनः स्वहेतुपरतन्त्रा इति च परोऽपि कृताञ्जलिरनुमन्यते । यदि चायं संवत्सरान्तरमनुसन्दधीत तदा नित्यो भावः इत्ययं पूर्वमेव पक्षः स्यात्, अनेकसंवत्सरस्थितिस्वभावस्य परोक्तनीत्योपस्थितत्वात् । तदनेन हेतुनिर्देशमनुतिष्ठता यथाकथञ्चिदपि संवत्सरान्ते विनंष्टव्यम् । तस्माद्यथा 25

१ एकस्य भिन्नकालापेक्षया कर्तृत्वं क्रमः ॥ २ सोऽपि वर्तमानकालावस्थायित्वात् तत्त्वतः ॥ सन्तानस्याभावाच्च न स्यात् ॥ ३ '७' [=सप्तम्यन्तम्] ॥ ४ संवत्सरस्थितिस्वभावस्य समयाद्यतिक्रमात् स्यान्निवृत्तिः ॥ ५ * °स्य समया° इति मूलादर्शे पाठः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

70A हेतुभिर्नश्वरात्मानो जनिताः प्रतिक्षणं नश्यन्ति तथा संवत्सरस्थितिधर्माणो जनिताः संवत्सरान्ते नश्यन्तु, को नाम दोषः ।

शेषस्येति समयावस्थितिस्वभावादिसमूहात्मकः संवत्सरस्थितिस्वभावः । ततोऽनेकस्वभावभेदात्मकसंवत्सरस्वभावस्य मध्याद्यावदपक्रामनि ततः शेषस्योत्तरक्षणेष्वनुगमो भवति यावत् संवत्सरान्त्यसमय इत्येवमन्वयसिद्धिः । 5

विनाशाहेतुकत्वं प्रतिक्षणविकारितामुपनयेत्, न निरन्वयनाशिनम्, तत्राव्याप्तेः । न च तत् सिद्धमपि, उत्तरपरिणामांशरूपत्वाद् विनाशस्य । स च कारणान्वयव्यतिरेकानुविधायी सिद्धः ।

स्यान्मतिः— प्रतिक्षणं निरन्वयनाशिनो भावा विनाशहेतोरयोगादिति । तदपि न, यतो विनाशाहेतुकत्वं प्रतिक्षणविकारितामुपनयेत्, न निरन्वयनाशिनम् । यदि 10 हि निर्हेतुको विनाशस्तदा प्रतिक्षणं भावा विनश्यन्तीति सिध्यतु, ते तु सर्वथा निरन्वयनाशिन इति तु कथम् । तत्रेति सर्वथापि निरन्वयनाशितायामव्याप्तेर्विनाशा-
70B हेतुकत्वस्य हेतोर्व्याप्तेरयोगात् । निर्हेतुकश्च विनाशो भवेत् कथञ्चिदन्वयश्च, को विरोधः । अन्तेऽप्ययं गत्वा भावो यदि विनङ्क्ष्यति तदा प्रथमक्षणेऽपि विनश्यतु विनाशहेतोरघटनादिति युक्तेर्विनाशाहेतुकत्वं भवद्भिर्गीयते, तच्च कथञ्चिदन्वयेऽपि 15 सङ्गच्छत एव, पर्यायरूपतया प्रथमक्षणेऽपि विनाशाभ्युपगमात् ।

न च तद् विनाशाहेतुकत्वं सिद्धमप्यस्माकम्, न केवलं हेतुः सन्दिग्धविपक्षव्यावृत्तिकः, असिद्धोऽपीत्यर्थः । उत्तरपरिणामांशरूपत्वाद्विनाशस्य, सर्वं हि वस्तु सदसदात्मकम्, तत्रोत्तरपरिणामस्य कपालादेर्यो घटादिरूपेणासत्त्वलक्षणः स्वतो भिन्नाभिन्नो धर्मः स एव घटादीनां प्रध्वंसः, एवं च युगपदुत्पादव्ययध्रौव्यात्मकत्वमपि 20 वस्तुनः स्यात्, कपालादेरुत्पाद-व्ययद्वयात्मकत्वात्, मृदादिद्रव्यस्य स्थितिमत्त्वाच्च ।
71A यत्रापि कपालादय एव प्रध्वंसत्वेन व्यवह्रियन्ते तत्रापि प्रध्वंसाभेदेनोपचारान्न मुख्यतः । स चेति विनाशः कारणान्वयव्यतिरेकानुविधायी सिद्धः प्रत्यक्षत एव प्रतीतः ।

१ शेषस्यान्वयः ॥ २ संवत्सरं यावद् स्थितिस्वभावो भावस्य ॥ ३ * 'हेतुत्वं' इति मूलादर्शे पाठः ॥ ४ तत्राव्याप्तेः ॥ ५ विषये ॥ ६ निर्हेतुको विनाशः ॥ ७ अभ्युपगमवादेनोच्यते निर्हेतुकत्वं 25 विनाशस्य, यावता कालाद्यपेक्षणं सदाप्यस्त्येव ॥ ८ न च तत् सिद्धमपि ॥ ९ विनाशहेतोरयोगश्च भविता, निरन्वयनाशिनश्च न भवितार इति ॥ १० घटादिप्रध्वंसात्मको व्ययः ॥ ११ स च कारणान्वयव्यतिरेकानुविधायी सिद्धः ॥ १२ उत्तरपरिणामांशरूपः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

पूर्वपर्यायरूपेणोत्तरपर्यायस्य यदसत्त्वं स्वतो भिन्नाभिन्नो धर्मः स सर्वत्र पूर्वपर्यायस्य विनाशः। वयं हि भावान्तरात्मकमेवाभावमातिष्ठामहे। उत्तरपर्यायांशरूपश्च विनाशः स्वस्वकारणान्वयव्यतिरेकानुविधायितया सहेतुको बालादीनामपि प्रतीत एव, केवलं भवानेव कुतोऽपि जाड्यातिशयादत्र भ्रान्तः।

भट्टार्चटस्त्वाह–"यद्युत्तरं कार्यात्मकं भावान्तरमेवाभावस्तदाऽग्निसंयोगादयो- 5
ऽङ्गारादिजन्मनि व्याप्रियन्त इतीष्टमेवास्माकं किन्तु भावान्तरकरणेऽभ्युपगम्यमाने-
71B ऽग्न्यादीनामिन्धनादावव्यापारात् तदवस्थमेवेन्धनादिकम्। ततश्च यथाऽग्न्यादि-
संयोगात् प्रागिन्धनादेरुपलब्धिरन्या च तत्साध्यार्थक्रिया तथाङ्गाराद्युत्पत्तावुपलब्ध्यादेः
प्रसङ्गः" [हेतुबिन्दुटीका पृ० ७८] इति।

तदेतं भट्टार्चटाशयविटपिनमुत्पाटयति– 10

न च पूर्वोत्तरयोर्भेदो येन पूर्वस्योपलम्भादि स्यात्। [४]किमु (किन्तु) स एवोत्तरीभवति। मृदादेरुपलम्भोऽप्यस्ति। प्रदीपादेस्तमसादिभावो भावान्तरम्।

[५]नै चेति। यदि विनाश्योऽन्यो विनाशश्चान्यः स्यात्तदा स्यादेवोपलम्भादिः। आदिशब्दादर्थक्रियाग्रहः। [६]किन्तु स एव विनाश्य एवोत्तरीभवति उत्तरपर्यायोभिन्न- 15
विनाशरूपो भवति। नोच्यते 'काष्ठादीनामवस्थितानामग्निसंयोगेनाङ्गाराः क्रियन्ते', येन काष्ठादीनां तादवस्थ्येनोपलम्भादि स्यात्। किन्तु काष्ठादय एवाङ्गारीक्रियन्ते। न काष्ठादीनां [७]सैवित्र्याः पुत्र इवाङ्गारादयो भिन्ना भवन्ति, किन्तु काष्ठान्येवाङ्गारी-
भवन्तीत्यर्थः। अत एव 'अग्न्यादीनामिन्धनादावव्यापारात्' इत्येतदप्यसिद्धम्। काष्ठा-
72A दयोऽङ्गारीक्रियन्त इत्यभ्युपगमेनोभयस्यापि करणक्रियया व्याप्तत्वात्। 20

अपि च, [८]क्वचित् पूर्वस्य सर्वथानुपलम्भाद्यप्यसिद्धम्, यतो [९]मृदादेरुपलम्भोऽप्यस्ति। पिण्डविनाशाभिन्ने हि घटपर्याये कटकविनाशाभिन्ने च कुण्डलपर्याये समुत्पन्ने सति मृद्रूपता सुवर्णरूपता च पूर्वपर्ययस्थितैवोपलभ्यते तत्साध्या क्रियाप्यस्ति। ततः पूर्वोपलम्भादिप्रसङ्गोऽपि कथञ्चिन्न बाधाय।

१ पूर्वस्य ॥ २ इन्धनाद् ॥ ३ इन्धनादेः ॥ ४ * टीकायां मूलादर्शे च किन्तु स इति पाठः, टिप्पण्यां 25
तु किमु स इति पाठः ॥ ५ न च पूर्वोत्तरयोर्भेदो येन पूर्वस्योपलम्भादि स्यात् ॥ ६ अङ्गारादिरूपः ॥ ७ किमु स एवोत्तरीभवति ॥ ८ इन्धनादिरूपतयाऽसत्त्वलक्षणस्तद्रूपः ॥ ९ '३' [=विग्रहे तृतीयान्तम्] ॥ १० अङ्गारादिरूपः ॥ ११ जनन्याः ॥ १२ '५' [पञ्चम्यन्तम्] ॥ १३ घटाद्यवस्थायाम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यादेवम्—यद्युत्तरपर्यायांशो विनाशस्तदा प्रदीप-तमसादीनां नित्यैकान्तैः स्यात्, तेषां भावरूपोत्तरपर्यायस्यादर्शनादिति । अत्रोच्यते—प्रदीपादेरिति । आदि-
72B शब्दाभ्यां तमसाद्यालोकादिग्रहः । प्रदीपपरमाणवो हि विध्वस्तास्तमसपरमाणवो भवन्ति । तमसपरमाणवः पुनरालोकपरमाणवः । ननु यदा प्रद्योतनप्रभाप्रतानमध्य एव प्रदीपः प्रध्वंस्य(स?)ते तदा कथं तमसीभवेदिति। एवं मन्यते—नैकरूपमेव भावान्तरम्, किन्तु क्वचित् कस्यचित् किमपि भवति, तत आलोकान्तःस्थितप्रदीपविध्वंसे आलोकान्तरपरमाणुरूपतैव भावान्तरम् । एवं सर्वत्रापि सर्वस्य भावान्तरमुत्प्रेक्ष्यम्, सतोऽवश्यं भावान्तरपरिणामनान्तरीयकत्वात् ।

एतेन यदप्युक्तं भट्टार्चटेन—"यदि भावान्तरं प्रध्वंसाभावो य एतेऽनुपजात-विकाराः प्रदीप-बुद्ध्यादयो ध्वंसन्ते तेषां कतरद् भावान्तरं प्रध्वंसो व्यवस्थाप्येत" [हेतुबिन्दुटीका पृ० ७९] इति, तत् परसिद्धान्तानवबोधबाधितमित्युपेक्षामर्हति ।

प्रागभावाभाव एव भावोद्भवः, न प्रध्वंसाभावाभावे ।

73A अथ यदि मृत्पिण्डस्याभावो घटांशस्तदा तदभावे पिण्डोन्मज्जनं कथं न भवतीति । उच्यते—प्रागभावाभाव एव भावोद्भवो भवति, न प्रध्वंसभ्याभावे । एवं मन्यते—न यावानभावस्तावतः सर्वस्याप्यभावे भाव उन्मज्जति । अन्योन्याभावाभावेऽप्युन्मज्जनप्रसङ्गात् । द्वौ घटौ परस्पराभावात्मकौ यदा विनश्यतस्तदा तदात्मकः परस्पराभावोऽपि विनश्यति, न च तयोरुन्मज्जनं दृश्यते, तस्माद्विशिष्टस्यैवाभावस्याभावे भावोद्भवः । स च प्रागभाव एव । यदि वा एकस्यां द्रव्यसन्ततौ पूर्वपर्यायस्याभावांशे उत्तरपर्यायस्य प्रागभावः, उत्तरपर्यायस्य पुनरभावांशः पूर्वपर्यायस्य प्रध्वंसाभाव इति वस्तुगतिः । तत्र मृत्पिण्डस्य यो घटाभिन्नः प्रध्वंसा-
73B भावो न तस्य प्रध्वंसो मृत्पिण्डाभिन्न एव, कपालानामेव तत्प्रध्वंसाभिन्नत्वात्,

१ पूर्वस्य ॥ २ 'तमस'शब्द औणादिकोऽकारान्तः ॥ ३ सदाप्यवस्थानं स्यात्, न कदापि विनाश इत्यर्थः ॥ ४ प्रदीपादेस्तमसादिभावो भावान्तरम् ॥ ५ मध्ये ॥ ६ विद्यमानस्य ॥ ७ उत्तरपर्यायः ॥ ८ पूर्वस्य ॥ ९ बुद्धिर्हि आत्मधर्म इत्यात्मैव भावान्तरम् ॥ १० प्रागभावाभाव एव भावोद्भवो न प्रध्वंसाभावाभावे ॥ ११ ॰ मन्यते इति यद्यपि पाठो हस्तलिखिते दृश्यते, तथापि तत्र अनुस्वारबिन्दुः किञ्चिद्धीनतेजाः, अतो मन्यते इति पाठोऽस्माभिरत्र स्वीकृतः ॥ १२ घटात्मकः १३ मृत्प्रध्वंसाभावात्मक-घटविनाशो मृत्पिण्डोत्पत्तिर्न भवति अविशिष्टविनाशत्वात् । न हि यो योऽविशिष्टोऽभावविनाशस्तस्मिन् सति पूर्ववस्तूत्पत्तिर्यथा इतरेतराभावे ॥ १४ मृत्पिण्डः, ततो घटः, ततः कपालानि । एवंरूपायाम् ॥ १५ सर्व वस्तु भावाभावात्मकम्, ततश्च भावांशोऽभावांशश्च प्रत्येकं विचारणीयः ॥ १६ कः ? ॥ १७ घट ॥ १८ घट ॥ १९ कः ? ॥ २० मृत्पिण्ड ॥ २१ घटात्मकः ॥ २२ घटाभिन्नमृत्पिण्डप्रध्वंसस्य ॥ २३ घट ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

[1]उत्तरपर्यायाभावांशस्य सर्वत्र पूर्वपर्यायप्रध्वंसरूपत्वात्, मृत्पिण्डस्य च पूर्वभावत्वात् । ततो मृत्पिण्डप्रध्वंसप्रध्वंसे सति न मृत्पिण्डोद्भवः, मृत्पिण्डप्रध्वंसप्रध्वंसस्य कपालाभिन्नरूपत्वेनामृत्पिण्डरूपत्वात्, मृत्पिण्डाभिन्नघटप्रागभावस्य पुनः प्रध्वंसो घटाभिन्न एव । ततो मृत्पिण्डाभिन्नप्रागभावप्रध्वंसे घटोद्भवो भवति, घटप्रागभावप्रध्वंसस्य घटरूपत्वात् ।

एतावत्तु परस्य वक्तुमवशिष्यते—यदि घटस्याभावो नास्ति तदा भावेन भाव्यम्, अभावाभावस्य भावनान्तरीयकत्वादिति । इदमपि पेलवम् । असतां हि
74A प्रादुर्भावः कारणसद्भावाधीनः । न च घटस्याभावाभावो घटसद्भावस्य कारणम् । मृत्पिण्ड-कुलालादीनामेवान्वय-व्यतिरेकाभ्यां तथानिश्चयात् । ततो यदि नाम घट-प्रध्वंसस्याभावो जातस्तथापि कथं घटसद्भावः स्यात्, कारणाभावात्? यथा ह्यतीतो घटः सम्प्रत्यसंस्तथा तत्कारणान्यप्यसन्त्येव, अतीतत्वात् । यदि तु तत्कारणानि स्युस्तदा प्रादुर्भावोऽनिवारित एव । अभावाभावस्य तु भावनान्तरीयकत्वं कारणान्तरापेक्षस्य, न तु केवलस्य । सति हि मृत्पिण्ड-चक्रादिकारणकलापे
74B प्रागभावाभावेऽपि भावोद्भवः, न त्वेवमेव । ततः सिद्धमेतत्—प्रागभावाभाव एव भावोद्भवो न प्रध्वंसाभावाभाव इति । तस्माद् भावाभिन्नत्वेऽप्यभावस्य न किञ्चिद् विनश्यति ।

ननु यदि सर्वत्र भावांश एवाभावस्तदा पर्युदास एवैको नञ् स्यात्, सर्वत्र विधेः प्राधान्यात् । तदाह भट्टाचार्यः—

"पर्युदास एवैको नञर्थश्च स्यात् । सोऽपि वा न भवेत् । यदि हि किञ्चित् कुतश्चिन्निवर्त्येत तदा [2]तद्व्यतिरेकि संस्पृश्येत तत्पर्युदासेन[3] । तच्च नास्ति, सर्वत्र 'निवृत्तिर्भवति' इत्युक्ते वस्त्वन्तरस्यैव कस्यचिद्विधानात् । तथा
75A चानेन[4] वस्त्वन्तरमेवोक्तं स्यात्, न [5]तयोर्विवेकः, [6]अविवेके च न पर्युदासः" [हेतुबिन्दुटीका पृ० ८१] इति ।

अत्राह—

अनर्पितसदनुवेधः पररूपनिषेधः प्रसज्यनञर्थः ।

[7]अनर्पितेति अर्थोऽभिधेयं परस्परानुविद्धस्वरूपसच्चपररूपासच्चात्मकं सर्वं वस्तु ।

१ घट ॥ २ '६' [=विग्रहे षष्ठयन्तम्] ॥ ३ पूर्वपर्यायस्य सर्वत्र प्रध्वंसरूपत्वे मृत्पिण्डस्य च भावरूपस्य उन्मज्जनं भवेदिति कथं भवान् वदेत् ॥ ४ घट ॥ ५ कपाल ॥ ६ घटस्य प्रागभावः ॥ ७ '६' [=विग्रहे षष्ठयन्तम्] ॥ ८ '६' [=विग्रहे षष्ठयन्तम्] ॥ ९ घटेन ॥ १० कारणभाव ॥ ११ मृत्पिण्डस्य सम्बन्धी घटलक्षणः प्रध्वंसः ॥ १२ निवर्त्यमानब्राह्मणादिव्यतिरेकि क्षत्रियादि ॥ १३ निवर्त्यमाननिषेधेन ॥ १४ नञा ॥ १५ निवर्त्यमान-विधीयमानयोः ॥ १६ अपार्थक्ये ॥ १७ **अनर्पितसदनुवेधः पररूपनिषेधः प्रसज्यनञर्थः** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तत्र स्वरूपसत्त्वानुवेधानर्पणेन यत्र पररूपासत्त्वमात्रं विवक्ष्यते यथा घटः पटात्मको न भवति तत्र प्रसज्यनञोऽवसरः । अविवक्षितसत्त्वांशाभेदेपररूपासत्त्वं प्रसज्यनञोऽर्थ इति भावः ।

ननु पररूपाभावोऽपि भवतां मतेन न तुच्छरूपः, सर्वत्र भावांशस्यैवा-
75B भावरूपत्वात् । ततस्तद्विवक्षायामपि विधेरेव प्राधान्यमिति । एवं मन्यते[1]—पररूपा- 5
भावोऽपि विवक्षितस्वरूपसत्त्वाभेदो[2] भाव एव, किन्तु स्वरूपसत्त्वाभेदो न विव-
क्षितस्ततोऽसौ तुच्छरूपो जातः । ततः कुतो विधेः प्राधान्यम् ? अत एवानर्पितसदनुवेधः
इत्युक्तम् । ततोऽर्पितसदनुवेधः पररूपनिषेधः पर्युदासस्य नञोऽर्थः, अनर्पितसदनुवेधस्तु
प्रसज्यनञ इति विषयविभागः सिद्धः । तस्मादुत्तरपर्यायांश एव भावानां विनाशः ।
स च स्वकारणान्वयव्यतिरेकानुविधायित्वेन सहेतुकः सिद्धः । 10
अत्र कीर्तिर्विनाशाहेतुत्वसाधनायोपन्यस्यति—

76A "सापेक्षाणां हि भावानां नावश्यंभावितेक्ष्यते ।

निरपेक्षो भावो विनाशे । सापेक्षत्वे हि घटादीनां केषाञ्चिन्नित्यतापि स्यात् । यद्यपि बहुलं विनाशकारणानि सन्ति । तेषामपि स्वप्रत्ययाधीनसन्निधित्वान्नावश्यं सन्निधानमिति कश्चिन्न विनश्येदपि । न ह्यवश्यं हेतवः फलवन्तः, वैकल्य-प्रतिबन्धै- 15
सम्भवात्" [प्रमाणवार्तिकस्ववृत्तिः पृ० ६५, प्रमाणविनिश्चयः पृ० २७६ A] इति ।

"अयं च प्रमाणार्थो दर्शितः—[3]यो [4]यद्भावं प्रत्यनपेक्षः [5]सं तद्भावनियतः[6], यदि [7]"निरपेक्षोऽपि भावः कालदेशा[वैस्था]न्तरापेक्षया विनश्येत्तदा देशकालावस्था-
न्तरापेक्षत्वान्निरपेक्षो न स्यात् । ततश्च यद्येकमपि क्षणं तिष्ठेत् कालान्तरापेक्षया
निरपेक्षत्वं बाध्येत । तस्मात् क्षणमात्रावस्थानेऽपि सापेक्षत्वसम्भवान्निरपेक्षत्वं 20
विरुद्धोपलब्ध्या विपक्षाद् व्यावर्त्यते" [प्रमाणविनिश्चयटीका पृ० २९० B—२९१A] ।

अत्राह—

अपेक्षितहेतवोऽपि विसभागक्षणादयोऽवश्यम्भाविनः ।

१ पट ॥ २ परस्यस्य पटादेः ॥ ३ उत्तरमाह ॥ ४ सन् ॥ ५ पटस्य ॥ ६ आरोपितवस्तुस्वरूप ॥ ७ * 'धर्माणाम्' इति प्रमाणविनिश्चये पाठः ॥ ८ * अत्र द्वयक्षरं त्र्यक्षरं वा किञ्चित् टिप्पणं 25
सूक्ष्माक्षरैर्लिखितं वर्तते, किन्तु तत् सम्यक् पठितुं न शक्यते । 'उत्पित्स'(?) 'उत्पाद्ये'(?) इति वा किञ्चिल्लिखितं भाति ॥ ९ कारणानि ॥ १० ओस् [= विग्रहे षष्ठीद्विवचनान्तम्] ॥ ११ पदार्थः ॥ १२ विनाशभावम् ॥ १३ विनाश ॥ १४ विवादपदः पदार्थोऽवश्यंभावविनाशे नियतो विनाशं प्रति अनपेक्षकारणत्वात् ॥ १५ हेतोरनैकान्तिकत्वमुद्भावयति ॥ १६ भोट[= Tibetan]भाषानुवादमध्येऽयं पाठः ॥ १७ सापेक्ष-
त्वोपलब्ध्या ॥ १८ तद्भावानियतत्वात् ॥

 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अपेक्षितेति । विसभागक्षणो विजातीयसन्तानोत्पादः । आदिशब्दादायुस्त्रुटि-
76B लक्षणमरणस्य चन्द्रादेरुदितस्यास्तमयस्य च ग्रहः । घटादीनां हि विजातीयसन्तानोत्पादेः सर्वभावानां द्रव्याद्यपेक्षोत्पादत्वाद्धेत्वन्तरापेक्षोऽपि नियतो दृष्टः । एवमायुषः क्षयोऽपि । ननु यः कपालादिक्षणो घटाद्यवस्थायामस्त्येव न, स कथं सापेक्षो भण्यते? सत एव हि क्वचिदपेक्षा नासत इति । एवं तर्हि विनाशस्यापि हेत्वन्तरापेक्षत्वेनाऽ[न]वश्यंभाविता प्रसञ्जयितुं न युक्ता, कपालांशस्यैव विनाशनात् तस्य च घटावस्थायामभावात् । अथ चासौ हेत्वन्तरापेक्षत्वेनाऽनवश्यम्भावी प्रसञ्जितः, यदुक्तं "न ध्रुवभावी भूतस्यापि भावस्य विनाशो हेत्वन्तरापेक्षणात्" [ ] इति । अपि च वाससि रागं दृष्टान्तयताऽविद्यमानस्याप्यपेक्षानु-
77A ज्ञातैव । तस्माद् धर्मकीर्ति-धर्मोत्तरयोरेवंपरमेव वचो यथा "यो धर्मिणो धर्मो धर्मिहेतुव्यतिरेकिणा हेत्वन्तरेण क्रियते स नावश्यम्भावी यथा वाससि रागः, विनाशोऽपि यदि तथा स्यात् सोऽपि ध्रुवं न स्यादिति न व्यतिरिक्तहेतुकृतोऽसौ" [ ] इति, तेन व्यभिचरति, घटस्य पुरुषस्य च धर्मिणः स्वहेतुव्यतिरिक्तहेतुकृतयोरपि कपाल-मरणयोरवश्यंभावदर्शनात् । विनाशानपेक्षत्वासिद्धौ च प्रमाणेनार्थोपदर्शनप्रयोसोऽपि धर्मोत्तरस्य निष्फल एव । तस्मादनवश्यंभाव-
प्रसञ्जनेनापि विनाशस्याहेतुत्वं न सिध्यति ।

77B धर्मोत्तरस्त्वाह—"किं तस्य सतो भावस्य निवृत्तिधर्मा स्वभावः स्वहेतुभ्यो निष्पन्न अहोश्विदनिवृत्तिधर्मा । यदि पूर्वः पक्षः, निवृत्तिधर्मतया स्वयमेव निवर्त्तेत । न च विनाशहेतुसापेक्षनिवृत्तिक एव हेतुभिर्जनित इति वक्तुं युक्तम् । तथाहि—यावद्विनाशहेतुसन्निधिकालस्तावत् स्थितिधर्मा भावः, अस्थितिधर्मत्वे प्रागेव निवृत्तिप्रसङ्गात् । विनाशहेतुसन्निधिकाले च स एव कियत्कालावस्थायी स्वभावो यः प्रथमे क्षणे आसीत्, ततो नैव निवर्तेत कियत्कालावस्थायित्वात् । तस्मान्न
78A विनाशहेतुसापेक्षनिवृत्तिकः कश्चिद्भावो हेतुभिर्जन्यते । अथानिवृत्तिधर्मा तस्य स्वभावस्तर्हि विनाशहेतुभिरपि न निवर्त्तयितुं शक्येत" [प्रमाणविनिश्चयटीका पृ० २८९] इति ।

१ अपेक्षितहेतवोऽपि विसभागक्षणाद्योऽवश्यम्भाविनः ॥ २ कपालक्षणः ॥ ३ क्षेत्रभावमुद्गरादि ॥ ४ मरिष्यद्वन ॥ ५ जैनं प्रति बौद्धस्य ॥ ६ विनाशस्यासत्वं कथयति ॥ ७ उत्पन्नस्यापि ॥ ८ यथा वाससि राग इति दृष्टान्त उपात्तोऽस्ति तेनैव ग्रन्थकृता ॥ ९ कारणानि ॥ १० आचार्यः ॥ ११ प्यक्षणिकसाधन । * अत्र "प्य" इति आद्यपाठोऽधिको निरर्थकश्च प्रतिभाति ॥ १२ * दृश्यतां पृ० १८५५० १७ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अत्राह—

स्वहेतुभ्यस्तत्तद्धेतुयोगतस्तथा तथा परिणामिनो भावाः ।

स्वहेतुभ्य इति मृत्पिण्ड-चक्र-चीवरादिसामग्रीभ्यस्तस्य तस्य विचित्ररूपद्रव्य-क्षेत्र-भाव-मुद्गरादिहेतोः सम्बन्धेन यस्य यस्य रूपस्योत्पादका हेतवः सन्निधीयन्ते तेन तेन नवपुराणादिना कपालादिना च रूपेण परिणमनशीला भावा भवन्ति । परिणामान्तरांशात्मक एव हि भावस्य विनाशः, परिणामान्तरं च किञ्चिन्नवपुराणादि घटादिद्रव्येऽवस्थितेऽपि प्रतिसमयभाव्यन्यान्यद्रव्यादिहेतुसन्निधानादपरापरं प्रतिसमय-
78B मुपजायते, किञ्चित्तु कपालादि घटादिपर्यायोच्छेदात्मकं प्रतिसमयानुपस्थायिमुद्गरादि-हेतुसन्निधानात् कालपरिवासेनोपजायते । तत्र परमार्थवेदिनां प्रतिसमयमपि घटादि-द्रव्ये विनाशबुद्धिर्भवति, स्थूलदृशां पुनः कपालादिपर्यायोत्पादे सति । प्रतिक्षणं हि सदृश-विसदृशाभिनवपर्यायोत्पादेन सर्वाण्यपि द्रव्याणि पर्यायरूपतया विनश्यन्त्येव, केवलमावरणक्षयोपशमतारतम्येन कचित् कदाचित् कस्यचिद्विनाशबुद्धिरुपजायते । एतदुक्तं भवति—नोच्यते स्वहेतुभ्यो भावाः प्रतिक्षणविनश्वरा जायन्ते नाप्यविनश्वरा नापि कियत्कालावस्थायिन इति । किन्त्वेतावदुच्यते—स्वहेतुभ्यो यथाहेतुसन्निधानं नवनवरूपैः परिणामशीला भावा भवन्ति । नवनवरूपैः परिणामश्च कारणान्वय-व्यतिरेकानुविधायी प्रत्यक्षसिद्धः । तदभिन्न एव च विनाशः । एवं च व्यवस्थापिते सति
79A विनाशस्य सहेतुकता वा भवतु निर्हेतुकता वा सर्वदाप्यभवनं वा, किं तेनावयोरिति ।

अयं चात्र न्यायः—यदुत्तरसन्तानोत्पादकं तत्पूर्वसन्ताननिवर्तकम्, यदेवं न भवति तदुत्तरसन्तानोत्पादकमपि न भवति यथा घटः पटस्य, उत्तरसन्तानोत्पादकं च विवादपदम्, उत्तरसन्तानोत्पादकत्वं च पूर्वसन्तानक्षणस्योत्तरक्षणाजनकत्वे [सति विनाशो]त्पादकत्वेन व्याप्तम्, तथा च पूर्वसन्ताननिवृत्तिस्तत्कृतैवेति ।

तन्न विनाशाहेतुकत्वमपि निरन्वयनाशाय ।

तदित्युपसंहरति । हेतोर्व्याप्यभावादसिद्धत्वाच्चेति कारणद्वयं पूर्वोपन्यस्तमेवात्र द्रष्टव्यम् । तस्मान्नैकान्तनित्या नाप्येकान्तक्षणिका भावा इति व्यवस्थितम् ।

---

१ स्वहेतुभ्यस्तत्तद्धेतुयोगतस्तथा तथा परिणामिनो भावाः ॥ २ विलम्बेन ॥ ३ उत्तरपर्याया-भिन्नः ॥ ४ पूर्वस्य ॥ ५ मुद्गरादि ॥ ६ कपालादिसन्तान ॥ ७ घटादिसन्तान ॥ ८ मुद्गरादि ॥ ९ * अत्रेदं बोध्यम्—'जनकत्वे × त्पादकत्वे-
न व्याप्तम् । तथा च' इत्येवं दक्षिणभागे बहिस्तात् Margin मध्ये पङ्क्तिद्वयमध्ये लिखितमस्ति । × एतच्च चिह्नं त्वे इत्यस्य पश्चाद् उपरिभागे लिखितमस्ति । × एतच्चिह्नं पाठपूरणाय हस्तलिखितादर्शेषु लिख्यते । किन्तु ग्रन्थकारेण कुतोऽप्यनवधानादिकारणेन पाठः पूरितो न विलोक्यते । अतोऽस्माभिः कल्पनया कथञ्चित् पाठं पूरयित्वा ईदृशः पाठोऽत्र लिखितः । 'जनकत्वेन व्याप्तम् इत्यपि पाठेन कार्यं तु सिध्यति ॥ १० तन्न विनाशाहेतुकत्वमपि निरन्वयनाशाय ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तदेवं निरन्वयनाशित्वमपनीय सान्वयनाशित्वसिद्धौ प्रत्यक्षमुपन्यस्यति—

सान्वयनाशित्वं चानुवृत्तव्यावृत्तवस्तुग्रहणपरिणामप्रत्यक्षसिद्धम् । न हि भेदाविशेषेऽपि घट-पटादिष्विव स्थास-कोशादिषु विलक्षणेव प्रतिपत्तिः, मृदेकत्वसंवेदनात् । न च मृदेकत्वेऽपि स्थास-कोशादीनामेकैव संवित्तिः, आकारभेदसंवेदनात् । नापि सर्वस्य सर्वत्रास्खलितः प्रत्ययो भ्रान्तः । लूनपुनर्जातकदलीस्तम्भादिष्वपि नैकान्तानन्वयो नाशः ।

सान्वयनाशित्वं चेति । अनुवृत्तं द्रव्यापेक्षया व्यावृत्तं पर्यायापेक्षया यद्वस्तु तद्ग्रहण-
79B परिणामवता प्रत्यक्षेण सिद्धं सान्वयनाशित्वं भावानाम्, यदेव वस्तुनोऽनुवृत्तव्यावृत्तत्वं तदेव सान्वयनाशित्वम् । तच्च प्रत्यक्षप्रसिद्धमेव । एतदेव द्रढयति—न हीति । घटपटादिष्विति वैधर्म्यम् ।वि लैक्षणेव व्यावृत्तत्वग्रहणपरिणामैव प्रतीतिः । मृदेकत्वसंवेदनात्, स्थास-कोश-कुम्भलादिषु हि व्यावृत्तांशवदनुवृत्तांशोऽपि मृद्रूपः प्रत्यक्षतः संवेद्यते ।

शङ्करनन्दनस्त्वाह—

"यथाविधोऽन्वयस्तथैवावगमोऽवगच्छंस्तद्व्यवस्थानिमित्तं स्यात् । अन्वयश्चाविर्नाशो नित्यत्वमनेककालसम्बद्धता वाऽभिधीयते । न च तथा प्रत्यक्षेण ग्रहणं
80A सम्भवति । एवं हि सम्भवेत् यदि प्रत्यक्षं वस्तु गृह्णत् कालत्रयसम्बन्धितावभासं स्यात् । तच्च नास्ति, इन्द्रियापेक्षितया प्रत्यक्षेण वर्त्तमानकालसहभावित्वमात्रस्य ग्रहणात्, इन्द्रियस्य हि भूतभविष्यतोः सम्बन्धानर्हत्वात् । तदाह—

"नार्थाभेदोऽपरं रूपं रूपात् कालद्वयानुगात् ।
तस्य नानुभवात् सिद्धिर्वर्त्तमानार्थसंश्रयात् ॥" [ ] इति ।

तत्रायं तावदतिप्रमेयरचनाकुशलोऽपि प्रतिवचनमेकमात्राभ्यां ददतां—निरन्वयनाशावभासि प्रत्यक्षं केनाप्यनुभूयते वा न वा । आद्ये सकललोकानुभवैरेव प्रतिघातः । द्वैतीयीके पुनरन्वयस्य प्रत्यक्षत्वमप्रयासमाविरास । निरन्वयनाशो ह्यन्वयस्याभावः ।
80B तेदवभासि चेत् प्रत्यक्षं नाजनिष्ट, शिष्टसिद्धं तर्हि भावरूपान्वयेऽवभासि ।

१ सान्वयनाशित्वं चानुवृत्तव्यावृत्तवस्तुग्रहणपरिणामप्रत्यक्षसिद्धम् ॥ २ न हि भेदाविशेषेऽपि घटपटादिष्विव स्थास-कोशादिषु विलक्षणैव प्रतिपत्तिः ॥ ३ ज्ञानम् ॥ ४ एते त्रयः पर्यायाः ॥ ५ रूपत्रयेण ॥ ६ अर्थाभेदो नित्यत्वमन्वयः ॥ ७ प्रत्यक्षात् ॥ ८ अनुभवस्य ॥ ९ उत्तरवाक्यमिदम् ॥ १० '४' [=चतुर्थ्यन्तम्] ॥ ११ निरन्वयनाशावभासि ॥ १२ सत्ता ॥ १३ सत्तारूपोऽन्वयः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रमाणेन ह्यभावानवभासे सति भावावभासिनैव भवितव्यम् । अन्यथा हि निर्विषयतया प्रामाण्यमपजह्यात्, भावाभावाभ्यां रहितस्य विषयस्यैवाभावात् । तस्मात् प्रतिसमयं निरन्वयनाशाभावोऽन्वयः । स च विषयवत्तया प्रामाण्यस्य व्यापनान्निरन्वयनाशानवभासिना प्रत्यक्षेण गृहीत एव, घटाभावाविषयत्वे घटविषयताया घटप्रत्यक्षस्याऽयत्नसिद्धत्वात् । 5

अथवा कृतं कुटिलभणितिभिः, अकुटिलमेवाभिधीयते । घट एवान्वयांशः, मृद्द्रव्यरूपत्वात् । पर्यायानुगन्तृतया द्रव्यं ह्यन्वयांशः । तथा घट एव व्यावृत्तांशः,
31A पर्यायरूपत्वात् । अननुगन्तृतया पर्याया एव हि व्यावृत्तांशः । एवं च घटग्रहणपरिणामवता प्रत्यक्षेणान्वयांशो व्यावृत्तांशश्च गृहीत एव, तयोर्घटस्वरूपानतिरिक्तत्वात्, तद्ग्रहणे च पूर्वकालसम्बन्धविगम उत्तरकालसम्बन्धयोग्यता च गृहीता, तयोस्तत्र 10 सम्भवात् । उभयकालसम्बद्धता पुनर्द्रव्यरूपस्यान्वयस्य पर्यायान्तरवत् स्वगतो धर्मः, द्रव्यस्यान्वयित्वेनोभयकालसम्बन्धितासम्भवात् । न चाखिलधर्माग्रहणे छद्मस्थज्ञानानां धर्मिणो विषया न भवन्ति । ततो यदि नाम प्रत्यक्षं वस्तु गृह्णत् त्रिकालसम्बद्धतावभासं न भवति तथाऽप्युक्तनीत्याऽन्वयांशविषयता न विरुध्यते ।
31B

पुनरप्याह—"न रूपविशेषाविष्करणमन्तरेणास्ति प्रत्यक्षं किञ्चित् । ततः क 15 आकारोऽन्वयस्यावभासत इति निवेद्यताम् ।" [ ] तँत् किमाकारावभास्येव प्रत्यक्षम् ? 'ओमिति चेत्, तर्हि स्पर्श-रस-गन्ध-शब्दानां किमाकारं प्रत्यक्षमिति भवानेव निवेदयतु । तस्मादाकारासम्भवाद्विषयग्रहणपरिणाम एव ज्ञानानां सर्वत्र विषयाकारः । स चान्वयग्राहिप्रत्यक्षस्याप्यस्ति । ततो यदुच्यते—"तँत्र प्रत्यक्षव्यापारेण नित्यताव्यवस्थापनम्, किन्तु प्रातिभज्ञानादेव" [ ] इति, तदपाक्रियतेति 20 यत् किञ्चिदेतदित्युपरम्यते ।

तदेवमनुवृत्तांशस्य प्रत्यक्षसिद्धत्वमुपपाद्य व्यावृत्तांशस्यापि प्रतिपादयति—नँ चेति । एकेवाऽनुवृत्तांशग्राहिण्येव, आकारभेदसंवेदनात् । मृदेकत्वेऽपि स्थासस्यान्य
32A आकारो वेद्यते कोशादेश्चान्यः ।

नन्वयमनुवृत्तव्यावृत्तवस्तुग्राहिप्रत्ययो भ्रान्त एव, सर्वभावानां स्वस्वभावाव- 25

१ निरन्वयनाशानवभास इत्यर्थः ॥ २ प्रत्यक्षम् ॥ ३ व्यापिकया ॥ ४ यतः प्रत्यक्षस्य न घटाभावो विषय इति ॥ ५ अनुवृत्तव्यावृत्तांशयोः ॥ ६ अनुवृत्तव्यावृत्तांशात्मकघटवस्तुग्रहणे ॥ ७ अनुवृत्तव्यावृत्तांशात्मके वस्तुनि ॥ ८ न च वाच्यं प्रत्यक्षेण उभयकालसम्बन्धाग्रहणे धर्मिणोऽग्रहणम् ॥ ९ शङ्करः ॥ १० आ[चार्यः] ॥ ११ शङ्करः ॥ १२ तदित्युपसंहारे बौद्धोक्तेरेव ॥ १३ प्रातिभज्ञानं चाप्रमाणं बौद्धस्य ॥ १४ न च मृदेकत्वेऽपि स्थास-कोशादीनामेकैव संवित्तिः ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्थानादिति । उच्यते—नेपीति । सर्वस्य द्रष्टुः सर्वत्र देशावस्थादावस्खलितोऽनुपचरितोऽनुपजातप्रमाणबाधो वा [1]प्रत्ययो भ्रान्तो वक्तुं शक्यो घटादिप्रत्ययस्यापि भ्रान्तत्वप्रसङ्गात् । तस्मात् प्रत्यक्षप्रमाणोपपन्नमेव वस्तुनोऽनुवृत्तव्यावृत्ताकारत्वम् । तदेव च सान्वयनाशित्वमतस्तदपि [2]तथैव ।

स्यादेवम्—[3]लूनपुनर्जातकदलीस्तम्भ-केश-नखादिष्वप्यनुवृत्तव्यावृत्ताकारः प्रत्ययो भवति, न च तेष्वनुवृत्ताकारोऽस्ति, ततश्चैतत्[4]प्रत्ययवद् भ्रान्त एवायमिति । तदयुक्तम्, न खल्वेकत्र भ्रान्तितायां सर्वत्रापि तथाभावः, मरीचिकायां जलज्ञानस्य भ्रान्तत्वे सर्वत्र तथाभावप्रसङ्गात् । अपि च, कदलीस्तम्भादिष्वप्यनुवृत्तांशः परमार्थसन्नेवास्ति ।
82B तदाह—[5]लूनेति । कदलीस्तम्भादीनामूर्द्ध्वभागलवनेऽप्यधोभागोऽवतिष्ठते स एव च पुनः प्ररोहति । अतः कथञ्चित् प्राक्तना एव कदलीस्तम्भ-केश-नखादयः पश्चादपि । ननु यत्र प्राचीनं रम्भास्तम्भं समूलकाषं कर्षित्वाऽपर एव रम्भास्तम्भस्तत्र निवेश्यते तत्रापि स एवायमिति प्रत्ययो भवति, न चात्रानुवृत्ताकारः पारमार्थिकोऽस्ति, ततो भ्रान्त एवायमिति । सत्यमेवैतत् । किन्त्वेतदालम्बनेन[6] परमार्थसन्नानुवृत्ताकारविषयोऽपि प्रत्ययो भ्रान्त इत्येतदसाधीयः, अतिप्रसङ्गस्योदितत्वात् ।

न चायमेकान्तक्षणिकेषूपपद्यते, अनुवृत्ताकारस्यापि भावात् । न चायं सदृशापरापरोत्पत्तितः, एकोऽयमिति भावात् । अन्यथा सदृशोऽयमिति स्यात् ।

[7]न चायमित्यनुवृत्तव्यावृत्ताकारः प्रत्ययः क्षणावस्थायिषु वस्तुषु सत्सूपपन्नो भवति, प्रत्ययेऽस्मिन्ननुवृत्ताकारस्यापि भावात् । क्षणमात्रावस्थायिवस्तुग्राही हि प्रत्ययो
83A व्यावृत्ताकार एव स्यात् । [8]न चायमिति अनुवृत्ताकारो ज्ञानगतः सदृशापरापरोत्पत्तितो भवतीति वक्तुं शक्यम्, एकोऽयमिति भावात्, ज्ञानगतस्य ह्यनुवृत्ताकारस्यैक एवायं त्रिष्वपि कालेषु पदार्थ इत्येवमाविर्भावात् । [9]अन्यथेति यदि वस्तुगतपारमार्थिकैकत्वनिबन्धनो ज्ञानगतोऽनुवृत्ताकारो नेष्यते किन्तु सदृशापरापरक्षणोत्पादनिबन्धनस्तदा सदृशोऽयं त्रिष्वपि कालेषु पदार्थो न पुनरेक इत्येवमनुगताकारो ज्ञानगतः स्यात् ।

१ नापि सर्वस्य सर्वथास्खलितः प्रत्ययो भ्रान्तः ॥ २ मृद्विवत् ॥ ३ प्रमाणोपपन्नम् ॥ ४ लूनपुनर्जातकदलीस्तम्भादिप्रत्ययवत् ॥ ५ प्रस्तुतप्रत्ययः ॥ ६ लूनपुनर्जातकदलीस्तम्भादिष्वपि वैज्ञानन्तानन्वयो नाशः ॥ ७ भ्रान्तप्रत्ययालम्बनेन ॥ ८ न चायमेकान्तक्षणिकेषूपपद्यते अनुवृत्ताकारस्यापि भावात् ॥ ९ न चायं सदृशापरापरोत्पत्तितः ॥ १० अन्यथा सदृशोऽयमिति स्यात् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न चैवम्, अतो न सदृशापरापरोत्पत्तितो ज्ञानेऽनुवृत्ताकारः, किं तर्हि ? वस्तुगत-पारमार्थिकैकत्वात् ।

ननु स्वलक्षणग्राहि निर्विकल्पकं व्यावृत्ताकारमेव । यः पुनरयमनुवृत्ताकारः स भ्रान्तविकल्पाकारत्वादप्रमाणमेवेति न वस्तुन्यनुवृत्ताकारः सन् सिध्यतीति ।
83B नन्वयमनुवृत्ताकारो विकल्पः कुतो भ्रान्तः ? अविद्यमानस्यानुवृत्ताकारस्य ग्रहणादिति चेत्, कुतः पुनरविद्यमानत्वं वस्तुन्यनुवृत्ताकारस्य ? त्रिकालावस्थायित्वेऽर्थक्रियाऽयोगादिति चेत्, ननु त्रिकालावस्थायित्वेऽपि सहकारिजनितपरिणामविशेषात् क्रम-यौगपद्याभ्यामर्थक्रिया युज्यत एव । एवं सत्यनित्यैता स्यादिति चेत्, को वै कथञ्चित् तामपि नानुजानाति, पर्यायरूपतया तस्या अपि भावात् । तस्मादेकान्त-नित्यत्वेऽर्थक्रियाऽयोगो न कथञ्चिन्नित्यत्वे । एवं च सत्यनुवृत्ताकारो वस्तुगतः परमार्थसन्नेव । परमार्थसत्परिच्छेदकस्य च विकल्पस्याभ्रान्तत्वेन तद्गताकारोऽपि
84A प्रमाणमेवेति सिद्धं प्रत्यक्षत एव सान्वयनाशि वस्तु ।

अनुमानमप्युच्यते—पूर्वो घटक्षण उत्तरघटक्षणात् कथञ्चिदभेदी, उपादानत्वेन कारणत्वात् । यः पुनः कथञ्चिदभेदी न भवति स उपादानत्वेन कारणमपि न भवति, यथाऽऽलोकः । उपादानत्वं हि कार्ये कथञ्चित् स्वधर्मारोपकत्वेन व्याप्तम्, तच्च सहकारिप्रत्ययानामपि प्रसङ्गादेकान्तभेदे सति न युज्यते तन्नस्तन्निवर्त्तमानं स्वव्या-प्यमुपादानत्वमपि निवर्त्तयतीति व्याप्तिसिद्धिः ।

स्यादेवम्—भेदाविशेषेऽप्युपादानस्यैवेयं प्रतिनियता स्वधर्मारोपकत्वशक्तिर्न सहकारिणामिति । नन्वन्वयव्यतिरेकाभ्यां तुल्ये सर्वेषां कारणत्वे सर्वथा भेदे वोपा-दानस्य कथञ्चित् कार्याभेदादन्यां प्रतिनियतां शक्तिं न विद्मः । "भेद-हेतुभावो-
84B विशेषेऽपीयमेवोपादानस्य कथञ्चित् स्वधर्मारोपकत्वे प्रतिनियता शक्तिर्यदेतत् कथञ्चित् कार्यादभिन्नं न तु सहकारिण इति ।

ननु भेद-हेतुभावोविशेषेऽपि सर्वेषामुपादानस्य प्रतिनियता शक्तिर्नाभेद-निबन्धना, किन्तु स्वकारणनिबन्धना । स्वकारणैरुपादानमेव स्वधर्मारोपकमुपजनितं

१ स्वमसाधारणं सजातीयविजातीयव्यावृत्तं ॥ २ वस्तुभूतः ॥ ३ आ[चार्यः] ॥ ४ वस्तुनः ॥ ५ क्षणि-कतेत्यर्थः ॥ ६ अनित्यतायाः ॥ ७ विकल्पगतानुवृत्याकारोऽपि ॥ ८ परिणामित्वेन ॥ ९ स्वधर्मारोपकत्वम् ॥ १० एकान्तभेदात् ॥ ११ स्वधर्मारोपकत्वम् ॥ १२ * अत्र पञ्चाक्षरप्रमाणं सूक्ष्माक्षरैर्लिखितं टिप्पणमस्ति, किन्तु पठितुं न शक्यते । केवलं भेदा इति आद्यमक्षरद्वयं कथञ्चित् पठितुं शक्यते ॥ १३ '६' [=विग्रहे षष्ठयन्तम्] ॥ १४ उपादानम् ॥ १५ '६' [=विग्रहे षष्ठयन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न सहकारिण इति । नन्वेतदस्माभिरन्यत्र स्वकारणशरणानुसरणमनुष्ठीयमानं किमिति भवतः परसम्पदुत्कर्षद्वेषिणो हृदयशूलोत्थानायोपकल्पते । वयमपि ह्येवमभिधातुं समर्था यथा—तथा कृतशब्दसङ्केतस्य पुरुषस्य क्षयोपशमेन निर्विकल्पकमुपजन्यते यथा सङ्केतितशब्दस्मरणनिरपेक्षमपि सविकल्पकं ज्ञानमुपजनयतीति ।

अपि चैवं कारणानुसरणे इदमपि स्यात् यथेन्द्रियाद् बोधरूपता विज्ञाने 5
85A नालयविज्ञानात् । न चाबोधरूपात् कथं बोधस्योत्पत्तिरिति वाच्यम् । यतः स्वकारणान्येवात्र प्रश्नमर्हन्ति यैरबोधरूपमपि बोधजननायेन्द्रियमुपजनितम् । ननु यदीन्द्रियं बोधरूपताकरणसमर्थं स्यात्तदा तदात्मीयोत्तरक्षणेऽपि कुर्यात् न चैवम्, अतो ज्ञायते विज्ञानेऽपि बोधरूपता न तदुपादानेति । तदपि न, विज्ञान एव बोधजनने समर्थमिन्द्रियं स्वकारणैर्जनितं नात्मीयोत्तरक्षण इत्युत्तरस्य सुलभत्वात् । इन्द्रियाभावेऽपि 10
मानसविकल्पे बोधरूपताऽस्त्येवेति चेत्, न, तत्र मनोजन्यत्वस्य वक्तुं शक्यत्वात् । विजातीयत्वाद्वा, न हीन्द्रियजा धर्मा अनिन्द्रियजे भवन्तीति ।

85B स्यादेवम्—इन्द्रियाद् बोधरूपता विज्ञानस्येष्टैव, इन्द्रिया-ऽऽलोक-मनस्कार-विषयप्रभवत्वात् तस्य । तत् कोऽयं प्रसङ्ग इति । तन्न, सामग्रीप्रभवत्वेऽपि ज्ञानस्येन्द्रियाद्विषयग्रहणयोग्यतानियमस्यैवेष्टत्वात् । यदुक्तं हेतुबिन्दौ—"समनन्तरप्रत्ययाद्धि- 15
ज्ञानाच्चक्षुर्विज्ञानस्योपलम्भात्मता । तस्यैवोपलम्भात्मनः सतश्चक्षुरिन्द्रियाद्रूपग्रहणयोग्यताप्रतिनियमः । विषयात् तुल्यरूपता । इत्यभिन्नत्वेऽपि वस्तुतः कार्यस्य कारणानां भिन्नेभ्यः स्वभावेभ्यो भिन्ना एव विशेषा भवन्ति" [हेतुबिन्दोः पृ० १०—११] इति ।

86A तस्माद्यत्र कार्यकारणयोर्भेदः प्रत्यक्षसिद्धो भवति तत्रातिप्रसङ्गपरिहारार्थं कारणोपजनितशक्तिप्रतिनियम उपन्यस्यते । यथा भेदाविशेषेऽप्यालोकपरमाणव एव रूपज्ञानं 20
जनयन्ति, न तमःपरमाणवः । अत्र तु भेद एव सन्दिग्धः । ततोऽतिप्रसङ्गपरिहारार्थं कारणानुसरणं यदि परं निर्गतिकत्वेन दैन्यमात्रमेवावगमयति । तस्मादुपादानत्वव्यापकं कथञ्चित् कार्ये स्वधर्मारोपकत्वं कथञ्चित् कार्यात् कारणस्याभेद एव घटते, नान्यथा ।

१ एतावता सविकल्पस्य प्रामाण्यं साधितमिति ॥ २ सजातीयोत्तरेन्द्रियक्षणेऽपि ॥ ३ बोधरूपताम् ॥ ४ इन्द्रियम् ॥ ५ प्रसः [=प्रथमसमासः, बहुव्रीहिरित्यर्थः] ॥ ६ मानसविकल्पे ॥ ७ कारणमात्रत्वेन ॥ ८ विज्ञानस्य ॥ ९ समो ज्ञानत्वेन । अनन्तरोऽव्यवहितत्वेन ॥ १० तेन अर्थेन सता तुल्यरूपता तुल्याकारता ॥ ११ * द्रष्टव्यं हेतुबिन्दुटीकायामेतद्विवरणम्, पृ० १११ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यान्मतिः—न कथञ्चिदभेदाभावप्रयुक्त आलोकस्योपादानतोविरहः, किं तर्हि ? उपादानलक्षणयोगाभावप्रयुक्तः । लक्षणं चेदम्—"जनकैराधेयैरतिशयस्य कार्यस्य समस्तविशेषैरुपकोडीकरणसमर्थं आत्मा यस्मादुत्पद्यते तदुपादानम् । यथा चक्षुरादिभ्यश्चक्षुर्विज्ञानस्य समस्तोपकारमयं बोधरूपत्वं समनन्तरप्रत्ययादुत्पन्नमिति तदुपादानम्"
868 [ ] इति । 5

अत्राप्युच्यते—उपादानलक्षणयोगविरहमप्यालोकस्य कथञ्चिदभेदाभावादेवावगच्छामः । अन्यथा तुल्येऽपि कारणत्वे किमिति समस्तविशेषकोडीकरणसमर्थं आत्मा कार्यस्य विवक्षितक्षणादेव भवति, नान्यस्मात् ?

एवं चानेनोऽप्युपादानलक्षणेन न दोषः—"अवस्थाभेदेऽपि यदेकाकारपरा-

---

१ ज्ञानं प्रति ॥ २ हेतुभिः ॥ ३ उत्पादितातिशयस्य ॥ ४ विषयपरिच्छेदतुल्याकारतादयो विशेषाः ॥ ५ जनकेभ्यः ॥ ६ आधेयातिशयस्य जायमानस्येति शेषः ॥ ७ विषयाद् विषयाकारता, इन्द्रियात् तद्ग्रहणपरिणामतादि ॥ ८ इन्द्रियादीनाम् ॥ ९ बोधरूपतास्वभावः ॥ १० **पूर्वलक्षणम् अर्चटकृतम्, इदं तु अन्येन ग्रन्थकृता कृतम्** ॥ * अत्रेदं बोध्यम्— अत्र टिप्पणकर्तुः किञ्चिदनवधानं संजातमिति प्रतीयते । वस्तुतः 'पूर्वलक्षणमन्येन ग्रन्थकृता कृतम्, इदं तु अर्चटेन कृतम्' इति टिप्पणं समीचीनं भाति अत्र । यत इदं लक्षणम् **अर्चटकृतायां हेतुबिन्दुटीकायामुपलभ्यते**, पूर्वलक्षणं तु **हेतुबिन्दुटीकायां** नोपलभ्यते । **हेतुबिन्दुटीकायामीदृशोऽत्र** पाठः— 10 15

"नन्वेकस्याः सामग्र्या अनेकस्य भावे सामग्र्यन्तरजन्येभ्यो भवतु भेदः, परस्परतस्तु कथम् ? । तदतद्रूपहेतुजत्वादि भावास्तदतद्रूपिण इष्यन्ते । तत्र यदा चक्षु-रूप-मनस्कारेभ्यो विज्ञानजन्म तदा चक्षूरूपक्षणयोरपि भावाद् विज्ञानेनाभिन्नहेतुजत्वात् तयोर्विज्ञानात्मता, विज्ञानस्य वा तद्रूपता कथं न प्रसज्येत ! । आह च—

"तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः । 20
तद्रूपादि किमज्ञानं विज्ञानाभिन्नहेतुजम् ॥" [प्रमाणवा. २.२५१] इति ।

नैष दोषः । तेषां यथास्वं स्वभावभेदेन निमित्तोपादानतया तदुपयोगात् । मनस्कारो हि विज्ञानस्योपादानकारणम् । चक्षुषस्तु स्वविज्ञानजननयोग्यस्य जन्मनि सहकारिकारणम् । एवमितरत्रापि यथायोगं वाच्यम् । ततोऽन्यादृशी सामग्री चक्षुःक्षणस्य जनिका, अन्यादृशी च विज्ञानादेरिति तद्वैलक्षण्यादेव कार्याणां वैलक्षण्यम् । 25

स्यादेतत्—सर्वेषामन्वयव्यतिरेकावनुविधीयेते तदा चक्षुरादिक्षणैरिति कुतोऽयं भेदः—इहोपादानभावेनेदमुपयुज्यते, अन्यत्र तु सहकारिभावेनेति ? । बोधरूपतादेरनुकाराननुकाराभ्यां तद्भावे व्यभिचाराव्यभिचारतश्च । तथाहि—विज्ञानं मनस्कारस्य बोधरूपतामनुकरोति, न चक्षुरादेर्जडादिभावम् । एवमन्यदपि प्रत्येयम् । नियमेन च विज्ञानमात्रभावे समनन्तरप्रत्ययस्य व्यापारो न चक्षुरादेः । चक्षुःक्षणान्तरोदये च पूर्वभाविनश्चक्षुषो न स्वविज्ञानयोग्यताहेतोः समनन्तरप्रत्ययस्य । एवं रूपस्यापि वाच्यम् । तस्मादवस्थाभेदेऽपि यद् एकाकारपरामर्श(र्ष)प्रत्ययनिबन्धनतया स्वसन्ततिपतितकार्यप्रसूतिनिमित्तं तद् उपादानकारणम् । यत् सन्तानान्तरे प्रागवस्थापेक्षविशेषोदयनिबन्धनं तत् सहकारिकारणम् । सा चेयं भावानां स्वहेतुपरम्परायाता प्रकृतिर्यया किञ्चित् कार्यं स्वसन्तानव्यवस्थानिबन्धनं जनय- 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मर्शप्रत्ययेनिबन्धनतया स्वसन्ततिपतितकार्यप्रसूतिनिमित्तं तदुपादानकारणम्" [हेतुबिन्दुटीका पृ०९५] इति। यतो योऽयमेकः परामर्श एकत्वबुद्धिस्तदा सा कथञ्चिदेकत्वनान्तरीयिकैव। अथ सदृशस्तादृशो वा प्रत्ययः, सोऽसिद्ध एव, पूर्वोत्तरक्षणयोरेकत्वसंवेदनेन सदृशादिप्रत्ययस्यासंवेदनात्। न खलु बहुषु घटेष्विव तयोः सदृश-
87A बुद्धिरुन्मीलति। तस्मादनुमानतोऽपि सान्वयनाशित्वं भावेषु प्रसिध्यति। 5

तदनुभवसिद्धोत्पाद-व्यय-ध्रौव्यसमुदयः कायः। न चैवं विरोधः, असम्भवात्। तथैव प्रमाणभावाच्च। प्रमाणानुपपत्तिर्हि विरोधलक्षम।

तदित्युपसंहरति। अनुभवः प्रत्यक्षम्। एतावता चोत्पादव्ययध्रौव्यात्मकत्वं सतो लक्षणमुक्तम्। नन्वैवमिति, नैवमेककालमेकत्रोत्पादव्ययध्रौव्याणि विरुध्यन्ते, 10
असम्भवाद् विरोधस्याघटनात्। वस्तूनां विरोधो हि परस्पराभावरूपत्वं वा स्वरूपसत्त्वासत्त्ववत्, परस्पराभावापादकत्वं वा शीतोष्णस्पर्शवत्, परस्पराभाववत्त्वं वा दण्डित्वकुण्डलित्ववदिति त्रयी गतिः। तत्र नादिमस्य सम्भवः, एकान्तनित्यत्वानित्यत्वयोरेव तद्रूपत्वात्। कथञ्चिन्नित्यत्वानित्यत्वयोश्चाभ्युपगमात्, तयोश्च परस्पराभावरूपत्वाभावात्। अन्यथा कथञ्चित्त्वव्याघातः। 15

87B **यदि हि कथञ्चिन्नित्यत्वस्य कथञ्चिदनित्यत्वमभावः स्यात् तदा कथञ्चिन्नित्यत्वं सर्वत्र सर्वदा सर्वथा तत्परिहारेणावतिष्ठेत। न हि भावः स्वाभावेन सह क्वचिदपि कदाचिदपि लेशतोऽपि सम्भवति। एवं च कथञ्चिन्नित्यत्वस्य कथञ्चित्त्वं व्याहन्येत, सर्वथाप्यनित्यत्वासम्भवेन सर्वथा नित्यत्वस्य भावात्, सर्वथाप्यपरित्यक्ता-**

नत्यपरं च सन्तानान्तरव्यपदेशनिबन्धनमिति। तस्या एव सामग्र्या अवान्तरविशेषकृतत्वाच्चक्षू-रूप-विज्ञानक्षणानां 20
परस्परतो वैलक्षण्यं न विरुध्यते।" इति हेतुबिन्दुटीकायां पृ० ९४-९५ ॥

११ वक्ष्यमाणेन ॥ १२ पूर्वं घटज्ञानं पश्चात् पटज्ञानमित्येवमवस्थाभेदेऽपि परं सर्वत्र 'ज्ञानं ज्ञानम्' इति प्रत्यय एको यस्मादुपजायते तदुपादानम्, तत्प्राचीनो ज्ञानक्षण एव ॥ १३ * "उक्तयोर्लक्षणयोराद्यं लक्षणं दुर्बोधत्वादुपसंहारव्याजेन स्पष्टयन्नाह—तस्मादिति। स्वसन्ततिव्यवस्थैव कुतो येन तत्पतितकार्यप्रसूतिनिमित्तं ज्ञातव्यमित्यपेक्षायां योज्यं यदेकाकारेति" इति पण्डितदुर्वेकमिश्रविरचिते हेतुबिन्दुटीकालोके पृ० ३३३ ॥ 25

१ ज्ञान ॥ २ '६' [=विग्रहे षष्ठयन्तम्] ॥ ३ त्रिस ॥ * अत्र त्रिसमासः=तृतीयः समासः, तत्पुरुष इत्यर्थो विवक्षितो भाति ॥ ४ आचा[र्यः] ॥ ५ अत्र विकल्पद्वयम्-किमेकः परामर्श एकत्वबुद्धिरुच्यते, किं वा सदृशस्तादृशो वेति ॥ ६ तदनुभवसिद्धोत्पादव्ययध्रौव्यसमुदयः कायः ॥ ७ न चैवं विरोधः ॥ ८ स्वरूपसत्त्वमसत्त्वाभावरूपम् ॥ ९ परस्पराभावरूपविरोधरूपत्वात् ॥ १० कथञ्चिदनित्यत्वपरिहारेण ॥ ११ पदार्थः ॥ १२ स्वरूपासत्त्वेन ॥ १३ ननु कथञ्चिन्नित्यत्वं कथञ्चिदनित्यत्वपरिहारेण स्थास्यति को दोष 30
इत्याशङ्क्याह—यथमिति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नित्यत्वस्यैव नित्यत्वस्य कथञ्चिद्रूपत्वात् । एवं कथञ्चिदनित्यत्वमप्यवधीकृत्य कथञ्चित्त्वव्याघातः प्रसञ्जनीयः ।

कथञ्चिन्नित्यत्वमेव दुर्घटं विरोधादिति चेत् । न । विरोधस्य द्विष्ठत्वात् । कथञ्चिन्नित्यत्वस्य ह्यन्येन विरोधो विमर्शनीयः, यथा शीतस्योष्णेन । तत्र कथञ्चिन्नित्यत्वस्य किमेकान्तानित्यत्वेन विरोध उत कथञ्चिदनित्यत्वेनेति पूर्वकमेवावर्त्तते । तत्र चोक्तम् ।

8A स्यादेतत्—नित्यत्वस्य कथञ्चित्त्वविशेषणमेव विरुध्यत इति । एवं तर्हि स्यात्-कथञ्चिदादिपदानामकृत्स्नवाचिनां प्रयोग एव त्वया प्रत्याख्यायत । तथा च किञ्चिद् भुक्तं किञ्चित् पीतं किञ्चिन्मधुरमित्येदपि न स्यात् । भोजनादेः स्तोकत्वाददोष इति चेत् । तर्हि नित्यत्वादेरपि स्तोकत्वादेव तथाभावोऽस्तु । न हि नित्यत्वादिभिः स्तोकैर्न भाव्यमिति नियमोऽस्ति । नित्यत्वादेश्च कथञ्चित्त्वं स्तोकत्वमुच्यते । ततः स्तोकवाचिनः 'कथञ्चित्'पदस्य नित्यत्वादिपदैर्न विरोधोऽस्ति, अर्थानामविरोधात् । तद्द्वारेणैव च शब्दानां विरुद्धत्वात् ।

स्यादेवम्—परिपूर्णापेक्षः स्तोकशब्दः सम्बन्धिशब्दत्वात्, कथञ्चिच्छब्दश्च स्तोकशब्दार्थः । न च क्वचिदपि नित्यत्वमनित्यत्वं वा परिपूर्णमस्ति, सर्वस्यापि कथञ्चिन्नित्यानित्यरूपत्वात् । ततः परिपूर्णस्यावधेरभावेन कथञ्चिच्छब्दस्य प्रयोग एव न
8B प्राप्नोतीति । तन्न । नियमाभावात् । अन्यथा तत्त्वध्वनेरप्रयोगप्रसङ्गः, अतत्त्वस्य परमार्थसतः कस्यचिदप्यभावात् । यथा चैकान्तनित्यत्वानभ्युपगमेऽप्येकान्तक्षणिकप्रयोगः, एकान्तक्षणिकानभ्युपगमे एकान्तनित्यप्रयोगो वा । न चैकान्तक्षणिकं किमप्यस्ति, प्रदीप-बुद्ध्यादेरपि परैः क्षणमात्रावस्थायित्वस्यानभ्युपगमात् । परैरपरिकल्पितापेक्षया न दोष इति चेत् । साऽत्रापि न किमस्ति । तस्मात् परिपूर्णनित्यत्वाभावेऽपि कथञ्चिदादिपदप्रयोगो न विरुध्यते । तथा च नित्यत्वस्य कथञ्चित्त्वविशेषणमविरुद्धम् । तस्मान्नादिमः पक्षः सम्भवी ।

परस्परापावापादकत्वमप्यसम्भवि, कथञ्चित्त्वव्याघातप्रसङ्गात् । कथञ्चिदनित्यत्वाभावापादकत्वेन कथञ्चिन्नित्यत्वस्यैकान्तत्वप्रसङ्गात् ।

१ परस्य वक्तव्यम् ॥ २ स्तोकादिभिः परिपूर्णापेक्षया भाव्यमिति नियमाभावात् ॥ ३ अतत्त्वपरिहारेण तत्त्वं व्यवस्थितम् । अतत्त्वं च पारमार्थिकं नास्ति त्वन्मते इति तत्त्वध्वनेरप्रयोगः प्राप्तः । अतत्त्वे च पारमार्थिके सप्तदशः सप्तमो वा पदार्थः स्यादिति ॥ ४ बौद्धं प्रति ॥ ५ नैयायिकं प्रति ॥ ६ किन्तु द्विक्षणावस्थायित्वं मतम् ॥ ७ बौद्ध ॥ ८ जैनमते । परैर्हि एकान्तनित्यता एकान्तक्षणिकता चाङ्गीकृतास्ति । तदपेक्षया स्तोकादिपदोपपत्तिः ॥ ९ विरोधः ॥ १० पूर्वं साधितं कथञ्चित्त्वम्, तस्मिन् साधिते इदं पठितम् ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

नापि तृतीयः सम्भवी, कृतकत्वानित्यत्वादेरपि परस्पराभाववत्त्वेन विरोधित्व-
89A प्रसङ्गात्। प्रकारान्तरं चाऽसम्भवादेव प्रत्याख्यायत।

नन्वस्त्यनुपलम्भो नाम तुरीयः प्रकारः। न हि कथञ्चिन्नित्यत्वाद्युपलभ्यत इति। न। असिद्धत्वात्, पूर्वपर्ययैर्विनाशिनो द्रव्यत्वेनानुयायिनो घटादेः प्रत्यक्षत एवोपलम्भात्। एवं भेदाभेदा-ऽभिलाप्यत्वानभिलाप्यत्व-सामान्यविशेषात्मकत्वादीनामपि विरोधपरिहारो विमर्शनीयः।

सदसद्रूपतयोः पुनर्विरोधशङ्कैव नास्ति। घटरूपसत्त्वं हि स्वाभावेनैव विरुध्यते, न पुनः पटरूपसत्त्वाभावेन। ततो यदि घटः स्वरूपेण संस्तदानीमपि पररूपेणासंश्च भवेत् किं
89B नाम विरुध्येत? आत्मन एव भावाभावयोर्विरोधात्, भावाभावमात्रयोः पुनर्विरोधे सर्वं सर्वात्मकं स्यात्। तच्च प्रत्यक्षेणैव बाध्यते। तस्मात् स्थितमेतत्—ये परस्पराभावरूपाः परस्पराभावापादका वा तेषां विरोधो यथा स्वरूपसत्त्वभावाभावयोः शीतोष्णयोर्वा, न चैवं कथञ्चिन्नित्यत्वानित्यत्वादय इति विरोधासम्भवः। तथा चास्माभिरेवान्यत्रोक्तम्—

"निजाभिधेयप्रतिघातशङ्कया कथञ्चिदादीनि पदान्यपि स्वतः।
निवेशयन्त्यर्थगणे विरोधिनः प्रसह्य सत्त्वप्रभृतीन् गतक्रमम् ॥१॥
कथञ्चिदर्था हि सदाद्यपूर्णता विहन्यते सा प्रतियोग्यनाश्रितौ।
विधिर्निषेधेन सहस्थितौ स्थितस्ततो विरोधः परिपूर्णता यदि ॥२॥"

[ ] इति।

तदयं प्रमाणार्थः—ययोरविरोधस्तयोर्युगपदेकत्राप्यवस्थानं यथा रूपरसगन्ध-स्पर्शानामुपादानसहकारितयोर्वा। अविरोधश्च स्यात्कारलाञ्छनयोर्नित्यत्वानित्यत्वयो-
90A र्भेदाभेदयोरभिलाप्यत्वानभिलाप्यत्वयोः सामान्यविशेषात्मकत्वयोः सत्त्वासत्त्वयोर्वेति। ततो विरोधासम्भवादुत्पादव्ययध्रौव्याणां युगपदेकत्रावस्थानं न विरुध्यते।

तथैवेति न केवलं विरोधासम्भवादेकत्रैककालं उत्पादव्ययध्रौव्याणि न विरुध्यन्ते तथा तथैव प्रमाणस्य प्रत्यक्षादेरुत्पादाच्च। हियस्मात् प्रमाणेन प्रत्यक्षादिनाऽनुपपत्तिर-नुपलम्भो यस्तद् विरोधस्य लक्ष्म लक्षणम्, न हि विरोधो नाम पारमार्थिकः कस्यचित् केनापि सहास्ति। किन्तु यो यथा येन सह प्रत्यक्षादिना नोपलभ्यते
90B स तथा तेन सह विरुद्ध इति लोके व्यवह्रियते। यदाह—

१ सदृशपरिणामः ॥ २ विसदृशपरिणामः ॥ ३ स्वरूपस्य ॥ ४ परस्परं पदार्थानां विलक्षणोपलक्षणात् ॥ ५ 'कथञ्चित्'पदस्य इदमेवाभिधेयं यद् युगपद् द्वावर्थौ ब्रूत इति ॥ ६ कर्तृणि ॥ ७ युगपत् ॥ ८ '६' [=विग्रहे षष्ठयन्तम्] ॥ ९ सहभावे ॥ १० नैयायिकं प्रति ॥ ११ तथैव प्रमाणभावाच्च ॥ १२ प्रमाणानुपपत्तिर्हि विरोधलक्ष्म ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"दृष्टेत्वान्न विरोधोऽपि कथ्यते युक्तिशालिभिः ।
विरोधोऽनुपलम्भो हि यतो जैनमते मतः ॥" [ ] इति ।

अतश्चैकत्रैककालमुत्पादव्ययध्रौव्याण्यपि प्रमाणेन तथैवोपलभ्यमानान्यविरोधीनि, विरोधलक्षणस्य प्रमाणानुपलम्भस्य तेष्वभावात् । अपि चैकनिमित्तानां स्यादपि विरोधसम्भावना, उत्पादादयश्च भिन्ननिमित्ताः । पूर्वपर्यायस्य हि व्ययः । उत्तरपर्यायस्योदयः । द्रव्यस्यानुयायिनो ध्रौव्यम् । ततः कुतोऽत्र विरोधसम्भावना ।

अविकलकारणस्य भवतोऽन्यभावेऽभावगतिः प्रमाणेन सहावस्थानानुपपत्तेरन्या का ?

शीतोष्णयोरपि प्रमाणानुपपत्तिलक्षणं विरोधं घटयति—अविकलेति । अविकलानि
91A समग्राणि कारणानि यस्य शीतादेः स तथोक्तः, भवतः परिणामान्तरेणोत्पद्यमानस्याऽन्यभावेऽन्यस्योष्णादेः सन्निधाने सति अभावगतिः शीतादेः सजातीयपर्यायपरिणामापरिच्छित्तिः प्रमाणेन सहावस्थानानुपपत्तेरन्या का ! न काऽपीत्यर्थः । अयमेव हि शीतस्योष्णेन सह विरोधो यदस्योष्णसन्निधाने सजातीयपर्यायैः परिणतिः प्रत्यक्षतो नोपलभ्यत इति । तस्मात् प्रमाणानुपपत्तिरेव सर्वत्र विरोधलक्षणम् । तच्चोत्पादादिषु नास्ति, प्रत्यक्षत एवैषामेकत्रैवोपलम्भात् ।

उत्पादादीनामविरोधाय युक्त्यन्तरमप्युपन्यस्यति—

स्यादपि सदैव पृथगाश्रयोपलब्धानामेकाश्रययोजनायां विरोधसम्भावना । न चोत्पाद-व्यय-ध्रौव्याणि सदा परस्परानुवेधेन पृथगाश्रयोपलब्धानि ।

स्यादपीति । ये हि सदैव सर्वैरपि पृथगाश्रया एवोपलभ्यन्ते ते यदा केनाप्येकाश्रयाः क्रियन्ते तदा भवेदपि विरोधसम्भ(म्भा)वना यथा शीतोष्ण-छायातपादीनाम् ।
91B न चोत्पादव्ययध्रौव्याणि सदा सर्वकालं परस्परानुवेधेनाऽन्योन्यानुप्रवेशेन, परस्परं कथञ्चित्तादात्म्येनेत्यर्थः, पृथगाश्रयोपलब्धानि, न खलु तदस्ति किञ्चिदपि वस्तु यत्र केवल उत्पादो व्ययो ध्रौव्यं वा व्यवस्थितं येनामीषामेकाश्रयीक्रियमाणानां विरोधः

१ एकत्रैव विरुद्धयोर्धर्मयोर्दृष्टत्वात् ॥ २ द्रव्ययोरपि ॥ ३ अविकलकारणस्य भवतोऽन्यभावेऽभावगतिः प्रमाणेन सहावस्थानानुपपत्तेरन्या का ? ॥ ४ अज्ञानम् ॥ ५ स्यादपि सदैव पृथगाश्रयोपलब्धानामेकाश्रययोजनायां विरोधसम्भावना ॥ ६ न चोत्पाद-व्यय-ध्रौव्याणि सदा परस्परानुवेधेन पृथगाश्रयोपलब्धानि ॥ ७ कृत्वा । सर्वकालं परस्परानुवेधाद्धेतोः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सम्भाव्यते। किन्त्वमी सर्वदा संलुलितत्वेनाभिन्नाश्रया एव, ततः कुतो विरोध-सम्भावना स्यात्।

स्यान्मतम्—अन्योन्यव्यवच्छेदरूपाणामेकव्यवच्छेदेनान्यविधानात् कथमेकत्र सम्भवः। अनित्यत्वव्यवच्छेदेन हि नित्यत्वं विधीयते, तद्व्यवच्छेदेन चानित्यत्वम्, परस्पराभावरूपत्वात्। ततो यत्र यत्प्रकारव्यवच्छेदेन यदितरप्रकारावच्छेदो न तत्र तदानीमेव व्यवच्छिद्यमानप्रकारसम्भवः, यथाऽऽतपव्यवच्छेदेनावच्छिद्यमानायां क्वचिद्देशे 92A छायायाम्, अन्योन्यव्यवच्छेदेन चावच्छिद्यते वस्तुनि नित्यत्वमनित्यत्वं वेति नैकत्रैकदोभयसम्भव इति। अत्राह—

अत एव नैकव्यवच्छेदेनापरपरिच्छेदः। यत् पुनरुभयांशार्पणया एकशब्देन वस्तुस्वरूपानभिधानं तत्रापराध्यति क्षयोपशमः। तन्नोत्पाद-व्यय-ध्रौव्याणां युगपद्भावेऽपि विरोधः।

अत एवेति। यत एव परस्परानुवेधेन न पृथगाश्रयोपलब्धान्युत्पादव्ययध्रौव्याणि तत एव नैकव्यवच्छेदेनापरपरिच्छेदः। प्रत्यक्षं हि वस्तुनि प्रवर्त्तमानं नान्योन्यव्यवच्छेदेन नित्यतामनित्यतां वा परिच्छिनत्ति, किन्तूभयमप्यव्यवच्छेदेन, स्यान्नित्यतया वस्तुनः परिच्छेदात्। यत्रापि क्वचित् कस्यचित् कुशास्त्राहितापसंस्कारस्य केवलनित्यताऽनित्यतावसायि प्रत्यक्षमुदयते तत्रापि द्वितीयाक्षेपेणाप्रतिषेधेन वेति न कस्यचिदपि 92B प्रत्यक्षं वस्तुन एकान्तेन क्षणिकत्वमक्षणिकत्वं वा परिच्छिनत्ति, किन्तु युगपदुभयमेककं वाऽन्याक्षेपाप्रतिषेधाभ्याम्। ततोऽन्यव्यवच्छेदेन नित्यानित्यतयोः परिच्छेदोऽसिद्धः। अत एव परस्पराभावरूपत्वमप्यसिद्धमेव, परस्पराव्यवच्छेदेन परिच्छेदात्।

स्यादेवम्—यौ परस्परपरिहारवन्तौ न तावेकाश्रयौ यथा भावाभावौ, परस्परपरिहारवत्यौ च नित्यतानित्यते। तदयुक्तम्। परस्परपरिहारस्यैवानयोरसिद्धत्वात्। न खलु क्वचिदपि केवला नित्यताऽनित्यता वा सिद्धास्ति, कथञ्चित्तादात्म्येनाश्रयपार्थक्यायोगात्। ननु नित्यत्वमनित्यत्वं वा परमार्थसदेव। यच्च परमार्थसत् तस्य क्वचिद्वस्तुन्यभावो यथा नीलस्य पीते। तदनयोरपि क्वचिद्वस्तुन्यभावेन भाव्यमिति। 93A तदपि न। नियताकारस्यैव परमार्थसतोऽन्यत्राभावात्। नित्यतानित्यते चानियताकारे, सर्वत्र सर्वदा भावात्। अयमर्थः—तद्वस्त्वेव न भवति यत्र युगपन्नित्यताऽनित्यते न स्तः, उभयाङ्कितत्वात् सर्वस्य वस्तुविचारस्य। ततः क्व वस्तुनि नित्यता-

१ निराकरणेन ॥ २ ज्ञानम् ॥ ३ अत एव नैकव्यवच्छेदेनापरपरिच्छेदः ॥ ४ कृत्वा ॥ ५ सत्तासत्ते ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ऽनित्यतयोरभावः स्यात् । अनियताकारत्वाच्चानयोरविरोधः । नियताकारस्यैव कस्यचित् केनचित् सह विरोधात् ।

स्यान्मतिः—एकव्यवच्छेदेनान्यपरिच्छेदो मा भूत्, अभिधानं पुनरस्ति, अनित्यताव्यवच्छेदेनैव नित्यशब्देन नित्यताया अभिधानात् । अन्यथा तदुच्चारणवैयर्थ्यप्रसङ्गः । तत एकशब्देन युगपन्नित्यता-ऽनित्यतयोरनभिधा[ना]न्नैकत्र सहावस्थानमिति ।

अत्राप्याह—यैत् पुनरिति नित्यानित्यात्मके वस्तुस्वरूपे नित्यानित्योभयविवक्षया
93B यदेतदेकेन विशेषाभिधायिनैा शब्देनानभिधानं तत्रापराध्यति क्षयोपशमो न विचारकः, क्षयोपशमाधीना हि सर्वाः शब्दप्रवृत्तयः। स च क्षयोपशमो नास्ति येन युगपन्नित्यतानित्यतोभयाभिधायी विशिष्टः शब्दो जन्यते । ततो युगपदेकशब्दानभिधानेऽपि न नित्यता-ऽनित्यतयोर्वस्तुन्यभावः । अत एवान्यव्यवच्छेदेनान्याभिधानमप्यसिद्धम् । क्षयोपशमसङ्केतवशाद्धि नित्यशब्दः स्वार्थमात्रमभिधाय विरमति । न खलु बीजमङ्कुरं जनयतीत्युक्ते सहकारिभावेनानङ्कुरजननं व्यवच्छिद्यते । या पुनरियमन्यव्यवच्छेदप्रतीतिः सा नित्यत्वमात्राभिधानसामर्थ्यनिबन्धना, शब्दो हि यदा नित्यत्वैकाभिधानसमर्थो नित्यत्वमेव
94A केवलमभिदधाति तदाऽनित्यत्वं व्यवच्छिनत्तीति प्रतीयते । एवं चोच्चारणवैयर्थ्यमपि नास्ति, स्वार्थाभिधानमात्रेण चरितार्थत्वात् । तस्मात् प्रमाणानुपपत्तिरेव विरोधो नान्यः, सा चोत्पादव्ययध्रौव्याणां युगपदेकत्र भावेऽपि नास्तीति सर्वं सुस्थम् । तदित्युपसंहरति ।

अत एवैकं सदसद्रूपमपि, स्वरूपाद्यैः सत् पररूपाद्यैरसत् । अन्यथा प्रतिनियतरूपाद्येव न स्यात् ।

अत एवेति । यत एवोत्पाद-व्यय-ध्रौव्याणां युगपदेकत्र न विरोधस्तत एवैकं सदसद्रूपमपि न विरुध्यते । एकं सत् कथं सदसद्रूपमिति चेत् । उच्यते—स्वरूपाद्यैरिति । आद्यशब्दाभ्यां क्षेत्र-भावादिग्रहः । घटः स्वरूपतः पार्थिवत्वेन सन्, नाबादित्वेन ।
94B क्षेत्रतोऽत्रत्यत्वेन, न पाटलिपुत्रकत्वेन । भावतः श्यामत्वेन, न रक्तत्वादिना ।

अन्यथेति यदि पररूपाद्यैरसत्त्वं नेष्यते तदा वस्तु प्रतिनियतरूपाद्येव न स्यात् । यदि हि घटः पटरूपाद्यैरपि सन्निष्यते तदा यदेतदस्य प्रत्यक्षसिद्धं प्रतिनियतं पृथुवृध्नोदरादिरूपं विवक्षितक्षेत्रभावित्वं श्यामवर्णत्वं च तन्न स्यात्, किन्तु सर्वापरद्रव्यरूपादिः स्यात् ।

१ ज्ञानं मा भूत् । शब्दोऽस्त्येव ॥ २ शब्दः ॥ ३ सामान्यशब्दैस्तु वस्तु-पदार्थादि[भि ?]रभिधानमस्ति ॥ ४ यत् पुनरुभयांशार्पणया एकशब्देन वस्तुस्वरूपानभिधानं तत्रापराध्यति क्षयोपशमः ॥ ५ ओम् ॥ * षष्ठीद्विवचनान्तं विग्रहे, क्षयोपशम-सङ्केतयोर्वशादित्यर्थः ॥ ६ विजातीयकार्येष्वपि सहकारिभावेन कारणत्वात् ॥ ७ तत्रोत्पाद-व्यय-ध्रौव्याणां युगपद्भावेऽपि विरोधः ॥ ८ अत एवैकं सदसद्रूपमपि ॥ ९ स्वरूपाद्यैः सत् पररूपाद्यैरसत् ॥ १० अन्यथा प्रतिनियतरूपाद्येव न स्यात् ॥ ११ सर्वक्षेत्रसर्वश्यामवर्णादयः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न च स्वरूपादिसत्त्वमेव विशिष्टं पररूपाद्यसत्त्वम्, अपरासत्त्वाभावे वैशिष्ट्यस्यैवाभावात् ।

स्यादेवम्—यदेव स्वप्रतिनियतै रूपादिभिर्वस्तुनः सत्त्वं तदेव पररूपादिभिरसत्त्वम् । न खलु स्वरूपादिसत्त्वं पररूपाद्यसत्त्वं च द्वयमस्ति, किन्तु विशिष्टं स्वरूपादिसत्त्वमेवैकमस्ति । तत् कस्य केनाविरोधश्चिन्त्यत इति । 5

95A **तन्न । यस्मान्न** च स्वरूपादिसत्त्वमेव विशिष्टं **पररूपादिभिरसंसृष्टं** पररूपाद्यसत्त्वमिति वक्तव्यम्, अपरेषां रूपादीनां यदसत्त्वं तस्याभावे स्वरूपादिसत्त्वस्य वैशिष्ट्यस्यैवाभावादघटनात् । यदि हि स्वरूपादिभिः सत्त्वं पररूपाद्यसंसृष्टत्वनिरपेक्षमेव पररूपाद्यसत्त्वमुच्यते तदा तथाभूते पररूपाद्यसत्त्वे सत्यपि पररूपादिभिः सत्त्वं प्राप्नोति, पररूपाद्यभावानवच्छिन्नेन रूपादिमात्रेण सत्त्वाभ्यनुज्ञानात्, पररूपादीनामपि रूपादिमात्रत्वानतिक्रमात् । अथ पररूपाद्यसंसृष्टं स्वरूपादिसत्त्वं पररूपाद्यसत्त्वमुच्यते । एवं तर्हि यत इदं स्वरूपादिसत्त्वं पररूपादिभिरसंसृष्टमुच्यते स स्वगतो रूपविशेषः स्वरूपादिसत्त्वस्यैष्टव्यः । स चास्माकं पररूपाद्यसत्त्वमुच्यते । स्वरूपादिसत्त्वमपि स्वकारणैः 95B वस्तुनः प्रतिनियतं तदा जनितं स्यात् यदि पररूपाद्यसत्त्वमपि जनितं स्यात् । ततः स्वरूपादिसत्त्वमेव प्रतिनियतमुच्यमानं पररूपाद्यसत्त्वमपरं परमार्थसदाकर्षति । 10 15

अर्चटस्त्वाह—"व्यतिरिक्तमपि भावांशाद्भावांशमिच्छता भावांशः स्वेभावेनाऽ-

१ न च स्वरूपादिसत्त्वमेव विशिष्टं पररूपाद्यसत्त्वम् ॥ २ अपरासत्त्वाभावे वैशिष्ट्यस्यैवाभावात् ॥ ३ ऽनविशिषे तेन? ॥ * अत्र 'अविशेषितेन' इति आशयः समीचीनः प्रतीयते, अतः 'अन्' इति 'अविशेषे' वर्तते, तेन अविशेषितेन इति ग्रन्थकृतोऽभिप्रायो भाति ॥ ४ • अस्य अर्चटग्रन्थस्य पण्डितदुर्वेकमिश्रविरचिता व्याख्या— 20

"ननु च तस्यासंकीर्णरूपता [न] स्वतः, किं त्वभावांशसद्भावात् । तत्कथमेवमभिधीयत इत्याशंक्य कारणमाह—**तथाहीत्यादि** । **अन्यथा** तस्य पररूपमिश्रताप्रकारेण । **स एवाभावांशः** परोभावो **न सिद्ध्येत्** परोभवदिति भावः । अत्रैवाभ्युच्चयहेतुमाह **न चेति** । **सा** संकीर्णरूपता, कथं न युक्तिमतीत्याह—**स्वहेतुबलेति स्वहेतुबलायातस्य** तद्धेतुभावेन विशेषणम् । योगपरिवर्जनं तस्यायोगात् । **तेन** वस्तुनेति सामर्थ्यात् ।

ननु तेन तस्य संकीर्णरूपस्य विनाश[नि] पराभावेन सर्वेषामेव भावानामुदयक्षणादूर्ध्वमभावादभावैकरसं जगत् स्यादिति प्रसंजयितुं युक्तं, न भू (तु) **तेन संकीर्णरूपविनाशेन(शने) वरं स्वहेतोरेवासंकीर्णरूपाणामुदयोऽस्त्वित्यति** । सत्यम् । यथाश्रुतिः(ते) स्यादेव दोषः । केवलमस्य तात्पर्यार्थबोधे यत्नः करणीयः । इह खलु भावानां क्षणभङ्गित्वेऽपि सदृशापरापरक्षणोदयादस्तुसन्तानविषया प्रतीतिरस्ति, न त्वभावविषयैव । अत एव तत्त्वधर्मतया(?)यामुपक्रमतोत्पद्यते । उदयोत्तरकालमव्यवधानेन वस्तुविषया च प्रतीतिः कथमुपपद्येत यदि स एवाभावः पूर्वसिद्धं संकीर्णरूपं विनाश्यान्यदसंकीर्णरूपमुत्पादयेत् । सति चैवं 'वरं वस्त्वेतोरेव तथाविधानामुदयोऽस्तु' इत्युच्यत इति । हेतुत्वेनार्थक्रियाकारित्वेन वस्तुरूपत्वादभावरूपतैव हीयेतेत्येतदुपेक्ष्यैव चैतदुक्तं द्रष्टव्यम्

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

संकीर्णरूपः कल्पनीयः । अन्यथा स एवाभावांशो न सिध्येत् । न च स्वभावेनासङ्कीर्णरूपतायामसत्यां पृथग्भूताभावांशसद्भावेऽपि सा युक्तिमती, स्वहेतुबलायातस्य सङ्कीर्णरूपस्याकिञ्चित्करत्वाभावांशसम्भवेऽपि त्यागायोगात् । न चैं तेनैव तद्विनाशनम्, विनाशहेतोरयोगात् । तेनैं सङ्कीर्णरूपविनाशने च वरं स्वहेतोरेव स्वभावतोऽसङ्कीर्णरूपाणामुदयोऽस्तु किं परिव्राण्मोदकन्यायोपगमेन ? तस्मात् स्वभाव एव भावानां 5
96A पररूपविकलत्वादभावांशो नान्यः" [हेतुबिन्दुटीका पृ० २५–२६] इति ।

अत्रोच्यते–

सदसद्रूपाद्धेतोरेव सदसद्रूपोत्पत्तिः, नोत्पन्नस्यासत्त्वेन परतो भेदः ।

सदिति । स्वरूपादिसत्त्वपररूपाद्यसत्त्वात्मकाद्धेतोरेव भावाः स्वरूपादिसत्त्वपर- 10
रूपाद्यसत्त्वात्मका भवन्ति । न पुनः पररूपादिसङ्करेणोत्पन्नानां पररूपाद्यसत्त्वेन पश्चात् पररूपादिभ्यो भेदः क्रियते । स्वहेतुभ्य एव भावाः पररूपाद्यसङ्कीर्णस्वभावा भवन्तीति वयमपि मन्यामहे । किन्तु पररूपाद्यसङ्कीर्णत्वं वस्तुनः स्वगतं रूपं स्वरूपादिसत्त्वात् स्याद्विधिं परमार्थसदेवेति ब्रूमः, तदनभ्युपगमेऽसङ्कीर्णा एत इति वक्तुमशक्यत्वात् । ततोऽसङ्कीर्णस्वभावोत्पत्तिरेवासत्त्वांशोत्पत्तिः, नान्या काचित् । 15
96B तस्मात् स्वरूपादिसत्त्वस्य वैशिष्ट्यान्यथानुपपत्त्या पररूपाद्यसत्त्वं वास्तवमेष्टव्यमेव ।

एकनिमित्तत्वे शब्दप्रत्ययभेदोऽपि न स्यात्, निमित्तत्वैरूप्यजत्वान्निमित्तवैरूप्यस्य । अन्यथा न प्रतिनियतोपादानपरिग्रहः । पीतमेव वा सकलनीलादिप्रत्ययहेतुः स्यात् ।

अपि च, यदि स्वरूपादिसत्त्वमेवैकमिष्यते तदैकनिमित्तत्वे सति शब्दभेदः 20

प्रथम संकीर्णरूपाणामुत्पादोऽभ्युपेयते, पश्चादसंकीर्णरूपाणामुदयमुपगन्तुं का पुनरत्र हानिरित्याशङ्क्याह– "किमित्यादि। कश्चित् किल परिव्राड् अशुचौ पतितं मोदकं करेण गृह्णन् केनचित् सोत्प्रासं पृष्टः– 'किमशुचेर्मोदकं गृह्णासि' इति। स एवं पृष्टस्तं प्रत्यवादीत्–'प्रक्षाल्यो(ल्या)त्रैव त्यक्षा(क्ष्या)मि' इति। सोऽयं परिव्राजको(क)मोदकं(क)प्रहणार्थी न्यायः, तदुपगमेन किम्? यथा च तत्र तन्मतम् 'अत्रैव त्यक्तव्य एवायम्' तदा किमशुचिम्रक्षितस्यान्नस्य ग्रहणेन ? वरमयं पूर्वावस्थानेन एवास्तु इत्युपालम्भस्तथा- 52
त्रापि । यदि त्वभावत एवासङ्कीर्णरूपाणां पश्चादुत्पादोऽभ्युपेतव्यो वरं प्रथमत एव तथाभूतानामुदयोऽभ्युपगम्यतामित्यभिप्रायः । ततस्तथाविधो(ध)स्य प्रमाणप्रसिद्धौ चायमुपालम्भाभिप्रायो द्रष्टव्यः । **तस्मादित्यादिना** प्रकृतोपसंहारः ।" इति दुर्वेकमिश्रविरचिते हेतुबिन्दुटीकालोके पृ० २७८ ॥ ५ स्वरूपेण स्वोत्पत्त्या ॥

१ असङ्कीर्णरूपता ॥ २ अभावस्य तुच्छरूपत्वादकिञ्चित्करत्वम् ॥ ३ अभावांशेनैव ॥ ४ पृथग्भूताभावेन ॥
५ सदसद्रूपाद्धेतोरेव सदसद्रूपोत्पत्तिः, नोत्पन्नस्यासत्त्वेन परतो भेदः ॥ ६ एकनिमित्तत्वे शब्दप्रत्ययभेदोऽपि न स्यात् ॥ 30

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रत्ययभेदश्च न स्यात्। घटः स्वरूपाद्यैः सन् पररूपाद्यैरसन्नित्येवं यः शब्दभेदः प्रत्ययभेदश्च स एकनिमित्तः कथं स्यात्, निमित्तवैरूप्यजत्वान्निमित्तिवैरूप्यस्य। शब्द-
97A प्रत्ययानां हि विषयगतं रूपं निमित्तम्, तच्चेदेकं तदा निमित्तिनामपि शब्दप्रत्ययानामेकत्वमेव। न खलु यत एव निमित्ताद्गौरयमिति शब्दः प्रत्ययो वा जायते तत एवाऽगौरित्यपि, शब्दप्रत्ययभेदव्यवस्थानाभावप्रसङ्गात्। तच्छब्दप्रत्ययभेदा- 5
न्यथानुपपत्त्याऽपि न स्वरूपादिसत्त्वमेव पररूपाद्यसत्त्वम्।

अन्यथेति यदि निमित्तैकत्वेऽपि निमित्तिभेद इष्यते तदा न प्रतिनियतोपादानपरिग्रहः स्यात्। यदा हि मृत्पिण्डो घटस्यैव निमित्तं न पटस्य तन्तवो वा पटस्यैव न घटस्य तदा घटार्थी मृत्पिण्डमेवानुधावति पटार्थी च तन्तूनेव। यदा तु निमित्ताभेदेऽपि निमित्तिभेदस्तदा पटार्थी मृत्पिण्डमप्यनुधावेत् घटार्थी च तन्तूनपि। 10

[3]पीतमेव वा सकलनीलशुक्लरक्तादिप्रत्ययानां हेतुः स्यात्। यथा हि स्वरूपादि-
97B सत्त्वमेवैकं वस्तुनि सदसदिति प्रत्ययहेतुरिष्यते तथा किमिति पीतमेवैकं सकलनीलादिप्रत्ययानामुत्पादकं नेष्यते। एवं च नीलशुक्लादिरूपमपि पररूपाद्यसत्त्वमिव न कल्पनीयं स्यात्, स्वरूपादिसत्त्वादिव पीतादेवैकस्मात् पररूपाद्यसत्त्वप्रत्ययवन्नीलादिप्रत्ययानामाविर्भावसम्भवात्। तस्मात् प्रतिनियतोपादानपरिग्रहात् पीतादेवैक- 15
स्मात् सकलनीलादिप्रत्ययानामनुत्पादाच्च शब्दप्रत्ययभेदो निमित्तभेदनिबन्धन एवैष्टव्यः।

एकस्मादनेकसंविदां भावेऽपि न विजातीयत्वम्, सर्वज्ञताभेदप्रसङ्गात्। न चार्थनिबन्धनास्तद्बुद्धयः, अतीतादिषु भावात्। अन्यथा तद्रूपतैव न स्यात्। 20

स्यादेतम्—एकस्मादपि घटविषयादनेकसर्वज्ञानामनेका बुद्धयः प्रादुर्भवन्ति, तत् कथं न व्यभिचार इति। उच्यते—[4]एकस्मादिति। एकनिमित्तत्वे प्रत्ययानामनेकत्वं
98A न निवार्यते, किन्तु विजातीयत्वम्, भेदशब्देन विजातीयत्वस्येष्टत्वात्। तच्च घटैकविषयाणामनेकसर्वज्ञबुद्धीनां नास्ति, सर्वासां घटग्रहणपरिणामवत्त्वेनोत्पादादिति न व्यभिचारः। एवं च स्वरूपादिसत्त्वमप्यनेकान् प्रत्ययानुत्पादयतु नाम। यत्पुनः 25

१ किन्तु अन्यस्मान्महिषादेः ॥ २ अन्यथा न प्रतिनियतोपादानपरिग्रहः ॥ ३ पीतमेव वा सकलनीलादिप्रत्ययहेतुः स्यात् ॥ ४ एकस्मादनेकसंविदां भावेऽपि न विजातीयत्वम् ॥ ५ विजातीयत्वम् ॥ ६ '६' [=विग्रहे षष्ठयन्तम्] ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सदसदिति प्रत्ययौ परस्परविरुद्धावुपजनयति तदेव मनागस्मानन्तर्दुनोति। अविजातीयत्वे हेतुमाह—सर्वज्ञताभेदप्रसङ्गादिति। यदि ह्येकस्मिन्नपि विषये रूपभेदेन सर्वदर्शिनां विज्ञानानि भवेयुस्तदा सर्वज्ञतैवाविजातीयत्वं स्यात्, सर्वभावानामन्यथा दर्शनात्।

किञ्च, नं चेति। न च अर्थनिबन्धना अर्थोत्पाद्यास्तेषां सर्वज्ञानां बुद्धयः, अतीतादिषु भावात्। सर्वज्ञा ह्यतीतमनागतं चार्थं परिच्छिन्दन्ति। न चातीतादयो- 988 ऽसन्तः परिच्छेदोत्पादका घटन्ते।

अन्यथेति। यद्यतीत-भविष्यन्तोऽपि बुद्धीरुपजनयेयुस्तदा तेषामतीतादिरूपतैव न स्यात्। यो ह्यर्थक्रियामुपजनयति स कथं नामातीतादिर्भवति। अयमर्थः—छद्मस्थबुद्धयो विषयादुत्पन्नाः समानरूपा एकविषया अप्यनेका भवन्ति। सर्वज्ञबुद्धयः पुनर्विषयोत्पाद्या एव न भवन्ति, किं तत्र विषयैकत्वानेकत्वकल्पनया?

नन्विदं स्वरूपाद्यैः सत् पररूपाद्यैश्चासदिति प्रत्ययौ कल्पनारूपत्वाद्भ्रान्तौ। उच्यते—

न च विकल्पधियो न प्रमाणम्, सम्यगनुभवत्वात्। तदस्खलितशब्दप्रत्ययभेदो भिन्नहेतुरेव।

नं चेति। सम्यगनुभवत्वात् प्रमाणलक्षणोपपन्नत्वात्। इन्द्रियार्थान्वयव्यतिरेकानुविधायी यः प्रत्ययः स सम्यगनुभवः। यश्च सम्यगनुभवः स निर्विकल्पकवत् 99A प्रमाणम्। वस्तुनि च सदसदिति प्रत्ययाविन्द्रियार्थान्वयव्यतिरेकानुविधायितया सम्यगनुभवौ, तथा च प्रमाणम्। प्रमाणरूपभेदेन च विषयस्यापि भेद एव। तेदित्युपसंहरति। सर्वत्र भावित्वमबाधितत्वं चास्खलितत्वम्। हेतुर्विषयः। शब्दाश्च निर्विषया न भवन्तीति प्राक् प्रपञ्चितमेव।

पररूपासत्त्व-स्वरूपसत्त्वयोरभेदेऽपि न पररूपासत्त्ववत् स्वरूपसत्त्वस्य सर्वत्र भावः. सर्वत्र सता स्वरूपासत्त्वेन बाधनात्, पररूपासत्त्वस्य प्रतिव्यक्ति भिन्नत्वाच्च।

१ न चार्थनिबन्धनास्तद्बुद्धयः, अतीतादिषु भावात्॥ २ अर्थाः॥ ३ अन्यथा तद्रूपतैव न स्यात्॥ ४ अर्थाः॥ ५ किन्तु वर्तमानरूपतैव॥ ६ ज्ञानलक्षणात्॥ ७ विषयात् क्षयोपशमस्ततो ज्ञानमिति पारम्पर्येणार्थो ज्ञानं प्रति कारणमस्त इति विषयादुत्पन्ना इत्युक्तम्॥ ८ न च विकल्पधियो न प्रमाणम्, सम्यगनुभवत्वात्॥ ९ तात्पर्येण पर्यायः॥ १० विवादाध्यासितौ सदसदिति प्रत्ययौ सम्यगनुभवाविति प्रतिज्ञा, इन्द्रियार्थान्वयव्यतिरेकानुविधायित्वात्॥ ११ तदस्खलितशब्दप्रत्ययभेदो भिन्नहेतुरेव॥ १२ देशे काले॥ १३ मरुमरीचिकायां जलज्ञानं भावि, पुरं बाधितम्॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्यादेवम्—पटरूपाद्यसत्त्वं यथा घटे व्यवस्थितं तथा पटादन्यत्र सकलेष्वपि वस्तुषु, अन्यथा पटस्य विभुत्वप्रसङ्गः। घटरूपादिसत्त्व-पटरूपाद्यसत्त्वयोश्च कथञ्चिद्-भेद इष्यते, तथा च पटरूपाद्यसत्त्ववद् घटरूपादिसत्त्वस्य सर्वत्रावस्थितिः स्यादिति। न। [1]पररूपासत्त्व-स्वरूपसत्त्वयोरभेदेऽपि न पररूपासत्त्ववत् [2]स्वरूपसत्त्वस्य सर्वत्र यावति पररूपासत्त्वं तावति भावोऽवस्थानम्। सर्वत्र वस्तुराशौ सता विद्यमानेन स्वरूपासत्त्वेन बाधनात् स्वरूपसत्त्वस्यावस्थाननिरोधात्। यद्यपि हि पटरूपासत्त्वाभेदाद् घटरूपसत्त्वं सर्वत्र प्राप्नोति तथापि स्वाभावेन बाधितत्वान्न भवति, स्वरूपस्वभावाभावयोः परस्परविरोधिनोरेकत्र प्रमाणेनानुपलम्भात्, पटरूपासत्त्ववद् घटरूपासत्त्वस्यापि सर्वत्र भावात्।

स्यान्मतम्—यावता घटरूपसत्त्वं पटरूपासत्त्वादभिन्नं तावता सर्वत्र प्राप्तं यावता च स्वाभावेन बाध्यते तावता न प्राप्तम्। एवं च सन्दिह्महे—पटरूपा-सत्त्वाभेदतो घटरूपसत्त्वं सर्वत्र वा भवेत् स्वाभाववाधितत्वान्मा वेति। तन्न।
100A सर्वत्रावस्थानं हि घटरूपसत्त्वस्य पररूपाभावाभेदायातत्वाद् गौणम्। अनवस्थानं तु स्वाभाववाधितत्वाद् मुख्यम्। गौणमुख्ययोश्च मुख्यमेव बलीय इति सर्वत्रानवस्थान-मेव भवति। अथवा यथा पटरूपासत्त्वाभेदेऽपि घटरूपसत्त्वं पटे न भवति पटरूपा-सत्त्वस्य [3]तत्राभावात्, पटरूपासत्त्वाक्रान्त एव देशे घटरूपसत्त्वभावस्य प्रसञ्जनात्। एवं [4]स्तम्भेऽपि न भवति, स्तम्भरूपासत्त्वस्य [5]तत्राभावात्, घटरूपसत्त्वस्तम्भरूपा-सत्त्वयोश्चाभेदात्, अभिन्नयोश्चैकयोगक्षेमत्वात्। एवमन्येष्वपि न भवति, सर्वेषां स्वरूपाभाववत् स्वरूपाभावाभिन्नस्यापि परिहारात्। यदिवा वस्तुस्वरूपासत्त्ववद् यदि वस्तुस्वरूपसत्त्वमपि सर्वान्यभावाभिन्नं भवेत्तदा सदंशेनापि भावानामभेदः
100B स्यात्। स च प्रत्यक्षबाधितः। ततो यद्यपि पररूपासत्त्वाभेदात् स्वरूपसत्त्वस्य सर्वत्र भावः प्रसक्तस्तथापि सत्त्वात् तेजोऽवयविनोऽनुष्णत्ववन्न भवति, प्रत्यक्षबाधित-त्वात्। न केवलं सर्वत्र सता स्वरूपासत्त्वेन बाधनात् स्वरूपसत्त्वं सर्वत्र न भवति, पररूपासत्त्वस्य प्रतिव्यक्ति भिन्नत्वाच्च। न यदेव पटरूपासत्त्वं घटे व्यवस्थितं तदेव कुसुमरश्मिरिव भावान्तरेष्वपि यतो घटरूपसत्त्वमभेदात् सर्वत्र भवेत्, किन्तु प्रति-

१ पटरूपाद्यसत्त्वेन सहाभेदादिति भावः॥ २ पररूपा-सत्त्वस्वरूपसत्त्वयोरभेदेऽपि न पररूपासत्त्व-वत् स्वरूपसत्त्वस्य सर्वत्र भावः॥ ३ अपेतनीणाव्या(?)एतस्य॥ * अत्र मध्यममक्षरत्रयं न सम्यक् पठ्यते॥ ४ सर्वत्र सता स्वरूपासत्त्वेन बाधनात्॥ ५ पटे॥ ६ घटरूपसत्त्वम्। कोऽभि-प्रायः? यथा घटरूपसत्त्वं पटरूपासत्त्वेनाभिन्नं तथा स्तम्भादिरूपासत्त्वेनापि इति सर्वत्र तदभावः॥ ७ स्तम्भे॥ ८ कुम्भादिषु॥ ९ सूत्र॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यक्ति भिन्नं । अन्यद्धि पटरूपासत्त्वं घटेऽन्यच्च स्तम्भादिषु । ततः पटरूपासत्त्वमेव व्यापकं न भवति कुतस्तेदभेदाद् घटरूपसत्त्वं तथा स्यात् । तस्मादबाधितप्रमाणविषयत्वात् सदसद्रूपं वस्तु परमार्थसदेवेति स्थितम् ।

101A ननु सदसत्त्वे भावाभावरूपे, भावोपमर्दनात्मकं चाभावस्य रूपम् । यदि चासत्त्वेन सत्त्वं ग्रासीकृतं तदाऽसत्त्वरूपतैव वस्तुनः स्यात्, सत्त्वरूपस्य नामापि नश्येदिति । न । भावोपमर्दनात्मकोऽभाव इति मार्गः श्रेयानुत्प्रेक्षितः । किन्तु स्वाभावः पराभावो वा भावोपमर्दनात्मक इत्यत्र विवेककरणे भ्रान्तोऽसि स्वाभाव एव हि भावोपमर्दनात्मको न पराभावः । वस्तूनां चासत्त्वं पररूपेण न स्वरूपेण । ततः पररूपाभावरूपेणासत्त्वेन स्वरूपसत्त्वस्य ग्रासीकरणेऽपि न वस्तुनोऽसत्त्वरूपतैव भवति, स्वसत्त्वाभावेनाऽग्रासीकरणात् ।

स्यादेवम्—पररूपासत्त्वमित्यत्र नञ् पर्युदासः प्रसज्यो वा? पर्युदासत्वे भावान्तरमेवोक्तं स्यात्, तस्य विधिविषयत्वात् । न च भावो भावान्तरात्मा भवति, प्रत्यक्षबाधितत्वात् । प्रसज्यत्वे तु तुच्छरूपं पररूपासत्त्वमुक्तं स्यात् । तस्य च
101B वस्तुधर्मत्वानुपपत्तिः । न हि निरुपाख्यं सोपाख्यस्वभावं भवितुमर्हतीति । न । केवलसतः केवलासतश्च सकाशात् सदसद्रूपं वस्तु जात्यन्तरमेव । ततस्तत्र नञ्विचारः क्रियमाणः केवलं वायुभक्षतामेव पिशुनयति । यदि वा प्रसज्यप्रतिषेधेऽपि न पररूपासत्त्वं तुच्छरूपम्, अतुच्छरूपेण स्वरूपसत्त्वेनाभेदात् । न हि केवलं सत्त्वमसत्त्वं वा क्वचिदप्यस्ति, किन्तु सर्वत्र सत्त्वसंवलितमेवासत्त्वम् । तस्मादबाधितप्रमाणविषयत्वाद्वस्तुनः सदसद्रूपत्वे वस्तुसती ।

सदसद्रूपते स्वतो धर्मिणश्च स्यादभेदिन्यौ, धर्मधर्मिणोरेकान्तभेदाभेदयोः सम्बन्धाभावात् । तदेकं सदसद्रूपमिति ।

सदसद्रूपते इति । स्वतः परस्परस्माद् धर्मिणश्च द्रव्यात्, स्यात् कथञ्चित्, धर्मधर्मिणोरेकान्तभेदाभेदयोः सम्बन्धाभावात्, धर्मधर्मिणोर्ह्येकान्तभेदे समवायः सम्बन्धो न घटते, तस्यैकत्वेन सर्वस्य तथाभावप्रसङ्गात् । संयोगश्च द्रव्ययोरेव
102A भवति । एकान्ताभेदेऽपि कस्य केन सम्बन्धः स्यात्, अनेकवस्तुनिष्ठत्वात् तस्य । तस्मात् कथञ्चिदभेद एव सम्बन्धः । धर्मिणश्चैकस्मात् कथञ्चिदभेदाद्धर्माणामपि

१ पटरूपासत्त्वाभेदात् ॥ २ व्यापकम् ॥ ३ स्वरूपसत्त्वाभावेनेत्यर्थः ॥ ४ नरसिंहवत् ॥ ५ **सदसद्रूपते स्वतो धर्मिणश्च स्यादभेदिन्यौ** ॥ ६ न च धर्मधर्मिणोः । न धर्मयोः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

परस्परं कथञ्चिदभेदः। सदसद्रूपते अपि वस्तुनो धर्मौ ततो धर्मिणः परस्परस्माच्च स्यादभेदिन्यौ ।

स्यादेवम्—द्रव्यपर्याययोः प्रतिभासभेदाद् घटपटवद् भेदैकान्त एव युक्तः। काल-संज्ञा-वचन-कारणा-ऽर्थक्रियाभेद-विरुद्धधर्माध्यासेभ्यश्च । तथाहि—अन्यः कालः पटस्यान्यश्च तन्तूनाम्, पटस्तन्तव इति संज्ञा-वचनयोर्भेदः, कारणा-ऽर्थक्रिया- 5
भेद-विरुद्धधर्माध्यासाश्च प्रतीता एव। तदेतदयुक्तम्, सर्वथा प्रतिभासभेदस्यासिद्धत्वात्। कथञ्चित् प्रतिभासभेदस्तु कथञ्चिदेव भेदं साधयति, न सर्वथा। तन्तव
102B एव च पटरूपतया परिणमन्ते, ततः कालभेदो न सिद्धः। अप्राप्तपटपरिणामानां पुनः कालभेदाद् भेदः सिद्ध एव। संज्ञाभेदस्तु कथञ्चिद् भेदेऽपि घटते। सँ चेष्ट एव। वचनभेदोऽप्येवमेव। कारणभेदः पुनरसिद्धः, कुविन्दादिना तन्तूनामेव पट- 10
रूपेण करणात्। अर्थक्रियाभेदोऽप्येवमेव। न हि प्राप्तपटावस्थास्तन्तवः पटाद् भिन्नामर्थक्रियां कुर्वन्ति। अप्राप्तपटावस्थानां पुनः सर्वत्र भेदोऽभिमत एव। य एव च धर्मास्तन्तूनां पटस्यापि त एव कथञ्चिदभेदादतो विरुद्धधर्माध्यासोऽपि न सिद्धः।

स्यान्मतम्—तन्तुभ्यो यदि पटस्य कथञ्चिदभेदस्तदा तन्तूनामिव पटानेकत्वम्, अथ पटात् तन्तूनां तदा पटस्येव तन्तूनामेकत्वं प्रसक्तम्, अन्यथा विरुद्ध- 15
103A धर्माध्यासादभेद एव न स्यादिति। तदेतदिष्टमेव। तन्तुपटयोः कथञ्चिदेकत्वस्यानेकत्वस्य चाभ्यनुज्ञानात्। पटरूपतया तन्तूनामेकत्वं तन्तुरूपतया पटस्य चानेकत्वम्। न खलु केवलमेकमनेकं वा किञ्चिदस्ति, सर्वस्यैकानेकरूपत्वात्।

स्यान्मतिः—द्रव्यपर्याययोरभेदे सङ्कर-व्यतिकरौ स्याताम्। तथाहि—येन स्वभावेन वस्तुन एकत्वं तेनानेकत्वमपि, येन चानेकत्वं तेनैकत्वमपि स्यात्, 20
सर्वेषां युगपत् प्राप्तिः सङ्करः। तथा येन स्वभावेनैकत्वं तेनानेकत्वमेव, येन चानेकत्वं तेनैकत्वमेव स्यात्, परस्परविषयगमनं व्यतिकरः इति। तदपि न, कथञ्चिद् भेदस्यापीष्टत्वात्। यो ह्यभेदैकान्तनिबन्धनो दोषः स समानकालभाविना भेदेन निवर्त्यते। एतेन यदुक्तम्—

१ एकस्मादभेदपरो धर्मोऽभेदी ॥ २ द्रव्यपर्यायौ एकान्तेन भिन्नौ भिन्नप्रतिभासत्वात् ॥ ३ न केवलं 25
प्रतिभासभेदात् ॥ ४ 'पट एकः, तन्तवश्च बहवः' इत्यादि विरुद्धधर्माध्यासत्वम् ॥ ५ कथञ्चिद् धर्मधर्मिणोरभेदे साधिते ॥ ६ सर्वथा कथञ्चिद्वा प्रतिभासभेद इति विकल्पद्वयम् ॥ ७ कथञ्चिद् भेदः ॥ ८ द्रव्यादिना ॥ ९ पर्यायेभ्योऽभेदादित्यर्थः ॥ १० पर्यायरूपेण ॥ ११ द्रव्याभेदादित्यर्थः ॥ १२ विपर्ययः ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"'विरोधिसंन्निधेर्दोषस्तज्जन्मा न भवेदपि ।
103B सति तस्मिंस्तदात्मा तु नानिष्टोऽपि निवर्त्तते ॥"
[हेतुबिन्दुटीका श्लो० ३१ पृ० १०६] इति,

तदपि प्रत्युक्तम्, भेदाभेदयोः परस्परं दोषात्मकत्वाभावात् । परस्परविरोधित्वमेव हि दोषात्मत्वम् । विरोधश्च परस्परपरिहारेणैवावस्थानसिद्धौ भवति । न च भेदाभेदयोः क्वचिदपि तथाभावः सिद्ध, सर्वदाप्यन्योन्यसंलुलितत्वात् । तस्मादभेदसम्भवो दोषः समानकालभाविना भेदेन निवर्त्त्यत इति न सङ्कर-व्यतिकरौ ।

104A अपि च, परमार्थसंविदेकैकगम्यं प्राकृतपुरुषशेमुषीणामगम्यमहिंसका-ऽपारदारिकपुरुषवच्छबलरूपं वस्तु । तत्र यदप्यस्माभिर्द्रव्यतयैकत्वं पर्यायतया चानेकत्वमित्यादि किञ्चिदुच्यते तदपि शिष्यावबोधमात्रफलतया प्रलापमात्रम्, यथावस्थितरूपेण कथयितुमशक्यत्वात् । यत् पुनस्तत्रापि सङ्कर-व्यतिकरादिदोषजातमुद्घोष्यते तदाकाशमुष्टिघातप्रायं सर्वमेव प्रयासमात्रफलमित्युपेक्षामर्हति ।

'नैदित्युपसंहरति । एकं न पुनरनेकं सत् । इतिकरणो मौलसूत्रव्याख्यापरिसमाप्त्यर्थः ।

एतेन यदुक्तम्—

१ भेद ॥ * अत्रेदं बोध्यम्—'आह च' इत्युक्त्वा ४५ कारिका **हेतुबिन्दुटीकायामर्चटेन** [पृ० १०४–१०७] लिखिताः, तत्रेयं ३१तमी कारिका । किन्तु नेमाः कारिका अन्यग्रन्थाद्**र्चटेन** उद्धृताः, अपि तु स्वकृता एव इति **हेतुबिन्दुटीकालोके** दुर्वेकमिश्रेण अभिहितम् । "अनन्तरोक्तमर्थजातं सातिरेकं स्वकृताभिः कारिकाभिः प्रतिपादयितुं परमुखेनाह–**आह चेति**।" इति **हेतुबिन्दुटीकालोके** पृ० ३४४ ॥ "भेदाभेदाभ्यामुक्तविधर्मत्वममीषां दोषाणामभ्युपेत्य सर्वमिदमुक्तम् । अधुना तु तादात्म्यादेव तेषामनिवार्यत्वमायातमिति प्रतिपादयितुं गुडनागरादौ परेण दृष्टान्तीकृते जन्यदोषाणामन्यथैवानुपपत्तिमभ्युपगच्छन्नाह– **विरोधीति** । विरोधिनो नागरादेः **सन्निधिः(धे)**:, **तस्माद्** विरोधिशून्याद् गुडादेर्जन्म यस्य दोषस्य **स तज्जन्मा न भवेदपि** । **तदात्मा** भेदाभेदात्मा **तु** दोषः, **सतु(ति) तस्मिन्नात्मभूते** भेदे अभेदे च **अनिष्टोऽपि न निवर्त्तते** अतस्वभावत्वप्रसङ्गादिति भावः । इदमत्रार्थसतत्त्वम्—भिद्यमानं हि रूपं भेदो विपर्ययेण चाभेदः । विभिन्नं च ते स्यातामित्यादिना च वस्तुतस्तदात्मक एव दोषो दर्शितः । अनेककार्यकारित्वमपि अभिन्नरूपात्मकमेव वस्तुतः । अन्यदपि दूषणं वस्तुतो भेदाभेदात्मकमेव । व्यावृत्तिकृतस्तु भेदो यदि भवेद् भवतु, न तावता प्रकृतक्षतिरिति" इति पण्डितदुर्वेकमिश्रविरचिते **हेतुबिन्दुटीकालोके** पृ० ३५१ ॥ २ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ३ '५' [=पञ्चम्यन्तम्] ॥ ४ अभेद ॥ ५ विरोधिनि सति ॥ ६ विरोध्यात्मा । कोऽर्थः ? भेदे सति अभेदभवनमेव दोषः ॥ ७ यथा वह्नौ सति शीतस्याभवनं विरोधः तथा भेदे सति अभेदस्याभवनमेव, विरोधात् ॥ ८ परस्परपरिहारेणावस्थानभावः ॥ ९ केवलज्ञान ॥ १० '३' [=विग्रहे तृतीयान्तम्] ॥ ११ **तदेकं सदसद्रूपमिति** ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

"मुक्तो न मुक्त एव हि संसार्यपि सर्वथा न संसारी ।
मानमपि मानमेव हि हेत्वाभासोऽप्यसावेव ॥ १ ॥
104B एवं सप्रतिपक्षे सर्वस्मिन्नेव वस्तुतत्त्वेऽस्मिन् ।
स्याद्वादिनः सुनीत्या न युज्यते सर्वमेवेह ॥ २ ॥"
[ ] इति । 5

तदपि निरस्तम्, प्रसङ्गस्येष्टत्वात् । तथाहि—मुक्तोऽपि स्वमुक्तत्वेनैव मुक्तो मुक्तान्तरमुक्तत्वेन त्वमुक्त एव, सर्वस्य पररूपेणासत्त्वात् । यदि वा सर्वकर्मक्षयेऽपि सच्च-चैतन्या-ऽसङ्ख्येयप्रदेशत्वादयः संसारिसाधारणा धर्मा मुक्तस्य सन्त्यतः कथञ्चिदमुक्त एव । एवं संसार्यपि संसार्यन्तररूपेणाऽसंसारित्वात् सत्त्वादिभिर्मुक्तसाधारणैर्धर्मैर्युक्तत्वाद्वा मुक्तोऽपि । तथा प्रत्यक्षमपि स्वरूपेणैव मानं नानुमानरूपेण, स्वविषय 10
एव वा न परविषये । अनुमानमप्येवमेव । प्रमाणाभासमपि स्वात्मनि प्रमाणम्,
105A विषये त्वप्रमाणम् । एवं सर्वत्र विपक्षः स्वयमुत्प्रेक्ष्यः । न चावस्थितधर्मविपर्ययसम्भव एवानेकान्तः । सदसद्रूपमपि हि न स्वरूपसत्त्वाभावेन किन्तु पररूपासत्त्वेन । तस्मान्न क्वचिदप्यनेकान्तविघातोऽस्तीति सर्वं सुस्थम् ।

एवं सप्तभङ्ग्यपि सिद्धा । 15

"एवमिति । एवं सदसद्रूपत्वयोरेकत्राविरोधसिद्धौ सप्तभङ्ग्यपि सिद्धा । सा चैवम्—स्यादस्ति । स्यान्नास्ति । स्यादवक्तव्यः । स्यादस्ति च नास्ति च । स्यादस्ति चावक्तव्यश्च । स्यान्नास्ति चावक्तव्यश्च । स्यादस्ति च नास्ति चावक्तव्यश्चेति ।

तत्राद्ये भङ्गे गुणीभूतासत्त्वस्य सत्त्वस्य प्राधान्यार्पणा, तस्य स्वशब्देनाभिधानात्, असत्त्वस्य तु स्याच्छब्देनाकर्षणात् । एवं सर्वत्र गुणप्रधानभावः । 20

द्वैतीयीके गुणीभूतसत्त्वस्यासत्त्वस्य प्राधान्यार्पणा ।

तार्तीयीके त्वयमर्थः—प्रधानभावार्पिते सत्त्वासत्त्वे युगपदेकेन सान्वयेन
105B विशेषाभिधायिना शब्देन वक्तुमशक्ये । न खलु स शब्दोऽस्ति यो युगपत् प्राधान्यार्पणया सत्त्वासत्त्वे प्रतिनियतरूपेणाभिदधाति, सच्छब्दस्यासदविषयत्वात्, असच्छब्दस्य च सदविषयत्वात् । 25

१ प्रमाणम् ॥ २ न ॥ ३ न ॥ ४ '६' [=षष्ठयन्तम्] ॥ ५ *उद्धृतमिदं श्लोकद्वयम् आचार्यश्री हरिभद्रसूरिभिरनेकान्तजयपताकायाम्, प्रथमेऽधिकारे पृ० ३५ ॥ ६ आत्मीयमुक्तत्वेन ॥ ७ '६' [=विग्रहे षष्ठयन्तम्] ॥ ८ प्रमाणम् ॥ ९ येनैव रूपेण भावस्तेनैवाभाव इत्यर्थः ॥ १० एवं सप्तभङ्ग्यपि सिद्धा ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ननु यथासङ्केतं शब्दप्रवृत्तिरिति सत्त्वासत्त्वयोर्युगपत् सङ्केतितः शब्दस्तदभिधायको भविष्यति, यथा गुणशब्दश्चतुर्विंशतेर्गुणानामिति । उच्यते—य इह सत्त्वासत्त्वलक्षण-विरुद्धधर्मयोर्युगपद्विशेषाभिधायी शब्दः सङ्केत्यते स तावत् सान्वयो न सम्भवति, तथाभूतस्य कस्यचिदपि शब्दस्य प्रकृति-प्रत्ययविभागादर्शनात् ।

निरन्वयस्तु शब्दः स्वेच्छया प्रकल्पिताक्षरसन्निवेशो (१) वाच्यान्तरवृत्तिः पूर्वप्ररूढो वा (२) सम्भवति । तत्राद्यो न युक्तः । न खलु स्वेच्छया प्रकल्पिता- 106A क्षरसन्निवेशाः शब्दाः सकलकाल-देशानुयायिनं व्यवहारमनुरुन्धन्ति । व्यवहारार्थं च सङ्केतः । वाच्यान्तरवृत्तिस्तु शब्दः प्ररूढादर्थादर्थान्तरे कयाचित् प्रत्यासत्त्या प्रवर्त्तेत, नान्यथा, पुरुषे सिंहशब्दवत् । एवमपि गौणः स्यात् । 'युगपन्मुख्यशब्दाभिधेयत्वं च विरुद्धयोर्निवार्यते । गवादिशब्दानां तु बहवोऽप्यर्था एकमेव वाच्यम् । न तत्र पर- म्परं वाच्यान्तरव्यवहारोऽस्ति, तेषामनेकार्थत्वस्य वृद्धपरम्परया प्ररूढत्वात् । प्रत्यासत्तिं च प्ररूढशब्दानामभ्रंसी युगपदनेकविरुद्धधर्मप्रतिनियतरूपाभिधाने न कामपि पश्यामः ।

ननु यदृच्छाशब्दा डित्थादयोऽनपेक्षितप्रत्यासत्तयोऽपि सर्वत्र प्रवर्त्तन्ते । 106B प्रवर्त्तन्तां नाम, तेषां वाच्यस्यैव कस्यचित् प्रतिनियतस्याभावात् । प्रतिनियतवाचिन- स्तु शब्दाः प्रत्यासत्तिं विना प्ररूढादर्थादन्यत्र न प्रवर्त्तन्त एव । न च विरुद्ध- धर्मयोर्डित्थादिशब्दसङ्केते काचिदर्थसिद्धिः, यदृच्छाशब्दानां सकलकाल-देशव्यवहारा- नुयायित्वात् । अपि च, सान्वयशब्दापेक्षया विरुद्धधर्मयोरवक्तव्यतोच्यते यथा सदंशाभिधायी सच्छब्दोऽस्ति तथा युगपत् सदसदंशाभिधायी नास्तीति । ततो यदि डित्थादिशब्दैः सङ्केतवशाद्विरुद्धधर्मावभिधीयेते तथापि न काचित् क्षतिः ।

यद्येवं प्ररूढादर्थादर्थान्तरे शब्दस्य प्रवृत्तौ प्रत्यासत्तिरपेक्ष्यते तदा शब्दानां सर्वार्थवाचकत्वव्याघातः स्यात् । न स्यात्, सङ्केतस्यापि सहकारित्वात् । यथा हि धूमो जातवेदसः स्वतो गमकोऽपि नान्तरीयकज्ञानमपेक्षते, न खलु नालिकेरद्वीप- 106A वासिनोऽनिश्चितकार्यभावस्य धूमदर्शनेऽपि वह्निनिश्चयो भवति । तथा यद्यपि सर्वे शब्दाः स्वतः सर्वार्थेषु प्रतिबद्धास्तथापि सङ्केतोत्क्षिप्तं क्षयोपशममपेक्षन्ते ।

१ कदाचित् सामान्यवाची स्यादिति विशेषेत्युक्तम् ॥ २ न तु गौणशब्दाभिधेयत्वम् ॥ ३ अनेकार्थ- स्वलक्षणम् ॥ ४ गवादिशब्दानाम् ॥ ५ मुख्यया वृत्त्या ॥ ६ सत्त्वासत्त्वयोः ॥ ७ येनैव संकेतितस्तं प्रत्येव व्यवहारः स्यात्, नान्यान् प्रति ॥ ८ अथ च त्वन्मते सर्वे शब्दाः सर्वार्थवाचका इष्टाः ॥ ९ निश्चितो हि धूमो धूमध्वजं गमयति नानिश्चित इति ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

सङ्केतश्च वृद्धपरम्परानुसारी, न स्वेच्छाचारी। अन्यथा न शास्त्रीयाच्छब्दात् सर्वदेशकालपुरुषेषु प्रतिनियतार्थप्रतीतिः स्यात्। ततो यत्रार्थे शब्दस्य वृद्धसमयो नास्ति ततोऽन्यत्र प्रवर्त्तमानः प्रत्यासत्तिमपेक्षत इति न किञ्चिदसमञ्जसम्। तत् स्थितमेतत् सत्त्वासत्त्वे प्रधानभावार्पिते विशेषाभिधायिना सान्वयेन शब्देन युगपद् वक्तुमशक्ये इति। 5

अवक्तव्ये 'धर्मौ भावांशौ' इत्यादिसामान्यशब्दैर्यद्वेच्छाशब्दैश्च वक्तुं शक्यत्वात् स्याच्छब्दप्रयोगः। एवं सर्वत्रावक्तव्यशब्दार्थो द्रष्टव्यः। 106B

तुरीये सत्त्वासत्त्वयोः क्रमेण प्राधान्यार्पणा। उभयोरपि स्वशब्देनाभिधानात्। उभयोः स्वशब्दाभिधानेऽपि [1]विरोधपरिहारार्थं स्याच्छब्दोऽपि प्रयुज्यते, एकत्र ह्येकान्तसत्त्वासत्त्वे विरुद्धे स्याताम्। 10

पञ्चमे गुणीभूतासत्त्वस्य सत्त्वस्य प्राधान्यार्पणा।

षष्ठे गुणीभूतसत्त्वस्यासत्त्वस्य प्राधान्यार्पणा।

सप्तमे तु क्रमार्पितसत्त्वासत्त्वयोः प्राधान्यार्पणा। अवक्तव्यशब्दार्थस्तु सर्वत्रापि सत्त्वासत्त्वविषय एव।

अयं तु विशेषः—तृतीयेऽवक्तव्यत्वस्यैव प्राधान्यम्। पञ्चमे सत्त्वावक्तव्यत्वयोः। 15
षष्ठेऽसत्त्वावक्तव्यत्वयोः। सप्तमे सत्त्वा-ऽसत्त्वा-ऽवक्तव्यत्वानामिति।

अथवा द्रव्य-पर्यायौ व्यस्त-समस्तावाश्रित्य चरमं भङ्गत्रयम्। केवलं द्रव्यं द्रव्यपर्यायौ सहार्पितावाश्रित्य स्यात् सदवक्तव्यं वस्तु। द्रव्याश्रयेण सत्त्वं सह द्रव्यपर्यायाश्रयेण चावक्तव्यम्। केवलं पर्यायं सहितौ द्रव्यपर्यायावाश्रित्य स्यादसदवक्तव्यम्। पर्यायाश्रयेणासत्त्वं सह द्रव्यपर्यायाश्रयेण चावक्तव्यत्वम्। क्रमार्पितौ सहार्पितौ च द्रव्यपर्यायावाश्रित्य स्यात् सदसदवक्तव्यम्। क्रमाश्रयेण सदसत्त्वं साहित्याश्रयेण चावक्तव्यत्वम्। 107A 20

कथं पुनरवक्तव्यशब्देनैव वक्तव्यशब्देनापि भङ्गकल्पना न भवति। उच्यते—इह तावदेकस्मिन् धर्मिणि परस्परविरुद्धयोरेव धर्मयोर्भङ्गचिन्ता। प्रधानभावार्पितयोश्च

१ पर्याया इमे॥ २ इत्थादिभिश्च। कोऽर्थः? इत्थशब्दः सङ्केतितः सत्त्वासत्त्वयोः केनापि॥ ३ स्यादवक्तव्यं चेत्यत्र॥ ४ वाच्येन सह॥ ५ स्यादस्ति चावक्तव्यश्च॥ ६ विशेषाभिधायिना एकेन शब्देन विरुद्धधर्मौ सत्त्वासत्त्वे न वक्तुं शक्ये असत्त्वादेव॥ ७ न कोऽप्येको युगपद् द्रव्यपर्यायवाची शब्दोऽस्ति इति अवक्तव्यत्वम्॥ ८ सत्त्वासत्त्वयोः॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विरुद्धयोर्युगपदेकेन विशेषशब्देनाभिधेयत्वानभिधेयत्वसंशीताववक्तव्यशब्दप्रयोगः । तथा च सप्तभङ्गी भवति । तद् यद्यवक्तव्यशब्दस्य प्रयोगवद् वक्तव्यशब्दस्यापि
107B विरुद्धधर्मयोर्युगपदेकशब्दाभिधेयत्वानभिधेयत्वचिन्तया प्रयोगः प्रसज्यते तदा न युक्तः, अवक्तव्यत्वस्य निर्णीतत्वात् । अथ सप्तयं घटो वक्तव्यश्चेत्येकधर्मस्यै वक्तव्यत्वावक्तव्यत्वचिन्तया न विरुद्धधर्मचिन्तया प्रयोगप्रसङ्गः तर्हि प्रसज्यतां नाम । न खलु वस्तुधर्माणां सत्त्वानित्यत्वादीनां शब्दाभिधेयत्वं निवार्यते, विरुद्धयोरेव धर्मयोर्युगपदेकशब्दाभिधेयत्वस्य प्रतिषेधनात् । न चैवमष्टादिभङ्गप्रसङ्गः, विरुद्धधर्मापेक्षया सप्तभङ्ग्या एव सम्भवात्, केवलसत्त्वासत्त्वभङ्गकानां युगपत्सत्त्वासत्त्वभङ्गकेष्वनन्तर्भावात् । अथवा संशयाभावाद्वक्तव्यशब्दाप्रयोगः । 'यो हि सत्त्वासत्त्वादिशब्दैर-
108A भिधीयते स कथमवक्तव्यः स्यात् । ततः सत्त्वादिशब्दा एव वस्तुनो वक्तव्यतामभिदधत इति न वक्तव्यशब्दप्रयोगो ज्यायान् ।

नन्वेकत्रापि वस्तुनि विधीयमान-निषिध्यमानानन्तधर्मसम्भवादनन्ताः सप्त भङ्गयः स्युः । स्युर्नाम, अनन्तानामपीष्टत्वात् । भङ्गकास्तु सर्वत्रापि सप्तैव । प्रतिपाद्यप्रश्नापेक्षया हि भङ्गाः प्रकल्पन्ते । प्रश्नश्च सप्तधैव सम्भवति, संदेहस्य सप्तविधत्वेन जिज्ञासायाः सप्तप्रकारायाः एव सम्भवात् । संदेहस्य तु सप्तविधत्वं तद्विषयस्य वस्तुधर्मस्य सप्तविधस्यैव भावात् । तावत् सत्त्वं वस्तुधर्मः, सत्त्वरहितस्य वन्ध्यासुतस्येवासत्त्वप्रसङ्गात् । स्वरूपादिभिरिव च पररूपादिभिरपि वस्तुनोऽसत्त्वा-
108B निष्टौ वस्तुरूपप्रतिनियमायोगादसत्त्वमपि वस्तुधर्म एव । क्रमार्पितसत्त्वासत्त्वयोरवक्तव्यत्वस्य सत्त्वावक्तव्यत्वयोरसत्त्वावक्तव्यत्वयोः सत्त्वासत्त्वावक्तव्यत्वानामपि वस्तुधर्मत्वमेव प्रतीयमानत्वात् । स्यादस्ति स्यान्नास्तीत्यादिशब्दप्रयोगे ह्यवहितश्रोतसः श्रोतुः क्रमार्पितसत्त्वासत्त्वादेः कस्यचिदर्थस्यास्ति प्रतीतिः । सा चेयं न भ्रान्ता, प्रमाणाबाधितत्वात्, वस्तुनि प्राप्तिप्रवृत्तिभावाच्च । अन्यथा सद्भूतप्रत्यक्षादेरपि भ्रान्तत्वप्रसङ्गः । तदनया सद्भूतप्रत्यक्षादिनेव वस्तुविषयया भवितव्यम् । तत् सप्तविध एव वस्तुधर्मः । तत्र सत्त्वासत्त्वयोः क्रमाक्रमत्वे गौणमुख्यत्वे वक्तव्यत्वावक्तव्यत्वे इत्यादयः स्वगता धर्माः । ततः कदाचित् कस्यचिदर्पणा क्रियते ।

---

१ मुख्यया ॥ २ अतो न वक्तव्यशब्देन सह सप्तभङ्गी ॥ ३ सत्त्वस्यैव एकस्य ॥ ४ परः प्राह—केषांचिद् भङ्गानां केषुचिद् भङ्गेष्वन्तर्भावान्न सप्तभङ्गी प्राप्ता इत्याशङ्कायाम् ॥ ५ स्यादस्ति, स्यान्नास्ति ॥ ६ सप्तभङ्गयेव ॥ ७ अर्थः ॥ ८ सप्तभङ्ग्या ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

109A नन्वयं स्याच्छब्दोऽनेकान्तवचनस्ततस्तेनैव सत्त्वादिधर्माणामुक्तत्वात् तदभिधानाप्रयोग एव। उच्यते—स्याच्छब्दोऽयमनेकान्तमात्रस्य वाचको द्योतकश्च। ततो यदा वाचकस्तदानेकान्तसामान्यप्रतिपत्तावपि विशेषप्रतिपत्त्यर्थं सत्त्वादिशब्दप्रयोगः। सामान्यशब्दप्रयोगेऽपि हि विशेषजिज्ञापयिषया विशेषशब्दोऽपि प्रयुज्यते, यथा गां बलीवर्दमानय, करेणुं गजं पश्य। यदा तु द्योतकस्तदा सत्त्वादिपदोक्तमेवार्थमवद्योतयितुं प्रयुज्यते। प्रयुज्यन्ते हि द्योतका ध्वनयः पदान्तरोक्तमप्यर्थमवद्योतयितुम्, यथा चादयः। 5

एवं नित्यत्वानित्यत्वयोः सामान्यविशेषयोरभिलाप्यत्वानभिलाप्यत्वयोर्भेदाभेदयोरन्येषां च सप्रतियोगिनां धर्माणामवक्तव्यत्वसंयोजनायां सप्तभङ्गी द्रष्टव्या।

109B अत्र चाद्यास्त्रयो भङ्गाः सकलादेशाः, वस्तुनः खण्डीकृत्यानभिधानात्। शेषास्तु विकलादेशाः, वस्तुनः खण्डीकृत्याभिधानात्। अत्र हि सच्चासच्चेत्येवं विभागीकृत्य वस्त्वभिधीयते। अथवा प्रमाणादेशेन सर्वेऽपि सकलादेशाः, प्रमाणस्य परिपूर्णाभिधायित्वात्। नयादेशेन तु विकलादेशाः, नयस्य खण्डाभिधायित्वात्। इयं च सप्तभङ्गी श्रुतं प्रमाणम्, शब्दादर्थप्रतीतेरिति। 10

सच्चाऽसच्चाऽवचनविषयं चोभयं च क्रमेण सच्चाऽसच्चाऽवचनविषयत्वेन युक्तं क्रमेण। 15
सच्चासच्चावचनविषयं चाक्रमात् सप्तभङ्गी सैषा नीतिर्नियमगहिता 'स्यात्'पवित्रा तु मानम् ॥१॥

110A सहार्पितं द्रव्यमशेषपर्यायैर्विरुद्धधर्मौ यदि वा सहार्पितौ।
विशेषशब्दैरविगीतलक्षणैर्वचोनदीष्णोऽपि न वक्तुमीश्वरः ॥२॥

सकलादेशाः पूर्वा एकध्वनिशासनात् त्रयो भङ्गाः।
अन्ये विकलादेशाः प्रमा-नयैर्वा विभागोऽयम् ॥३॥ 20

सम्प्रति पूर्वोदितमेव प्रमेयं श्लोकैः सङ्क्षेपेण सङ्गृह्णाति—

---

१ सत्त्वादिधर्मवाचकशब्दाप्रयोग एव ॥ २ सकलाश्च ते आदेशाश्च भणनानि ॥ ३ मुख्यया वृत्त्या अस्ति च नास्ति चेति न खण्डीकृतम् ॥ ४ स्याद्वादाभिप्रायेण ॥ ५ एतेऽपि 'स्यात्'पदरहिताः सन्त इत्यर्थः ॥ ६ आगमलक्षणम् ॥ ७ *अत्र १, २, ३, इत्यादयः अङ्का लिखिताः सन्ति, तदनुसारेण अयमत्र भावः—सच्च १, असच्च २, अवचनविषयं च ३, उभयं च क्रमेण ४, सच्च अवक्तव्यं च ५, असच्च अवक्तव्यं च ६, सच्च असच्च अवक्तव्यं च ७ ॥ ८ स्यादस्ति च नास्ति च ॥ ९ स्यादस्ति चावक्तव्यं च ॥ १० युगपत् ॥ ११ प्रमाणम् ॥ १२ एतेन डित्थादीनां परिहारः ॥ १३ यद्वा सर्वे सकलादेशाः प्रमाणादेशेन, विकलादेशा नयादेशेन ॥ 25

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कायः प्रदेशबाहुल्यं भावांशैस्तदणोः पुनः ।
उत्पाद-व्यय-ध्रौव्याणां यद्वा कायः समुच्चयः ॥ १ ॥
अर्थक्रिया हि नैकान्तनित्यानित्येषु युज्यते ।
सदाभावप्रसङ्गः स्यान्नासतो हेतु-कार्यते ॥ २ ॥
प्रमाणानुपपत्तिर्या तद् विरोधस्य लक्षणम् ।
न खल्वन्यत् ततस्ताप-शीतयोरपि लक्ष्यते ॥ ३ ॥
उत्पाद-व्यय-ध्रौव्याणां सतामेकत्र नास्ति सा ।
अतश्च सदसद्रूपमेकमप्युपपद्यते ॥ ४ ॥

इति सङ्ग्रहश्लोकाः ।

कोय इत्यादि । तदिति प्रदेशबाहुल्यम् ।

अर्थक्रिया हीत्यादि । सदाभावप्रसङ्गः स्यादिति नित्यस्यैकरूपत्वेन सदा सन्निहितत्वात् । असतः सर्वथा निरन्वयनाशिन एकान्तक्षणिकस्येत्यर्थः ।

प्रमाणानुपपत्तिरित्यादि । लक्षणलिङ्गानुसरणात् तदो नपुंसकत्वम् । खलुशब्दो यस्मादर्थः । ततः प्रमाणानुपपत्तेः । शीतोष्णयोरपि प्रमाणानुपपत्तिरेव विरोध इत्यर्थः ।

उत्पादेत्यादि । सा प्रमाणानुपपत्तिः ।

पूर्वोदितसङ्ग्रहाय श्लोकाः सङ्ग्रहश्लोकाः ।

110B स्यादेवम्—आगमे षड् द्रव्याण्युक्तानि । यदुक्तम्—"कइ णं भंते! दव्वा पन्नता? गोयमा! छ दव्वा पन्नता । तंजहा—धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए पुग्गलत्थिकाए जीवत्थिकाए अद्धासमये [भगवतीसूत्रे २५।४।६३३]त्ति । भवद्भ्यां च पञ्च द्रव्याणि प्रपञ्चितानि । तत् कथं नागमविरोध इति ।

अत्राह—

१ कायः प्रदेशबाहुल्य भावांशैस्तदणोः पुन । उत्पाद-व्यय-ध्रौव्याणां यद्वा कायः समुच्चयः ॥ २ अर्थक्रिया हि नैकान्तनित्यानित्येषु युज्यते । सदा भावप्रसङ्गः स्यान्नासतो हेतुकार्यते ॥ ३ प्रमाणानुपपत्तिर्या तद् विरोधस्य लक्षणम् । न खल्वन्यत् ततस्तापशीतयोरपि लक्ष्यते ॥ ४ शब्दस्य ॥ ५ उत्पाद-व्यय-ध्रौव्याणां सतामेकत्र नास्ति सा । अतश्च सदसद्रूपमेकमप्युपपद्यते ॥ इति संग्रहश्लोकाः ॥ ६ * तत्त्वार्थसूत्रे कालश्चेत्येके [५।३८] इति सूत्रं वर्तते । सिद्धसेनगणिविरचितायां तत्त्वार्थटीकायामेतत् सूत्रं वक्ष्यमाणं पृ० १२५ पं० १५ इत्यत्र निर्दिष्टं च सूत्रमुद्धृतमस्ति, तदनुसारेणात्रापि सूत्रमिदमुद्धृतमस्ति ग्रन्थकाराभ्यामिति स्पष्टं प्रतिभात्यत्र ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कालश्चेत्येके[2] ।

[1]एकेषामाचार्याणां मतेन कालोऽपि जीवादिभ्यः पृथगेव स्वतन्त्रं द्रव्यम् । जीवादिद्रव्यैः परिणमद्भिः स्वत एव कल्प्यते[3] कारणतयापेक्ष्यत इति कालोऽपेक्षाकारणम्, बलाकाप्रसवे गर्जितध्वनिवत् । द्रव्यत्वं चास्य गुणपर्यायवत्त्वात् । संयोग-विभाग-सङ्ख्या-परिणामा-ऽमूर्त्तत्वा-ऽगुरुलघुत्व-सूक्ष्मत्वादयो गुणाः । जीवादि पर्यायाणां परिणामहेतुत्व-परत्वापरत्वादिप्रत्ययहेतुत्वादयस्तु पर्यायाः । यदुक्तम्—

111A "निःशेषद्रव्यसंयोगविभागादिगुणाश्रयः ।
कालः सामान्यतः सिद्धः सूक्ष्मत्वाद्याश्रयो भिदा[4] ॥१॥
क्रमवृत्तिपदार्थानां वृत्तिकारणतादयः ।
पर्यायाः सन्ति कालस्य गुणपर्ययवानतः ॥२॥" [ ] इति ।

अस्य चास्तित्वं प्रतिनियतसकृदनेकपदार्थपरिणामात् । न खलु वर्ष-शीतोष्ण-वाता-ऽशनि-हिम-तडिदभ्रगर्जितोल्काङ्कुर-किसलय-पत्र-फल-प्रसूनोदयादयः प्रतिनियत-भाविनः परिणामाः प्रतिनियतमपेक्षाकारणमृते घटन्ते, परिणामकारणमात्रभावित्वेन सर्वदा भावप्रसङ्गात् । न च क्षित्यादय एवापेक्षाकारणम्, तेषामसर्वगतत्वात् । अत एव न धर्मा-ऽधर्मौ । न चाकाशानि, भिन्नकार्योपलम्भात् । तस्मात् काल
111B एव पदार्थपरिणामस्यापेक्षाकारणम् ।

ननु च कालस्य परिणामो यद्यस्ति तदाऽसौ बाह्यान्यनिमित्तापेक्षः, तन्निमित्तमपि परिणाममात्मसात्कुर्वदपरनिमित्तान्तरापेक्षमित्यनवस्था स्यात् । कालपरिणामस्य च बाह्यानपेक्षत्वे जीवादिपरिणामस्यापि बाह्यनिमित्तापेक्षा मा भूत् । न च कालस्य परिणामो न सिद्धः, सतोऽवश्यं परिणामित्वाभ्यनुज्ञानात्, अन्यथा सत्त्वमेव न स्यात् । तन्न परिणामलिङ्गः कालो भवितुमर्हतीति । तन्न । तस्य सकलपदार्थ-

१ 'इति द्रव्यालंकारः परिपूर्यते स्म ॥ कृतिरियं पण्डितरामचन्द्रगुणचन्द्रयोः । क्षेमं भूयात् संघाय संघस्य वा । भद्रं भवतु । सोमालिखितं । १४९२ वर्षे चैत्रमासे कृष्णपक्षे अमावास्यां तिथौ । इति अहम्मदाबादनगरे 'हाजापटेलनी पोल'मध्ये 'संवेगीनो उपाश्रय' इत्यत्र विद्यमाने मूलमात्रस्य द्रव्यालङ्कारस्य हस्तलिखितादर्शे १२B पत्रे । 'इति द्रव्यालंकारः परिपूर्यते स्म' इति राजस्थाने बेडानगरे वर्तमाने श्रीश्रुतज्ञानअमीधाराख्ये भाण्डागारे विद्यमाने मूलमात्रस्य द्रव्यालङ्कारस्य हस्तलिखितादर्शे १३A पत्रे ॥ २ कालश्चेत्येके ॥ ३ * हस्तलिखितादर्शे पूर्वं कल्पते इति लिखितमासीत्, तदनन्तरं तत्रैव कल्प्यते इति संशोधनं विहितमस्ति । किन्तु अत्र कालस्य प्रस्तुतत्वात् 'कल्प्यते' इत्येव सम्यग् भाति वस्तुतः ॥ ४ '६' [=विग्रहे षष्ठ्यन्तम्] ॥ ५ '३' [=तृतीयान्तम्] ॥ ६ पुण्य-पापे ॥ ७ धर्मा-ऽधर्म-खाणि ॥ ८ तत् बाह्यनिमित्तमपि ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

परिणामनिमित्तत्वेन स्वपरिणामेऽपि हेतुत्वात्, सकलावगाहहेतुत्वेनाकाशस्य स्वावगाहहेतुत्ववत्, सर्वविदः सकलार्थसाक्षात्कारित्वेन स्वात्मसाक्षात्कारित्ववद्वा । न
112A चैवं जीवादय एव स्वपरिणामानामपेक्षाकारणमपि भविष्यन्तीति वक्तुं शक्यम् । निम्बादौ स्वहेतुकस्य कटुकत्वादेर्दर्शनादोदनादावपि तस्य स्वहेतुकत्वप्रसङ्गात् । [पदार्थेषु परापरादि]प्रत्ययान्यथानुपपत्त्या कालकल्पना तावदवश्यभाविनी । सा चेत् कार्यान्तरार्थमुपस्थिता कार्यान्तरमपि भवदीयं साधयति साधयतु नाम को दोषः ? यदि हि परिभोगार्थं परिगृहीता प्रियदयिता गृहकर्मापि करोति तदा गृहिणां न किं विशेषलाभः ? तस्मात् पदार्थानां प्रतिनियतपरिणामदर्शनात् कालो नाम
112B द्रव्यान्तरमस्तीति गम्यते । परापरादिप्रत्ययहेतुत्वाच्च । तथाहि—ऐपरदिक्सम्बन्धिनि ˇनिन्यवृद्धलुब्धके परत्वप्रत्ययः पैरदिक्सम्बन्धिनि च प्रशस्ते कुमारतपस्विन्यपरत्वप्रत्ययोऽवश्यं विशिष्टकारणापेक्षः । स च काल एव, अन्यस्याघटनात् । तस्मात् पदार्थप्रतिनियतविचित्रपरिणामान्यथानुपपत्त्या परापरादिप्रत्ययान्यथानुपपत्त्या च सिद्धं कालो नाम षष्ठं द्रव्यं केषाञ्चिदाचार्याणां मतेन ।

ननु यद्यागमसिद्धं कालद्रव्यं तदा किमिति भवद्भिर्थां पञ्चसु द्रव्येष्वन्तर्भावितम् ।
113A उच्यते—आगमेऽन्तर्भावोऽपि प्रतिपादितः । तदुक्तम्—"किमिदं भंते ! कालो त्ति पवुच्चई ? गोयमा । जीवा चेव अजीवा चेव ।" [ ] । अपि चावाभ्यामस्तिकायानां लक्षणं कर्तुमारब्धम् । न च कालोऽस्तिकायः, आगमेऽप्रतिपादनात् । ततः पञ्चास्तिकायलक्षण[प्रतिपादनाश्रय एवे]ति ॥ छ ॥

अकम्पानां वृत्तौ यदजनि शुभं तेन पदवीं
रिपुर्वा मित्रं वा सपदि लभतां तां जनगणः ।
अकाण्डे क्रोधान्धप्रभुविहितदण्डप्रतिभया-
न्न कम्पन्ते यस्यां परिजनवपूंषि क्षणमपि ॥ १ ॥

पूर्वैर्यस्य समुद्धृतिर्न विहिता धीरैः कुतोऽप्याशया—
दावाभ्यां स समुद्धृतो श्रुतनिधेर्द्रव्योत्करो दुर्लभः ।

१ * अत्र ताल्पत्रधारायां मनाक् त्रुटितत्वात् सप्ताष्टान्यक्षराणि त्रुटितानि । अतोऽस्मत्कल्पनया पूरितोऽयं पाठः ॥ २ स्वपरिणामेऽपि हेतुत्वलक्षणम् ॥ ३ पश्चिम ॥ ४ प्रशस्येऽपि पुरुषे परशब्दो वर्तते इति निन्द्य इत्युक्तम् ॥ ५ पूर्व ॥ ६ * "समया ति आवलिया ति वा जीवा ति या अजीवा ति या पवुच्चति" इति स्थानाङ्गसूत्रे सू० १०६ ॥ ७ *अत्र ताल्पत्रधारायाः किञ्चित् त्रुटितत्वात् सप्ताष्टान्यक्षराणि अस्मत्कल्पनया पूरितानि ॥ ८ धर्मादीनाम् ॥ ९ विवरणे ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

एनं यूयमनन्तकार्यनिपुणं गृह्णीत तत्कोविदाः
स्वातन्त्र्यप्रसवां यदीच्छत चिरं सर्वार्थसिद्धं हृदि ॥ २ ॥

113B मध्यं बौद्धामृतजलनिधेर्गाढवान् भ्रान्तवांश्च
न्यायाटव्यां वचनशठताप्रोत्स्व(च्छ्व)सत्कण्टकायाम् ।
आम्नाती वा विषमविफलप्रक्रिये यो विशेषे 5
शास्त्रारम्भे यदि परमसौ दक्षतां लक्षयेन्नौ ॥ ३ ॥

नोत्प्रेक्षाबहुमानतो न च परस्पर्द्धासमुल्लासतो
नापीन्द्युतिनिर्मलाय यशसे नो वा कृते सम्पदः ।
आवाभ्यामयमादृतः किमु वृथा द्रव्यप्रपञ्चश्रम-
सन्दर्भान्तरनिर्मितोऽनवमप्रज्ञाप्रकर्षश्रिये ॥छ॥ ॥ ४ ॥ 10



इति श्री रामचन्द्र-गुणचन्द्रविरचितायां स्वोपज्ञद्रव्यालङ्कारटीकायां
तृतीयोऽकम्पप्रकाश इति ॥
॥ छ ॥

संवत् १२०२ सहजिगेन लिखितं.....

१ '७' [=सप्तम्यन्तमिदं पदम्] ॥ २ इतः परं तालपत्रवारायास्त्रुटितत्वात् पञ्चषाण्यक्षराणि त्रुटितानि ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रथमं परिशिष्टम् ।

द्रव्यालङ्कारटीकायामुद्धृतानां पाठानां पृष्ठाङ्कक्रमेण सूचिः ।

उद्धृतः पाठः	पृ.पं.[1]
तदस्यास्त्यस्मिन्निति मतुः [सि. ७।२।१]	२-४
उष्ट्रमुखादयः [सि.३।१।२३]	३-३
वैशाखस्थानस्थः पुरुष इव... [प्रशम०२१०]	३-८
जं संठाणं तु इहं भवं... [आवश्यकनि. ९६९]	३-१०
दीहं वा ह्रस्सं वा.... [आवश्यकनि.९७०]	३-१२
श्यामो भवेत्तु शृङ्गारः... [नाट्यशास्त्रे ६।४२]	७-१९
विष्ठा-कृमिज उद्वेगी.... [नाट्यशास्त्रे ६।८१]	७-२१
किञ्चान्यद् यदि तद्.... [ ]	११-१८
अथेष्टं ते रसैर्भौमै... [ ]	११-२०
आलिप्तं जतुना काष्ठं... [ ]	११-२२
तथैव यदि तद् बीजं... [ ]	१२-१
आत्मादिमात्ममध्यं च.. [ ]	१८-२१
क्वचित् [सि.६।२।१४५]	२१-१०
यावादिभ्यः [सि. ७।३।१५]	२१-११
मतिश्रुतयोर्निबन्धो... [तत्त्वार्थ. १।२७]	२२-५
एकस्यार्थस्वभावस्य [प्रमाणवार्तिके ३।४२]	२२-२१
यत्रैव जनयेदेनां....	२३-५
यद्भावो भावलक्षणम् [सि.२।२।१०६]	२५-९
निद्धस्स निद्धेण दुआहिएण.... [प्रज्ञापनासूत्रे गा.३२]	२५-२२
एकगुणस्निग्धस्य... [ ]	२६-१
एकगुणस्य द्व्यधिकादिगुणेनापि... [ ]	२६-४
भेदादणुः [तत्त्वार्थ. ५।२७]	२७-१४
इह तावत् परमाणूनां संसर्गग्रहे... [प्रमाणविनिश्चयटीका पृ.४६A]	३०-१७
अधिगते तु स्वलक्षणे ... [हेतुबिन्दौ पृ.३]	३१-१६
तस्मादनधिगतार्थविषयं... [हेतुबिन्दौ पृ.३]	३२-८
तदेव परमार्थसत्... [न्यायबिन्दौ १।१४-१५]	३२-१८
न च सामान्यं काञ्चिदर्थक्रिया.... [हेतुबिन्दौ पृ.३]	३२-२०
अन्योन्यप्रत्ययापेक्षा... [हेतुबिन्दुटीका श्लो.३३ पृ.१०६]	३५-१
सन्निवेशेन ये भावा... [हेतुबिन्दुटीका श्लो.३४ पृ.१०६]	३५-३

१. पृ० = पृष्ठाङ्कः । पं० = पङ्क्त्यङ्कः । अत्र प्रथमः पृष्ठाङ्कः, द्वितीयः पङ्क्त्यङ्को ज्ञेयः ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

बहूनां च निरवयवानां... [ ] ३६-१३
यत् सत् तन्निरवयवं.... [ ] ३७-४
महत्त्वादनेकद्रव्यवत्त्वाद्.... [वैशेषिकसूत्रे ४।१।६] ४१-१
अवनतिविशेषानुपलम्भश्च... [प्रशस्तपादभाष्यटीका व्योमवती] ४१-९
गुरुत्वं जलभूम्योः.... [प्रशस्तपादभाष्ये] ४१-१८
अपाकजरूप-रस-गन्ध.... [प्रशस्तपादभाष्ये] ४२-४
नापि स्थूल एको... [प्रमाणविनिश्चये. पृ.२६२A] ४४-५
प्रयोजनम् [सि.६।३।११७] ४५-१६
अतोऽनेकस्वरात् [सि.७।२।६] ४५-१७
प्रज्ञादिभ्योऽण् [सि.७।२।१६५] ४५-१८
न च मनसः स्पर्शवत्त्वे... [प्रशस्तपादभाष्यटीका व्योमवती पृ.४२७] ४६-२२
तथा स्पर्शवत्त्वे सति... [प्रशस्तपादभाष्यटीका व्योमवती पृ.४२७] ४७-५
न च मूर्तत्वेन स्पर्शो... [प्रशस्तपादभाष्यटीका किरणावली पृ.१०३] ४८-२
विजातीयानामनारम्भकत्वम्... [प्रशस्तपादभाष्यटीका किरणावली पृ.४१] ४९-२
द्रव्याणि द्रव्यान्तरमारभन्ते [वैशेषिकसूत्रे १।१।८] ४९-४
इन्द्रियादीनां तु विज्ञान... [प्रमाणवार्तिकस्ववृत्तौ पृ.१०] ५०-९
विधिमुखस्तु प्रत्ययोऽसिद्धः ... [प्रशस्तपादभाष्यटीका किरणावली पृ.१३] ५२-१
तस्माद्रूपविशेषोऽयम्....[प्रशस्तपादभाष्यटीका न्यायकन्दली पृ.२४] ५५-२०
द्विष्ठसम्बन्धसंवित्तिः... [ ] ५८-३
न हि कदाचित् प्रत्यक्षाप्रत्यक्ष .. [ ] ५८-५
यत् शुषिरं तदाकाशम् [ ] ५९-३
न सत्ता सत्तान्तरमुपैति [ ] ५९-१४,११४-१३
हृदि प्राणो गुदेऽपानः.. [ ] ६०-३
आतपः कटुको रूक्षः... [ ] ६०-१३
तनुभुवनादि कार्यं... [प्रशस्तपादभाष्यटीका व्योमवती पृ.६३८] ६१-७
क्षयोपशान्तिप्रभव... [ ] ६४-२२
अस्त्यनुभवविशेषोऽर्थकृतो... [प्रमाणविनिश्चये पृ.२६१A] ६४-२५
सन्तापाय न शक्तः... [सि.बृ.३।१।५१] ६६-४
सहोपलम्भनियमादभेदो.. [प्रमाणविनिश्चये पृ.२६३B] ६७-६
ततः कल्पितभेदनिबन्धनः... [प्रमाणविनिश्चयटीका पृ.१८५A] ६८-१६
विकल्पज्ञेयभेदार्थः .. [ ] ६९-१
तेनायं नियमार्थो दर्शितः..... [प्रमाणविनिश्चयटीका पृ.१८९B-१९०A] ६९-१९
एतदुक्तं भवति-न भिन्नयोर्नियतः... [प्रमाणविनिश्चयटीका पृ.१८६A] ७१-९
यद् येन नियतसहोपलम्भं... [प्रमाणविनिश्चयटीका पृ.१८९] ७१-१५

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भेदः सहोपलम्भानियमेन.. [प्रमाणविनिश्चयटीका पृ.१८९B-१९०B] ७१-१८
सह संवेदनं तावन्न.... [ ] ७२-२४
पारमार्थिकमपि प्रमाणं... [प्रमाणविनिश्चयटीका पृ.१९६A] ७७-१९
मध्यव्यवस्थितस्याणोः... [ ] ८०-५
स हेतुरेकत्र विदां विचित्रता... [ ] ८१-९
अर्थोपयोगेऽपि पुनः... [प्रमाणविनिश्चयः पृ.२५३A] ८२-१
न हि सर्वत्रैव स्मृत्यपेक्षो... [अनेकान्तजयपताकायां तृतीयेऽधिकारे पृ.१८०] ८२-१३
तद्ध्यर्थसामर्थ्येनोत्पद्यमानं.... .[प्रमाणविनिश्चयः पृ.२५२B] ८४-१९
शब्दस्य संकेतकालभावितत्वं... [प्रमाणविनिश्चयटीका पृ.८७A पं.४] ८५-६
अपेक्ष्यमाणत्वं साक्षाज्जनकत्वेन... [प्रमाणविनिश्चयटीका पृ.६१B] ८५-२४
विशेषणं विशेष्यं च... [प्रमाणविनिश्चये पृ.२५३] ८६-४
यद्यभिलापवद् विज्ञानं... [ ] ८७-७
विचारकत्वे चैन्द्रिय..... [प्रमाणविनिश्चये पृ.२५३B] ८८-१५
इन्द्रियकृतस्तु रूपग्रहण... [प्रमाणविनिश्चयटीका पृ.६६A] ९०-४
यत् प्रत्यक्षं तन्नाभिलाप... [ ] ९१-९
हेतु-कर्तृ-करणेत्थम्भूतलक्षणे [सि.२।२।४४] ९२-४
अधिगते तु स्वलक्षणे... [हेतुबिन्दुः पृ.३] ९३-१६
एकस्मिन्नपि वस्तुनि.... [ ] ९५-९
सर्वे भावाः स्वभावेन... [प्रमाणवा. ३।४०] ९७-१
एकप्रत्यवमर्शार्थं.... [प्रमाणवा. १।७४] ९७-९
ज्वरादिशमने... [प्रमाणवा.१।७५] ९७-११
एकप्रत्यवमर्शस्य... [प्रमाणवा.१।११०] ९९-३
इतरेतरभेदोऽस्य... [प्रमाणवा.१।७३] १०२-२
ऋवर्णोवर्ण [सि.७।४।७१] १०२-१९
वर्षाकालेभ्यः [सि.६।३।८०] १०३-१
पिण्ड एव कुण्डे... [आत्मतत्त्वविवेके] १०६-१८
विचित्रा हि पदार्थानां ...[ ] ११०-४
अस्तु वा सर्वगतं सामान्यं ... [ ] १११-१५
सर्वस्योभयरूपत्वे... [प्रमाणवा.१।१८३] ११३-२०
अथास्त्यतिशयः कश्चित् [प्रमाणवा.१।१८४] ११४-१
सर्वात्मत्वे च भावानां... [प्रमाणवा.१।१८५] ११४-३
प्रवृत्तिनियमो न स्यात्... [ ] ११४-५
भेदे चोभयरूपैकवस्तु... [ ] ११४-७
विशेषरूपं यत् तेषु... [ ] ११४-९

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न सत्ता सत्तान्तरमुपैति [ ] ५९-१४, ११४-१३
कुंभो न जीवदवियं... [सम्मति. ३।३१] ११४-
खस्य स्वभावः खत्वं.. [प्रमाणवा.१।६८] ११६-४
प्रकारे जातीयर् [सि.७।२।७५] १२०-२४
शब्दाः संकेतितं प्राहुः... [प्रमाणवा. १।६३] १२१-९
ते तु स्वालम्बनमेवार्थ.... [प्रमाणवार्तिकस्ववृत्तौ पृ.२५] १२३-९
प्रमेयरूपं हि परिच्छिन्नं... [प्रमाणविनिश्चयटीका पृ.१३B] १२४-२४
अनुमानं द्विधा स्वार्थं.... [प्रमाणविनिश्चयः पृ.२६५A] १२५-१४
अतस्मिंस्तद्ग्रहाद् भ्रान्ति.... [प्रमाणविनिश्चयः पृ.२६५B] १२५-१५
परार्थमनुमानं तु... [प्रमाणविनिश्चयः पृ.२८५A] १२५-१६
तथा विषयभेदात् ... [प्रमाणविनिश्चयटीका पृ.१३ B] १२५-२२
प्रवृत्तिविषयस्य व्यवस्थापकं... [ ] १२६-१४
तद्भावहेतुभावौ हि.... [प्रमाणवा. १।२८] १२७-१०
स्वयं हि वस्तु क्वचित् .... [ ] १२९-३
क्षणिकाः सर्वसंस्काराः.... [ ] १३४-१६
परिस्पन्दात्मको..... [तत्त्वार्थश्लोकवार्तिके ५।२, पृ.४१८] १३५-३
प्रयोगविस्रसोत्पाद्या.... [तत्त्वार्थश्लोकवार्तिके ५।२, पृ.४१८] १३५-५
विस्रसोत्पत्तिका तेजो.... [तत्त्वार्थश्लोकवार्तिके ५।२, पृ.४१८] १३५-७
यद्यात्मा गतिमान्नेष्यते... [ ] १३७-७
आत्मा हि प्रेरको.... [ ] १३७-१३
तथैव द्रव्यसामर्थ्यात्... [ ] १३७-१५
धम्मत्थिकाए णं भंते... [भगवतीसूत्रे १३।४।२४-२५] १४४-१४
अर्हे तृच् [सि.५।४।३७] १४५-१४
कर्मजा तृचा च [सि.३।१।८३] १४५-१५
आगासत्थिकाए णं भंते.. [भगवतीसूत्रे १३।४।२६] १४८-१८
प्राग्भागो यः सुराष्ट्राणां... [ ] १५०-९
यद् बहुप्रदेशं तत् .... [ ] १५३-१२
निरंशमाकाशं सर्व... [ ] १६०-७
निरंशमाकाशं सदा... [ ] १६०-१३
सक्रियस्य हि यद् ..... [ ] १६४-२५
यदङ्कुरं प्रत्यप्रयोजकं... [ ] १६८-१०
विवादाध्यासितं बीजं... [ ] १६९-२०
किं तस्य सहकारिणा क्रियते .. [ ] १६९-२६
सहकारिभिर्न हेतोर्विशेष... [ ] १७०-१४

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

यत् पुनरसता कार्येण... [ ] १७२-१४
अतदात्मत्वेऽपि... [ ] १७३-१
यो हि यद्रूपो नोपलभ्यते... [ ] १७५-१
अथ केयं शक्तिः ... [ ] १७५-९
यद्युत्तरं कार्यात्मकं... [हेतुबिन्दुटीका पृ.७८] १८२-५
यदि भावान्तरं प्रध्वंसाभावो... [हेतुबिन्दुटीका पृ.७९] १८३-९
पर्युदास एवैको... [हेतुबिन्दुटीका पृ.८१] १८४-१७
सापेक्षाणां हि भावानां... [प्रमाणवार्तिकस्ववृत्तिः पृ.६५] [प्रमाणविनिश्चयः पृ.२७६A] १८५-१२
अयं च प्रमाणार्थो... [प्रमाणविनिश्चयटीका पृ.२९०B] १८५-१७
न ध्रुवभावी भूतस्यापि [ ] १८६-८
यो धर्मिणो धर्मो... [ ] १८६-१०
किं तस्य सतो भावस्य... [प्रमाणविनिश्चयटीका पृ.२८९] १८६-१७
यथाविधोऽन्वयस्तथैव.. [ ] १८८-१४
न रूपविशेषाविष्करण... [ ] १८९-१५
तत्र प्रत्यक्षव्यापारेण... [ ] १८९-१९
समनन्तरप्रत्ययात् विज्ञानात्.... [हेतुबिन्दुः पृ.१०-११] १९२-१५
जनकैराधेयातिशयस्य... [ ] १९३-२
अवस्थाभेदेऽपि... [हेतुबिन्दुटीका पृ.९५] १९३-९
निजाभिधेयप्रतिघात... [ ] १९६-१३
कथञ्चिदर्था हि सदा [ ] १९६-१५
दृष्टत्वान्न विरोधोऽपि .. [ ] १९७-१
व्यतिरिक्तमपि भावांशा.. [हेतुबिन्दुटीका पृ.२५-२६] २००-१६
विरोधिसन्निधेर्दोष.. [हेतबिन्दुटीका श्लो. ३१, पृ.१०६] २०७-१
मुक्तो न मुक्त एव हि... [ ] २०८-१
एवं सप्रतिपक्षे सर्वस्मिन् [ ] २०८-३
कइ णं भंते दव्वा.. [भगवतीसूत्रे २५।४।६३३] २१३-१७
निःशेषद्रव्यसंयोग.. [ ] २१४-७
क्रमवृत्तिपदार्थानां ..[ ] २१४-९
किमिदं भंते कालो त्ति.. [ ] २१५-१५

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अथ द्वितीयं परिशिष्टम् ।

विशिष्टानि कतिपयानि टिप्पणानि

[अस्मिन् परिशिष्टे **द्रव्यालङ्कारटीकायां** केषाञ्चित् पाठानां तुलनाद्यात्मकानि कानिचित् टिप्पणानि उपन्यस्यन्ते]

पृ.२ पं.२ । लक्षणं च... । तुलना-"**तल्लक्षणं द्विविधम्, आत्मभूता-ऽनात्मभूतभेदात्, उष्ण-दण्डवत्** । तदेतल्लक्षणं द्विविधम्-आत्मभूतमनात्मभूतं चेति । तत्र आत्मभूतमग्नेरौष्ण्यम्, अनात्मभूतं देवदत्तस्य दण्डः ।" इति **अकलङ्कदेवविरचिते तत्त्वार्थराजवार्तिके** २।९, पृ.११९ ।

पृ.२ पं.५ । मतुप्रत्ययो... । "**नित्ययोगे मतुविधानम्**" इति **तत्त्वार्थराजवार्तिके** ५।२३। "नित्ययोगे मतुप् विहितः" इति **सिद्धसेनगणिविरचितायां तत्त्वार्थवृत्तौ** ५।२३। "नित्ययोगे मतोर्विधानात्.. स्पर्शादिसामान्यस्य नित्ययोगात् पुद्गलेषु" इति **तत्त्वार्थश्लोकवार्तिके** ५।२३।

पृ.२ पं.५ । पूरणाद् गलनाच्च... । तुलना- "पूरणाद् गलनाच्च पुद्गलाः संहन्यमानत्वाद् विसंहतिमत्त्वाच्च [५।१, पृ.३१६] ... पूरणाद् गलनाच्च पुद्गलाः परमाणुप्रभृतयोऽनन्तानन्तप्रदेश-स्कन्धपर्यवसानाः" इति **सिद्धसेनगणिविरचितायां तत्त्वार्थवृत्तौ** ५।४, पृ.३२५

"**पूरण-गलनान्वर्थसंज्ञत्वात् पुद्गलाः** ।२४।... भेदात् संघातात् भेदसंघाताभ्यां च पूर्यन्ते गलन्ते चेति पूरणगलनात्मिकां क्रियामन्तर्भाव्य पुद्गलशब्दोऽन्वर्थः पृषोदरादिषु निपातितः" इति **तत्त्वार्थराजवार्तिके**, ५।१, पृ.४३४ ॥

"पूरण-गलनधर्माणः पुद्गलाः परमाण्वादयोऽनन्ताणुकस्कन्धपर्यन्ताः । ते हि कुतश्चिद् द्रव्याद् गलन्ति वियुज्यन्ते किञ्चित्तु द्रव्यं तत्संयोगतः पूरयन्तीति भावः ।" इति मलधारिहेमचन्द्रसूरिविरचितायाम् **अनुयोगद्वारसूत्रवृत्तौ** पृ.१८४ ।

पृ.२ पं.१४ । अथ मूर्तिमाह- । तुलना- "रूपं मूर्तिः, मूर्त्याश्रयाश्च स्पर्शादय इति" इति **तत्त्वार्थभाष्ये** ५।३।, "किं पुना रूपं नामेत्यत आह- **रूपं मूर्तिः** । मूर्तिर्हि रूपादिशब्दाभिधेया, सा च रूपादिसंस्थानपरिणामा, नासर्वगतद्रव्यपरिमाणलक्षणा, व्यभिचारदर्शनात् । सर्वतः परिमितत्वे लोकस्य आत्मनोऽपि मूर्तिमत्त्वप्रसङ्गः **काणभुजानाम्** । परिमितत्वं चावश्यमभ्युपेयं विशिष्टसंस्थानत्वादिभिर्लोकस्य। अतो रूपमेवाव्यभिचारित्वान्मूर्तिरुच्यते । अन्येऽभिदधति-रूपशब्दो नीलादिवर्णाभिधायी समस्ति, अस्ति च दीर्घादिसंस्थानप्रतिपादनपरः । तद् यः संस्थानप्रतिपत्तिमाविष्करोति रूपशब्दस्तमुररीकृत्यावोचदाचार्यः 'रूपं मूर्तिः' इति । एवंविधमूर्त्याश्रिताश्च स्पर्शादयः किल सर्वदा न कदाचिदसंस्थाना भवितुमर्हन्ति, अन्यथा वान्ध्येय-व्योमकुसुम-मण्डूकशिखण्डकल्पाः स्युरिति । अत्र पक्षे धर्मा-ऽधर्म-सिद्धसंस्थानैरनेकान्तः । तस्माद् रूपमेव मूर्तिरस्तु । एवं तर्हि गुणमात्रं मूर्तिशब्दस्य विषयः प्रसक्तः, न च रूपमेव मूर्तीरिति, उच्यते- द्रव्यास्तिकनयावष्टम्भात् सकलमिदं निरूप्यते। .... सैव हि मूर्तिर्द्रव्यस्वभावा चक्षुर्ग्रहणमासाद्य रूपमिति व्यपदिश्यते । अत एव पुनराह सहचराव्यभिचारप्रदिदर्शयिषया- **मूर्त्याश्रयाश्च स्पर्शादय** इति । न खलु मूर्तिं स्पर्शादयो व्यभिचरन्ति, सहचरितत्वात् । यत्र रूपपरिणामस्तत्रावश्यन्तया स्पर्श-रस-गन्धैरपि भाव्यम्। अतः सहचरमेतच्चतुष्टयम्, अतः परमाणावपि

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विद्यते । ..... अतो रूप-रस-गन्ध-स्पर्शा एव विशिष्टपरिणामानुगृहीताः सन्तो मूर्त्तिव्यपदेशभाजो भवन्ति।'' - इति **सिद्धसेनगणि**विरचितायां **तत्त्वार्थवृत्तौ** पृ.३२३-३२४ ।

पृ.२ पं.१५ । स्पर्शग्रहणमादौ... । तुलना- ''**स्पर्शग्रहणमादौ विषयबलदर्शनात् ।१।** .. सर्वसंसारिजीवग्रहणयोग्यत्वाच्च । .... तत एवानन्तरं रसवचनम्, स्पर्शग्रहणानन्तरभावित(भावि)त्वाद् रसग्रहणस्य तदनन्तरं तद्ग्रहणं क्रियते ।.... **रूपात् प्राग् गन्धवचनमचाक्षुषत्वात् ।४। .... अन्ते वर्णग्रहणं स्थौल्ये सति तदुपलब्धेः ।५।....**'' इति **तत्त्वार्थराजवार्तिके** ५।२३। पृ० ४८४ ।

''**स्पर्शरसगन्धवर्णवन्तः पुद्गलाः** [तत्त्वार्थ. ५।२३], स्पर्शग्रहणमादौ विषयबलदर्शनात् । सर्वेषु हि विषयेषु रसादिषु स्पर्शस्य बलं दृश्यते, स्पष्टग्राहिषु इन्द्रियेषु स्पर्शस्यादौ ग्रहणव्यक्तेः । सर्वसंसारिजीवग्रहणयोग्यत्वाच्चादौ स्पर्शस्य ग्रहणम् । .... तत एवानन्तरं रसवचनम्, स्पर्शग्रहणानन्तरभावि हि रसग्रहणम् । रूपात् प्राग् गन्धवचनमचाक्षुषत्वात् । अन्ते वर्णग्रहणं स्थौल्ये सति तदुपलब्धेः'' इति **तत्त्वार्थश्लोकवार्तिके** ५।२३, पृ.४१९॥

पृ.२ पं.१८ । नन्वन्ये संस्थानं मूर्तिमाहुः .... । तुलना- ''**रूपादिसंस्थानपरिणामो मूर्तिः ।२।** रूपमादिर्येषां त इमे रूपादयः । के पुनस्ते ? रूप-रस-गन्ध-स्पर्शाः । परिमण्डल-त्रिकोण-चतुरस्रा-ऽऽयतचतुरस्रादिराकृतिः संस्थानम् । तैः रूपादिभिः संस्थानैश्च परिणामो मूर्तिरित्याख्यायते'' इति **अकलङ्कदेव**विरचिते **तत्त्वार्थराजवार्तिके** ५।५, पृ.४४४ ।

''**रूपिणः पुद्गलाः** [तत्त्वार्थ. ५।५], रूपशब्दस्यानेकार्थत्वेऽपि मूर्तिमत्पर्यायग्रहणं शास्त्रसामर्थ्यात् । ततो रूपं मूर्तिरिति गृह्यते 'रूपादिसंस्थानपरिणामो मूर्तिः' [तत्त्वार्थराज.] इति वचनात्'' इति **तत्त्वार्थश्लोकवार्तिके** पृ.३९६ ॥

पृ.३ पं.१९- पृ.७ पं.४ । कठिनादिरष्टधा स्पर्श.. । तुलना - ''तत्र स्पर्शोऽष्टविधः - कठिनो मृदुर्गुरुर्लघुः शीत उष्णः स्निग्धो रूक्ष इति । रसः पञ्चविधः- तिक्तः कटुः कषायोऽम्लो मधुर इति । गन्धो द्विविधः- सुरभिरसुरभिश्च । वर्णः पञ्चविधः- कृष्णो नीलो लोहितः पीतः शुक्ल इति ।'' इति **तत्त्वार्थभाष्ये** ५।२३॥

''कठिनादयो विद्वदङ्गना- बालादिप्रतीतास्तथापि सुप्रयुक्तकारिभिरमूनि लक्षणानि प्रत्येकं प्रकाश्यन्ते- अनमनात्मकः कठिनः, सन्नतिलक्षणो मृदुः, अधोगमनहेतुर्गुरुः, प्रायस्तिर्यगूर्ध्वगमनहेतुर्लघुः, वैशद्यकृत् स्तम्भनस्वभावः शीतः, मार्दव-पाककृदुष्णः, संयोगे सति संयोगिनां बन्धकारणं स्निग्धः, तथैवाऽबन्धकारणं च रूक्षः । इतिशब्दः परिस्थूरस्पर्शभेदेयत्ताप्रतिपादनार्थः । ... श्लेष्मशमनकृत् तिक्तः, श्लेष्मभेद-पाटवकृत् कटुः, अन्नरुचिस्तम्भनकर्ता कषायः, आश्रवणक्लेदनकृदम्लः, ह्लादन-बृंहणकृन्मधुरः, लवणो मधुरान्तर्गत इत्येके, संसर्गज इत्यपरे । सुरभिश्चन्दनोशीर-कश्मीरजादीनाम्, असुरभिर्लसुन-विष्ठादीनाम्, सौमुख्य-वैमुख्यकारित्वात् साधारण इत्येके, तन्न, उभयोरन्तर्णीतविषयत्वात् । कृष्णादयो वर्णाः क्रमेण अञ्जन-शुकपत्र-रुधिर-काञ्चन-शङ्खादिषु विभावनीयाः । संसर्गजाः सारङ्गादयः ।'' इति **सिद्धसेन**गणिविरचितायां **तत्त्वार्थवृत्तौ** ५।२३, पृ.३५६ ।

''गुण्यन्ते संख्यायन्त इति गुणाः, तेषां नाम गुणनाम । 'वण्णनामे' इत्यादि । तत्र वर्ण्यते अलङ्क्रियते वस्तु अनेनेति वर्णः कृष्णादिः पञ्चधा प्रतीत एव । कपिशादयस्तु एतत्संयोगेनैवोत्पद्यन्ते,

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न पुनः सर्वथा एतद्विलक्षणा इति नेहोदाहृताः । गन्ध्यते आघ्रायते इति गन्धः, तस्य नाम गन्धनाम, स च द्विविधः-सुरभिर्दुरभिश्च । तत्र सौमुख्यकृत् सुरभिः, वैमुख्यकृद् दुरभिः । अत्रापि उभयसंयोगजः पृथग् नोक्तः, एतत्संसर्गजत्वादेव भेदाविवक्षणात् । रस्यते आस्वाद्यत इति रसः, तस्य नाम रसनाम, स च तिक्त-कटु-कषाया-ऽम्ल-मधुरभेदात् पञ्चविधः, तत्र श्लेष्मादिदोषहन्ता निम्बाद्याश्रितस्तिक्तो रसः । तथा च भिषक्शास्त्रम्-

'श्लेष्माणमरुचिं पित्तं तृषं कुष्ठं विषं ज्वरम् ।
हन्यात् तिक्तो रसो बुद्धेः कर्ता मात्रोपसेवितः ॥१॥' [ ]

गलामयादिप्रशमनो मरिच-नागराद्याश्रितः कटुः । उक्तं च-

'कटुर्गलामयं शोफं हन्ति युक्त्योपसेवितः ।
दीपनः पाचको रुच्यो बृंहणोऽतिकफापहः ॥१॥' [ ]

रक्तदोषाद्यपहर्ता बिभीतका-ऽऽमलक-कपित्थाद्याश्रितः कषायः । आह च -

'रक्तदोषं कफं पित्तं कषायो हन्ति सेवितः ।
रूक्षः शीतो गुरुग्राही रोपणश्च स्वरूपतः ॥१॥' [ ]

अग्निदीपनादिकृदम्लीकाद्याश्रितोऽम्लः । पठ्यते च-

'अम्लोऽग्निदीप्तिकृत् स्निग्धः शोफ-पित्त-कफापहः ।
क्लेदनः पाचनो रुच्यो मूढवातानुलोमकः ॥१॥' [ ]

पित्तादिशमकः खण्ड-शर्कराद्याश्रितो मधुरः । तथा चोक्तम्-

'पित्तं वातं कफं हन्ति धातुवृद्धिकरो गुरुः ।
जीवनः केशकृद् बाल-वृद्ध-क्षीणौजसां हितः ॥१॥' [ ] इत्यादि ।

स्थानान्तरे स्तम्भिताहारबन्धविध्वंसकर्ता सिन्धुलवणाद्याश्रितो लवणोऽपि रसः पठ्यते । स चेह नोदाहृतो मधुरादिसंसर्गजत्वात् तदभेदेन विवक्षणात् । सम्भाव्यते च तत्र माधुर्यादिसंसर्गः, सर्वरसानां लवणप्रक्षेप एव स्वादुत्वप्रतिपत्तेरित्यलं विस्तरेण ।

स्पृश्यत इति स्पर्शः कर्कशादिरष्टविधः । तत्र स्तब्धताकारणं दृषदादिगतः कर्कशः । सन्नतिकारणं तिनिशलतादिगतो मृदुः । अधःपतनहेतुरयोगोलकादिगतो गुरुः । प्रायस्तिर्यगूर्ध्वाधोगमनहेतुरर्कतूलादिनिश्रितो लघुः । देहस्तम्भादिहेतुः प्रालेयाद्याश्रितः शीतः । आहारपाकादिकारणं वह्न्याद्यनुगत उष्णः । पुद्गलद्रव्याणां मिथः संयुज्यमानानां बन्धनिबन्धनं तैलादिस्थितः स्निग्धः । तेषामेवाऽबन्धनिबन्धनं भस्माद्याधारो रूक्षः । एतत्संसर्गजास्तु नोक्ताः, एष्वेवान्तर्भावादिति ॥'' इति मलधारिश्रीहेमचन्द्रसूरिविरचितायाम् **अनुयोगद्वारसूत्रवृत्तौ** पृ.२७०-२७१ ।

पृ.९ पं.८ । परिणामः.... । तुलना- ''**द्रव्यस्य स्वजात्यपरित्यागेन प्रयोग-विस्रसालक्षणो विकारः परिणामः** । द्रव्यस्य चेतनस्येतरस्य वा द्रव्यार्थिकनयस्य अविवक्षातो न्यग्भूतां स्वां द्रव्यजातिमजहतः पर्यायार्थिकनयार्पणात् प्राधान्यं बिभ्रता केनचित् पर्यायेण प्रादुर्भावः पूर्वपर्यायनिवृत्तिपूर्वको विकारः प्रयोग-विस्रसालक्षणः परिणाम इति प्रतिपत्तव्यः । तत्र प्रयोगः पुद्गलविकारः, तदनपेक्षा प्रक्रिया विस्रसा । तत्र परिणामो द्विविधः- अनादिरादिमांश्च । अनादिर्लोकसंस्थान-मन्दराकारादिः । आदिमान् प्रयोगजो वैस्रसिकश्च । तत्र चेतनस्य द्रव्यस्यौपशमिकादिभावः कर्मोपशमाद्यपेक्षोऽपौरुषेयत्वाद् वैस्रसिक इत्युच्यते । ज्ञा(दा?)न-

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शील-भावनादिलक्षण आचार्यादिपुरुषप्रयोगनिमित्तत्वात् प्रयोगजः । अचेतनस्य मृदादेः घटसंस्थानादिपरिणामः कुलालादिपुरुषप्रयोगनिमित्तत्वात् प्रयोगजः । इन्द्रधनुरादिनानापरिणामो वैस्रसिकः । तथा धर्मादिरपि परिणामो योज्यः ।'' इति **तत्त्वार्थराजवार्तिके** ५।२२, पृ.४७८ ।

''कः पुनः परिणामः ? द्रव्यस्य स्वजात्यपरित्यागेन प्रयोग-विस्रसालक्षणो विकारः परिणामः । तत्र विस्रसापरिणामोऽनादिरादिमांश्च । चेतनद्रव्यस्य तावत् स्वजातेश्चेतनद्रव्यत्वाख्यायाः अपरित्यागेन जीवत्व-भव्यत्वा-ऽभव्यत्वादिरनादिः, औपशमिकादिः पूर्वाकारपरित्यागाज(ज्ज?)हद्वृत्तिरादिमान्, स तु कर्मोपशमाद्यपेक्षत्वादपौरुषेयत्वाद् वैस्रसिकः । अचेतनद्रव्यस्य तु लोकसंस्थान-मन्दराकारादिरनादिः, इन्द्रधनुरादिरादिमान् पुरुषप्रयत्नानपेक्षत्वादेव वैस्रसिकः । प्रयोगजः पुनर्दान-शील-भावनादिश्चेतनस्य आचार्योपदेशलक्षणपुरुषप्रयत्नापेक्षत्वात्, घटसंस्थानादिरचेतनस्य, कुलालादिपुरुषप्रयोगापेक्षत्वात् । धर्मास्तिकायादिद्रव्यस्य तु वैस्रसिकोऽसंख्येयप्रदेशित्वादिरनादिः परिणामः, प्रतिनियतगत्युपग्रहहेतुत्वादि-रादिमान् । प्रयोगजो यन्त्रादिगत्युपग्रहहेतुत्वादिः पुरुषप्रयोगापेक्षत्वात् '' इति **तत्त्वार्थश्लोकवार्तिके** ५।२२, पृ.४१४ ।

पृ.११ पं.१० । परिणामिनो... । तुलना- ''व्यवस्थिताव्यवस्थितदोषात् परिणामाभाव इति चेत्, न, अनेकान्तात् । न हि वयमङ्कुरे बीजं व्यवस्थितमेव ब्रूमहे, विरोधादङ्कुराभावप्रसङ्गात् । नाप्यव्यवस्थितमेव, अङ्कुरस्य बीजपरिणामत्वाभावप्रसङ्गात्, पदार्थान्तरपरिणामत्वाभाववत् । किं तर्हि ? स्याद् बीजं व्यवस्थितं स्यादव्यवस्थितमङ्कुरे व्याकुर्महे । न चैकान्तपक्षभावी दोषोऽनेकान्तेष्वस्तीत्युक्तप्रायम् । स्याद्वादिनां हि बीजशरीरादे(दि?)रेवं वनस्पतिकायिको बीजांकुरादिः स्वशरीरपरिणामभागभिमतः यथा कललशरीरे मनुष्यजीवोऽर्बुदादिस्वशरीरपरिणामभृदिति, न पुनरन्यथा सः ।'' इति **तत्त्वार्थश्लोकवार्तिके** ५।२२ पृ.४१५।।

''**व्यवस्थिताव्यवस्थितदोषादिति चेत्, न, अनेकान्तात् ।१४।** स्यान्मतम्-बीजेऽङ्कुरत्वेन परिणते अङ्कुरे बीजं व्यवस्थितं वा स्यात्, अव्यवस्थितं वा ? यदि व्यवस्थितम्, बीजस्य व्यवस्थानात् विरोधात् अङ्कुराभावः । अथाव्यवस्थितम्, न तर्हि बीजमङ्कुरत्वेन परिणतम् । तस्मादुभयत्र दोषान्नास्ति परिणाम इति । तन्न । किं कारणम् ? अनेकान्तात् ..... ।'' इति **तत्त्वार्थराजवार्तिके** ५।२२, पृ.४७८-४७९ ।

पृ.११ पं.१५ । स्यान्मतम्... । तुलना - ''**वृद्ध्यभावप्रसङ्ग इति चेत्, न, अन्यहेतुत्वात्**। स्यादेतत्- नास्ति परिणामः, कुतः ? वृद्ध्यभावप्रसङ्गात् । यदि बीजमङ्कुरत्वेन परिणमेत, बीजमात्र एवाङ्कुरः स्यात्, पयःपरिणामदधिवत् । ततो वृद्ध्यभावः । उक्तं च-

'किंचान्यद् यदि तद् बीजं गच्छेदङ्कुरतामिह । विवृद्धिरङ्कुरस्य स्यात् कथं बीजादपुष्कलात् ?।।'

[ ]

भौमोदकरससम्बन्धाद् वृद्धिरिति चेत्, न, बीजपरिणामाभावप्रसङ्गात् । उक्तं च-

'अथेष्टं तै रसैर्भौमैरौदकैश्च विवर्धते । नन्वेवं सति बीजस्य परिणामो न युज्यते ।।' [ ]

भौमोदकरसद्रव्यान्तरसंचयाद् वृद्धिरिति चेत्, न, द्रव्यान्तरसंयोगेऽपि वृद्ध्यभावात् । यदि भौमोदकरसद्रव्यान्तराणि संयोगवृद्ध्या वर्धन्ते, ननु वृद्ध्यभावः जतुसंयोगे काष्ठवृद्ध्यभाववत् । उक्तं च-

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

'आलिप्तं जतुना काष्ठं यथा स्थूलत्वमृच्छति । ननु काष्ठं तथैवास्ते जतु चात्र विवर्धते ॥
तथैव यदि तद् बीजमास्ते येनात्मना स्थितम् । रसाश्च वृद्धिं कुर्वन्ति बीजं तत्र करोति किम् ॥'
[ ] इति ।

तत्र । किं कारणम् ? अन्यहेतुत्वात् । 'बीजमात्रोऽङ्कुरो भवेत्' इति ब्रुवता त्वयैवाभ्युपगतः परिणामः । यस्तु भवता दोष उपन्यस्तः 'वृद्ध्यभावप्रसङ्गः' इति नासौ युक्तः । कुतः ? अन्यहेतुत्वात् । यथा मनुष्यायुर्नामोदयाभ्यां जातो बालो बाह्यसावित्रकिरणादिसम्बन्धापेक्षः स्तन्य-नवनीताद्याहारमनुभवन् अभ्यन्तरवीर्यान्तरायक्षयोपशमाविर्भावितआहारजरणसामर्थ्यकायाग्निबलोपेत उपयुक्ताहाररसादि-परिणामान्निर्माणनामकर्मोदयापेक्षो वर्धते, तथा वनस्पतिविशेषायुर्नामोदयापेक्षो बीजाधिष्ठानो जीवोऽङ्कुरो जातो भौमोदकरसाहारं तप्तायःपिण्डवदात्मसात् कुर्वन् बाह्यसावित्रकिरणसन्तापाभ्यन्तर-वीर्यान्तरायक्षयोपशमाविर्भावताङ्कुर[:] कायाग्निबलाद् भौमोदकरसान् जरयन् स्वानुरूपनिर्माणकर्मोदयापेक्षो वर्धते । अयं तु वृद्ध्यभावदोष एकान्तवादिनामेव भवति, नित्यत्वैकान्ते तावद्विपरिणामाभावात् वृद्ध्यभावः, क्षणिकैकान्तवादेऽपि प्रतीत्यसमुत्पादाभ्युपगमात्, तावतोऽधिगमे (तावतो विगमे?) तावत एवोपगमाद् वृद्ध्यभावः । किञ्च, सर्वेषां क्षणिकत्वादङ्कुरस्य तत्कारणाभिमतानां च भौमोदकरसादीनां युगपद्वा विनाशः स्यात् पौर्वापर्येण वा ? यदि युगपत्, नास्ति तत्कृता वृद्धिः । न हि वृद्धिहेतवो विनश्यन्तोऽन्यस्याविनश्यतोऽर्थस्य वृद्धिं कुर्वन्तो दृष्टाः । अथ पौर्वापर्येण, विनष्टस्याङ्कुरस्य भौमादयः किं कुर्वन्ति ? विनष्टा वा किं कुर्युः ? अनेकान्तवादिनां तु अङ्कुरो भौमादयश्च द्रव्यार्थादेशात् स्यान्नित्याः, पर्यायार्थादेशाच्च स्यात् क्षणिका इति वृद्ध्युपपत्तिः'' इति **तत्त्वार्थराजवार्तिके** ५।२२, पृ.४७९-४८० ।

''स्यान्मतम्- न बीजमङ्कुरादित्वेन परिणमते वृद्ध्यभावप्रसङ्गात् । यो हि यत्परिणामः स न ततो वृद्धिमान् दृष्टो यथा पयःपरिणामो दध्यादिः, बीजपरिणामश्चाङ्कुरादिः, तस्मान्न ततो वृद्धिमानिति बीजमात्रमङ्कुरादिः स्यादतत्परिणामो वेति । उक्तं च-

'किं चान्यद् यदि तद् बीजं गच्छेदङ्कुरतामिह । विवृद्धिरङ्कुरस्य स्यात् कथं बीजादपुष्कलात् ?॥१॥
अथेष्टं तै रसैर्भौमैरौदकैश्च विवर्धते । तस्यैव(नन्वेवं?) सति बीजस्य परिणामो न युज्यते ॥२॥
आलिप्तं जतुना काष्ठं यथा स्थूलत्वमृच्छति । ननु काष्ठं तथैवास्ते जतु चात्र विवर्धते ॥३॥
तथैव तत्र तद् बीजमास्ते येनात्मना स्थितम् । रसाश्च वृद्धिं कुर्वन्ति बीजं तत्र करोति किम् ॥४॥'
[ ] इति ।

तदेतदनालोचिततत्त्ववचनम्, तद्बुद्धेरहेतुकत्वात् ।
यथा मनुष्यनामा-ऽऽयुःकर्मोदयविशेषतः । जातो बालो मनुष्यात्मा स्तन्याद्याहारमाहरन् ॥३४॥
सूर्यातपादिसापेक्षः कायाग्निबलमादधन् । वीर्यान्तरायविच्छेदविशेषविहितोद्भवम् ॥३५॥
विवर्धते निजाहाररसादिपरिणामतः । निर्माणनामकर्मोपष्टम्भादभ्यन्तरादपि ॥३६॥
तथा वनस्पतिर्जीवः स्वायुर्नामोदये सति । जीवाश्रयोऽङ्कुरो जातो भौमादिरसमाहरन् ॥३७॥
तप्तायस्पिण्डवत् तोयं स्वीकुर्वन्नेव वर्धते । आत्मानुरूपनिर्माणनामकर्मोदयाद् ध्रुवम् ॥३८॥
ततो न वृद्ध्यभावोऽङ्कुरादेः । यदप्युक्तं 'यो यत्परिणामः स ततो न वृद्धिमान् दृष्टो यथा क्षीरपरिणामो

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दध्यादिर्न क्षीरादेः' इति। तत्र हेतुः कालात्ययापदिष्टः, धर्मि-दृष्टान्तग्राहकप्रमाणबाधितत्वात्। धर्मी तावद् बीजपरिणामोऽङ्कुरादिः, ततो वृद्धिमानेव प्रतिभासमानः कथं चाऽवृद्धिमाननुमातुं शक्यः। दृष्टान्तश्च शीतक्षीरस्य तप्यमानोत्फेन- क्षीरपरिणामः धर्मोद्वर्तितदधिपरिणामो वा क्षीराद् वृद्धिमानुपलभ्यमानः कथं तद्वृद्ध्यभावसाध्ये निदर्शनम्। 'तत्परिणामत्वात्' इत्यसिद्धं च साधनं परिणामाभाववादिनः। पराभ्युपगमात् तत्सिद्धौ वृद्धिसिद्धिरपि तत एव स्यात् सर्वथा विशेषाभावात्। तन्न वृद्ध्यभावात् परिणामाभावः स्याद्वादिनं प्रति साधयितुं शक्यः।'' इति **तत्त्वार्थश्लोकवार्तिके** ५।२२ पृ.४१५-४१६ ॥

पृ.१२ पं.२३। परिणामः कश्चित् सदृशेतरः...। तुलना- ''परिणामो हि कश्चित् पूर्वपरिणामेन सदृशो यथा प्रदीपादेर्ज्वालादिः। कश्चिद् विसदृशो यथा तस्यैव कज्जलादिः। कश्चित् सदृशासदृशो यथा सुवर्णस्य कटकादिः। तत्र पूर्वसंस्थानाद्यपरित्यागे सति परिणामाधिक्यं वृद्धिः। सदृशेतरपरिणामो यथा बालकस्य कुमारादिभावः। सदृश एवायमित्ययुक्तम्, विसदृशप्रत्ययोत्पत्तेः, सर्वथा सादृश्ये बाल-कुमाराद्यवस्थयोः कुमाराद्यवस्थायामपि बालप्रत्ययोत्पत्तिप्रसङ्गात् बालकावस्थायां वा कुमारादिप्रत्ययोत्पत्ति-प्रसक्तेः। सर्वथा विसदृश एव बालकपरिणामात् कुमारादिपरिणाम इत्यपि न प्रातीतिकम्, 'स एवायम्' इति प्रत्ययस्वभावात्। भ्रान्तोऽसौ प्रत्यय इति चेत्, न, बाधकाभावात्, आत्मनि 'स एवाहं' प्रत्ययवत्। सर्वत्र तस्य भ्रान्तत्वोपगमे नैरात्म्यवादावलम्बनप्रसङ्गः, न चासौ श्रेयान्, वश्च सदृशेतरपरिणामात्मनो वस्तुनः साधनात्, प्रत्यभिज्ञानस्याभेदप्रत्ययस्य वा प्रामाण्यव्यवस्थापनात्। ततो युक्तः सदृशेतरपरिणामात्मको वृद्धि-परिणामः। एतेनापक्षयपरिणामो व्याख्यातः'' इति **तत्त्वार्थश्लोकवार्तिके** ५।२२, पृ.४१६-४१७।

पृ.१४ पं.१। अव्यापि स्यात्...। तुलना- ''नन्वयं पक्षाव्यापको हेतुः स्पर्शादिः, जले गन्धस्याभावात्, तेजसि गन्ध-रसयोः, वायौ गन्ध-रस-रूपाणामनुपलब्धेः' इति ब्रुवाणं प्रत्याह- ..... तथाहि- आपो गन्धवत्यः, तेजो गन्ध-रसवद्, वायुः गन्ध-रस-रूपवान्, स्पर्शवत्त्वात्, पृथिवीवत्। कालात्ययापदिष्टो हेतुः प्रत्यक्षा-ऽऽगमविरुद्धपक्षनिर्देशानन्तरं प्रयुक्तत्वात्, तेजसि अनुष्णत्वे साध्ये द्रव्यत्ववत् इति चेत्, न, नायनरश्म्यादिष्वनुभूतरूपस्पर्शविशेषे साध्ये तैजसत्वहेतोः कालात्ययापदिष्टत्वप्रसङ्गात्। तत्रागमेन विरोधाभावात् तद्भावप्रतिपादनान्न दोष इति चेत्, तत एवान्यत्र दोषो मा भूत्। स्याद्वादागमस्य प्रमाणत्वमसिद्धमिति चेत्, न, तस्यैव प्रामाण्यसाधनात्, यौगागमस्यैव दृष्टेष्टविरुद्धत्वेन प्रामाण्यानुपपत्तेः।.. नाप्यनैकान्तिकः, विपक्षवृत्त्यभावात्। अन्वयाभावादगमक इति चेत्, न, सर्वस्य केवलव्यतिरेकिणोऽप्रयोजकत्वप्रसङ्गात्। साध्याविनाभावनियमनिश्चयात् कस्यचित् प्रयोजकत्वे प्रकृतहेतोस्तत एव प्रयोजकत्वमस्तु '' - इति **तत्त्वार्थश्लोकवार्तिके** ५।२३, पृ.४२०।

पृ.१७ पं.८। सप्रतिघत्वात्....। ''**षष्ठाश्रयप्रसिद्ध्यर्थं धातवोऽष्टादश स्मृताः** ।१।१७। पञ्चानां विज्ञानधातूनां चक्षुर्धात्वायतनादयः पञ्चाश्रयाः। **षष्ठस्य** मनोविज्ञानधातोराश्रयोऽन्यो नास्ति। अतस्तदा**श्रयप्रसिद्ध्यर्थं** मनोधातुरुपदिष्टः। एवमाश्रया-ऽऽश्रिता-ऽऽलम्बनषट्कव्यवस्थानेनाष्टादश धातवो भवन्तीति।..... **गोत्रार्थो धात्वर्थः**। यथैकस्मिन् पर्वते बहूनि अयस्-ताम्र-रूप्य-सुवर्णादिगोत्राणि धातव उच्यन्ते एवमेकस्मिन्नाश्रये सन्ताने वा अष्टादश गोत्राणि अष्टादश धातव उच्यन्ते। आकरास्तत्र गोत्राण्युच्यन्ते।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

त इमे चक्षुरादयः कस्याकराः ? स्वस्या जातेः, सभागहेतुत्वात् ।..... ये पुनरिमे अष्टादश धातव उक्तास्तेषां कति सनिदर्शनाः ? कत्यनिदर्शनाः ? **सनिदर्शन एकोऽत्र । रूपम्,** स हि शक्यते निदर्शयितुम्- इदमिह, इदममुत्रेति । उक्तं भवति- अनिदर्शनाः शेषा इति । कति सप्रतिघाः ? कत्यप्रतिघाः ? **सप्रतिघा दश, रूपिणः**, य एते रूपस्कन्धसंगृहीता **दश** धातव उक्तास्ते **सप्रतिघाः** । प्रतिघो नाम प्रतिघातः । स च त्रिविधः आवरण-विषय-आलम्बनप्रतिघातः । १ तत्रावरणप्रतिघातः स्वदेशे परस्योत्पत्तिप्रतिबन्धः, हस्तो हस्तेनाहतः उपले वा । उपलोऽपि तयोः । २ विषयप्रतिघातः चक्षुरादीनां विषयिणां रूपादिषु विषयेषु ।... ३ आलम्बनप्रतिघातश्चित्त-चैत्तानां स्वेषु आलम्बनेषु । क पुनर्विषयालम्बनयोर्विशेषः ? यस्मिन् यस्य कारित्रं स तस्य विषयः । यच्चित्त-चैत्तैर्गृह्यते तदालम्बनम् । कुतः पुनः स्वस्मिन् विषये प्रवर्तमानमालम्बने वा प्रतिहन्यते इत्युच्यते ? तस्मात् प्रेरणाप्रवृत्तेः । निपातो वात्र प्रतिघातो या स्वविषये प्रवृत्तिः । तदिहावरणप्रतिघातेन दशानां सप्रतिघत्वं वेदितव्यम् । ...

'यत्रोत्पित्सोर्मनसः प्रतिघातः शक्यतेऽन्यैः कर्तुम् । तत् सप्रतिघं ज्ञेयं विपर्ययादप्रतिघमिष्टम् ॥' इति भदन्तकुमारलातः । उक्ताः सप्रतिघा अप्रतिघाश्च ।'' इति **वसुबन्धुविरचिते अभिधर्मकोशभाष्ये** प्रथमे कोशस्थाने ।

'अट्ठारस धातुयो- चक्खुधातु, रूपधातु, चक्खुविञ्ञाणधातु, सोतधातु, सद्दधातु, सोतविञ्ञाणधातु, घाणधातु, गन्धधातु, गन्धविञ्ञाणधातु, जीव्हाधातु, रसधातु, जीव्हाविञ्ञाणधातु, कायधातु, फोट्ठब्बधातु, कायविञ्ञाणधातु, मनोधातु, धम्मधातु, मनोविञ्ञाणधातु ।'' इति **विभङ्गप्रकरणे** पृ.८७ ।

पृ.१८ पं.१८ । अणवः स्कन्धाश्च.... । तुलना- ''**अणवः स्कन्धाश्च** [तत्त्वार्थ. ५।२५], अण्यन्ते इत्यणवः अस्मदादीन्द्रियव्यापारातीतत्वात् केवलसंशब्दनसमधिगम्याः सौक्ष्म्यात् स्थौल्याद् ग्रहणादानादिव्यापारसमर्थाः प्रायः स्कन्धाः संघाता इति । चशब्दः समुच्चेता, समस्तपुद्गला एव द्विविधाः परमाणवः स्कन्धाश्चेति ।'' इति **सिद्धसेनगणि**विरचितायां **तत्त्वार्थवृत्तौ** पृ.३६५ ॥

''**अणवः स्कन्धाश्च** [तत्त्वार्थ. ५।२५], **प्रदेशमात्रभाविस्पर्शादिप्रसवसामर्थ्येन अण्यन्ते शब्द्यन्त इत्यणवः ।१।** प्रदेशमात्रभाविभिः स्पर्शादिभिः गुणैः सततं परिणमन्त इत्येवम् अण्यन्ते शब्द्यन्ते ये ते अणवः । सौक्ष्म्यादात्मादय आत्ममध्या आत्मान्ताश्च । उक्तं च-

अत्तादि अत्तमज्झं अत्तंतं णेव इंदिए गेज्झं ।
जं दव्वं अविभागी तं परमाणुं विजाणीहि ॥ [ ]

स्थौल्याद् ग्रहण-निक्षेपणादिव्यापारास्कन्दनात् स्कन्धाः ।२। स्थौल्यभावेन ग्रहण-निक्षेपणादिव्यापारास्कन्दनात् स्कन्धा इति संज्ञायन्ते । ..... **उभयत्र जात्यपेक्षं बहुवचनम् ।३।** अनन्तभेदा

---

१. ''स्वस्या जातेः । किम् ? आकरा इति प्रकृतम् । सभागहेतुत्वात् । पूर्वोत्पन्नं चक्षुः पश्चिमस्य सभागहेतुरित्याकरो धातुः । यतो हि सुवर्णाद्युत्पत्तिस्ते तेषामाकराः ।'' इति **यशोमित्र**विरचितायाम् **अभिधर्मकोशभाष्यव्याख्यायां स्फुटार्थायाम्** । २. ''यत्रैकं सप्रतिघं वस्तु तत्र द्वितीयस्योत्पत्तिर्न भवति । यथा हस्तो हस्तेनाहतः प्रतिहन्यते उपले वा । हस्तो हस्तस्थाने उपलस्थाने वा नोत्पद्यते । **उपलोऽपि तयोः**, हस्तोपलयोः स्थाने उत्पलोऽपि नोत्पद्येत । ..... **कारित्रं** पुरुषकारः । ..... **तस्मात् परेणाप्रवृत्तेरिति**, यो हि लोके यतः परेण न प्रवर्तते स तत्र प्रतिहन्यते काष्ठे कुड्ये वा । तस्मात् चक्षुरादि विषयात् परेण न कारित्रं करोति, विषय एव तु करोति । तस्मात् तत्र प्रतिहन्यत इति उच्यते ।'' इति **यशोमित्र**विरचितायाम् **अभिधर्मकोशभाष्यव्याख्यायां स्फुटार्थायाम्** ।

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अपि पुद्गला अणुजात्या स्कन्धजात्या च द्वैविध्यमापद्यमानाः सर्वे गृह्यन्त इति तज्जात्याधारानन्तभेदसंसूचनार्थं बहुवचनं क्रियते ।

अणुस्कन्धा इत्यस्तु लघुत्वादिति चेत्, न, उभयसूत्रसम्बन्धार्थत्वाद् भेदकरणस्य ।४। स्यान्मतम् - 'अणवः स्कन्धा अणुस्कन्धाः' इति वृत्तिकरणमिह युक्तं लघुत्वादिभिः । तन्न, किं कारणम् ? उभयसूत्रसम्बन्धार्थत्वात् भेदकरणस्य, स्पर्श-रस-गन्ध-वर्णवन्तोऽणवः, शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तम-श्छाया-ऽऽतपोद्द्योतवन्तश्च स्कन्धा इति । वृत्तौ पुनः सत्यां समुदायस्यार्थवत्त्वात् अवयवार्थाभावात् भेदेनाभिसम्बन्धः कर्तुं न शक्यः'' इति **तत्त्वार्थराजवार्तिके** ५।२५, पृ.४९१ ॥

''**अणवः स्कन्धाश्च** [तत्त्वार्थ. ५।२५], प्रदेशमात्रभाविस्पर्शादिपर्यायप्रसवसामर्थ्येन अण्यन्ते शब्द्यन्ते इत्यणवः सौक्ष्म्यादात्मादय आत्ममध्या आत्मान्ताश्च । तथा चोक्तम्-

'आत्मादिमात्ममध्यं च तथात्मान्तमतीन्द्रियम् ।
अविभागं विजानीयात् परमाणुमनंशकम् ॥' [ ]

स्थौल्यात् ग्रहण-निक्षेपणादिव्यापारास्कन्दनात् स्कन्धाः । उभयत्र जात्यपेक्षं बहुवचनम् । अणुजात्याधाराणां स्कन्धजात्याधाराणां चावान्तरतज्जातिभेदानामनन्तत्वात् । 'अणुस्कन्धाः' इत्यस्तु लघुत्वादिति चेत्, न, उभयसूत्रसम्बन्धार्थत्वाद् भेदकरणस्य । स्पर्श-रस-गन्ध-वर्णवन्तोऽणवः शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तम-श्छाया-ऽऽतपोद्द्योतवन्तश्च स्कन्धा इति । **वृत्तौ** पुनः समुदायस्यार्थवत्त्वादवयवार्थाभावात् भेदेनाभिसम्बन्धः कर्तुमशक्यः ।'' इति **तत्त्वार्थश्लोकवार्तिके** ५।२५, पृ.४३० ।

पृ.२४ पं.१० । एकगुणस्निग्धस्य.... । तुलना-''**स्निग्धरूक्षत्वाद् बन्धः** [तत्त्वार्थ.५।३२], स्निग्धरूक्षयोः पुद्गलयोः स्पृष्टयोर्बन्धो भवतीति । अत्राह- किमेष एकान्त इति ? अत्रोच्यते- **न जघन्यगुणानाम्** [तत्त्वार्थ. ५।३३], जघन्यगुणस्निग्धानां जघन्यगुणरूक्षाणां च परस्परेण बन्धो न भवति। अत्राह-उक्तं भवता जघन्यगुणवर्जानां [स्निग्धानां] रूक्षेण रूक्षाणां च स्निग्धेन सह बन्धो भवतीति । अथ तुल्यगुणयोः किमत्यन्तप्रतिषेध इति ? अत्रोच्यते- 'न जघन्यगुणानाम्' इत्यधिकृत्येदमुच्यते- **गुणसाम्ये सदृशानाम्** [तत्त्वार्थ. ५।३४], गुणसाम्ये सति सदृशानां बन्धो न भवति । तद्यथा-तुल्यगुणस्निग्धस्य तुल्यगुणस्निग्धेन तुल्यगुणरूक्षस्य तुल्यगुणरूक्षेणेति । अत्राह-सदृशग्रहणं किमपेक्षत इति ? अत्रोच्यते-गुणवैषम्ये सदृशानां बन्धो भवतीति । अत्राह- किमविशेषेण गुणवैषम्ये सदृशानां बन्धो भवतीति ? अत्रोच्यते-**द्व्यधिकादिगुणानां तु** [तत्त्वार्थ.५।३५], द्व्यधिकादिगुणानां तु सदृशानां बन्धो भवति । तद्यथा-स्निग्धस्य द्विगुणाधिकस्निग्धेन, द्विगुणाद्यधिकस्निग्धस्य एकगुणस्निग्धेन, रूक्षस्यापि द्विगुणाद्यधिकरूक्षेण, द्विगुणाद्यधिकरूक्षस्य एकगुणरूक्षेण। एकादिगुणाधिकयोस्तु सदृशयोर्बन्धो न भवति । अत्र तुशब्दो व्यावृत्तिविशेषणार्थः, प्रतिषेधं व्यावर्तयति बन्धं च विशेषयति ।'' इति **उमास्वाति**विरचिते स्वोपज्ञे **तत्त्वार्थभाष्ये** ५।३२-३५।

पृ.२५ पं.१ । ननु स्निग्ध.... । तुलना- ''अस्ति च स्नेहादिगुणानां प्रकर्षापकर्षभेदः, तद्यथा-जलादजाक्षीरं स्निग्धम्, अजाक्षीराद् गोपयः, गोपयसो महिषीपयः, ततः करभीपयः इत्युत्तरोत्तरस्नेहाधिकत्वम् । एषामेव पूर्वं पूर्वं रूक्षम्'' इति **सिद्धसेनगणि**विरचितायां **तत्त्वार्थवृत्तौ** ५।३३, पृ.४२१ ।

''**तोया-ऽजा-गो-महिष्युष्ट्रीक्षीर-घृतेषु पांशु-कणिका-शर्करादिषु च**

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्रकर्षाप्र(प)कर्षदर्शनात् तदनुमानम् ।५। यथा तोयादजाक्षीर-घृते प्रकृष्टस्नेहे, ततः प्रकृष्टस्नेहे गोक्षीर-घृते, ततश्चाधिकस्नेहें महिषीक्षीर-घृते, ततोऽप्युत्कृष्टस्नेहे उष्ट्रीक्षीर-घृते । पांशुभ्यः प्रकृष्टरूक्षगुणाः तुषकणिकादयः, ततोऽपि प्रकृष्टरूक्षाः शर्कराः । तथा परमाणुष्वपि प्रकर्षाप्र(प)कर्षवृत्त्या स्निग्धरूक्षाः गुणाः सन्तीत्यनुमानं क्रियते ।'' इति **तत्त्वार्थराजवार्तिके** ५।३३, पृ.४९८।

''ननु च जघन्यगुणाः परमाणवः सन्तीति कुतो निश्चयः ? स्निग्ध-रूक्षगुणयोरपकर्षातिशयदर्शनात् परमापकर्षस्य सिद्धेर्जघन्यगुणसिद्धिः । उष्ट्रीक्षीराद्धि महिषीक्षीरस्यापकृष्टः स्नेहगुणः प्रतीयते, ततो गोक्षीरस्य, ततोऽप्यजाक्षीरस्य, ततोऽपि तोयस्येति । तथा रूक्षगुणोऽपि शर्करातः कणिकानामपकृष्टः प्रतीयते, ततोऽपि पांशूनामिति ।'' इति **तत्त्वार्थश्लोकवार्तिके** ५।३४ पृ.४३६ ॥

पृ.१३३ पं.९ । कम्पनं कम्पो देशाद् देशान्तरप्राप्तिहेतुः पर्यायविशेषः... । तुलना- ''उभयनिमित्तापेक्षः पर्यायविशेषो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया, न पुनः पदार्थान्तरं तथाऽप्रतीयमानत्वात्, गुण-सामान्य-विशेष-समवायवत् ।

